इत्यादि। ननु ग्रन्थारम्भे मङ्गलाचरणमनुपपन्नं प्रमाणप्रयोजनयोरभावात्। तथाहि न तावत्प्रत्यक्षं प्रमाणं मङ्गलाचरणकर्त्तव्यताया अतीन्द्रियत्वात्। किञ्च नास्तिकादिग्रन्थस्य मङ्गलाचरणाभावेऽपि समाप्तिदर्शनात् कृतेऽपि मङ्गले क्वचिद्ग्रन्थस्य समाप्त्यदर्शनात् तस्मादन्वयव्यतिरेकव्यभिचारान्मङ्गलस्य प्रत्यक्षेण निर्विघ्नसमाप्तिकारणत्वमवगन्तुमशक्यम्। नाप्यनुमानं लिङ्गाभावात् न च शिष्टाचारात्तदनुमानमिति वाच्यम् तस्यानिर्वचनात्। नाप्यागमः प्रत्यक्षस्य तस्याभावात्। अनुमानासम्भवेनानुमेयागमस्याप्यसम्भवात् नाप्यर्थापत्तिः अन्यथोपपत्तेर्दर्शितत्वात्। तस्मान्मङ्गलाचरणे न प्रमाणमस्ति नापि प्रयोजनं यस्मात् ग्रन्थसमाप्तिस्तेन विनापि सम्भवेन तत्प्रयोजनत्वानुपपत्तेः। विघ्नध्वंसस्य तु स्वतःसिद्धविघ्नविरहस्थलेऽसम्भवेन तत्प्रयोजनत्वानुपपत्तेः। तस्मात्प्रयोजनप्रमाणयोरभावान्मङ्गलाचरणमनुपपन्नमिति॥

अत्रोच्यते ग्रन्थारम्भे मङ्गलाचरणमवश्यं कर्त्तव्यम्। न च तत्र प्रमाणाभावः अनुमितश्रुतेरेव प्रमाणत्वात्। न चानुमानासम्भवः शिष्टाचारत्वेन तदनुमानात्। तथाहि मङ्गलं वेदबोधिताभीष्टोपायताकं अलौकिकाविगीतशिष्टाचारत्वात् दर्शादिवत्। मङ्गलत्वञ्च विघ्नध्वंसासाधारणकारणत्वं अतो नाश्रयासिद्धिः। अलौकिकत्वञ्च अन्वयव्यतिरेकाप्रमाणितत्वम्। अविगीतत्वञ्च प्रकटशिष्टानभ्युपगतानिष्टसाधनत्वम्। शिष्टत्वञ्च वीतदोषपुरुषत्वम् वेदप्रामाण्याभ्युपगन्तृत्वं वा अतो न स्वरूपासिद्धिः[1] व्यभिचारो वा। यत्र निर्विघ्नसमाप्तिकामो मङ्गलमाचरेदित्यनुमितया श्रुत्या मङ्गलस्या-

(१) क ३.११ लि २।

भीष्टनिर्विघ्नसमाप्तिफलकत्वं निश्चीयते। तस्मान्नास्तिकादीनां मङ्गलाचरणाभावे जन्मान्तरीयमङ्गलाद्ग्रन्थसमाप्तिरुपपद्यते। यत्र कृतेऽपि मङ्गले समाप्त्यभावस्तत्र विघ्नप्राचुर्यं बलवत्तरविघ्नो वा बोध्यः। तन्निवृत्तिस्तु मङ्गलप्राचुर्याद्वा बलवत्तरमङ्गलाचरणाद्वा भवत्यतो नान्वयव्यतिरेकव्यभिचारः। अथ वा मङ्गलाचरणस्य विघ्नध्वंस एव फलम्। न च स्वतःसिद्धविघ्नविरहवता कृतस्य मङ्गलस्य फलाभावेन तत्साधनताबोधकश्रुतेरप्रामाण्यप्रसङ्ग इति वाच्यम् स्वतःसिद्धपापविरहवता पापभ्रान्त्या कृतस्य प्रायश्चित्तस्य पापनिवृत्तिलक्षणफलाभावेऽपि प्रायश्चित्तविधायकशास्त्रस्येवास्यापि प्रामाण्योपपत्तेः। नच फलव्यभिचारशङ्कया मङ्गलाचरणे प्रवृत्तिर्न स्यादिति वाच्यम् संशयादपि प्रवृत्त्युपपत्तेः। एवमप्रतिपत्त्यन्यथाप्रतिपत्तिविप्रतिपत्त्यादिनिवृत्तिः शिष्टाचारः प्रतिभा चेत्येवमादीनि बहूनि फलानि मङ्गलस्य सन्ति। "एवं मङ्गलाचरणेन विघ्ने निवृत्ते बुद्धिप्रतिभादिदृष्टकारणकलापाद्ग्रन्थस्य समाप्तिर्भवति तस्मात् प्रमाणप्रयोजनयोस्सम्भवात् ग्रन्थारम्भे मङ्गलाचरणमवश्यं कर्त्तव्यमिति ॥

ननु ब्रह्मात्मनोरैक्यमनुपपन्नं विरुद्धधर्माक्रान्तत्वात्। तथाहि श्रुत्यादिभिर्जगत्कल्पनाधिष्ठानं सर्वज्ञं ब्रह्मावगम्यते जीवस्तद्विपरीतः कथं तयोरैक्यं स्यादित्याशङ्क्य जीवस्याहंपदवाच्यस्य वैपरीत्येऽप्यन्तःकरणोपलक्षितस्य मायोपलक्षितेन भासमात्रादृते भेदाभावात् तस्यापि जगत्कल्पनाधिष्ठानत्वसम्भवेन विरोधाभावादैक्यं सम्भवतीत्यभिप्रेत्याह सदेति। सत्यन्तःकरणोपलक्षिते तस्मिन्नपि विश्वङ्गिरित्यादिभेदभिन्नं ब्रह्माप्याम्नातमस्त्यम्। अध्याये निरूपयिष्यति तथाच श्रुतिः।

देहो नाहं श्रोत्रवागादिकानि
नाहं बुद्धिर्नाहमध्यासमूलम्।
नाहं सत्यानन्दरूपश्चिदात्मा
मायासाक्षी कृष्ण एवाहमस्मि ॥ २ ॥

"मय्येव सकलं जातं मयि सर्व्वं प्रतिष्ठितम्।
मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहम् ॥

इत्यन्तःकरणोपलक्षिते प्रतीचि सर्वकल्पनां दर्शयति। एतेन प्रपञ्चस्य मिथ्यात्वमपि सूचितं। तत्रानुमानमपि व्यावहारिकः प्रपञ्चो मिथ्यादृश्यत्वात् शुक्तिरूप्यवत् इत्यादिमिथ्यात्वसाधकं द्रष्टव्यम् ॥ शुक्तिरूप्यमग्रे निरूपयिष्यते ततश्च ब्रह्मात्म्यैक्यमुपपन्नमितिभावः ॥ १ ॥

अहंशब्दार्थविवेकपूर्वकं पूर्वमनुसन्धितं ब्रह्मात्मतत्त्वम् इष्टदेवतावाचकशब्देन निर्दिश्य पुनस्तदनुसन्दधाति ॥

देह इति। स्वप्ने स्थूलदेहप्रतीतेरभावादहं स्थूलदेहो न भवामीत्यर्थः। ननु स्थूलोऽहं कृशोऽहमित्याद्यनुभवात्तदतिरिक्तस्यात्मनोऽननुभवात् स्वप्नेऽपि स्थूलोऽहमित्यनुभवस्य सार्वजनीनत्वात्। स्थूलदेह एव आत्मेति चेन्न। स्थूलशरीरस्योत्पत्तिविनाशत्वेनानात्मत्वम्। आत्मत्वे कृतहानिः(१) अकृताभ्यागमप्रसङ्गात् स्थूलोऽहमित्याद्यनुभवस्य भ्रमत्वेन तस्यात्मत्वासाधकत्वाद्देहातिरिक्तस्यात्मनः श्रुतिस्मृतीतिहासपुराणयुक्तिविद्वदनुभवसिद्धत्वेन तस्यापलापायोगात् स्वप्ने स्थूलोऽहमित्यनुभवस्य जाग्रद्वासनाजन्यतयातद्विषयत्वात्। अन्यथा वाराणस्यां सुप्तः रामसेतौ रामनाथमनुभवन् प्रबुद्धस्तत्रैवावतिष्ठेत्। तस्मात् स्थू-

---

(१) शरीरस्य आत्मत्वे तस्य विनाशवत्तेन कृतानां श्रौतस्मार्त्तकर्म्मणां विनाशः स्यात्।

लशरीरस्य स्वप्नेऽभावादात्मनः स्वप्नेऽप्यहमित्यनुभवादहं स्थूलदेहो न भवामि॥ अस्तु तर्हीन्द्रियाण्यात्मा काणोऽहं मूकोऽहमित्यनुभवदर्शनात् प्राणसंवादादिष्विन्द्रियाणां चेतनत्वावगमाच्चेति चेन्न। करणत्वेन वास्यादिवदिन्द्रियाणामात्मत्वायोगात्। करणकर्तृत्वयोर्विरुद्धत्वात् बहूनामिन्द्रियाणामात्मत्वे विरुद्धाभिप्रायतया सद्यः शरीरपातप्रसङ्गात्। योऽहमद्राक्षं सोऽहं स्पृशामीत्यात्मैक्यबाधप्रसङ्गाच्च। प्राणसंवादस्याभिमानिनी देवताविषयत्वेनेन्द्रियाणामात्मत्वासाधकत्वाच्च। उत्पत्तिविनाशवत्त्वेन पूर्वोक्तदोषप्रसङ्गात्। काणोऽहमित्याद्यनुभवस्य भ्रमरूपत्वाच्च। श्रुत्यादिभिस्तदतिरिक्तात्मप्रतिपादनात् इन्द्रियाणि नात्मा॥ अस्तु तर्हि प्राण आत्मा क्षुत्पिपासावानहमित्यनुभवदर्शनात्। अन्योऽन्तरात्मा प्राणमय इति श्रुतेः जाग्रदाद्यवस्थास्वनुवर्त्तमानत्वाच्चेति चेन्न। तस्य वायुविकारत्वात् नात्मत्वमित्यभिप्रेत्याह श्रोत्रमिति। श्रोत्रमिति ज्ञानेन्द्रियाणामुपलक्षणम्। वागिति कर्मेन्द्रियाणामुपलक्षणम्। आदिशब्देन मुख्यप्राणो गृह्यते। तथाचाहं ज्ञानेन्द्रियकर्मेन्द्रियमुख्यप्राणो न भवामि तेषां स्वप्नसुषुप्त्योर्लयदर्शनात्। यद्यपि परदृष्ट्या प्राणोऽनुवर्त्तते स्वप्नादौ तथापि स्वदृष्ट्यानुपलम्भात् प्राणस्य लयाभिधानं द्रष्टव्यम्। "तानि यदा गृह्णाति अथ हैतत्पुरुषः स्वपिति नाम[1] तद्गृहीत एव प्राणो भवति"इत्यादि श्रुतेः। अन्यथा पूर्वोक्तदोषानपायात्। एतेन क्षुत्पिपासावानहमिति प्राणस्यात्मत्वानुभवो भ्रमतया परास्तः। तस्मात्प्राणादीनामनात्मत्वमिति भावः॥ अस्तु तर्हि विज्ञानमात्मा कर्त्ता भोक्ताहमित्यनुभव-

(१) only क। अ स्वपितिनाम।

दर्शनात् अन्योऽन्तरात्मा विज्ञानमय इति श्रुतेरित्यत आह बुद्धिरिति । बुद्धिरन्तःकरणवृत्तिः इयमन्तःकरणस्याप्युपलक्षणं । तथाचाहमन्तःकरणं तद्वृत्तिश्चेत्युभयं न भवामि तस्य भौतिकत्वेन जडत्वात् सुषुप्तौ लयदर्शनाच्च । कर्त्ता भोक्ताहमित्यनुभवस्य भ्रमत्वेन तस्यात्मसाधकत्वायोगात् । श्रुतेस्तत्र तात्पर्य्याभावात् । "अन्योऽन्तरात्मानन्दमय" इत्यतिरिक्तात्मश्रुतेः । तथाचान्तःकरणं तद्वृत्तिश्च नात्मेतिभावः । एतेन मनोमयकोशस्याप्यात्मत्वं परास्तम् ॥ अस्तु तर्हि सर्वाध्यासमूलमानन्दमयशब्दवाच्यमज्ञानमात्माहमज्ञ इत्यनुभवादित्यचाह अध्यासमूलमिति । अध्यासो विपर्य्ययो मिथ्याज्ञानम् अतस्मिंस्तद्बुद्धिरिति यावत् । अयं विस्तरेणाग्रे निरूपयिष्यते । तस्याध्यासस्य मूलं कारणमज्ञानम् । तथाचाहमध्यासकारणमज्ञानञ्च भवामि तस्य ज्ञानविवर्त्यत्वाज्जडत्वात्समाधावप्रतीयमानत्वादज्ञोऽहमित्यनुभवस्य भ्रान्तित्वात् । "ब्रह्मपुच्छं[१] प्रतिष्ठे"त्यानन्दमयकोशाधिष्ठानस्य तत्साक्षिणोऽतिरिक्तस्य प्रतिपादनेन श्रुतेरानन्दमयस्यात्मत्वे तात्पर्य्यायोगाच्चाज्ञानमनात्मेति भावः ॥ कस्तर्ह्यात्मा यस्य ब्रह्मत्वमनुभवस्यहं ब्रह्मास्मीति तत्राह सत्येति । अज्ञानतत्कार्य्यसाक्षी आत्मा स एवाहमित्यनुभूयते । तस्यैव ब्रह्मत्वमनुभवाम्यहं ब्रह्मास्मीति । किं तद्ब्रह्मेत्यत आह कृष्ण इति । कृष्णः परं ब्रह्म

"कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः ।
तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते ॥

इति स्मरणात् कृष्ण एवाहमस्मीत्यभिप्रायः ॥

---

(१) तैत्तिरीयोपनिषद् ब्रह्मवल्ल्यां पञ्चमखण्डे ।

अथ मोक्षस्य वाक्यार्थज्ञानाधीनत्वात्तस्य च पदार्थज्ञानाधीनत्वात्तदर्थं तत्पदार्थन्निरूपयामः। तत्पदार्थस्य लक्षणं द्विविधं तटस्थलक्षणं स्वरूपलक्षणञ्चेति। सृष्टिस्थितिलयकारणत्वं तटस्थलक्षणम्।

अय भाव तत् सृष्ट्वा तदेवानुप्राविशदनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि स एष इह प्रविष्ट (१)आप्रणखाग्रेभ्य इत्यादि श्रुतय अविक्रियो नित्यशुद्धबुद्धमुक्तस्वभाव आत्मा अनाद्यनिर्वचनीयमायाशक्त्या आकाशादिस्थूलशरीरान्त सृष्ट्वा तदनुप्रविश्य तत्साक्षी भूत्वाऽविवेकात्तदीयधर्मानात्मन्यारोप्याहं कर्त्ता भोक्तेति संसारमनुभवति। श्रुत्याचार्यप्रसादेन विवेकात्त परित्यज्य स्वात्मसाक्षात्कारेण माया विनाश्य परमानन्दस्वरूपमनुभवतीति वदन्तीति ततो न कोऽपि विरोध ॥ एतच्चाग्रे स्फुटतर व्युत्पादयिष्यते ॥

साक्षात्कर्त्तव्यस्य ब्रह्मण स्वरूपतटस्थलक्षण दर्शयति सत्येत्यादिना। मायासाक्षित्व तटस्थलक्षणम्। माया साक्षादीक्षते भासयतीति मायासाक्षी। मायां व्युत्पादयिष्यति। अन्यत् स्वरूपलक्षण कालत्रयाबाध्य सत्य आनन्द सुख निरतिशयसुखस्वरूप इत्यर्थ चिदात्मा ज्ञानस्वरूप। सत्यमिति मिथ्यावस्तुतादात्म्य व्यावर्त्तयति आनन्द इति दुःखतत्साधनतादात्म्य व्यावर्त्तयति। चिदात्मेति जडतादात्म्य व्यावर्त्तयति। तथा च सत्यज्ञानानन्दस्वरूप सर्वसाक्षी परमात्माहमस्मि तत्त्वमसि अहं ब्रह्मास्मीति श्रुतेरिति भाव ॥१॥

अथातो ब्रह्मजिज्ञासेत्यत्र साधनचतुष्टयसम्पत्त्यनन्तरं ब्रह्मजिज्ञास

---

(१) [illegible]

सूचिता। तच विचारित तत्त्वमस्यादिवाक्यजन्यमवगतिपर्यन्त ब्रह्मात्मैक्यगोचर फलीभूत ज्ञानमिच्छाकर्म। तच्च पदार्थज्ञानाधीनम् अविदितपदार्थस्य पुरुषस्य वाक्यार्थज्ञानानुदयात्। तदपि पदार्थज्ञान विचाराधीनमित्यर्थाद्विचारकर्त्तव्यता सूचिता[१]। स च विचारो द्विविध प्रधानविचारस्तत्सहकारिविचारश्चेति। ज्ञानेनाप्तु[२]मिष्टात्मत्वाद्ब्रह्म प्रधानम। तद्विचार प्रधानविचार। समन्वयादिविचारैर्विना ब्रह्मविचारासम्भवात्समन्वयविरोधसाधनफलविचारास्तत्सहकारिण। समन्वयो नाम ब्रह्मात्मैकत्वप्रतिपादकत्वेन वेदान्तवाक्याना समनुगतत्व तात्पर्यमिति यावत्। तद्विचार शारीरके प्रथमाध्याये कृत। श्रुतिविरोधे स्मृत्यादीना प्रत्यक्षादीनाञ्च आभासत्वाद्वेदान्तसमन्वयस्य प्रमाणान्तरेण विरोधाभावोऽविरोध सोऽपि द्वितीयाध्याये विचारित। द्विविधमपि साधन तृतीये विचारित। द्विविधमपि फल चतुर्थे विचारित। साधनमध्ये वाक्यार्थविचारस्य ज्ञान प्रत्यन्तरङ्गसाधनत्वात् तत्सहकारित्वेन पदार्थविचारस्याप्यन्तरङ्गसाधनत्वात् पदार्थविचार सप्रयोजन प्रतिजानीते॥

अथ साधनचतुष्टयसम्पत्त्यनन्तर तत्पदार्थं निरूपयाम इति सम्बन्ध॥

ननु काकदन्तपरीक्षावत्पदार्थनिरूपणस्य प्रयोजनशून्यत्वात्तन्निरूपणमसङ्गतमित्याशङ्क्याह तदर्थमिति। पदार्थज्ञानार्थं प्रथम तत्पदार्थं निरूपयाम क्रमेण त्वपदार्थमपीति भाव॥

---

(१) क l 33 सूचिता।
(२) क h११ मन्दभोक्तममात्।

ननु पदार्थज्ञानस्य सुखप्राप्तिदुःखनिवृत्त्योरन्यतरत्वाभावेन कथं पुरुषार्थत्वमित्याशङ्क्याह तस्येति। वाक्यार्थज्ञानं परामृश्यते। ततश्च वाक्यार्थज्ञानस्य पदार्थज्ञाना[१]धीनत्वादविदितपदार्थस्य वाक्यार्थज्ञानासम्भवात्तदर्थं पदार्थज्ञानं सम्पादनीयं हेतुः। पदार्थबोधो हि वाक्यार्थावगतेरित्यादि[२]वचनादिति भावः। वाक्यार्थज्ञानस्य वा कथं प्रयोजनत्वं तस्मिन् सत्यपि संसारोपलम्भादित्यत आह मोक्षस्येति।

ननु कोऽयं मोक्षः अज्ञाननिवृत्तिर्ब्रह्मभावो वा। नाद्यः अज्ञाननिवृत्तेर्ब्रह्मस्वरूपापेक्षया भिन्नत्वे अद्वैतश्रुतिविरोधापत्तेः। न च श्रुतेर्भावाद्वैतपरत्वान्नोक्तदोष इति वाच्यम् संकोचे मानाभावात्। किञ्च ब्रह्मव्यतिरिक्तस्य कल्पितत्वनियमेनाविद्यानिवृत्तेरपि कल्पितत्वेन मिथ्यात्वापत्त्या मोक्षस्यानित्यत्वप्रसङ्गेनाविद्यायाः कल्पितत्वेन तत्प्रति यौगिकनिवृत्तेस्तत्सत्ताधीनसत्ताकतया सत्यत्वायोगेन मोक्षस्यानित्यत्वं स्यात्। न च तदिष्टं सर्वैर्मोक्षवादिभिर्मोक्षस्य नित्यताभ्युपगमादन्यथामुक्तानां पुनरुत्पत्तिप्रसङ्गात्। न द्वितीयः मोक्षस्य ज्ञानसाध्यत्वञ्च स्यात्। तस्मान्मोक्षस्यानिरूपणाद्वाक्यार्थज्ञानस्य तत्साधनत्वेन प्रयोजनवत्त्वं दुर्निरूप्यमिति॥

अत्रोच्यते अविद्यानिवृत्तिरेव मोक्षः। मायाधिष्ठानब्रह्मस्वरूपैव। कल्पितप्रयोगिकाभावस्याधिष्ठानव्यतिरेकेण दुर्निरूप्यत्वात्। न च मोक्षस्य ज्ञानसाध्यत्वं न स्यादिति वाच्यम्। न हि साध्यत्वं नाम मोक्षस्य जन्यत्वम् घटाभावस्यानादिसिद्धत्वेनोत्पत्तेरनिरूपणात्। किन्तर्हि अभिव्यक्तिमात्रम्। अभिव्यक्तिर्नाम ज्ञानेन भ्रमतिर-

(१) क and ख has जन्यत्वात्।

(२) क and ख has वाक्यार्थवचनात्।

स्कारः। अखण्डैकरसानन्दस्फुर्त्तिरिति यावत्। तस्माद्वाक्यार्थज्ञानस्य मोक्षसाधनत्वमुपपन्नम्॥

ननु तस्मिन् सत्यपि संसारोपलम्भात् कथमोक्षसाधनत्वम्। तस्माच्छास्त्रेण ब्रह्म निश्चित्य यावज्जीवं कर्मानुतिष्ठन् ब्रह्मध्यानाभ्यासं कुर्यात्। ततश्च ध्यानाभ्यासकर्मभ्यां मरणकाले शुद्धे मनस्यभ्यासपाटवेन चरमप्रत्ययः साक्षात्कार उदेति। ततो मोक्षो भवति। अथवा प्रसंख्यानं कर्त्तव्यम्। प्रसंख्यानं नाम शब्दयुक्तिप्रत्ययानामावृत्तिः। तेनासंसृष्टाद्वितीयब्रह्मसाक्षात्कारो भवति। तदुक्तम्—

"शब्दयुक्तिप्रसंख्यानैरात्मना च मुमुक्षवः।
पश्यन्ति मुक्तमात्मानं प्रमाणेन चतुष्पदाः॥

इति। तस्माद्वाक्यार्थज्ञानान्मोक्ष इति मनोरथमात्रम्। किन्तु यथोक्तप्रकारेणैव ब्रह्मसाक्षात्कारान्मोक्षः। तथाच

"विद्याञ्चाविद्याञ्च यस्तद्वेदोभयं सह।
अविद्यया मृत्युं तीर्त्त्वा विद्ययामृतमश्नुते"॥
"तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः"।

इत्येवमाद्याः श्रुतयोऽनुगृहीता भवन्ति॥ तस्मान्मोक्षस्य वाक्यार्थज्ञानाधीनत्वमनुपपन्नमिति॥

अत्रोच्यते चरमसाक्षात्कारात्कीदृशो मोक्षो भवतीति विवेक्तव्यम् अविद्यानिवृत्तिर्वा ब्रह्मभावो वा। नाद्यः चरमप्रत्ययादविद्यानिवृत्तिर्भवति प्रथमप्रत्ययान्नेत्यत्र को हेतुः। प्रत्ययत्वाविशेषात्। संसारोपलम्भ एव ज्ञापक इति चेन्न। तस्य साक्षात्कारोत्तरमपि प्रारब्धवशादप्युपपत्तेः। किञ्च "ब्रह्मविद्ब्रह्मैव भवति"।

"तरति शोकमात्मवि"दित्यादिश्रुतिषु ज्ञानमात्रस्य मोक्षहेतुत्वं श्रूयते। न तु ज्ञानोत्तरं किञ्चित्कर्त्तव्यमवगम्यते। ततश्चरमस्यैव मोक्षहेतुत्वं न प्रथमस्येति कल्पनायां मानाभावात्। ज्ञानेनाज्ञाननिवृत्तौ तत्कृतकर्तृत्वाद्यभिनिवेशस्यापि निवृत्तत्वात्तस्य विधिकिङ्करत्वायोगेन ध्यानकर्मप्रवृत्त्यसम्भवात्। ब्रह्मणः प्रत्यग्रूपत्वेन नित्यापरोक्षतया प्रथमं परोक्षज्ञानं पश्चादपरोक्षज्ञानमिति कल्पनायां मानाभावाच्च। अत एव न द्वितीयोऽपि चरमज्ञानेनेव प्रथमज्ञानेनापि ब्रह्मभावाभिव्यक्तेस्सम्भवात् तस्मात्प्रथमो वा मध्यो[1] वा चरमो वाऽसन्दिग्धाविपर्य्यस्तो वाक्यजन्यप्रत्ययो मोक्षहेतुः॥ अत एव न प्रसंख्यानविधिरपि विद्यां चाविद्याञ्चेति वाक्यस्योपासकविषयत्वात्। तमेव धीरो. विज्ञायेति वाक्यस्य साक्षात्कारोद्देशेन निदिध्यासनविधिपरत्वात्तस्मान्मोक्षस्य वाक्यार्थज्ञानाधीनत्वमुपपन्नमेवातो वाक्यार्थज्ञानं सम्पादनीयमिति भावः॥

लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति न्यायात्ताभ्यां तत्पदार्थं निरूपयितुं लक्षणं विभजते तत्पदार्थस्येति। द्वैविध्यमाह तटस्थेति। कादाचित्कत्वे सति व्यावर्त्तकत्वं तटस्थलक्षणम्। यथा पृथिवीलक्षणस्य गन्धवत्त्वस्य, तस्य पृथिव्यां महाप्रलये उत्पत्तिक्षणे चाभावात्। सकलकार्य्यविनाशस्यैव प्रलयत्वात्। न्यायमते उत्पन्नं द्रव्यं क्षणमगुणमिति तिष्ठतीति प्रथमक्षणे द्रव्यस्य निर्गुणत्वस्वीकारात्। तथाच्कादाचित्कत्वात् व्यावर्त्तकत्वाच पृथिव्या गन्धवत्त्वं तटस्थलक्षणमेवं ब्रह्मणोऽप्युदाहरति यत इति। यत इत्युत्पत्तिः स्थितिः

(१) क ख lisa मध्यमोवा।

परिपालनं लयो नाशः। लयकारणत्वमित्युक्ते ब्रह्मण उपादानत्वमेव स्यात्। यत्कार्य्यं यत्र लीयते तत्कार्य्यम्प्रति तस्योपादानत्वनियमा-न्निमित्तकारणमन्यदेव स्यात्। तथा चाद्वैतश्रुतिविरोधः स्यात्त-दर्थमुक्तम् स्थितीति। स्थितिलयकारणत्वमित्युक्ते उत्पत्तिकारणं दण्डादिवन्निमित्तकारणमन्यदेव स्यात्तथा च पूर्वोक्तदोषस्तद्वारणार्थ-मुक्तं सृष्टीति। सृष्टिस्थितिकारणमित्युक्ते कुलालादिवद्ब्रह्मणो नि-मित्तकारणत्वमेव स्यादुपादानकारणमन्यदेव स्यात्तथा च सिद्धान्त-विरोध अत उक्तं लय इति। सृष्टिस्थितिलयकारणत्वं तटस्थ-लक्षणमित्युक्त्या ब्रह्मणोऽभिन्ननिमित्तोपादानत्वं सिध्यति। एवं च प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधादिति सिद्धान्तो न विरुध्यते। तथा च लक्षणस्यायं निष्कर्षः जगत्कर्त्तृत्वे सति जगदुपादानत्वं तटस्थलक्षणम् ब्रह्मण इति। जगदुपादानत्वं तटस्थलक्षणमित्युक्ते मायायामतिव्याप्तिः। मायाविशिष्टस्य जगदुपादानतया विशेषणी-भूतमायाया अप्युपादानत्वावश्यम्भावात्। कार्य्यान्वितस्यैव विशेषण-त्वात्। "मायान्तु प्रकृतिं विद्यादि"त्यादिश्रुत्या मायायास्तदुपा-दानत्वावगमाच्च। तदतिव्याप्तिवारणाय जगत्कर्त्तृत्वे सतीत्युक्तं। लक्षणस्य त्रीणि दूषणानि भवन्त्यव्याप्त्यतिव्याप्त्यसम्भवाश्चेति। लक्ष्यै-कदेशे लक्षणस्यावर्त्तनमव्याप्तिः। अलक्ष्ये लक्षणस्य गमनमतिव्याप्तिः। लक्ष्ये क्वाप्यवर्त्तनमसम्भवः। ततश्चातिव्याप्तेरपि दूषणत्वाद्विशेषणमर्थ-वत्। कर्त्तृत्वं नाम उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वम्। तच्च चेतनस्यैव सम्भवतीति न मायायामतिव्याप्तिः। तावत्युक्तनैया-यिकाभिमततटस्थेश्वरेऽतिव्याप्तिस्तस्य वेदान्त्यसंमतत्वेनाऽलक्ष्यत्वात्त-

"यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ती"ति श्रुतेः[1]। तदुक्तं भगवता सूत्रकारेण "जन्माद्यस्य यत" इति[2]॥ सत्य-

ज्ञाद्यर्थमुत्तरदलम्।. परमाणवो जगत्समवायिकारणमीश्वरो जगत्कर्त्तेति जगदुपादानजगत्कर्त्रोर्नैयायिकैर्भेदाभ्युपगमादस्माभिर-भिन्ननिमित्तोपादानत्वाङ्गीकारान्नातिव्याप्तिः॥

नन्वेकस्योपादानत्वं कर्त्तृत्वं च विरुद्धं तथा लोकेऽदर्शनात्। नहि घटकर्त्ता कुलालो घटोपादानम्। घटोपादानभूतो वा मृत्पिण्डो न वा घटकर्त्ता। किन्तु मृत्पिण्ड उपादानं कुलालः कर्त्ता एव-मीश्वरोऽपि जगत्कर्त्ता तदन्यदुपादानम्। अन्यथा दृष्टविरोधापत्तेः। दृष्टपूर्वकत्वाददृष्टकल्पनायाः॥

ननु वयञ्च कल्पयामः "तदैक्षत बहुस्यां प्रजायेये"त्यादि-श्रुति-रेव विरोधयतीति चेन्न। दृष्टविरोधे श्रुतेरर्थान्तरसम्भवात् तस्माद-भिन्ननिमित्तोपादानत्वमनुपपन्नमिति॥

अत्र ब्रूमः। "तदैक्षत बहुस्यां सोऽकामयत बहुस्यां प्रजाये-येत्यादिश्रुत्या बहुभवनकामयितृत्वश्रवणेन चेतनस्य ब्रह्मण एवोपा-दानत्व जगत्कर्त्तृत्वं चावगम्यते। न च तद्बाधितुं युक्तम्। उप-क्रमोपसंहारप्रभृतितात्पर्य्यलिङ्गैरद्वितीये ब्रह्मणि वेदान्ततात्पर्य्ये निर्णीते सामान्यतो दृष्टानुमानेन श्रुत्यर्थबाधायोगात्। श्रुतिविरोधे प्रमाणान्तराणामाभासत्वात्॥

(१) तैत्तिरीयोपनिषद्भृगुवल्ली १म खण्डः।

(२) The above is omitted in क and ख MSS.

ज्ञानानन्तानन्दाः स्वरूपलक्षणम्[1], "सत्यञ्ज्ञानमनन्तं ब्रह्म[2]" "आनन्दो ब्रह्मेति विजानादि"त्यादि श्रुतेः[3] ॥४॥

यदपि लोकेऽदर्शनादुपादाननिमित्तयो र्भेदोऽभ्युपेयइति। तदसत् ऊर्णनाभ्यादेरभिन्ननिमित्तोपादानत्वस्य दृष्टत्वात्। किञ्च यथा नैयायिकादिभिर्जीवात्मनो ज्ञानादिकं प्रत्युपादानत्वं निमित्तत्वञ्चाभ्युपगम्यते। तथा ब्रह्मणस्तदुपपत्तेर्न कोऽपि दोषः। तस्मादभिन्ननिमित्तोपादानत्वम् ब्रह्मण इति सिद्धम् ॥३॥

ब्रह्मणः सृष्ट्यादिकारणत्वे श्रुतिमुदाहरति यतोवेति। तत्र सूत्रसम्मतिमाह तदुक्तमिति।

उत्पत्तिं च विनाशञ्च भूतानामागतिं गतिम्।
वेत्ति विद्यामविद्याञ्च स वाच्यो भगवानिति ॥

श्लोकोक्तलक्षणो भगवान् तेन बह्वर्थसूचनात् सूत्रम्। यथाहुः

लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च।
सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिणः ॥

इति। सूत्रं करोतीति सूत्रकारस्तेन वादरायणाचार्य्येणेति यावत्। समन्वयलक्षणे स्थितमधिकरणमनु[4]क्रमते। तल्लक्षणञ्च

विषयोविशयश्चैव पूर्वपक्षस्तथोत्तरम्।
प्रयोजनञ्च पञ्चैते प्राञ्चोऽधिकरणं विदुः ॥

---

(१) तैत्तिरीयोपनिषद्ब्रह्मवल्ल्या प्रथमखण्डे।

(२) तैत्तिरीयोपनिषद्भृगुवल्ल्या षष्ठखण्डे।

(३) ख ग and घ have यजानात्।

(४) क, ग has अनुक्रम्यते।

इति वदन्ति ॥ यतो वा इमानीत्यादिवाक्यं विषयो ब्रह्मणो लक्षणं समर्थयति न वेति संशयः। न समर्थयतीति पूर्वपक्षः। तथाहि जगतोऽनित्याशुचिदुःखजडपरिच्छिन्नत्वेन ब्रह्मणस्तद्विलक्षणत्वेन तत्कारणत्वायोगान्न तटस्थलक्षणं सम्भवतीति तथा ब्रह्मणस्स्वरूपलक्षणञ्च न सम्भवति नित्यशुद्धत्वादीनामप्रसिद्धत्वादिति वास्तवकारणत्वासम्भवेऽपि कल्पितसर्पादेः रज्ज्वादेरिवाध्यस्तजगज्जन्मादिकारणत्वं मायिक ब्रह्मणो न विरुध्यते इत्युत्तरं भवति। तस्माल्लक्षणं सम्भवतीतिसिद्धान्तः॥ अस्याधिकरणस्य लक्षणविचारात्मकत्वेन पूर्वाधिकरणपूर्वपक्षसिद्धान्तयोर्यत्प्रयोजनं तदेव द्रष्टव्यम्। तदुक्तम्—

आक्षेपे चापवादे च प्राप्त्यां लक्षणकर्मणि।
प्रयोजनेन वक्तव्य यत्र कृत्वा प्रवर्त्तते॥

इति। जन्मादिसूत्रस्यायमर्थः अस्य नामरूपाभ्यां व्याकृतस्याकाशादिप्रपञ्चस्य जन्मादिर्यतः तत्। तथा जन्मस्थितिभङ्गं यतः सर्वज्ञात्सर्वशक्तेः कारणाद्भवति तद्ब्रह्मेत्यनुषङ्गेन योजनया सृष्टिस्थितिलयकारणत्वं ब्रह्मणस्तटस्थलक्षणमिति फलितोऽर्थः॥

स्वरूपलक्षणापरिज्ञातेन तटस्थलक्षणमात्रेण ब्रह्म ज्ञातुमशक्यमिति स्वरूपलक्षणमाह सत्यमिति। स्वरूप सद्व्यावर्त्तकं स्वरूपलक्षणं यथा पृथिव्याः पृथिवीत्वं जातिव्यक्त्योस्तादात्म्याभ्युपगमात् पृथिवीस्वरूपं सत् पृथिवीत्वं पृथिवीमितरेभ्यो व्यावर्त्तयत्यतः पृथिव्याः पृथिवीत्वं स्वरूपलक्षणमेवं सत्यज्ञानानन्दा(१)दय. ब्रह्मण॥

ननु सत्यलक्षणभावस्य भेदगर्भत्वात् ब्रह्मणोऽखण्डैकरसत्वेन कथं

(१) क ख bas सत्य।

सत्यादेर्लक्षणत्वमिति चेन्नैष दोषः। काल्पनिकभेदाभ्युपगमेन तदुपपत्तेः। तदुक्तम्। "आनन्दो विषयानुभवो नित्यत्वञ्चेति सन्ति धर्म्माः ब्रह्मणोऽपृथक्त्वेऽपि पृथगिवावभासन्ते" इति॥

नचापृथक्त्वे तेषां पृथक्त्वावभासः किं प्रयुक्त इति वाच्यम्। अन्तःकरणतद्धर्मोपाधिवशात् पृथक्त्वावभासोपपत्तेः। तथाहि, बाधाभावविशिष्टं सत्यं, वृत्त्यवच्छिन्नं चैतन्यं ज्ञानं, प्रीत्यादिवृत्त्यवच्छिन्न आनन्दः। यद्वा व्यञ्जकवृत्त्युपहितं चैतन्यं ज्ञानम्, अनुकूलवृत्त्युपहितमानन्दः ततस्तेषां ब्रह्मणश्च वास्तवभेदाभावेऽप्यौपाधिकभेदसत्त्वाल्लक्ष्यलक्षणभाव उपपद्यते। एवं च सत्यं ब्रह्म इत्युक्ते नैयायिकाभिमतसत्तासामान्येऽतिव्याप्तिर्लक्ष्यस्य ब्रह्मणो जडत्वप्रसङ्गश्च। अत उक्तं ज्ञानमिति। तावत्युक्ते पराभिमतात्मसमवेतज्ञानेऽतिव्याप्तिर्लक्ष्यब्रह्मणोऽनित्यत्वापुरुषार्थत्वप्रसङ्गश्च तन्निरसनायोक्तमानन्द इति।

नचैवमप्यपुरुषार्थत्वाभावे ब्रह्मणोऽनित्यत्वं दुष्परिहरमिति वाच्यम्। सत्यमिति विशेषणेन तत्परिहारसम्भवात्। "आनन्दो-ब्रह्म" इत्युक्ते विषयसुखेऽतिव्याप्तिर्लक्ष्यस्य जडत्वप्रसङ्गश्च तन्निवारणाय ज्ञानमित्युक्तम्। लक्षणस्यानित्यत्वपरिहाराय सत्यमित्युक्तम्॥

ननु सत्यज्ञानानन्दादिशब्दानां भिन्नार्थत्वेनानन्दादिगुणकं ब्रह्मैव लक्षणवाक्येन प्रतिपाद्यते ततश्च कथमखण्डैकरसत्वं ब्रह्मण इति चेन्नैवं। "सत्यं ज्ञानमनन्तं ब्रह्मानन्दो ब्रह्मेति व्यजानात्" "विज्ञानमानन्दो ब्रह्मे"त्येवमादिवाक्येषु सत्यज्ञानानन्दादिशब्दानां भिन्नार्थत्वेनानन्दादिशब्दानां सामानाधिकरण्येनाखण्डैकरसानन्दब्रह्मबोधकतया गुणगुणिभावकल्पनायां मानाभावात्।

नच तेषामेकार्थप्रतिपादकत्वे पर्य्यायता स्यादिति वाच्यम् वाच्यभेदस्योक्तत्वात् ॥

नन्वेवमपि लोके वाक्यस्य संसर्गविशिष्टान्यतरप्रतिपादकत्व-दर्शनेन कथमखण्डव्यक्तिप्रतिपादकत्वमिति चेन्न। "घटः सन् द्रव्यं" "पृथिवीप्रकृष्टप्रकाशश्चन्द्र" इत्यादिवाक्यानां लक्षणया खण्डव्यक्ति-प्रतिपादकत्वदर्शनेन प्रकृतेऽपि तत्सम्भवात्' विशिष्टे शक्तानां सत्या-दिपदाना अखण्डचैतन्ये भागलक्षणया सत्यादिपदान्यखण्डैकरसा-नन्दव्यक्तिं बोधयन्ति ।

नचैकेन पदेन तद्बोधसम्भवे पदान्तरवैयर्थ्यमिति वाच्यम्। पदस्य स्मारकत्वेन वाक्यस्यैवानुभावकत्वात् प्रयोजनान्तरस्यापि प्रतिपादितत्वाच्च। अन्यथा' ब्रह्मणोऽद्वितीयत्वं न सिद्ध्येत। इदमेव वाक्यस्याखण्डार्थत्वम्। तदुक्तम्।

संसर्गासङ्गिसम्यग्धीहेतुता या गिरामियम्।
उक्ता खण्डार्थता, यद्वा तत्प्रातिपदिकार्थतेति ॥

प्रातिपदिकार्थमात्रपरत्वमखण्डार्थत्वमिति चतुर्थपादार्थः। तस्मा-त्सत्यज्ञानानन्दाः स्वरूपलक्षणं ब्रह्मण इत्यनवद्यम् ॥

तत्र श्रुतिमुदाहरति सत्यमित्यादिना। अन्तः परिच्छेदो न विद्यते यस्य तदनन्तं त्रिविधपरिच्छेदशून्यमित्यर्थं। तथाचोक्तं,

न व्यापित्वाद्देशतोऽन्तो नित्यत्वान्नापि कालतः।
न वस्तुतोऽपि सार्वात्म्यादानन्त्यं ब्रह्मणि त्रिधेति ॥

आदिशब्देन विज्ञानमानन्दो ब्रह्मेत्यादीनां ग्रहणम् ॥४॥

उक्तञ्च, आनन्दादयः प्रधानस्येति तत्पदार्थः॥

आनन्दादीनां ब्रह्मलक्षकत्वे व्याससूत्रं[1] संवादयति। उक्तञ्चेति। तृतीये गुणोपसंहारे स्थितं "सत्यं ज्ञानमनन्तं ब्रह्मे"ति तैत्तिरीयके[2]। "तस्मैवात्मन आकाशस्सम्भूत" इति "विज्ञानमानन्दं ब्रह्मे"ति[3] "स वा एष महानज आत्मा असङ्गो ह्ययं पुरुष" इत्यादि बृहदारण्यके। "अस्नाविरं शुद्धमपापविद्धमि"ति[4] ईशावास्ये। एवं तत्र तत्र श्रूयते। तत्र संशयः यस्यां शाखायां ब्रह्मणो यावद्गुणजातं श्रुतं तावदेव ध्यातव्यम्। आहोस्वित् शाखान्तरस्थगुणोपसंहारेण समग्रं ब्रह्म ध्यातव्यमिति। तत्र यस्यां यावच्छ्रुतं तच्छाखिभिस्तावदेव ब्रह्म ध्यातव्यं न शाखान्तरीयगुणोपसंहारेण। तावता निर्गुणब्रह्मसाक्षात्कारसम्भवादितरोपसंहारे प्रयोजनाभावादिति प्राप्ते सिद्धान्तः। प्रधानस्य ब्रह्मणः आनन्दादयः सर्वे सर्वत्रोपसंहर्त्तव्याः लक्षकत्वेन। यद्यानन्दात्मादिभिर्ब्रह्म न लक्ष्येत तर्ह्यनात्मत्वानानन्दत्वादिव्यावृत्तिर्न सिध्येत्। ततश्चानन्दात्मकब्रह्मसाक्षात्कारो न भवेत्। अतस्तदर्थमानन्दादीनां ब्रह्मलक्षणतया सर्वोपसंहारेण ब्रह्मानुसन्धेयम् ॥

ननु तर्हि सत्यकामत्वादीनामप्युपसंहारः स्यादिति चेन्न। तेषां कारणलक्षणत्वेन निर्गुणब्रह्मालक्षकत्वेनानुसन्धानानुपयोगात्। तस्मान्निर्गुणप्रकरणपठितानामानन्दादीनां ब्रह्मलक्षकत्वेनोपसंहारेण ब्रह्मानुसन्धेयमिति ॥

---

(१) Brahmasutra 3. 3. 11
(२) तैत्तिरीयके ब्रह्मवल्ल्यां द्वितीयानुवाके।
(३) बृहदारण्यक ४. ४. २२.
(४) ८ मन्त्रः

स च द्विविधः वाच्यार्थो लक्ष्यार्थश्चेति। मायोपहितं चैतन्यं तत्पदस्य वाच्यार्थः। मायाविनिर्मुक्तं चैतन्यं तत्पदस्य लक्ष्यार्थः॥ ६॥

ननु सृष्टिस्थितिलयकारणत्वं ब्रह्मणः तटस्थलक्षणमित्युक्तं तदनुपपन्नमसम्भवात्। तथाहि न तावदुपादानकारणत्वं ब्रह्मणो विकल्पासहत्वात्। तथाहि किमारम्भकत्वेनोपादानत्वं विवक्षितम्। उत परिणामित्वेनाहोस्विद्विवर्त्ताधिष्ठानत्वेन। नाद्य अद्वितीयत्वेन ब्रह्मणोऽनारम्भकत्वात्। न द्वितीय "केवलो निर्गुणश्च, निष्कलं निष्क्रियं शान्तमविकार्योऽयमुच्यते" इत्यादि श्रुतिस्मृतिभिर्गुणक्रियाशून्यत्वनिरवयवत्वप्रतिपादनेन ब्रह्मणः परिणामित्वायोगात्। न तृतीय घटस्सन् पटस्सन्निति सत्यत्वेनानुभूयमानस्य प्रपञ्चस्य ब्रह्मविवर्त्ततया मिथ्यात्वकल्पनाया मानाभावात्। तस्माद् ब्रह्मण उपादानकारणत्वं दुर्निरूप्यम्॥

नापि जगत्कर्तृत्वेन कारणत्वं ब्रह्मणः। कर्तृत्वं नामोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वम्। तच्च ब्रह्मणो न सम्भवति ज्ञानचिकीर्षाकृतीनां नित्यत्वे सर्वदा जगदुत्पत्तिप्रसङ्गात्। ततश्च प्रलयप्रतिपादकशास्त्रविरोधः। [1]तेषामनित्यत्वे कार्यतया ब्रह्माश्रयत्वायोगात् ब्रह्मणोऽपरिणामित्वादनादिभावस्यानित्यत्वायोगात्॥ अतएव नोभयात्मकं कारणत्वं ब्रह्मणस्सम्भवात् सृष्टिस्थितिलयकारणत्वं ब्रह्मणस्तटस्थलक्षणमित्यसङ्गतम्॥५॥

कथं तर्हि जगदुत्पत्तिः उच्यते सत्त्वरजस्तमोगुणात्मिकाप्रधा-

---

१ विवा० ३।८।५

नाम्नहङ्कारादिक्रमेण जगदुत्पद्यते। तस्य परिणामित्वाज्जगज्जन्मादिकारणत्वं सम्भवति पुरुषस्त्वसङ्गो निर्विकारी ॥

एवमाशङ्कमानः साङ्ख्यादीन्निराकर्त्तुं तत्पदार्थं विभजते स चेति। द्विविधमाह वाच्यर्थ इति। शक्त्या गम्यमानो वाच्यार्थः। लक्षणया गम्यमानो लक्ष्यार्थः। कौ तौ वाच्यलक्ष्यावित्याशङ्कायामाह मायेत्यादि। एतदुक्तम्भवति यद्यपि शुद्धस्यापरिणामित्वेनोपादानत्वं तथापि मायोपहितस्य तत्सम्भवत्येव। तदपि विवर्त्ताधिष्ठानत्वेन। अतत्त्वतोऽन्यथाभावो विवर्त्तस्तदधिष्ठानत्वं मायोपहितस्य न विरुध्यते। न च घटः सन्निति सत्यत्वानुभवेन प्रपञ्चस्य ब्रह्मविवर्त्ततया मिथ्यात्वानुपपत्तिरिति वाच्यम्। अनुभवस्याधिष्ठानसत्यत्वविषयतया मिथ्यात्वे बाधकाभावात्। नहि प्रपञ्चस्य स्वतः सत्तासम्बन्धः सम्भवति "नेह नानास्ति किञ्चने" त्यादिशास्त्रेण तस्य प्रतिषेधात्। नापि मिथ्यात्वे प्रमाणाभावः वाचारम्भण श्रुतेरेव प्रमाणत्वात्। मिथ्यात्वनिरुक्तिरग्रे वक्ष्यते ॥

किञ्च, जगदुपादानत्वं ब्रह्मणोऽवश्यमभ्युपगन्तव्यम्। "यत्प्रयन्त्यभिसंविशन्ती"ति तस्मिंल्लयश्रवणात्। यस्य यत्र लयस्तत्तस्योपादानमिति व्याप्तेर्घटादेः कारणे मृदादौ दृष्टत्वात्। "बहुस्यां प्रजायेये"ति ब्रह्मणो बहुभवनश्रवणाच्च। नह्यनुपादानस्य बहुभवनं सम्भवति। अपि च प्रत्युत प्रधानस्यैव जगदुपादानत्वन्न भवति तस्याप्रमाणिकत्वात्। नहि क्वचिच्छ्रुतौ प्रधानस्य त्रिगुणात्मकस्योपादानत्वमवगम्यते। सर्वत्र श्रुतिषु "आत्मन आकाशः सम्भूत" इत्यादिषु चेतनस्य ब्रह्मण एवोपादानत्वावगमात् ॥

अथ केयं माया शृणु यथा शुक्त्यादौ रजतादि कल्पितम् तथा चेतनेऽचेतनं कल्पितम् ॥ ७ ॥

न चोदाहृतश्रुतिभ्यात्मन एवोपादानत्वमवगम्यते न ब्रह्मण इति वाच्यम् । "तत् सृष्ट्वा तदेवानुप्राविशदि"ति जीवभावेन ब्रह्मण प्रवेशश्रवणात् । ब्रह्मणएवात्मतयोपादानत्वोपपत्तेः ॥

किञ्च, "तदैक्षत सोऽकामयत बहुस्यां प्रजा येये"ति बहुभवन कर्त्तुः कारणस्य सर्वत्र कामयितृत्वेक्षितृत्वश्रवणात् ब्रह्मण एवोपादानत्वं न प्रधानस्येक्षितृत्वादेरसम्भवात् । तस्य चेतनधर्मत्वात् मुख्ये सम्भवति गौणस्यान्याय्यत्वात् । तस्माद्ब्रह्मणएवोपादानत्वं न प्रधानस्येति सिद्धम् ॥

एव मायोपहितस्य जगत्कर्तृत्वमपि सम्भवति । तच्च पूर्वोक्तमेव ज्ञानेच्छाकृतयो मायोपहितस्येश्वरस्य जन्या अनित्याश्चापरिणामित्वेन शुद्धस्य तदाश्रयत्वाभावेऽपि मायोपहितस्य तदाश्रयत्वं सम्भवत्येव ! तस्य सर्वविवर्त्ताधिष्ठानत्वान्नोक्तदोषं. । तस्मादुभयात्मकं सृष्टिस्थितिलयकारणत्व तटस्थलक्षण सम्भवतीति सिद्धम् ॥६॥

मायास्वरूप पृच्छत्ययेति । किम् शब्दः प्रश्नार्थे । माया किदृशीत्यर्थ । आक्षेपार्थे वा किं शब्दः । माया न सम्भवतीति स्वरूपलक्षणप्रमाणानिरूपणात् । तथाहि किम्माया सत्या मिथ्या वा । आद्ये ब्रह्मभिन्ना तदभिन्ना वा । नाद्यः अपसिद्धान्तप्रसङ्गात् ।

किञ्च ब्रह्मणो ऽसङ्गत्वेन केनाप्यसम्बन्धात् मायोपहितत्वमनुपपन्नमेव । न तावद्ब्रह्मणो मायया संयोग. सम्भवति । संयोगस्या-

"इदं सर्वं यदयमात्मा" "आत्मैवेदं सर्वं" "ब्रह्मैवेदं सर्वं" "पुरुष एवेदं विश्वं" "सर्वं खल्विदं

व्याप्यवृत्तित्वेन सावयवधर्म्मतया निरवयवत्वेन ब्रह्मणो मायया संयोगायोगात्। नापि समवायसम्भवति अनङ्गीकारात्। नापि तयोस्तादात्म्यं भिन्नयोस्तादात्म्यायोगात्। नापि तयोर्भेदाभेदौ विरुद्धत्वात्। तस्माद्ब्रह्मणो मायोपहितत्वमनुपपन्नम्॥ न द्वितीयः जडाजडयोरभेदायोगात्। नाद्यद्वितीयः ईश्वरस्य मिथ्यात्वप्रसङ्गात्। न च तदिष्टं मोक्षशास्त्राप्रामाण्यप्रसङ्गात्। नहि मिथ्यावस्तुज्ञानेन मोक्षः सम्भवति। एवं मायास्वरूपं दुर्निरूप्यम्। अत एव तल्लक्षणमपि दुर्निरूप्यम्। सति धर्म्मिणि धर्म्माश्चिन्त्यन्त इति न्यायात् धर्म्मिणो दुर्निरूपत्वे तद्धर्मलक्षणस्यापि सुतरां दुर्निरूपत्वात्। अत एव तत्र प्रमाणमपि दुर्निरूपं निर्विषयप्रमाणप्रवृत्तेरयोगात्॥

तस्मान्मायाया दुर्निरूपत्वात् उपहितस्य तत्पदवाच्यत्वमनुपपन्नमिति समाधत्ते शृङ्खलिति। मायास्वरूपं निरूप्य तदुपहितचैतन्यमीश्वरः स एव तत्पदवाच्यार्थः। तस्य जन्मादिकारणत्वं तटस्थलक्षणमिति वक्तुं तदुपोद्घातत्वेन परमात्मनि सद्रूपत्वमध्यासमामान्यमाह यथेति। प्रतिपाद्यमर्थं बुद्धौ सङ्गृह्य प्रागेव तदर्थमर्थान्तरवर्णनमुपोद्घातः। अचेतनमज्ञानं तत्कार्य्यं कल्पितमध्यस्तमित्यर्थः॥७॥

चेतने ब्रह्मण्यचेतनस्य कल्पितत्वे श्रुतार्थापत्तिं प्रमाणमाह इदं सर्वमित्यादिना। इदं सर्वमित्यनेन प्रमाणोपस्थित आकाशादिजडजातं प्रतिपाद्यते। आत्मशब्देनाद्वितीयः सर्वसाक्षी प्रत्यग्भूत

ब्रह्म" "वासुदेवः सर्वमिति" "नारायणः सर्वमिदं पुराण" इत्यादिश्रुतिस्मृतिशतैः अचेतनस्य चेतनव्यतिरेकेणाभावप्रतिपादनात् चेतनाचेतनयोरभेदायोगाच्च ॥ ८ ॥

परमात्मा प्रतिपाद्यते । जडचेतनयोरैक्यायोगात् । आत्मसर्वशब्दयोस्सामानाधिकरण्यम्। बाधायां योऽयं चोरः स स्थाणुरिति वत् । तथाच यथा दृष्टान्तवाक्ये स्थाणुव्यतिरेकेण चोराभाव चोरस्थाणुशब्दयोरवगम्यते । तथा दार्ष्टान्तिकेऽपि श्रुतिवाक्ये आत्मव्यतिरेकेण कृत्स्नजडाभावः आत्मसर्वशब्दयोः सामानाधिकरण्यादवगम्यते । सचाभावः स्वप्रतियोगिनः प्रपञ्चस्य ब्रह्मणि कल्पितत्वमन्तरेणानुपपन्नः सन् तस्य कल्पितत्वं कल्पयति। इयं श्रुतार्थापत्तिः। अनयाऽचेतनस्य चेतने कल्पितत्वमवगम्यत इति भावः। एवमयमर्थो वाक्यान्तरेष्वपि समानः पूर्णत्वात्पुरुष परमात्मनैतेन ।

किञ्च नामरूपमिति श्रुत्यन्तरात् सर्वेषु भूतेषु वसति सर्वभूतानि यस्मिन् वसन्तीति वासुदेवः सर्वान्तर्यामी परमात्मा । तथाचोक्तम्—

"सर्वत्रासौ समस्तञ्च वसत्यत्रेति वै यतः ।
ततस्स वासुदेवाख्यो विद्वद्भिः परिपठ्यते ॥"

इति । नराज्जातं नारं तदयनं यस्य स नारायणः सर्वान्तर्यामीत्यर्थः । तदुक्तं महाभारते ।

"नराज्जातानि तत्त्वानि नाराणीति ततो विदुः ।
तानि तस्यायनं पूर्वं तेन नारायणः स्मृतः ॥"

इति। अस्यार्थः प्रत्यगभिन्नात्परमात्मनो नरादुत्पन्नानि तत्त्वानि चतुर्विंशतिः। तानि भगवता दर्शितानि।

"महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च।
इन्द्रियाणि दशैकञ्च पञ्च चेन्द्रियगोचराः॥"

अथवा नारमुदकमयनमस्येति वा विग्रहः। तथाच मनुनोक्तम्।

आपो नारा इति प्रोक्ता आपो वै नरसूनवः।
अयनं तस्य ताः पूर्वं तेन नारायणस्मृतः॥ इति॥

ननु सर्वात्मशब्दयोः सामानाधिकरण्यान्नीलोत्पलादिवत्तादात्म्यमेवास्तु। नच नीलोत्पलयोर्गुणगुणिभावात्तादात्म्येऽपि प्रकृते तदभावाज्जडाजडयोर्विरुद्धस्वभावलाञ्छिताभिन्नलक्षणं तादात्म्यं कथमिति वाच्यम्। तर्हि मृद्घटयोरिव कार्य्यकारणभावसम्भवेन तयोस्तत्सम्भवात्। अथवा शाखिशाखयोरिव जडाजडयोरभेदो वास्तु इत्याशङ्क्याहाचेतनेति।

अयमभावः चेतनाचेतनयोर्विरुद्धस्वभावत्वान्न तादात्म्यम्। नच मृद्घटयोरिव कार्य्यकारणभावेन तत्सम्भवति अपरिणामित्वेन कार्य्यकारणभावस्य निरस्तत्वात्। विवर्त्तत्वेन तदुपगमेऽचेतनस्य कल्पितत्वमागतमेव। वृक्षशाखयोरवयवावयविभावसम्भवेन भेदाभेदे सत्यपि चेतनस्य ब्रह्मणो निरवयवत्वेन विभुत्वेन च चेतनाचेतनयोरवयवावयविभावायोगात्। अभेदो न भवति "एकमेवाद्वितीयमिति" श्रुत्या ब्रह्मणोऽद्वितीयत्वावगमात्। अनयोः पारमार्थिकोऽभेदो न सम्भवति। तथा"ह्यात्मैवेदं सर्वमिति" बाधायां सामा-

चेतनं नित्यशुद्धबुद्धमुक्तसत्यपरमानन्दानन्ताद्वयं ब्रह्म ॥ ९ ॥

नाधिकरणेनात्मव्यतिरेकेण कृत्स्नजडप्रपञ्चाभावप्रतिपादनेनाचेतनं सर्वं चेतने कल्पितमिति ॥ ८॥

किन्तच्चेतनं किन्तदचेतनमित्याकाङ्क्षायां चेतनाचेतनस्वरूपमाह चेतनमिति । कार्य्यतादात्म्यं व्यावर्त्तयति नित्यमिति । "आकाशवत्सर्वगतश्च नित्य" इत्यादि श्रुते । परस्य नित्यत्वं अचेतनधर्मतादात्म्यं व्यावर्त्तयति(१) शुद्धमिति । "अस्नाविरं शुद्धमपापविद्ध"-मित्यादि श्रुते । परस्य शुद्धत्वं रागद्वेषादिराहित्यं कारणीभूताज्ञानतादात्म्यं वारयति बुद्धमिति । ज्ञानैकरस। प्रज्ञानघनश्रुतेरित्यर्थः। अज्ञानकृतावरणादितादात्म्यं निरस्यति मुक्तमिति। बन्धरहितविमुक्तश्च विमुच्यत इति श्रुतेरित्यर्थं । अनृतत्वं निराकरोति सत्यमिति । कालत्रयाबाध्यं सत्यम् "सत्यञ्ज्ञानमनन्तम्ब्रह्म सदेव सौम्येदमग्र आसीदिति श्रुते."। तस्य पुरुषार्थत्वमाह आनन्देति । "आनन्दो ब्रह्मेति व्यजानात्" "विज्ञानमानन्दोब्रह्म इति श्रुते"। तस्य सर्वैकरसतामाह अद्वयमिति । न विद्यते द्वयं यस्य तदद्वयं पञ्चविधभेदशून्यमिति यावत्। ते च जीवानां परस्परभेदा । जीवेश्वरयोर्घटादीनाञ्च भेद.। ईश्वरस्य च जीवस्य च जडानाञ्चं। एवं प्रतियोगिभेदेन भेदा. पञ्चविधा । तच्छून्यं तेषां कल्पितत्वात् । अथवा त्रिविधभेदशून्यमद्वयम्। विजातीयभेद सजातीयभेदः

(१) ख ग निरस्यति ।

अचेतनमज्ञानादि जडजातम्। अज्ञानं त्रिगुणात्मकं सदसद्भ्यामनिर्वचनीयं भावरूपं ज्ञाननिवर्त्त्यम् ॥ १० ॥

स्वगतभेदश्चेति त्रिविधो भेदस्तद्रहितम्। "एकमेवाद्वितीयम्ब्रह्म इति श्रुतेः" ॥९॥

ननु किमिदमज्ञानं न तावज्ज्ञानाभावः प्रागभावस्य प्रतियोगिसमानकालत्वायोगात्। अज्ञानस्य प्रतियोगिसमानकालत्वेन न जानामीत्यनुभूयमानत्वात्। अतः प्रागभावो नाज्ञानम्। अत एव न ध्वंसः नात्यन्ताभावोऽपि। प्रतियोगिव्यधिकरणत्वात् विशेषाभावस्य ज्ञानसामान्यविरोधित्वात्। अज्ञानन्तु ज्ञानसामान्यविरोधि। अत एव नान्योन्याभावोऽपि। तस्माज्ज्ञानसामान्यविरोधिभावरूपमज्ञानमवश्यमङ्गीकर्त्तव्यम् ॥

ननु किं लक्षणमज्ञानम्। न तावज्ज्ञाननिवर्त्त्यत्वम्। तस्य घटादावतिव्याप्तेः। प्रतियोगिप्रत्यक्षस्य ध्वंसं प्रति कारणत्वात्। नापि निर्वचनीयत्वम्। तेनैव तस्य निवर्चनात्। तस्माल्लक्षणाभावाद्भावरूपाज्ञानमनुपपन्नम्। नापि तत्र प्रमाणं पश्यामः। न तावत्प्रत्यक्षं प्रमाणम्। तस्योभयवादिसम्मतप्रागभावविषयत्वात्। नाप्यनुमानं लिङ्गाभावात् ॥

नच सर्गाद्यकालीनं कार्य्यं जडोपादानकार्य्यत्वात् घटवदित्यनुमानं प्रमाणमिति वाच्यं। तस्यार्थान्तरत्वात्। न"चाज्ञानेनावृतं ज्ञान"मित्याद्यागम एव तत्र प्रमाणमिति वाच्यम्। आगमस्य भ्रान्तिज्ञानविषयत्वात्। नाप्यर्थापत्तिस्तत्र प्रमाणम्। दृश्यमानकार्य्य-

स्यान्यथोपपत्तेः । तस्माल्लक्षणप्रमाणयोरभावाच्चेतनेऽज्ञानादि कल्पितमित्यनुपपन्नमित्यत आह अज्ञानमिति । त्रयो गुणा सत्त्वरजस्तमांस्यात्मानो यस्य तत्तया । एतेन मिथ्याज्ञानतत्संस्काररूपाविद्यैव जगद्धेतुरिति प्रत्युक्तम् । आगन्तुकत्वे तस्याः सोपादानत्वनियमेन ब्रह्मणोऽपरिणामित्वेन तत्त्वायोगात् । अनागन्तुकत्वेऽपसिद्धान्तप्रसङ्गात् । तस्माद्यत्किञ्चिदेतत् ॥

अज्ञानलक्षणमाह सदसद्भ्यामिति । भावप्रधानोऽयं निर्देशः । सत्त्वे बाधो न स्यात् असत्त्वे प्रत्यक्षविषयत्वं न स्यात् प्रत्यक्षेण ब्रह्म न जानामीत्यनुभूयते । अतोऽसत्त्वेनानिर्वचनीयम् । ब्रह्मज्ञाने बाध्यमानत्वात्सत्त्वेनाप्यनिर्वचनीयम् ॥

एतदुक्तंभवति सदसद्विलक्षणमज्ञानमिति । असद्विलक्षणमित्युक्ते सत्यतिव्याप्तिः स्यात् । अत उक्तं सद्विलक्षणमिति । तावत्युक्तेऽसत्यतिव्याप्तिरत उक्तमसद्विलक्षणमिति । अभ्युपेत्येदमुक्तं असतो निस्स्वरूपत्वेनातिव्याप्तिप्रसङ्गानवकाशादसन्नाम किञ्चिदस्ति चेदसत्त्वव्याघातः । नास्ति चेत् कुत्रातिव्याप्तिः ॥ कथन्तर्ह्याचार्योक्तिः सदसद्भ्यामनिर्वचनीयमिति । शिष्यबुद्धिव्युत्पादनमात्रे तात्पर्यादाचार्याणामहृदयवाचामहृदयमेवोत्तरमिति न्यायेन वादिनिराकरणमात्रतात्पर्याद्वा असद्विलक्षणोक्तिः । कालत्रयाबाध्यत्वं सत्त्वं तद्भिन्नत्वमनित्यत्वमिति फलितार्थः ॥

नन्विदं लक्षणं कार्ये प्रपञ्चेऽप्यस्तीत्यतिव्याप्तिः । नैष दोषः अनादित्वे सतीति विशेषणात् । नन्वेवमपीश्वरादावतिव्याप्तिः तस्यानादित्वेन कल्पितत्वेन चोक्तलक्षणसद्भावात् । तदुक्तं श्रुत्या जीवेशा-

अहं ब्रह्म न जानामीत्यनुभवात् ।[1] (ते ध्यानयोगानुगता अपश्यन्) देवात्मशक्तिं स्वगुणैर्निगूढामित्यादि श्रुतेः" ।

अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ।
ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ॥

इति स्मृतेश्च ॥ ११ ॥

वाभासेन करोति माया चाविद्या च स्वयमेव भवतीति । "जीव ईशो विशुद्धाचित्तस्याभेदस्तयोर्द्वयोः अविद्या तच्चि[2]तोर्योगः "षडस्माकमनादय" इति सांप्रदायिकवचनात् ।

"मायाभासे न जीवेशौ करोतीति" श्रुतन्ततः ।
कल्पितावेव जीवेशौ ताभ्यां सर्वं प्रकल्पितमिति ॥

विद्यारण्योक्तेश्चातिव्याप्तिर्वज्रलेपायितेत्यत आह ज्ञाननिवर्त्यमिति । "यतो ज्ञानमज्ञानस्यैव निवर्त्तकमिति" पञ्चपादिकाचार्य्यैरुक्तत्वादज्ञानमेव ज्ञाननिवर्त्त्यम् । तथाचायमर्थः सम्पद्यते सदिलक्षणमनादिज्ञाननिवर्त्त्यमज्ञानमिति । अथवा अनाद्युपादानं ज्ञाननिवर्त्त्यमज्ञानं प्रागभावेऽतिव्याप्तिपरिहारायोपादानमिति । घटादावतिव्याप्तिनिवारणायानादीति । ब्रह्मण्यतिव्याप्तिवारणाय ज्ञाननिवर्त्यमित्युक्तम्भवति । ज्ञानाभावोऽज्ञानमित्याशङ्कानिरासार्थमाह भावरूपमिति ॥१०॥

अज्ञानसद्भावे प्रत्यक्षादिप्रमाणान्युपन्यस्यति अहमित्यादिना ।

---

(१) क, ग, पुस्तके नास्ति ।
(२) क, तद्विदोर्योग इति पाठ ।

देवश्चासावात्मा च देवात्मा तस्य शक्तिम् । स्वगुणैः सत्त्वादिभिर्निगूढाम् । ब्रह्मध्यानपरायणाः ब्रह्मविदः अपश्यन्निति योजना । तेनावृतत्वेन मुह्यन्ति संसरन्ति । शास्त्राचार्यप्रसादजनितज्ञानेन येषामज्ञानं निवृत्तं तेषामहम् ब्रह्मास्मीति ज्ञानम्परम् ब्रह्म प्रकाशयतीत्युत्तरेणान्वयः । ज्ञानाभावस्य ब्रह्मस्वरूपावरकत्वायोगादनिच्छतापि तार्किकवलीवर्दैनानया स्मृत्या भावरूपमज्ञानमेष्टव्यम् ॥

एतेन सत्त्वरजस्तमोगुणात्मकमचेतनं स्वतन्त्रम्पारमार्थिकपरिणामि नित्यम् प्रधानमिति साङ्ख्यमतं प्रत्युक्तम् ।

"ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः" ।

इति भगवद्वचनविरोधात् ॥

नच बुद्धिधर्माज्ञानविषयतया भगवद्वचनमन्यथासिद्धमिति वाच्यम् । बुद्धिधर्माज्ञानस्य मिथ्याज्ञानरूपत्वेन चैतन्यावरकत्वायोगाद्"ज्ञानेनावृतं ज्ञान"मित्यावरकत्वस्मरणात् । अचेतनस्य रथादेश्चेतनाधिष्ठितस्यैव प्रवृत्तिदर्शनेन प्रधानस्य स्वातन्त्र्यायोगात् । परिणामिनः सावयवतया क्षीरादेरनित्यत्वदर्शनेन प्रधानस्य नित्यत्वकल्पनायां मानाभावाददृष्टपूर्वकत्वाददृष्टकल्पनायाः ॥

एतेन मिथ्याज्ञानमेवाज्ञानमिति प्रत्युक्तम् । तस्मात्सर्वोपादानमनाद्यनिर्वचनीयं भावरूपमज्ञानमेष्टव्यम् ॥

एवञ्च मदद्वैतश्रुतिर्न विरुध्यते । साङ्ख्यादिमतमेव श्रुतिविरुद्धत्वेनाप्रमाणत्वात् । चकारोऽनुक्तानुमानप्रमाणसमुच्चयार्थः । तथाहि विवादगोचरापन्नं प्रमाणज्ञानम्स्वप्रागभावव्यतिरिक्तस्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकं अप्रकाशितार्थप्रकाशकत्वात् अन्धकारे प्रथमोत्पन्नप्रदीपप्रभावत् । अत्र निवर्तकं प्रमाणज्ञानत्वात् शुक्तिज्ञानवत् । नच प्राग-

भावेनार्थान्तरत्व प्रागभावस्याप्रमाणिकत्वात् । अस्तु वा प्रागभाव-स्तथापि तस्य समानाश्रयत्वेऽपि समानविषयत्वासम्भवेन तन्निवार-णात्। ज्ञानस्यैव स्वविषयत्वात् । नचानुमित्यादेरज्ञाननिवर्त्तकत्वा-नङ्गीकारेणानुमानस्य तत्र व्यभिचार इति वाच्यम्। असत्त्वापादक-मौल्याज्ञाननिवृत्तेरेवानुमित्यादिनाभ्युपगमेन तदसम्भवात । अथवा पक्षहेत्वोरपरोक्षत्व विशेषण देयम। नचैव दृष्टान्ते साध्यवैकल्य शुक्तिज्ञानेन तन्निवृत्तेरनुभवसिद्धत्वात् ॥

ननु शुक्त्यवच्छिन्नचैतन्यावरकमज्ञान मूलाज्ञान तदन्यद्वा । नाद्य इदानीम्ब्रह्मसाक्षात्काराभावेन तन्निवृत्त्योक्तदोष स्यादेव। न द्वितीय अनन्ताज्ञानकल्पनायाङ्गौरवप्रसङ्ग इति चेन्नैष दोष । शुक्त्यवच्छिन्नचैतन्यावरकाज्ञान मूलाज्ञानमेव। इदानी ब्रह्मसाक्षा-त्काराभावेन तन्निवृत्त्यभावेऽप्यज्ञान नष्टमित्यनुभवानुरोधेन शुक्ति-ज्ञानेन तत्तदावरणनिवृत्ते सम्भवान्नोक्तदोष । अथवाऽज्ञान द्विविध मूलाज्ञान तूलाज्ञानञ्च। ब्रह्मावरकमज्ञानमाद्यम् । विषयचैतन्या वरकमज्ञानन्तूलाज्ञानम्। तच्च प्रतिविषय नाना। शुक्त्यवच्छिन्न चैतन्यावरकमज्ञान यावद्विषयभावि एकमेव। शुक्तिज्ञानेन तत्तत-मावरणमेव निवर्त्तते। ननु तदज्ञान ज्ञानेनाज्ञान निवृत्तमित्या-वरणनिवृत्तिरेवानुभूयते इति केचित ॥

वस्तुतस्त्वेकैकस्मिन्विषयेऽनन्ताज्ञानानि मूलाज्ञानपरतन्त्राणि तिष्ठन्ति । एकैकज्ञानेनैकैकन्निवर्त्तते ज्ञानेनाज्ञानन्निवृत्तमित्य-नुभवस्य सर्वसमतत्वेनावरणनिवृत्तिविषयतया सङ्कोचे माना-भावात् । नचाज्ञानानन्त्याभ्युपगमे कल्पनागौरवमिति वाच्यम्।

तच्चाज्ञानं द्विविधम्। मायाविद्याभेदात्। शुद्धसत्त्वप्रधानं सन्मायेत्युच्यते। मलिनसत्त्वप्रधानं सदविद्येत्युच्यते। "जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवतीति श्रुतेः" ॥ १२ ॥

अथवाऽज्ञानस्य शक्तिर्द्विविधा, ज्ञानशक्तिः क्रियाशक्तिश्चेति। रजस्तमोभ्यामनभिभूतं सत्त्वं ज्ञानशक्तिः।

प्रमाणवतो गौरवस्यादोषत्वात्। तस्माद्दृष्टान्ते साध्यसम्भवात् अनवद्यम् ॥११॥

अज्ञानं विभजते तच्चेति। द्वैविध्यमाह मायेति। एकमेवाज्ञानं सत्त्वशुद्ध्यविशुद्धिभ्यां मायाविद्या-चेति द्विधा जातमित्याह शुद्धेति। रजस्तमोभ्यामतिरस्कृतं शुद्धम्। तद्विपरीतं मलिनम्। तत्र श्रुतिप्रमाणमाह माया चेति। स्वयमेव यथोक्तप्रकारेण मायाविद्या चेति द्विधा भवति। ताभ्यां मायाविद्याभ्यामेकमेव चैतन्यं जीवेश्वररूपेण द्विधा जातमित्याह जीवेशाविति। आभासेन प्रतिविम्बरूपेणेत्यर्थः। अयम्भावः मायाप्रतिविम्बितं चैतन्यमीश्वरः अविद्याप्रतिविम्बितश्चैतन्यञ्जीव इति ॥१२॥

प्रकारान्तरेण मायाविद्याभेदस्य वक्तुमज्ञानस्य शक्तिं विभजते अथवेत्यादिना। कार्य्यानुकूलकारणनिष्ठसामर्थ्यं शक्तिः। ज्ञानशक्तिं मुत्पादयति रज इति। अनभिभूतमतिरस्कृतम्। इदङ्कुतोऽवगम्यते इत्यत आह सत्त्वादिति। आवरणशक्तिमाह रज इति। तत्र भाष्यकारसम्मतिमाह तदुक्तमिति। समस्तविशेषादित्यत्र पूर्व-

"सत्त्वात्संजायते ज्ञानमिति स्मृतेः"। सत्त्वेनानभिभूते रजस्तमसी क्रियाशक्तिः। क्रियाशक्तिर्द्विविधा आवरणशक्तिर्विक्षेपशक्तिश्चेति। रजस्सत्त्वाभ्यामनभिभूतं तम आवरणशक्तिः। तदुक्तम्, "कृष्णं तम आवरणात्मकत्वादिति"। सा च नास्ति न प्रकाशत इति व्यवहारहेतुः। तथाचोक्तम्, "न भाति नास्ति कूटस्थ" इत्यापादानमावृत्तिरिति। तमस्सत्त्वाभ्यामनभिभूतं रजो विक्षेपशक्तिः; "रजसो लोभ एव चे"ति स्मृतेः॥ १३॥

पचे"ऽजामेकां लोहितशुक्लकृष्णा"मित्यभिधानमन्त्रस्य व्याख्यानावसरे कृष्णशब्देन तमोगुणः प्रतिपाद्यते। तमोगुणस्यावरणात्मकत्वादिति। तस्यावरकत्वं प्रतिपादितं भाष्यकारेणातो यथोक्तलक्षणावरणशक्तिरित्यर्थः। तस्य लक्षणमाह सा चेति। पूर्वं स्वरूप व्युत्पादितं इह[1] तु लक्षणं व्युत्पाद्यत इति विशेषः। अर्थोऽस्ति न प्रकाशत[2] इति व्यवहारकारणमज्ञानशक्तिरिति तल्लक्षणं ज्ञेयम्[3]। तत्र संमतिमाह तथा चोक्तमिति। कूटवन्निर्विकारेण तिष्ठतीति कूटस्थः परमात्मा स नास्ति न प्रकाशत इत्यापादानम्। आपादानकारणमावृत्तिरावरणशक्तिरित्यर्थः। विक्षेपशक्तिमाह तम इति। १३॥

(१) [illegible]
(२) [illegible]
(३) [illegible] [illegible]

लोभादीनां विक्षेपकत्वं प्रसिद्धमेव । सा चाकाशादिप्रपञ्चोत्पत्तिहेतुः । उक्तञ्च,—

"विक्षेपशक्तिर्लिङ्गादि ब्रह्माण्डान्तं जगत्सृजेदिति"। तथाच, पूर्वोक्ताज्ञानं आवरणशक्तिप्रधानं सदविद्येत्युच्यते । ज्ञानं(१)शक्तिप्रधानं सन्मायेत्युच्यते ।

एतदभिप्राया स्मृतिरपि ।

"तरन्त्यविद्यां विततां हृदि यस्मिन्निवेशिते ।
योगी माया ममेयाय तस्मै विद्यात्मने नमः" ॥

इत्येवंरूपा द्रष्टव्या । एवं च मायोपहितं चैतन्यमीश्वरो जगत्कारणमन्तर्यामीत्युच्यते । स एव तत्पदवाच्यार्थः ॥ १४ ॥

ननु रजसो लोभहेतुत्वमुदाहृतस्तावदवगम्यते न तु विक्षेपहेतुत्वमित्याशङ्क्याह लोभादीनामिति । आदिशब्देन मदमात्सर्यादयो ग्राह्याः । विक्षेपशक्तेः कृत्यमाह सा चेति । सजातीयविजातीयव्यावर्त्तकत्वादिदमेवास्या लक्षणम् । तत्र सम्मतिमाह उक्तञ्चेति । समष्टिव्यष्टिसूक्ष्मशरीरं लिङ्गम् । आदिशब्देन पञ्चीकृतभूतानि गृह्यन्ते ॥

ननु भवत्वेवं प्रकृते किमायातमित्यत आह तथाचेति । नच वैपरीत्ये किं विनिगमकमिति वाच्यम् । स्वाश्रयाव्यामोहकरी माया, आश्रयमोहकरी त्वविद्येति मायाविद्यालक्षणप्रसिद्धेः आवरणशक्तेर्मोहकारित्वात् तत्प्रधानमज्ञानमविद्येत्युच्यते । विक्षेपादिशक्तेरन्यथा(२)-साधकप्रधानमज्ञानं मायेत्युच्यते । तथाच न वैपरीत्यमिति भावः ॥

---

(१) ख. ज्ञानं विक्षेपशक्तिप्रधानम् पाठः । (२) क. ग. रन्यथात्वात् ।

ननु तरत्यविद्यामिति श्लोके घटकलशादिवन्मायाविद्याशब्दयोः पर्य्यायत्वमवगम्यते तत्कथं तयोर्भेदसिद्धिरित्यत आह एतदभिप्राया स्मृतिरपीति। अत्राप्यावरणशक्तिं निमित्तीकृत्याविद्याशब्दः प्रकृतिं व्युत्पादयति। विक्षेपादिशक्तिं निमित्तीकृत्य मायाशब्दोऽपीति। एषोऽभिप्रायो यस्याः सा एतदभिप्राया सा तथोक्ता। योगी ब्रह्मसाक्षात्कारोऽस्यास्तीति योगी ब्रह्मनिष्ठ इति यावत्। यस्मिन् सर्वान्तर्य्यामिणि सर्वाधिष्ठाने वासुदेवे। हृदि अन्तःकरणे। निवेशितेऽहम्ब्रह्मास्मीति साक्षात्कृते सति। कार्य्याकारेणाविष्कृतामावरणशक्तिप्राधान्येनाविद्याशब्दवाच्यां, विक्षेपशक्तिप्राधान्येन मायापदवाच्यां, प्रकृतिं तरति नाशयति। तस्मै नमइति सम्बन्धः। कीदृशाय[1] नमः। विद्या चैतन्यमात्मा यस्य स तथोक्तस्तस्मै। पुनः कस्मै अमेयाय न मेयोऽमेयः अप्रमेयायेत्यर्थः॥

ननु पूर्वं साक्षात्कारविषयत्वं ब्रह्मणः प्रतिपादितमिदानीमप्रमेयत्वमुच्यते तथाच पूर्वोत्तरव्याघातः। उच्यते वृत्तिविषयत्वमुक्तं साक्षात्कृते सतीति। अप्रमेयायेति चैतन्याविषयत्वमुच्यते "यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह तन्त्वौपनिषदं पुरुषं पृच्छामी"-त्यादिश्रुतिभ्यः। अतो न व्याघात इत्यर्थः। मायाविद्याविभागनिरूपणफलमाह एवश्चेति। "एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्यामी एषो योनिः सर्वस्य"त्यादिश्रुत्योच्यते इति शेषः॥

ततः किं तचाह स एवेति। स ईश्वरः "तत्त्वमसि" वाक्ये तत्पदस्य वाच्यार्थः॥१४॥

---

(१) क, ग, कदव्भुताय पाठ।

अविद्योपहितं चैतन्यं जीवः प्राज्ञ इति चोच्यते ।

तदुक्तम्,—

"तमोरजस्सत्त्वगुणा प्रकृतिर्द्विविधा च सा ।
सत्त्वशुद्ध्यविशुद्धिभ्यां मायाविद्ये च ते मते" ॥
"मायाबिम्बो वशीकृत्य तां स्यात् सर्वज्ञ ईश्वरः ।
अविद्यावशग स्त्वन्य स्तद्वैचित्र्यादनेकधे"ति ॥
अस्मान्मायी सृजते विश्वमेत
त्तस्मिंश्चान्यो मायया सन्निरुद्धः ।
"मायां तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम्" ।
इत्येवमादयः श्रुतय उक्ताभिप्राया द्रष्टव्याः ॥ १५ ॥

नन्वविद्यायाः कुत्र तदुपयोग इत्याशङ्क्य सुषुप्तस्थाने एकीभूत "प्रज्ञानघन (१) एवानन्दमयो ह्यानन्दभुगि"त्यादिश्रुत्याऽविद्योपहितं चैतन्यं जीवः प्राज्ञ इति चोच्यते । स एव त्वंपदस्य वाच्यार्थ इत्यभिप्रेत्य प्रसङ्गाज्जीवस्वरूपं व्युत्पादयति अविद्योपहितमिति । उक्तयुक्त्येति शेषः । उक्तेऽर्थे वृद्धसम्मतिमाह तदुक्तमिति । सच्चिदानन्दब्रह्मप्रतिबिम्बसमन्विता सत्त्वरजस्तमोगुणात्मिका प्रकृतिरेकैव ।

"अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः ।
अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ॥
न स विदाय च इमां अज्ञानान्यद् युष्माकमन्तरं बभूव ।
नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति"— ॥

इत्यादि श्रुतिभ्यः ।

(१) क ख, एवानन्द पाठः ।

नन्विन्द्रो मायाभिः पुरुरूप ईयते इत्यादिश्रुतौ मायाभिरिति बहुवचनसामर्थ्याल्लिङ्गादज्ञानस्य नानात्वावगमात्कथमेकत्वमवधार्यते? नचाजामन्त्रेण तदवगम्यते इति वाच्यम्। श्रुत्यन्तरविरोधे तदवधारणायोगात्। नच परस्परविरोधादुभयोरप्रामाण्यापत्तिरिति वाच्यम्। बहुवचनसामर्थ्यादज्ञाननानात्वे निश्चितेऽजामन्त्रस्याज्ञानसमष्टिपरत्वोपपत्तेः। तस्मात्प्रकृतिरेकैवेत्यवधारणमनुपपन्नमिति ॥

मैवम्, श्रौतार्थस्य बलवत्त्वात्प्रकृतेरेकत्वावधारणोपपत्तेः। तथाहि, अजामन्त्रे एकामिति श्रुत्या एकवचनसामर्थ्येन च लिङ्गेन प्रकृतेरेकत्वं निर्णीयते। "इन्द्रो मायाभि"रित्यस्मिन्मन्त्रे बहुवचनसामर्थ्यादज्ञाननानात्वमवगम्यते। तत्र श्रुतिलिङ्गयोः श्रुतेर्बलीयस्त्वाच्छ्रौतार्थप्रकृत्यैकत्वमभ्युपगन्तव्यम्। अन्यथा न्यायविरोधापत्तेः। किञ्च, "इन्द्रो मायाभि"रित्यत्र केवललिङ्गादज्ञाननानात्वमवगम्यते। अजामन्त्रे श्रुतिलिङ्गाभ्यामज्ञानैकत्वमिति तदेवावश्यमभ्युपगन्तव्यम् ॥

तर्हीन्द्रो मायाभिरिति मन्त्रस्याप्रामाण्यप्रसङ्ग इति चेन्न। अर्थान्तरत्वेन प्रामाण्योपपत्तेः। तथाहि। "इन्द्रो मायाभि"रित्यत्र मायाशब्देन प्रज्ञाविशेषो[1] मिथ्याभिमानो वा विधीयते। ततश्चेन्द्रः परमात्मा तैरन्यतरै[2]र्वा हिरण्यगर्भादिभिर्नानारूपः सन् चेष्टते इत्यर्थान्तरत्वेन प्रामाण्यमुपपद्यते, नाज्ञाननानात्वप्रतिपादने तात्पर्यं मन्त्रस्य। अजामन्त्रस्य त्वज्ञानैकत्वप्रतिपादने तात्पर्यादर्थान्तरायोगाच्चाज्ञानमेकमेव। तस्मात्प्रकृतिरेकैवेत्यवधारणमुपपन्नम् ॥

---

(१) ग मिथ्याभिनिवेशो वा इति अधिक पाठः।

(२) ग, अन्यतमैरिति पाठ ।

यद्वा, यथा एक एव देवदत्तः क्रियानिमित्तवशेन पाठकः पाचक इति व्यपदिश्यते। तथा एकमेवाज्ञानं विक्षेपावरणशक्तिनिमित्तभेदेन मायाऽविद्येति च व्यपदिश्यते। तथाच; अविद्याप्रतिविम्बितं चैतन्यं जीवः; अविद्योपहितं चैतन्यमीश्वरः; आभास एव च॥१६॥

सा सत्त्वशुद्ध्यविशुद्धिभ्यां मायाविद्याभेदेन द्विविधा। तद्वैचित्र्यान्मालिन्यवैचित्र्यादनेकधा अनेकप्रकारा। अविद्या इति शेषः। अयमाशयः। शुद्धसत्त्वप्रधाना माया एकैव तदुपहित ईश्वरः। मलिनसत्त्वप्रधाना अविद्या मालिन्यवैचित्र्यादनेकधा तदुपहितो जीवोऽपि तथैव। अस्मिन् पक्षे नाना जीवः। उक्तार्थे श्रुत्यन्तरसम्मतिमाह अस्मादिति। अस्मादेतात्। मायी मायोपाधिकः परमात्मा। एतच्छ्रुत्यादिप्रमाणेनावगम्यमानम्। विश्वमाकाशादिब्रह्माण्डान्तम् जगत्। सृजते उत्पादयति। तस्मिन् सृष्टे ऽन्योऽविद्योपाधिकः मायया पूर्वोक्तया देहादिष्वहं ममेत्यभिमानेन सन्निरुद्धो बद्धः। प्रकृतिर्जगदुपादानकारणम्। मायिनं मायोपाधिकम्। विद्यादित्युभयत्र सम्बध्यते। अयमाशयः। मायोपाधिकः परमात्मा सोपाधिकमायाप्राधान्येन जगदुपादानकारणं स्वप्राधान्येन निमित्तमिति। इममेवार्थमग्रे व्युत्पादयिष्यति ॥१५॥

अज्ञानस्यैकत्वेऽपि मायाऽविद्याभेदे ततो जीवेश्वरभेदश्चोक्तः इदानीमज्ञानमेकमेव, मायाऽविद्याभेदो नास्ति, विम्बप्रतिविम्बभावेन जीवेश्वरयोर्भेदः, जीवोऽप्येक एवेत्यभिप्रेत्य पक्षान्तरमाह

यद्वेति। व्यपदिश्यते इति। तथाच, मायाविद्याशब्दौ पर्य्यायवन्तौ न मायाविद्ययोर्भेद इत्यर्थः। कथं तर्हि जीवेश्वरयोर्भेदस्तत्राह तथाचेति। अविद्यायां प्रतीयमानमविद्याप्रतिविम्बितम्। परमात्मनो नीरूपत्वेन सूर्य्यादिवत्प्रतिविम्बायोगात्। अविद्योपाधिकमविद्योपहितम्। नच तत्र प्रमाणाभाव इत्याह आभास एव चेत्यादिना द्वितीये स्थितमंशो नानाव्यपदेशादन्यथा चापि दासदाशकितवादित्वमवधीयते।

एके, तत्र पूर्वाधिकरणे जीवेश्वरयोरुपकार्य्योपकारकभाव उक्तः, स किं स्वामिभृत्ययोरिव आहोस्विदग्निविस्फुलिङ्गयोरिवेति संशयः तत्रानियम इत्येकः पूर्वपक्षः।

द्वितीयस्तु भेदश्रुत्यनुरोधात् स्वामिभृत्यवदेव जीवपरयोरुपकार्य्योपकारकभावः। इति प्राप्ते इदमाह परस्यांश इवांश आभासरूपो जीवः। कुतो नानाव्यपदेशात्। "य आत्मनि तिष्ठन्नि"त्यादिना। अन्यथा चापि परमात्माभिन्नश्च जीवः ब्रह्मदाशा[१] ब्रह्मदासा[२] ब्रह्मैवेमे कितवा[३] उत "तत्त्वमस्यादि" श्रुतिभिरभेदप्रतिपादनात् जीवेश्वरयोरत्यन्तैक्ये, "अहरहः सन्ध्यामुपासीत; गृहस्थः सदृशीं भार्य्यामुपेयात्, ब्राह्मणो न हन्तव्यः; मिश्रीभावः[४] गुर्वङ्गनां नोपगच्छेदि"त्यनुज्ञापरिहारयोरानर्थक्यप्रसङ्ग इति चेन्न। देहाभिमानादर्थत्वोपपत्तेस्तयोः॥

नन्वेवमपि कर्म्मफलव्यतिकरः स्यादिति चेन्न। जीवस्य परि-

(१) दाशा कैवर्त्ताः। (२) दासा भृत्याः।
(३) कितवा द्यूतकृतो भक्ताः। (४) क ग, नास्ति पाठः।

च्छिन्नत्वान्न कर्मफलव्यतिकरः। जीवस्य परमात्माभिन्नतया कथं परिच्छिन्नत्वमित्याशङ्क्याह सूत्रकार आभास एव चेति। जलादि-प्रतिबिम्बित-सूर्य्यादिवदाभास एव प्रतिबिम्बरूप एव जीवः। कस्तत्र प्रतिबिम्बोपाधिरिति चेत्।

अत्र केचित्। अन्तःकरणविशिष्टे कर्त्तृत्वादिसंसारस्यानुभूय-मानत्वात्, "कार्य्योपाधिरयं जीव" इति वचनाच्च। अन्तःकरण प्रतिबिम्बोपाधिरिति वदन्ति॥

अपरेतु,— अन्तःकरणस्याज्ञानकार्य्यतया स्वातन्त्र्यायोगेन जीव-परमात्मभेदकत्वायोगात्, नान्तःकरण जीवोपाधिः। किन्त्वज्ञानं स्वातन्त्र्यात्। तदपि नाना, तत्प्रतिबिम्बो जीवः, सोऽपि नाना, तदुपाधेरज्ञानस्य नानात्वात्। तथाच, ब्रह्मण्यारोपितानामज्ञानानां परिच्छिन्नतया तत्प्रतिबिम्बितरूपाणां जीवानामपि परिच्छिन्न-त्वादितरेतरव्यावृत्तत्वाच्च न कर्मफलव्यतिकर इति सूत्रार्थ इति नानाजीववादिनामभिप्रायमाहुः॥

अन्येतु,— जीवेश्वरविभाजकोपाधिरज्ञानमेव तस्य स्वातन्त्र्यात्। तदप्येकमेव तत्प्रतिबिम्बो जीवः, उपाधेरेकत्वात्। सोऽप्येक एव अज्ञानैक्ये प्रमाणं दर्शितम्। आभास एव चेत्येकवचनसामर्थ्याच्च।

ननु जीवैक्ये बन्धमोक्षव्यवस्था कथमित्थमन्तःकरणनानात्वे प्रमातृणां नानात्वं तत्त्वज्ञानेनैकस्मिन् प्रमातरि मुच्यमाने तद्भिन्न प्रमाता बद्ध इति बन्धमोक्षव्यवस्था सम्भवति। स्यादेतत् कोऽयं मोक्षो नाम अविद्यानिवृत्तिरिति चेत्, तावत्कार्य्याविद्या निवृत्तिर्वा सकलभ्रान्तिज्ञाननिवृत्तेरसम्भवात्। मूलाविद्यासत्त्वेन

पुनर्भ्रान्तिज्ञानोदयसम्भवात्। यत्किञ्चिद्भ्रान्तिज्ञाननिवृत्तेरपुरुषार्थत्वात्।

नन्वज्ञानगतावरणशक्तिरविद्या तन्नानात्वेन यस्य प्रमातुस्तत्त्वज्ञानमुत्पन्नं तस्य स्वसंसारहेतुभूताविद्यानिवृत्तिर्मोक्षः यस्य तन्नोत्पन्नं तस्य बन्ध इति बन्धमोक्षव्यवस्थोपपद्यत इति चेन्न। नानाजीववादप्रसङ्गात्। तथाहि। अविद्याया नानात्वेन, बन्धहेतुतया, तदाश्रयजीवभेदस्यावश्यकतया; नानाजीववादप्रसङ्गः। अन्यथा बन्धमोक्षव्यवस्था न स्यात् प्रतिज्ञाविरोधश्च।

अस्तु तर्हि मूलाविद्यानिवृत्तिर्मोक्ष इति चेन्न। एवमुक्तौ सर्वमुक्तिप्रसङ्गात्। नच जीवैक्ये सर्वमुक्त्युपपादनमनुपपन्नमिति वाच्यम्। हिरण्यगर्भशुकवामदेवादीनां मुक्त्यभ्युपगमेनास्मदादीनां संसारानुपलम्भप्रसङ्गात्। तदनभ्युपगमे तत्प्रतिपादकशास्त्रस्याप्रामाण्यप्रसङ्गात्।

किञ्च। यावदधिकारमवस्थितिरधिकारिणामित्यत्रोपासनेनेन्द्रादिपदं प्राप्तानामधिकारिपुरुषाणां निमित्तवशेन जन्मान्तरसत्त्वेऽपि तत्त्वज्ञानप्रतिबन्धाभावेनाधिकारावसाने मोक्षोऽभ्युपेयते। एकजीवपक्षे तत्सर्वं दत्तजलाञ्जलिः स्यात्। अपिच साक्षात्कृततत्त्वो गुरुः शिष्याय तत्त्वमुपदिशतीत्यभ्युपगन्तव्यम्। तद्विज्ञानार्थं "स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियम् ब्रह्मनिष्ठम्"।

"उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः"।

इत्यादिश्रुतिस्मृतिभ्यः। तत्रैकजीवपक्षे उत्पन्न-ब्रह्म-साक्षात्कारस्य गुरोरभावेन गुरुशिष्यव्यवस्थाया असम्भवादनिर्मोक्षः प्रसज्येत।

किञ्च। कर्मकाण्डज्ञानकाण्डयोरेकजीवपक्षेऽधिकारिभेदाभा-

त्वेनाप्रामाण्यप्रसङ्गः। तस्मादज्ञानमेकं तदुपाधिको जीवोऽप्येक एव इत्यनुपपन्नमिति॥

अत्र ब्रूमः—"अजामेकां, मायान्तु प्रकृतिं विद्यात्, नीहारेण प्रावृताः, अज्ञानेनावृतं ज्ञानं, मम माया दुरत्यया, विभेदजनकेऽज्ञाने" इत्यादिश्रुतिस्मृतीतिहासपुराणेषु लाघवानुगृहीतश्रुतिलिङ्गाभ्यामविद्यैक्ये निश्चिते तदुपाधिको जीवोऽप्येक एवेति निर्णीयते।

नच बन्धमोक्षव्यवस्थानुपपत्तिरिति वाच्यम्। अज्ञस्य बन्धो ज्ञानिनो मोक्ष इति व्यवस्थासम्भवात्। हिरण्यगर्भादीनां मुक्तिप्रतिपादकशास्त्रस्य प्रवृत्तिकरत्वेन स्वार्थे तात्पर्य्याभावात्। नच महानुभावानां तेषां तत्त्वज्ञानाभावेऽस्मदादीनां तत्त्वज्ञानोपपत्तौ का प्रत्याशेति वाच्यम्। सृष्ट्यादिविक्षिप्तचित्तत्वेन तेषां ज्ञानाभावेऽपि विवेकवैराग्यसम्पन्नानामस्मदादीनां तत्त्वज्ञानोत्पत्तौ बाधकाभावात्। "स्वर्गकामो यजेते"त्यादिवाक्यप्रामाण्यात् स्वर्गोद्देशेन यागादिप्रवृत्तिवद्द्रष्टव्यः श्रोतव्य इत्यादिप्रामाण्यात्, ज्ञानोद्देशेन श्रवणादिषु प्रवृत्त्युपपत्तेः। नच क्रममुक्त्युपासनाशास्त्रविरोधः। व्यवहारिकप्रमातृभेदविषयतया स्वप्नवदविरोधोपपत्तेः॥

नन्वेवं सति पूर्वकल्पे दहरा[1]द्युपासनया ब्रह्मलोकं गतानां तत्त्वसाक्षात्कारेणाज्ञाननिवृत्तेर्मोक्षस्य सम्पन्नत्वेनास्मदादीनां संसारानुपलब्धिप्रसङ्ग इति चेन्नैवम्। स्वप्नवत्तदुपपत्तेः। न हि स्वप्नावस्थायां

(१) दहरोऽस्मिन्नन्तराकाश इति श्रुतिः। एवं चान्यत्र।

अत एवोपमा सूर्य्यादिवत्।

"यथा ह्ययं ज्योतिरात्मा विवस्वा-
[1]नपो भिन्ना बहुधैकोऽनुगच्छन्।
उपाधिना क्रियते भेदरूपो
देवः क्षेत्रेष्वेव मजोऽयमात्मा"॥

स्वभ्रान्तिकल्पितप्रमातुर्मुक्तिदर्शनेन बन्धदर्शनेन वा स्वस्य मुक्तिर्बन्धो वा भवति। नच[2] शास्त्राप्रामाण्यम्॥

एतेनाधिकारिभेदाभावात् कर्मज्ञानकाण्डप्रामाण्यं प्रत्युक्तम्। नच गुरुशिष्यव्यवस्थानुपपत्तिः। परोक्षज्ञानिनोऽपि तन्निष्ठस्योपदेष्टृत्वोपपत्तेः। अथवा परमेश्वरो वा गुरुशरीरमाविश्य साधकमनुगृह्णातीति व्यवस्था न विरुध्यते। तस्मादेक एव जीवः॥

किञ्च। "आभास एव च, स एव तु कर्मानुस्मृतिशब्दविधिभ्यः, सत्ता सौम्य तदा सम्पन्नो भवति प्राज्ञेनात्मना संपरिष्वक्तः प्राज्ञेनात्मनान्वारूढः" इत्यादिष्वेकवचनसामर्थ्याज्जीवैक्यमभ्युपगन्तव्यम्॥

नन्वेव"मिमाः सर्वाः प्रजाः सति सम्पद्यते न विदुः वीतरागभयक्रोधा मन्मयामुपाश्रिताः, यावदधिकारमवस्थितिरधिकारिणा"मित्यादिषु बहुवचनसामर्थ्याज्जीवबहुत्वं किन्न स्यादिति चेन्नैतदेवं लाघवात्तदैक्योपपत्तेः। तस्मादेक एव जीव इति वदन्ति॥१६॥

अतएवेति। तृतीये स्थितं न स्थानतोऽपि परस्योभयलिङ्गम्। सर्वत्र हि जीवः सुषुप्त्यादौ येन ब्रह्मणा सम्पन्नो भवति। तत् किं निर्विशेषं सविशेषमुभयलिङ्गं वाऽन्यतरलिङ्गं वा। अन्यतरलिङ्ग-

(१) क, नाप इति पाठ। (२) ख ग, न वा शास्त्रस्याप्रामाण्यमि

एक एव हि भूतात्मा भूते भूते व्यवस्थितः ।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत्" ॥
इत्यादि श्रुतिसूत्रयोः सत्त्वात् ॥ १७ ॥

मित्यत्रापि सविशेषलिङ्ग वा निर्विशेषलिङ्ग वेति संशय । तत्र "सत्यकाम सत्यसङ्कल्प अस्थूलमन एव ह्रस्वमि"त्याद्युभयविधश्रुति सम्भवात्, उभयलिङ्ग ब्रह्मेति प्राप्तेऽभिधीयते । नोभयलिङ्गम् ब्रह्म। एकस्य वस्तुनो द्वैरूप्यायोगात् । न "ह्येकमेव सविशेष निर्विशेषञ्च भवती"ति युक्त्या वक्तु शक्यम् ॥

अस्तु तर्ह्युपाधित सविशेष स्वभावतो निर्विशेषञ्चेत्युभयलिङ्ग ब्रह्मेति चेन्नैतदेवम् । न ह्युपाधितोऽपि स्वभावतोऽपि निर्विशेष सविशेषम्भवति विरोधात्सर्वत्र । किन्तु पारमार्थिक निर्विशेष-स्वरूपं सविशेषस्वरूप मायामयम् । तथाच श्रुतिस्मृती भवत ।

"अशब्द मस्पर्श मरूप मव्यय
तथाऽरस नित्यमगन्धवच्च यत् ।
अनाद्यनन्त महत पर ध्रुव
निचाय्य त मृत्युमुखात् प्रमुच्यते ॥
स यथा सैन्धवघनोऽनन्तरोऽबाह्य कृत्स्नो रसघन एव, एव वाऽरेऽयमात्मानन्तरोऽबाह्य कृत्स्न प्रज्ञानघन एव ॥
अनादिमत्पर ब्रह्म न सत्तन्नासदुच्यते" ।

इत्यादि । एतेन सविशेषमेव ब्रह्म न निर्विशेष सत्यकामत्वादिश्रुतेरिति प्रत्युक्तम् ॥

ननु ब्रह्मणो निर्विशेषत्वे सगुणवाक्यानां सृष्ट्यादिवाक्यानां वा का गतिरिति चेन्न। तेषामन्यपरत्वेन तत्र तात्पर्य्याभावात्। तथाहि! "सर्वे वेदा यत्पदमामनन्ती"तिशास्त्रेण सर्ववेदप्रतिपाद्यत्वमवगम्यते। ततश्च कर्मवाक्यानि स्वप्रतिपाद्य-यागाद्यनुष्ठानेन सत्त्वशुद्धिद्वारा ब्रह्मसाचात्कारोत्पादनेन तत्र पर्य्यवस्यन्ति। उपासनावाक्यानि तत्तद्गुणविशिष्टोपासनविधानेन चित्तैकाग्र्यद्वारा ब्रह्मणि पर्य्यवस्यन्ति। तत्त्वमस्यादि वाक्यानि साचाद्ब्रह्मणि पर्य्यवस्यन्ति। तदुक्तम्,

"शुद्धिद्वारा कर्मकाण्डस्थवाक्यम्
चित्तैकाग्र्यद्वारतो ध्यानवाक्यम्।
साचादेतत् तत्त्वमस्यादिवाक्यम्
सत्यानन्दे स्वप्रकाशे प्रयातीति॥"

सृष्टिप्रलयादिवाक्यानि तु अध्यारोपापवादन्यायेन सृष्ट्यादिदर्शनस्य ब्रह्मज्ञानोपायतया ब्रह्मणि पर्य्यवस्यन्ति। तदुक्तमाचार्य्यचरणैः।

"मृल्लोहविस्फुलिङ्गाद्यैः सृष्टिर्याचोदितान्यथा।
उपायः सोऽवताराय नास्ति भेदः कथञ्चन"॥

इति। ततश्च सगुणोपासनसृष्ट्यादिप्रतिपादकवाक्यानां ब्रह्मज्ञानोपायतोपदर्शनमुखेन निर्विशेषे ब्रह्मणि पर्य्यवसानात्। निर्विशेषम् ब्रह्म यतः, अतो ब्रह्माविद्याप्रतिविम्बितं सज्जीवोऽविद्योपहितं सदीश्वर इति विम्बप्रतिविम्बभावेन जीवेश्वरभाव इति। अत्र वेदान्तेषु जलसूर्य्यादिदृष्टान्तोपादानमिति सूत्रकार आह अत एवेति। यतो ब्रह्म निर्विशेषं अत एवेति वेदान्तेषु जलसूर्य्याद्युपमोपादीयते। तानेव वेदान्तानुदाहरति यथेत्यादिना।

ननु सूर्य्यादीनां रूपवत्त्वेन जलादौ प्रतिबिम्बसम्भवेऽपि ब्रह्मणो रूपादिरहितत्वेन कथमविद्यायां प्रतिबिम्बोदयः। नच जले आकाशादिप्रतिबिम्बवत् अविद्यायां ब्रह्मप्रतिबिम्बसम्भव इति वाच्यम्। आकाशस्यापि रूपादिशून्यतया जलादौ प्रतिबिम्बासम्भवात्। नच स्वल्पजलभाजने साभ्रनक्षत्राकाशानुभवविरोध इति वाच्यम्। तत्रापि रूपादिमन्नक्षत्रादिप्रतिबिम्ब एवानुभूयते। आकाशप्रतिबिम्बानुभवस्तु भ्रम एव। तस्माद्बिम्बप्रतिबिम्बभावेन ब्रह्मणो जीवेश्वरविभागोऽनुपपन्न इति चेन्न। रूपवत्त एव प्रतिबिम्ब इति नियमाभावात्। रूपादिरहितस्य लोहितरूपादेः स्फटिकादौ प्रतिबिम्बदर्शनात्। नच रूपादिहीनस्य द्रव्यस्य प्रतिबिम्बासम्भव इति वाच्यम्। तादृशव्योमादेः प्रतिबिम्बदर्शनात् आकाशानुभवस्य सर्वानुभवसिद्धत्वात्। नच तस्य भ्रमत्वम् बाधकाभावात्। तस्माद्ब्रह्मणो बिम्बप्रतिबिम्बभावेन जीवेश्वरविभागः॥

अथवा अविद्याविशिष्टं चैतन्यं जीवः अविद्योपहितं चैतन्यमीश्वरः। यथाहुः—

"बिम्बत्वं प्रतिबिम्बत्वं यथा पूषणि कल्पितम्।
जीवत्वमीश्वरत्वञ्च तथा ब्रह्मणि कल्पितम्"॥

इति। एतदभिप्रेत्य सूत्रकारोऽप्याह—

"वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवमिति"।

"अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः" इत्यादि श्रुतिरादिशब्देन गृह्यते॥१३॥

अज्ञानमेकं तद्विशिष्टचैतन्यं जीव इत्येव कश्चिदाह अभिमिति।

अस्मिन् पक्षे जीवस्तु एक एव तस्मिन्नन्तःकरण-विशिष्टाः प्रमातारः कल्पिताः ।

केचित्तु, नानाज्ञानं स्वीकृत्य वनवदज्ञानसमुदायः समष्टिः तदुपहितं चैतन्यमीश्वरः । वृक्षवत्प्रत्येकमज्ञानं व्यष्टिः तदुपहितं चैतन्यं प्राज्ञ इति वदन्ति ॥ १८ ॥

ननु जीवैक्ये सुखदुःखवैचित्र्यानुपपत्तिरित्याशङ्क्य प्रमातृभेदेन तद्वैचित्र्यमुपपद्यत इत्याह तस्मिन्निति । अविद्याप्रतिबिम्बिते जीव इत्यर्थः । प्रमातार इति प्रमाश्रया इत्यर्थः ।

पक्षान्तरमाह केचित्त्विति । अयमाशयः । शास्त्रेषु शुकादीनां मोक्षप्रतिपादनादस्मदादीनां संसारोपलम्भाच्च प्रतिपुरुषं न जाना-मीत्यनुभूयमानानि भिन्नान्यज्ञानानि स्वीकर्त्तव्यानि । अन्यथा बन्धमोक्षव्यवस्था न स्यात् । "इन्द्रो मायाभिः पुरुरूप ईयते" इत्यादि श्रुतौ मायाभिरिति बहुवचनसामर्थ्याच्च । "अजामेका"-मिति श्रुतेः समष्ट्यज्ञानविषयतयान्यथोपपत्तेः । अन्यथा मायाभि-रिति बहुवचनस्यानर्थक्यप्रसङ्गात् । अर्थान्तरकल्पनायां प्रकृतहाना-प्रकृतप्रक्रियाप्रसङ्गात् । आनर्थक्यप्रतिहतानां विपरीतं बलाबलमिति न्यायात्, वाक्यशेषानुरोधाच्च "एकामिति" श्रुतेरज्ञानसमष्ट्येकविष-यत्वमभ्युपगन्तव्यम् । ततश्चाज्ञाननानात्वे निश्चिते तदुपाधिका जीवाश्च नाना भवन्ति । एवञ्च शुकादीनां मोक्षेऽप्यस्मदादीनां संसारोपलम्भो न विरुध्यते ॥

नन्वज्ञानभेदेन जीवभेदाभ्युपगमे प्रतिजीवं प्रपञ्चभेद ईश्वरभेदश्च स्यात्। नचेष्टापत्तिः। योऽयं घटस्त्वयानुभूतः स एव मयापीति प्रत्यभिज्ञाविरोधप्रसङ्गात्। अन्याज्ञानकल्पितप्रपञ्चस्यान्यप्रत्यक्षाविषयत्वात्।

नच भ्रान्तित्वम्। बाधकाभावात्। एकः परमेश्वरः सकलजगत्सृष्टिस्थितिलयकारणमिति सर्वतन्त्रसिद्धान्तविरोधप्रसङ्गाच्च। अथैतद्दोषपरिजिहीर्षया समष्ट्यज्ञानोपहितचैतन्यमीश्वरः। तत्सृष्टः प्रपञ्चः सर्वसाधारण इत्यभ्युपगम्येत। तर्ह्यनिर्मोक्षः प्रसज्येत। तथाहि। निर्गुणब्रह्मभावापत्तिर्मोक्षः। एकस्य तत्त्वज्ञानेन सर्वाज्ञानानामनिवृत्तेरीश्वरजगतोरबाधेन निर्गुणब्रह्मप्राप्तेरसम्भवान्मोक्षो न स्यात्।

किञ्च। अद्वितीयब्रह्मज्ञानान्मोक्षोऽभ्युपगन्तव्यः। तच्चाद्वितीयब्रह्मज्ञानं नानाजीवपक्षे न सम्भवति। स्वव्यतिरिक्तजीवेश्वरजगतां विद्यमानत्वात्। ततश्चानिर्मोक्षः प्रसज्येत।

किञ्च। शास्त्रप्रामाण्यात् कथञ्चिज्ज्ञानान्मोक्षोपपादनेऽपि सगुणब्रह्मप्राप्तिर्मोक्षः स्यान्न निर्गुणब्रह्मप्राप्तिः तच्चानिष्टम्, "अनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कम्पश्येदि"त्यादिशास्त्रविरोधात्। तस्मादेकाज्ञानं स्वीकृत्य नानाजीववादोऽनुपपन्न इति॥

अत्रोच्यते, अज्ञानभेदेन जीवभेदोऽवश्यमभ्युपगन्तव्यः सर्वशास्त्रप्रामाण्यात्। नच जीवभेदेऽनेकप्रपञ्चेश्वरकल्पनापत्तिरिति वाच्यम्। इष्टापत्तेः। नच प्रत्यभिज्ञाविरोध स्तस्या भ्रमरूपत्वात्। तथाहि।

एकस्मिन् शुक्तिशकले दशानां पुरुषाणां रजतभ्रमे सति

स्वस्वाज्ञानकल्पितस्य रजतस्यान्योन्यभेदेऽपि अन्याज्ञानकल्पितस्य रजतस्यान्यप्रत्यभिज्ञाविषयत्वे[१]ऽपि त्वया यद्रजतमनुभूतं तदेव मयापीति यथा प्रत्यभिज्ञा भ्रमरूपा जायते, एवं प्रकृतेऽपि स्वस्वाज्ञानकल्पितप्रपञ्चस्य स्वस्वाज्ञानोपहितचैतन्यमीश्वर एक एवेति नानेकेश्वरकल्पनापत्तिः सर्वतन्त्रविरोधो वा ।

अथवा, व्यष्ट्यज्ञानोपहित चैतन्य जीवः समष्ट्यज्ञानोपहितचैतन्य-मीश्वरः। तत्सृष्टः प्रपञ्चः सर्वसाधारण. । एवञ्च न प्रत्यभिज्ञाविरोधो न शास्त्रविरोध । नापि कल्पनागौरवम् । नचानिर्मोक्षप्रसङ्गः स्वस्वश्रुत्याचार्य्यप्रसादेन ब्रह्मसाक्षात्कारेण स्वाज्ञाननिवृत्त्या तत्कार्य्य-लिङ्गशरीरादिनिवृत्ते. सम्भवात् । निर्गुणब्रह्मभावापत्तेरविरोधात् ।

ननु स्वव्यतिरिक्ताना जीवेश्वरजाताना[२] विद्यमानत्वेनाह मुक्तोऽन्यो बद्धोऽन्यः प्रपञ्चोऽन्य ईश्वर इति भेददृष्टेरानिवारणाद्-द्वितीयब्रह्मसाक्षात्काराभावेन कथ निर्गुणब्रह्मभावापत्तिर्मोक्ष इति चेन्न । एव"मिद सर्व यदयमात्मा वाचारम्भण विकारो नामधेय-मि"त्यादिशास्त्रैर्ज्ञानादिसमस्तजडजातस्य ब्रह्मण्यध्यस्तत्वावधारणेन मिथ्यात्वनिश्चयाद्द्वितीयब्रह्मसाक्षात्कारसम्भवेन ब्रह्मभावापत्तिर्मोक्ष उपपद्यते ।

नचाज्ञानेन[३] स्वज्ञाननिवृत्तावप्यन्याज्ञानानिवृत्त्या ब्रह्मण ईश्वरत्वानपायात् ज्ञानेन सगुणब्रह्मभावापत्तिरेव स्यादिति वाच्यम् ।

---

(१) क म, प्रत्यक्षाविषयत्वे पि पाठः ।

(२) म जन्मताम् पाठ ।

(३) क म नच ज्ञानेन स्वाज्ञान निवृत्ताविति पाठः ।

अन्ये तु कारणीभूताज्ञानोपहितं चैतन्यमीश्वरः। अन्तःकरणोपहितं चैतन्यं जीवः। कार्योपाधिरयं

अन्यज्ञानादन्यप्राप्तेरयोगात्। नहि शुक्तिज्ञानाद्रजतप्राप्तिः सम्भवति। किन्तु शुक्तिरेव प्राप्यते। एवं निर्गुणब्रह्मज्ञानान्निर्गुणं ब्रह्मैव प्राप्यते न सगुणं तस्य मायामयत्वात्। तथा शुक्तावन्यस्य रजतभ्रान्तिदशाया अन्यो विशेषदर्शी शुक्तिज्ञानाच्छुक्तिमेव प्राप्नोति न रजतं परमार्थतस्तत्राभावात्। अन्याज्ञानकल्पितस्य रजतस्यान्यप्रत्यक्षविषयत्वाभावाच्च। तथा ब्रह्मण्यज्ञानादीश्वरजगद्भ्रान्तिदशायां श्रुत्याचार्यप्रसादादन्यो विशेषदर्शीह ब्रह्मास्मीति अद्वितीयब्रह्मसाक्षात्कारानन्दैकरसमनिर्विशेषमद्वितीयं ब्रह्मैव प्राप्नोति न सगुणमीश्वरं तस्य मायामयत्वेन परमार्थतस्तद्व्यतिरेकेणाभावात्। नहि भ्रान्त्यज्ञानं पारमार्थिकं वस्तु भवति। तस्मात्साधारणासाधारणप्रपञ्चाभ्युपगमेऽपि निर्गुणब्रह्मभावापत्तिरूपो मोक्ष उपपद्यते। तस्मा"दिन्द्रो मायाभिः पुरुरूप ईयत" इत्यादिश्रुतिवशात् सर्वेषामहं ब्रह्म न जानामीति स्वस्वाज्ञानानुभववशादनेकान्यज्ञानानि ब्रह्मण्यारोपितानि तदुपाधिजीवाश्चेतरेतरविलक्षणाः। एवञ्च सति "रूपं रूपं प्रतिरूपो बभूव" इत्यादि श्रुतिः। अथातो ब्रह्मजिज्ञासेति शास्त्रमप्येतेतत्सर्वं सामञ्जस्येनोपपद्यते। तस्मान्नानाजीववाद इति॥ अथ समष्टिव्यष्ट्योरभेदात्तथाभ्युपगमात्तदुपहितयोरीश्वरप्राज्ञयोरपि तादात्म्यं द्रष्टव्यम्॥१८॥

मतान्तरमाह अन्ये त्विति। विक्षेपादिशक्तिप्राधान्येनाज्ञानस्य

जीवः। "कारणोपाधिरीश्वर" इति वचनादित्याहुः। सर्वथा मायोपहितं चैतन्यमीश्वरः स च ज्ञानशक्त्युपहितस्वरूपेण जगत्कर्त्ता विक्षेपादिशक्तिमदज्ञानोपहितस्वरूपेण जगदुपादानमूर्णनाभिवत्। "यथोर्णनाभिः सृजते गृह्यते चे"त्यादि श्रुतेः "यः सर्वज्ञः स विश्ववित् स हि सर्वस्य कर्त्ते"त्यादि श्रुतिभ्यश्च॥ १९॥

मायाशब्दवाच्यत्वाद्यथोक्तेषु पञ्चस्वपि पक्षेषु मायोपहितं चैतन्यं जगत्कारणमीश्वर इत्यर्थः(१)। सर्वसम्मत इत्युपसंहरति सर्वथापीति। अज्ञानैकत्वनानात्वाभ्यां प्रकारान्तरेण वा जीवैकत्वनानात्वयोर्विवादेऽपिमायोपहितं चैतन्यमीश्वर इत्यविवादमिति सूचयत्यपीति।

नन्वीश्वरे विवादाभावेऽपि जीवैकत्वनानात्वयोर्विवादसम्भवात्(२) किमुपादेयं किं हेयमिति शृणु। सर्वमुपादेयं सर्वं हेयं मायामयत्वात् व्यवहारस्य। तर्हि सर्वस्य हेयत्वमेव न तूपायदेयत्वमिति चेन्न। अध्यारोपापवादन्यायेन ब्रह्मणो ज्ञातव्यतया व्यवहारेण विना ब्रह्मज्ञानासम्भवात् तदुपादेयतया सर्वमुपादेयमभवत्येव। अयं विशेषः। जीवैकत्वे जीवनानात्वे वा यथा यस्य मनो रोचते स तथा तं पक्षं स्वीकृत्य प्रत्यगात्मानं विविच्य तस्य ब्रह्मत्वं साक्षात् कुर्यात् न तु तत्र विवदितव्यम्। दूषणभूषणयोः सर्वत्र तुल्यत्वात् प्रत्यगात्मप्रधानता येन प्रकारेण भवति तथा सम्पादनीयं स एव शास्त्रार्थः। तदुक्तम्। वार्त्तिककाराचार्यैः—

---

(१) क, ग, इत्युपमर्थः पाठः। (२) क, ग, सद्भावात् पाठ।

"यथा[१] यथा भवेत् पुंसां व्युत्पत्तिः प्रत्यगात्मनि ।
सा सैव प्रक्रियेह स्यात् साध्वी सा च[२] व्यवस्थितिरिति॥"

व्युत्पत्तिर्ज्ञानं तत्पदवाच्यार्थस्य मायोपहितस्येश्वरस्य जन्मादिकारणत्वमुक्तं तदुपादानत्वेन कर्तृत्वेन च द्वेधा भवति। तत्र केन रूपेणोपादानत्वं केन रूपेण कर्तृत्वस्येत्याकाङ्क्षायां तदुभयं क्रमेण दर्शयति सचेत्यादिना। ज्ञानेति। ज्ञानशक्तिमदज्ञानोपहितस्वरूपेणेत्यर्थः। अन्यथा शुद्धस्यासङ्गत्वेन कर्तृत्वायोगात्। कर्तृत्वन्नाम उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वं तच्च शुद्धे ब्रह्मणि न सम्भवति। "असङ्गो ह्ययं पुरुष" इत्यादिश्रुत्या ब्रह्मणोऽसङ्गत्वावगमेन ज्ञानेच्छाकृतीनां तस्मिन्नसम्भवात्। यथोक्तेश्वरस्यैव तदिति भावः॥

एकस्यैव ब्रह्मण उपादानत्वे कर्तृत्वे च दृष्टान्तमाह ऊर्णनाभीति। ब्रह्मणोऽभिन्ननिमित्तोपादानत्वे प्रमाणमाह यथेति। आदिशब्देन यथा पृथिव्यामोषधयः सम्भवन्ति। यथा सतः पुरुषात् केशलोमानि तथाक्षरात्सम्भवतीह विश्वं यथोर्णनाभिस्तन्तुनोपचरेत्। "यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः यथा सुदीप्तात्पावकाद्विस्फुलिङ्गा" इत्यादिवाक्यानि गृह्यन्ते॥

यथोक्तेश्वरस्यासर्वज्ञत्वे जगत्कर्तृत्वस्य असम्भवतीति ततः सर्वज्ञत्वं वक्तव्यं, तत्र प्रमाणमाह यः सर्वज्ञ इति। यः सर्वज्ञः स सर्वविद्यस्य ज्ञानमयं तपः तस्मादेतद्ब्रह्म नामरूपमन्नञ्च जायते। "एष सर्वज्ञ एष सर्वेश्वरः एषोऽन्तर्यामी एष योनिः सर्वस्य प्रभवाप्ययौ हि

(१) क, ख यथा यथा पाठः।
(२) क, ख चात्मवस्थितिः पाठः।

भूताना अह सर्वस्य प्रभवो मत सर्वं प्रवर्त्तते" इत्यादिश्रुति-स्मृतिभ्यश्च यथोक्त ईश्वर सर्वज्ञ सर्वशक्ति यथोक्तप्रकारेण जगत्कर्त्ता जगदुपादानञ्चेति योजना अयमेव मायोपहित परमेश्वरो ब्रह्म-विष्णुमहेशरूपताम्भजते । तथाहि ।

मायानिष्ठ निरतिशयसत्त्व त्रिमूर्त्त्याकारेण परिणमते परमेश्वरेच्छया लोकानुग्रहाय । तत्र दण्डकमण्डलुमन्मूर्त्त्युपहित सन् परमेश्वरो जगत्स्रष्टा ब्रह्मा भवति । शङ्खचक्रगदाम्बुजपाणिमूर्त्त्युपहित सन् परमेश्वरो जगद्गोप्ता विष्णुर्भवति । त्रिनेत्रशूलपाणिमूर्त्त्युपहित *सन् परमेश्वरो जगत्संहर्त्ता महेश्वरो भवति ।* '*स ब्रह्म स शिव* सेन्द्र सोऽचर परम स्वराड् स एव विष्णुरि त्यादि श्रुते ।

एकैव मूर्त्तिर्विभिदे त्रिधासौ
सामान्यमेषा प्रथमावरत्व ।
हरेर्हरस्तस्य हरि कदाचि-
द्धाता तयोस्तावपि धातुराद्यौ ॥

इत्यभियुक्तोक्तेश्च । अत्र स्वस्वभक्त्यनुसारेणोपास्या सर्व इति ।

अपरे तु स्रष्टा हिरण्यगर्भो जीव परमेश्वराविष्ट समष्टि-लिङ्गशरीराभिमानी सत्यलोकवासी शिवविष्णु मूर्त्तौ तु शुद्ध-सत्त्वपरिणामरूपे ।

रुद्रो नारायणश्चैवेत्येक सत्त्व द्विधा कृतम् ।
'*लोके चरति कौन्तेय ? व्यक्तिस्थ सर्वकर्मसु" ॥*

इति महाभारतवचनात ॥ तत्रापि विष्णुभक्तिर्मोक्ष प्रत्यन्तर-ङ्गसाधन शिवादिभक्तिरीषद्व्यवधानेन विष्णो सत्त्वप्रवर्त्तकत्वात् ।

"आरोग्य भास्करादिच्छेच्छ्रियमिच्छेद्धुताशनात् ।
ज्ञान महेश्वरादिच्छेन्मोक्षमिच्छेज्जनार्दनात्" ॥

इति पुराणवचनाच्च ।

"माञ्च योऽव्यभिचारेण भक्तियोगेन सेवते ।
स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते" ॥

इति भगवद्वचनाच्चेति वदन्ति ।

शैवास्तु मायोपहित पर एव चन्द्रकलावतस-नीलकण्ठत्रिनयनोमासमेत निरतिशय सत्त्व मूर्त्युपहित सन् परमशिवो भवति। स एव मुमुक्षुभिरुपास्य ।

उमासहाय परमेश्वर प्रभु
त्रिलोचन नीलकण्ठ प्रशान्तम् ।
ध्यात्वा मुनिर्गच्छति भूतयोनि
समस्तसाक्षिण तमस परस्तादिति श्रुते ॥

तस्यैव ब्रह्मविष्णुमहेश्वरा विभूतय । "स ब्रह्मा स शिव" इत्यादि श्रुते ।

"यस्याज्ञया जगत्स्रष्टा विरिञ्चि पालको हरि ।
संहर्त्ता कालरुद्राख्यो नमस्तस्मै पिनाकिने" ॥

इति वचनाच्चेति वर्णयन्ति ॥

वैष्णवास्तु मायोपाधिक परमात्मा शङ्खचक्रगदाम्बुजपाणिलक्ष्मीसमेत निरतिशयसत्त्वमूर्त्युपहित सन् परमवासुदेवो भवति, स एव मुमुक्षुभिरुपास्य तस्य त्रिमूर्त्तयो विभूतय ।

एवम्पूर्वोक्तादीश्वरादाकाश उत्पद्यते, "आकाशाद्वायुर्वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी च तस्माद्वा एतस्मादात्मनः आकाशः सम्भूतः" इत्यादिश्रुतेः। मायायाः सत्त्वरजस्तमोगुणात्मकत्वात्, तत्कार्य्याण्याकाशादीन्यपि सत्त्वरजस्तमोगुणात्मकानि अपञ्चीकृतानि सूक्ष्मभूतानीति च वर्णयन्ति ॥ २० ॥

"वेदाहमेतं पुरुषं महान्त-
मादित्यवर्णं तमसः परस्तात् ।
तमेव विद्वानमृत इह भवति
नान्यः पन्था विद्यतेऽयनाय ॥

"स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराड्"इत्यादित्यादिश्रुतेः । "मोक्षमिच्छेज्जनार्दना"दिति वचनाच्चेति मन्यन्ते ॥

हैरण्यगर्भास्तु, श्रुतिस्मृतिवादानां बहूनां सत्त्वाद्धिरण्यगर्भं मुमुक्षुभिरुपास्यं प्राहुः । शैवादिपक्षे मूर्त्तित्रयातिरिक्त-मूर्त्तिकल्पनायां प्रमाणविरहम् । उदाहृतश्रुतीनामर्थान्तरत्वोपपत्तेः ॥१९॥

ब्रह्मणोमायोपहितस्य सृष्टिस्थितिलयकारणत्वं तटस्थलक्षणमुक्तं तदेव प्रपञ्चयन् वियत्पादोक्तन्यायेन सृष्टिक्रममाह एवमिति। पूर्वोक्तादिति । विक्षेपादिशक्तिप्रधानमायोपहितादीश्वरादित्यर्थः ।

अथायमुक्रमः, संहरिष्यमाण प्राणिकर्मवशात् परमेश्वर इदमिदानीं स्रष्टव्यमितीक्षते । तत ईक्षितुः परमेश्वरादाकाश उत्पद्यते आकाशाद्वायुस्ततोऽग्निस्तत आपस्ततः पृथिवीचेति ।

एवं माकाशादीनामपि सर्वत्र कार्य्योपलब्ध्या विभुत्वेन निरवयवद्रव्यतयोत्पत्तिविनाशकारणाभावात्तच्छून्यतयाऽनादित्वं नित्यत्वञ्च।

नचोत्पत्तिश्रुतेराकाशस्यानादित्वं कथमिति वाच्यम्, प्रमाणान्तरविरोधे तस्य गौणत्वोपपत्तेः, तथाच, पारमर्षं सूत्रं गौण्यसम्भवादिति। एवं मनसोऽपीति।

अत्रेदञ्चिन्त्यम्, शक्तिसादृश्यादीनां बहूनां पदार्थानां विद्यमानत्वेन षट्पदार्था न सम्भवन्ति। नच शक्तिसादृश्यसद्भावे मानाभाव इति वाच्यम्, करतलामलसंयोगे सति मण्यादिसमवधाने दाहानुत्पत्त्या 'तदपनये दाहोत्पत्त्या' वह्नौ दाहानुकूलशक्तिविनाशोत्पत्त्योरावश्यकत्वेन शक्तिसिद्धेः।

नच प्रतिबन्धकाभावेन दाहोत्पत्त्युपपत्तौ कथं शक्तिसिद्धिरिति वाच्यम्, प्रतिबन्धकाभावस्य दाहकारणत्वे मानाभावात्, तदन्वयव्यतिरेकयोः कार्य्यानुत्पादस्याग्रिमसमयसम्बन्धसम्पादकत्वेनान्यथासद्धत्वाच्च। "कथमसतः सज्जायेते"ति श्रुत्या "नासतोऽदृष्टत्वादि"ति न्यायेन चाभावकारणत्वस्य निराकृतत्वाच्च। तस्मात्कारणे कार्य्यानुकूलशक्तिरभ्युपगन्तव्या।

एवं चन्द्रवन्मुख-मित्याद्यनुभवात् सादृश्यसिद्धिस्तस्मात्पदार्थानामनन्यात् द्रव्यादयः षट्पदार्था इत्यसङ्गतम्।

किञ्च, द्रव्यादि चतुर्विंशत्यसङ्गतम्, अन्धकारस्य दशमद्रव्यत्वात्। नचान्धकारस्यालोकाभावतया कथं द्रव्यत्वमिति वाच्यम्। प्रतियोगिनिरपेक्षतया प्रतीयमानस्याभावत्वकल्पनायां मानाभा-

वात्। नीलन्तमश्चन्तीत्यादिप्रत्यक्षप्रतीत्या रूपादिमत्त्वेन तस्य द्रव्यत्वोपपत्तेश्च। तस्मात् द्रव्याणि नवैवेत्यनुपपन्नम्।

किञ्च, आत्मनः श्रुतिस्मृतिविद्वदनुभवैर्निर्गुणत्वमचिदानन्दस्वरूपत्वावगमेन, गुणाश्रयत्वेन समवायिकारणत्वेन वा द्रव्यत्वकल्पनायां मानाभावात्।

नचात्मनोऽद्रव्यत्वे गुणादिवत्परत(१)न्त्रत्वापत्तिरिति वाच्यम्। तस्य सर्वकल्पनाधिष्ठानतया सर्वप्रेरकत्वेन च स्वातन्त्र्योपपत्तेः। कुतः पारतन्त्र्यमतोऽपि द्रव्याणि नवैवेत्यनुपपन्नम्। "अतोऽन्यदार्त्तमि"-त्यादिश्रुत्या ब्रह्मभिन्नस्य सर्वस्यानित्यत्वात् कथमाकाशादीनां नित्यत्वम्। नच (२)तस्योपचरितार्थत्वं प्रमाणान्तराविरोधात्। तथाहि।

न तावदाकाशादीनामार्त्तत्वे प्रत्यक्षविरोधस्तेषामतीन्द्रियत्वात्। नाप्याकाशं नित्यं निरवयवद्रव्यत्वात्। आत्मवदित्यनुमानविरोध इति वाच्यम्। असिद्धत्वात्।

नच विभुत्वेननिरवयवत्वसिद्धिरिति वाच्यम्। तस्यानिर्वचनात्। न तावत्सकलमूर्त्तद्रव्यसंयोगित्वं विभुत्वं संयोगस्याव्याप्यवृत्तितया सावयवनिरवयवयोस्तदसम्भवात्। नापि परममहत्परिमाणवत्त्वं विभुत्वं परममहत्परिमाणस्यानिरूपणात्।

सर्वेयत्ता नवच्छिन्नपरिमाणत्वम्परममहत्त्वम्, तथात्वे मानाभावात्। नच सर्वत्र कार्योपलम्भिरेवमानमिति वाच्यम्। तर्हि यत्र कदापि कार्यं नोपलभ्येत्, तत्र तदसिद्धा विभुत्वासिद्धिः। नाणु-

(१) क ग, पारतन्त्र्यापत्ति रिति पाठः। (२) ग, तस्या उपचरितेति पाठः।

पमानविरोधः नित्यत्वाभावेऽपि तत्सम्भवात्। नाप्यागमविरोधः वादिवाक्यस्याप्रमाणत्वात्, श्रुतिस्त्वनित्यत्वमेव बोधयति।

नच विनाशकारणानिरूपणात्कथं तदुपपद्यत इति वाच्यम्। उपादानकारणनाशादेव तन्नाशोपपत्तेः॥

किं तदुपादानमिति चेत्परिणाम्युपादानमज्ञानम्, विवर्त्तोपादानम्ब्रह्म। तत्र ब्रह्मणो नित्यत्वेऽपि "ज्ञानेनाज्ञाननिवृत्त्या तन्निवृत्तिरुपपद्यत" इत्यार्त्तश्रुतेर्मानान्तराविरोधादुपचरितार्थत्वाभावेनाकाशादीनामनित्यत्वम्।

एतेनाकाशादीनां समवायिकारणासमवायिकारणानिरूपणादनादित्वमित्यपास्तम्। समवायासिद्ध्यासमवायिकारणासमवायिकारणपरिभाषाया अप्रामाणिकत्वात्। कुतस्तर्हि कार्य्योत्पत्तिरिति चेदुपादानकारणनिमित्तकारणाभ्यां ते च निरूपयिष्येते। समवायासम्भवो वक्ष्यते। एतेन परमाणूनामप्युत्पत्तिविनाशकारणानिरूपणादनादित्वमित्यापास्तम्, सूक्ष्मभूतातिरिक्तपरमाणुसद्भावे मानाभावात्। नचानुमानात्तत्सिद्धिरिवाच्यम्, तर्हि तत एव परमाणूनां सावयवत्वप्रसङ्गात्। नचानवस्थाभ[1]यात्तदसिद्धिरिति वाच्यम्। परमकारणे विश्रान्तिसम्भवेनानवस्थापरिहारात्। नच मेरुसर्षपयोस्तुल्यपरिमाणत्वप्रसङ्गोऽनन्तावयवारब्धत्वाविशेषादिति वाच्यम्। अप्रयोजकत्वात्। किञ्च,

रूपादिमत्त्वात् परच्छिन्नत्वाच परमाणूनां सावयवत्वमनित्यत्वमभ्युपगन्तव्यं घटादीनां रूपादिमतां तथा दर्शनात्। किञ्च,

---

(१) क, ख, भियेति पाठः।

संयुक्ताभ्यां परमाणुभ्यां द्व्यणुकोत्पत्तिर्वाच्या । सानुपपन्ना तत्संयोगाऽयोगात् परमाणूनां निरवयवत्वाभ्युपगमात्संयोगो न भवति तस्याव्याप्यवृत्तित्वात् । नहि निःप्रदेशे संयोगतदभावौ सम्भवतः। असबद्वानान्दिग्भागमनवच्छेदकत्वात्तत्सम्बन्धानिरूपणाच्च । तस्मात्परमाणुभ्यां द्व्यणुकमुत्पद्यते इत्यसङ्गतम् ।

अपिच येनाश्रुतं श्रुतम्भवत्यमतं मतमविज्ञातं विज्ञातमित्येकविज्ञानेन सर्वविज्ञानं प्रतिज्ञातम् । तच्च ब्रह्मभिन्नस्याकाशादित्वे नित्यत्वे बाधितं स्यात् । नच तदिष्टं मृदादिदृष्टान्तेन कार्य्यस्य कारणादव्यतिरेकेण तदुपपादनमनर्थकं स्यात्तस्मात् ब्रह्मभिन्नं सर्वमुत्पद्यते विलीयते चेति श्लिष्टतरम् ।

अस्तु तर्हि प्रधानान्महदादिक्रमेण प्रपञ्चोत्पत्तिरिति चेन्न, प्रधानस्याप्रामाणिकत्वेन जगदुपादानत्वायोगात् ।

ननु स्मृतिसिद्धत्वात् कथमप्रामाणिकत्वमिति चेन्न, श्रुतिविरोधे स्मृतेरप्रामाणिकत्वात् । तस्मादाम्नायोपदिष्टाद्ब्रह्मण आकाशादिक्रमेण प्रपञ्चोत्पत्तिरिति सर्वैरभ्युपगन्तव्यम् । अन्यथा श्रुतेरप्रामाण्यप्रसङ्गात् । नच तदिष्टम्, अध्ययनविधिपरिगृहीतस्याक्षरमात्रस्यानर्थक्यायोगात् । तस्मात् ब्रह्मण एवाकाशादिक्रमेण जगदुत्पद्यते इत्यनवद्यम् । आकाशादिभ्यः सूक्ष्मशरीरोत्पत्तिं वक्तुं "कारणगुणा हि कार्य्यगुणानारभन्त" इति न्यायेन भूतकारणस्याज्ञानस्य सत्त्वरजस्तमोगुणात्मकत्वेन तत्कार्य्याणामाकाशादीनामपि सत्त्वरजस्तमोगुणात्मकत्वं व्यवहारायोग्यत्वात् । सूक्ष्मभूतत्वं पञ्चीकरणाभावादपञ्चीकृतत्वमित्याह मायाया इति । वर्णयन्ति वेदान्तविद इति शेषः ॥२०॥

एतेभ्यः सूक्ष्मभूतेभ्यः स्थूलभूतानि सूक्ष्मशरीराणि च सप्तदशलिङ्गात्मकानि जायन्ते। सप्तदशलिङ्गानि तु ज्ञानेन्द्रियाणि पञ्च, कर्मेन्द्रियाणि पञ्च, मनो बुद्धिः पञ्च प्राणाश्चेति ॥ २१ ॥

एतेभ्यः सूक्ष्मभूतेभ्यः सूक्ष्मशरीराणां स्थूलभूतानाञ्चोत्पत्तिमाह एतेभ्य इति। लिङ्गानि गणयति। सप्तदशेति। श्रोत्रत्वक्चक्षूरसनघ्राणाख्यानि ज्ञानेन्द्रियाणि। वाक्पाणिपादपायूपस्थाख्यानि कर्मेन्द्रियाणि। तत्र शब्दोपलब्धिसाधनमिन्द्रियं श्रोत्रम्। स्पर्शोपलब्धिसाधनमिन्द्रियं त्वक्, रूपोपलब्धिसाधनमिन्द्रियं चक्षुः। रसास्वादोपलब्धिसाधनमिन्द्रियं रसनम्। गन्धोपलब्धिसाधनमिन्द्रियं घ्राणम्। वचनक्रियासाधनमिन्द्रियं वाक्, आदानक्रियासाधनमिन्द्रियं पाणी, गमनक्रियासाधनमिन्द्रियं पादौ, विसर्गक्रियासाधनमिन्द्रियं पायुः, सुखक्रियासाधनमिन्द्रियमुपस्थः, सुखञ्च स्वानुकूलसाक्षात्कारप्रमिति क्रियान्यतरकरणमतीन्द्रियमिन्द्रियम्। आलोकादावतिव्याप्तिवारणायातीन्द्रियमित्युक्तम्। अतीन्द्रियत्वं नाम संयोगादिप्रत्यासत्तिजन्यसाक्षात्कारविषयत्वम्।

न च, वस्तुमात्रस्यालौकिकं साक्षात्कारविषयत्वादसम्भव इति वाच्यम्। अलौकिकसाक्षात्कारस्यानङ्गीकारात्, सामान्यज्ञानयोगजधर्म्माणां प्रत्यासत्तित्वे मानाभावेनातिप्रसङ्गेन च तज्जन्यसाक्षात्कारविषयस्यासम्भवात्।

न च तर्हि साक्षात्काराविषयत्वमतीन्द्रियत्वमस्तु किं अन्यान्येन

तथाच आकाशादिसात्त्विकांशेभ्यो व्यस्तेभ्यो ज्ञानेन्द्रियाणि उत्पद्यन्ते।

"आकाशसात्त्विकांशात् श्रोत्रमुत्पद्यते,
वायोः सात्त्विकांशात् त्वगिन्द्रियम्। तेजसः
सात्त्विकांशाच्चक्षुः, अपां सात्त्विकांशाद्रसनं
पृथिवी सात्त्विकांशात् घ्राणं श्रोत्रमाकाशः" ॥

इत्यादि श्रुतेः। आकाशादीनां सात्त्विकांशेभ्यो मिलितेभ्यो ऽन्तःकरणमुत्पद्यते। २२ ॥

चेति[1] वाच्यम्। सर्वस्य वस्तुनो ज्ञाततयाऽज्ञाततया वा साक्षिभास्यत्वेन साक्षिणो नित्यापरोक्षत्वेनासम्भववारणार्थत्वात्। धर्म्मादावतिव्याप्तिवारणायाद्यविशेषणम्। अनुमित्यादिकरणेऽतिव्याप्तिवारणाय साक्षादित्युक्तम्। स्वाकारवृत्त्युपहिताबाधितयोग्यवर्त्तमानविषयचैतन्याभिन्नत्वं प्रमितेः साक्षात्त्वम्। एतच्चाग्रे व्युत्पादयिष्यते। मनसि चित्तस्य बुद्धावहङ्कारस्यान्तर्भावं मत्वा बुद्धिमनसोर्ग्रहणम्। प्राणापानव्यानोदानसमानाः पञ्च प्राणास्तेषां लक्षणमनुपदमेव वक्ष्यति ॥ २१ ॥

सप्तदशलिङ्गानामुत्पत्तिक्रममाह तथाचेति। व्यस्तेभ्यः प्रातिस्विकेभ्यो ज्ञानकरणानीन्द्रियाणि ज्ञानेन्द्रियाणि, ज्ञानस्य सत्त्वपरिणामत्वात्तत्करणानामिन्द्रियाणां सात्त्विकांशकार्य्यत्वमुपपद्यते। तत्र कस्मात्किमुत्पन्नमित्याकाङ्क्षायामाह आकाशेति। श्रोत्रस्य शब्दग्राहकत्वेन शब्दगुणकत्वादाकाशसात्त्विकांशादुत्पत्तिः। यदिन्द्रियं

---

(१) क, ख, पुस्तके-चकारो नास्ति।

रूपादिषु पञ्चसु मध्ये यं गुणङ्गृह्णाति तदिन्द्रियं तद्गुणकमिति व्याप्तेः। अन्यथा शब्दग्राहकत्वमेव न स्यात्। एवं त्वगादीनामपि वाय्वादिसात्त्विकांशकार्य्यत्वं द्रष्टव्यम्। तत्र श्रुतिं प्रमाणयति श्रोत्रमिति। आदिशब्देन

"वायौ त्वक् अग्नौ चक्षुरप्सु जिह्वा पृथिव्यां घ्राणमिति गृह्यते"।

अस्यार्थः आकाशे यः सात्त्विकांशस्तस्माच्छ्रोत्रमुत्पद्यत इति पर्य्यायान्तरेष्वपि योजनीयम्, अन्तःकरणस्य श्रोत्रादिद्वारा शब्दादिसर्वविषयग्राह-कत्वात्सर्वात्मकत्वं वक्तव्यमित्याकाङ्क्षायामाकाशादिसात्त्विकांशसमुदायादुत्पत्तिमाह आकाशादीनामिति।

अत्र साङ्ख्या मन्यन्ते

"त्रिविधमन्तःकरणं बुद्धिरहङ्कारोमनश्चेति"

तत्र प्रकृते र्बुद्धिरुत्पद्यते महत्तत्त्वापरपर्य्याया। ततोऽहङ्कारः। सच त्रिविधः सत्त्वरजस्तमोगुणभेदात्। तत्र सात्त्विकाहङ्कारादेकादशेन्द्रियाण्युत्पद्यन्ते, तामसाहङ्कारात्पञ्चतन्मात्राणि रजसाहङ्कारोऽनयोः प्रवर्त्तकत्वेन सहकारी पञ्चतन्मात्रेभ्यः पञ्चमहाभूतानि। तदुक्तम्।

"मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः।

सप्तषोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुष" इति।

अस्यार्थः सत्त्वरजस्तमोगुणानां साम्यावस्था प्रकृतिः सा जगतोमूलकारणं न कस्यापि विकृतिर्भवति महदहङ्कारपञ्चतन्मात्राणि सप्तप्रकृतयो विकृतयश्च भवन्ति। मूलप्रकृत्यपेक्षया महत्तत्त्वं विकृतिः कार्य्यमिति यावत्। अहङ्कारापेक्षया प्रकृतिरुपादानकारणमिति यावत्। एवमहङ्कारोऽपि महत्तत्त्वापेक्षया विकृतिः, इन्द्रियपञ्च-

तन्मात्रापेक्षया प्रकृतिः। एवं पञ्चतन्मात्राण्यहङ्कारापेक्षया विकृतयः। सूक्ष्मभूतापेक्षया प्रकृतयश्च भवन्ति। एकादशेन्द्रियाणि पञ्चमहाभूतानि षोडशविकारा एव असङ्गत्वात्पुरुषो नोभयमिति, तच्चिन्त्यम्। सूत्रकृता "ईक्षतेर्नाशब्द"मित्यादिना ऽशब्दतया ऽप्रमाणिकत्वेन प्रधानवादस्य दूषितत्वात्।

"अन्नमयं हि सौम्य? मनः आपो-
मयः प्राणस्तेजोमयी वागिति"

श्रुत्यान्तःकरणप्राणेन्द्रियाणां भौतिकत्वावगमाच्च।

ननु ब्रह्मणो ऽसङ्गत्वेन श्रुत्या वा तस्य जगदुपादानत्वं कथं प्रतिपाद्यते विरोधादिति चेत्सत्यम्। शुद्धस्यासम्भवेऽपि मायोपहितस्य तत्सम्भवादेतच्च प्रागेव प्रतिपादितम्। एतेन "निरवयवमणु नित्यं मन" इति नैयायिकमतं प्रत्युक्तम्। अद्वैतश्रुतिविरोधापत्तेः।

"एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च"

ति श्रुतौ मनस उत्पत्तिश्रवणाद्विकार्यस्यानित्यत्वाच्च।

किञ्च। "यन्मूर्त्तं तत्परिच्छिन्नं यत्परिच्छिन्नं तत्सावयवं तदनित्य"मितिनियमेन मनसो मूर्त्तत्वाभ्युपगमेन सावयवत्वमनित्यत्वञ्च स्यादेव। अपिच मनसोऽणुत्वे तत्संयोगजन्यसुखस्य तावन्मात्रप्रसङ्गेन सर्वाङ्गव्यापि सुखं न स्यात्। तथाच,

"पादे मे वेदना शिरसि मे सुख"मिति।

युगपत् सुखदुःखानुभवो न स्यात् मनसोऽणुत्वेनोभयत्र संयोगाऽभवात् एतेन मनसो विभुत्वं प्रत्युक्तम् ॥२२॥

तत्सङ्कल्पविकल्पनिश्चयाभिमानानुसन्धानरूपवृत्तिभेदाच्चतुर्विधम्॥

"मनो बुद्धिरहङ्कारश्चित्तञ्चेति चतुर्विधम्।
सङ्कल्पाख्यं मनोरूपं बुद्धिर्निश्चयरूपिणी॥
अभिमानात्मकस्तद्वदहङ्कारः प्रकीर्त्तितः।
अनुसन्धानरूपञ्च चित्तमित्यभिधीयते"॥

इति वार्त्तिकवचनात्। पूर्वोक्ताकाशादिराजसांशेभ्यो व्यस्तेभ्यः कर्मेन्द्रियाण्युत्पद्यन्ते। आकाशराजसांशाद्वागिन्द्रियमुत्पद्यते, वायोराजसांशाद्धस्तौ, तेजसोराजसांशात्पादौ, अपां राजसांशात्पायुः, पृथिवीराजसांशादुपस्थः, आकाशादिराजसांशेभ्योमिलितेभ्यः प्राण उत्पद्यते, सोऽपि वृत्तिभेदात्पञ्चविधः।

तस्माच्चावयवमन्तःकरणमुत्पद्यते इति सिद्धं तद्विभजते तदिति। तत्र पञ्चीकरणवार्त्तिकमुदाहरति मन इति। कर्मेन्द्रियाणामुत्पत्तिमाह पूर्वोक्तेति-वचनादिक्रियाकर्मतत्करणानीन्द्रियाणि कर्मेन्द्रियाणि अपामिति।

केचित्तु। अपां राजसांशादुपस्थमुत्पद्यते, पृथिवीराजसांशात् पायुः "अग्निरथापः प्रतिष्ठिता इति रेतसो"ऽपि श्रुतेरिति वदन्ति॥

प्राणोत्पत्तिं वृत्तिभेदात्तद्भेदं तदवच्छेदाह आकाशेति। तत्र प्राणमाह वाक् पाणीति। आदिशब्देन

"एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चे-"

परागगमनवान्नासाग्रवर्त्ती प्राणः, अर्वाग्गमनवान् पाय्वादिस्थानवर्त्त्यपानः, विष्वग्गमनवान् सर्वशरीरवर्त्ती व्यानः, ऊर्द्ध्वगमनवान् कण्ठवर्त्त्युदानः, अशितपीतान्नपानादिसमीकरणकर्त्ताऽखिलशरीरवर्त्ती समानः;

"वाक् पाणिपादपायूपस्थाख्यानि
कर्मेन्द्रियाणि तेषां क्रमेणे-"

त्यादि श्रुतेः ॥ २३ ॥

त्यादिवाक्यं गृह्यते। तथा पद्मपुराणे शिवगीतायामपि सूक्ष्मभूतेभ्यः सप्तदशलिङ्गानामुत्पत्तिक्रमोदर्शितः।

"व्योमादिसात्त्विकांशेभ्यो जायन्ते धीन्द्रियाणि तु।
व्योम्नः श्रोत्रं भुवोघ्राणं जलाज्जिह्वाथ तेजसः॥
चक्षुर्वायोस्त्वगुत्पन्ना तेषां भौतिकता ततः।
व्योमादीनां समस्तानां सात्त्विकांशेभ्य एव च॥
जायेते बुद्धिमनसी बुद्धिः स्यान्निश्चयात्मिका।
वाक्पाणिपादपायूपस्थांश्च कर्मेन्द्रियाणि तु॥
व्योमादीनां रजोऽंशेभ्यो जायन्ते तान्यनुक्रमात्।
समस्तेभ्यो रजोऽंशेभ्यः पञ्चप्राणास्ततः परम्॥
जायन्ते सप्तदशकमेवं लिङ्गं शरीरकमिति।

नागकूर्मकृकलदेवदत्तधनञ्जयाख्याः पञ्च अन्ये वायवः सन्ति। नाग उद्गीर्णकरः, कूर्म उन्मिलनकरः, कृकलः क्षुत्करः, देवदत्तो जृम्भणकरः, धनञ्जयः पोषणकर इति वदन्ति। वेदान्तिनस्तु तेषां पृथक्कल्पनागौरवाच्छ्रुत्यादिप्रमाणाभावाच्च प्राणादिष्वन्तर्भावं वदन्ति॥ २३॥

अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयकोशाः पञ्चात्रैवान्तर्भवन्ति। वक्ष्यमाणं स्थूलशरीरमन्नमयः कोशः। उक्तम्,

"सूक्ष्मशरीरं कोश त्रयात्मकं कर्मेन्द्रियैः
सहितः प्राणः प्राणमयकोशः कर्मेन्द्रियैः
सहितो मनो मनोमयकोशः ज्ञानेन्द्रियैः
सहिता बुद्धिर्वि-ज्ञानमयकोशः अयमेव
कर्तृत्वोपाधि, र्विज्ञानं यज्ञं तनुते"॥

इत्यादि श्रुतेः। अन्तःकरणस्य सत्त्ववृत्तिर्द्विविधा निश्चयवृत्तिः सुखाकारा वृत्तिश्चेति। निश्चयवृत्तिमदन्तःकरणम्बुद्धिरित्युच्यते। सुखाकारवृत्तिमदन्तःकरणभोक्तृत्वोपाधिः।

तैत्तरीयश्रुत्युक्तानाङ्कार्य्यकारणरूपाणां पञ्चकोशानां स्थूलसूक्ष्मकारणोपाधिष्वन्तर्भावमाह अन्नमयेति। अन्नमयं कोशं व्युत्पादयति वक्ष्यमाणेति। अस्मदादिस्थूलशरीरं कार्य्यान्नमयकोशः(१), विराट् स्थूलशरीरं कारणान्नमयकोशः(२), उभयमेकीकृत्य निर्दिशति स्थूलशरीरमिति। प्राणमयकोशं व्युत्पादयितुमुक्तसूक्ष्मशरीरकोशत्रयमन्तर्भूतमित्याह उक्तमिति। समष्टिव्यष्टिकोशानेकीकृत्य तानेव कोशाननुक्रामति कर्मेति। अयं विज्ञानमयः(३) कोशः,

---

(१) क, ग, कार्य्यान्नमय कोश इति पाठः।
(२) क ग, कारणान्नमय कोश इति पाठः।
(३) क, ग विज्ञानमयकोश इति पाठः।

"तस्य प्रियमेव शिरो, मोदो दक्षिणः पक्षः, प्रमोद उत्तरपक्ष, आनन्द आत्मा, ब्रह्मपुच्छं प्रतिष्ठा" ॥ इत्यादि श्रुतेः। अयमेव कारणपर्य्यन्त आनन्दमयकोश' केचित्त्वज्ञानमानन्दमयकोशं वदन्ति ॥ २४ ॥

इदं सूक्ष्मशरीरं सप्तदशलिङ्गं द्विविधं समष्टिव्यष्टि-भेदात्। अपञ्चीकृतपञ्चमहाभूतानि तत्कार्य्यंसप्त दशलिङ्गं समष्टिरित्युच्यते। एतदुपहितं चैतन्यं हिरण्यगर्भ इत्युच्यते। प्राणः सूत्रात्मेति च, ज्ञानक्रियाश

तस्य कर्त्तृत्वोपाधित्वे प्रमाणमाह विज्ञानमिति। आनन्दमयकोश व्युत्पादयितु मत्त्ववृत्ति विभजते अन्त करणस्येति। तत किमित्यत आह निश्चयवृत्तिमदिति। तस्य विज्ञानमयकोशत्वात्। तदुपाधिको जीव कर्त्ता ज्ञाता प्रमातेति चोच्यते(१)। सुखाकारवृत्तिमदन्त करणस्य भोक्तृत्वोपाधित्वे प्रमाणमाह तस्येति। अयम्भोक्तृत्वोपाधि कारणपर्य्यन्त अज्ञानपर्य्यन्त आनन्दमयकोशोपाधिकश्चिदात्मा भोक्तेत्युच्यते इति भाव। पक्षान्तरमाह केचित्त्विति। अय पक्षश्चिन्तनीय ॥२४॥

पञ्चकोशान्व्युत्पाद्य सूक्ष्मशरीर विभजते इदमिति।. समष्टि व्युत्पादयति अपञ्चीकृतेति। समष्टिसूक्ष्मशरीरोपाधिकश्चिदात्मा सूत्रादिसञ्ज्ञो भवतीत्याह एतदिति। हिरण्यगर्भप्राणसूत्रशब्दानां तद्वाचकत्वे क्रमेण प्रवृत्तिनिमित्तमाह ज्ञानेति। ज्ञानस्य क्रिया च

---

(१) क ग इत्यत्र इत्यधिक।

क्तिमदुपहितत्वात्, व्यापित्वाच्च। अथवा पूर्वोक्तापञ्चीकृतभूतेभ्यः सर्वव्यापकं लिङ्गशरीरं पृथगेवोत्पन्नं तदेव समष्टिरित्युच्यते। समष्टित्वन्नाम गोत्वादिवत्सर्वच व्यष्टिष्वनुस्यूतत्वम्। तदुक्तम्,

"तेभ्यः समभवत्सूत्रं लिङ्गं सर्वात्मकं महदि"ति।

केचित्तु वनवत् लिङ्गशरीरसमुदायः समष्टिरिति वदन्ति। प्रत्येकं लिङ्गशरीरं व्यष्टिरित्युच्यते। व्यष्टित्वन्नाम व्यक्तिवत् व्यावृत्तत्वम्। एतदुपहितञ्चैतन्यं तैजस इत्युच्यते। तेजोमयान्तःकरणोपाधित्वात् ॥ २५॥

ज्ञानक्रिये तयोः शक्ति ज्ञानक्रियाशक्तिः "द्वन्द्वान्ते श्रूयमाणः शक्तिशब्दः प्रत्येकमभिसम्बध्यते" तथाच ज्ञानशक्तिः क्रियाशक्तिश्चेत्ये-ते यस्य तत् ज्ञानक्रियाशक्तिमत् सूक्ष्मशरीरं तदुपाधिकत्वादित्यर्थः। पक्षान्तरमाह अथवेति। किं तत् समष्टित्वं तत्राह समष्टित्वन्नामेति। उक्तार्थे सम्मति-माह तदुक्तमिति। तेभ्योऽपञ्चीकृतपञ्चभूतेभ्यः सर्वात्मकं सर्वव्यापकं परमात्मनो गमकत्वाल्लिङ्गमिदमेव शास्त्रैर्महत्त्वमित्युच्यते इत्यभिप्रेत्याह महदिति। पक्षान्तरमाह केचित्त्विति। अयमपि[1] चिन्त्यः व्यष्टिस्वरूपं व्युत्पादयति प्रत्येकमिति। व्यष्टित्वं निर्व्यक्तिव्यष्टित्वं नामेति। अस्तु ततः किं तत्राह एतदुपहितमिति। तत्र प्रवृत्तिनिमित्तमाह तेजोमयेति। तेजोमयं तेजोविकारोयदन्तःकरणं तदेवोपाधिर्यस्य स तथोक्तः तस्य भावस्तत्त्वं तस्मादित्यर्थः ॥२५॥

(१) क. पुस्तके-चय पाठो न।

सामान्यविशेषयोरिव जातिव्यक्त्योरिव च समष्टिव्यष्ट्योस्तादात्म्याभ्युपगमात्तदुपहितयोस्तैजससूत्रात्मनोरपि तादात्म्यं एतदेव सूक्ष्मशरीरम्, अविद्याकामकर्मसहितं पुर्य्यष्टकमित्युच्यते। ज्ञानेन्द्रियपञ्चकं कर्म्मेन्द्रियपञ्चकम्, अन्तःकरणचतुष्टयं प्राणादिपञ्चकं भूतसूक्ष्मपञ्चकम्, अविद्या कामः कर्म्मचैतान्यष्टौ[1]। तत्र कार्य्या विद्या द्रष्टव्या ॥ २६ ॥

समष्ट्युपाधिकहिरण्यगर्भज्ञानं व्यष्ट्युपाधिकतैजसज्ञानञ्च निष्प्रयोजनं सुखप्राप्तिदुःखनिवृत्त्योरसम्भवादित्याशङ्क्य सूत्रतैजसात्मनोरभेदोपासनया हिरण्यगर्भप्राप्तिफलसम्भवात्तज्ज्ञानस्य न निष्प्रयोजनत्वमित्यभिप्रेत्य तदनुसन्धानोपयोगित्वेन सदृष्टान्तं समष्टिव्यष्ट्योस्तादात्म्यप्रतिपादनेन तदुपहितयोरपि तादात्म्यं प्रतिपादयति सामान्यविशेषयोरिवेति। द्रव्यत्वादिसामान्यं पृथिवीजलादिर्विशेषः सत्ता सामान्यं द्रव्यं[2] गुणादिर्वा विशेषः घटत्वादिर्जातिः पृथुबुध्नोदराकारघटादिर्व्यक्तिः। ततश्च यथा सामान्यविशेषयोस्तादात्म्यं सर्वैरभ्युपेयते, जातिव्यक्त्योर्वा तथा समष्टिव्यष्टिसूक्ष्मशरीरयोस्तादात्म्यमभ्युपेयतेऽस्माभिः ॥

ननु जातिव्यक्त्योर्वैशेषिकादिभिः समवायाभ्युपगमात्कथं तद्दृष्टा-

---

(१) क अयमपि चिन्त्य इत्यधिकः पाठः।

(२) ख, सत्ता सामान्यं द्रव्यमिति पाठः।

न्तेन समष्टिव्यष्ट्योस्तादात्म्याभ्युपगम इति चेन्न, समवायासिद्धेः। तथाहि, लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति न्यायविदां समयः तद्-भावात्तदसिद्धिः।

ननु नित्यसम्बन्धत्वं समवायलक्षणं प्रत्यक्षादीनि प्रमाणानीति चेत्यभ्युपगमात्कथं तदसिद्धिरिति चेन्न, अद्वैतश्रुतिविरोधेन तद्-निरूपणात्। तथाहि, श्रुतिस्तावत्

"सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयं" "सत्यं ज्ञानमनन्तं ब्रह्मेति", ब्रह्मणोऽनन्तत्वमद्वितीयत्वञ्च प्रतिज्ञाय तत्सिद्धये "तदैक्षत बहुस्यां प्रजायेयेति" "तत्तेजोऽसृजत" "यतो वा इमानि भूतानि जायन्ते" "आनन्दो ब्रह्मेति" व्यजनात्॥ "आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते"—इत्यादिना ब्रह्मव्यतिरिक्तस्य जगज्जातस्य तस्मा-दुत्पत्तिं तल्लियमप्रतिपाद्य "ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि स यश्चायं पुरुषे यश्चासावादित्ये स एकः" इत्यादिना ब्रह्मणोऽद्वितीयत्वम्प्रतिपादयति। सा[1] समवायस्य नित्यत्वे विरुध्येत। अतो नित्यसम्बन्धत्वं लक्षणमित्यसङ्गतमेतत्॥

ननु अज्ञानतत्सम्बन्धादीनामनादित्वादनादिभावस्य नित्यत्वनि-यमात्कथं ब्रह्मणोऽद्वितीयत्वमिति चेद्दाढम्। अज्ञानादीनामध्यस्तत्वेन तेषामधिष्ठानमात्रतया ब्रह्मणोऽद्वितीयत्वोपपत्तेः। नचानादिभावस्य नित्यत्वनियमः तस्यारोपितत्वेन ज्ञाननिवर्त्यत्वात्, अनारोपि तस्याप्यनादिभावस्य तथात्वस्येष्टत्वात्।

नच तदनन्ताद्वितीयसिद्धये प्रपञ्चस्य ब्रह्मकार्यत्वप्रतिपादन-

(१) ग. घ समवायश्चेति पाठः।

समङ्गतमिति वाच्यम् । नहि वयमप्रागसतः सत्ता योग्यत्वमाद्य-क्षणसम्बन्धित्वं वा [1]कार्यत्वं ब्रूमस्तयोरसङ्गतत्वात्, नापि परिणामित्वमसम्भवात् । किं तर्हि विवर्त्तापरनामाध्यस्तत्वम् ब्रह्मकार्यत्वमिति ब्रूमः। एवञ्च सति "ऐतादात्म्यमिदं सर्वं" "वाचारम्भणं विकारो नामधेयं "तदनन्यत्वमारम्भणशब्दादिभ्य" इत्यादिश्रुतिसूत्राणि सामञ्जस्येनोपपद्यन्ते अन्यथाऽसङ्गतानि स्युः । तस्माद् ब्रह्मव्यतिरिक्तस्य सर्वस्य तत्त्वज्ञाननिवर्त्त्यतयाऽनित्यत्वावगमान्नित्यसम्बन्धत्वं समवायलक्षणमित्यसङ्गतम् ।

किञ्च, समवायसमवायिभ्यां भिन्नोऽभिन्नो वा आद्येऽपि समवायः, समवायिनि केन सम्बन्धेन वर्त्तते संयोगेन समवायेनान्येन वा। नाद्यः द्रव्यधर्मत्वात् संयोगस्य, न द्वितीयः अनवस्थाप्रसङ्गात्, न तृतीयः सम्बन्धान्तरानिरूपणात् स्वरूपसम्बन्धस्याप्रामाणिकत्वात् । अन्यथा समवायासिद्धिप्रसङ्गात्, नाद्य द्वितीयः अपसिद्धान्तापत्तेः, तस्मात्तत्स्वरूपस्य दुर्निरूपत्वात्तदसिद्धिः । एवमप्रमाणाभावादपि समवायासिद्धिः । तथाहि न तावत्प्रत्यक्षं प्रमाणमतीन्द्रियत्वात् समवायस्य घटे रूपं समवेतमित्यादिप्रतीतेर्वादिकल्पिततया [2]सर्वसम्मतत्वाभावेनाप्रमाणत्वात्, नापि तत्रानुमानं प्रमाणं लिङ्गाभावात् ।

नच विशिष्टबुद्धिर्विशेषणविशेष्यसम्बन्धविषया विशिष्टबुद्धित्वादित्यनुमानेन[3] तत्सिद्धिरिति वाच्यम् । अनुमानस्यार्थान्तरत्वात् । तस्माल्लक्षणप्रमाणयोरनिरूपणात्, समवायासिद्धे जातिव्यक्त्योः सा-

(१) म, कार्यमदृति इति पाठ। (२) म, सा इत्यधिक ।
(३) म विशिष्टबुद्धित्वाद्विपुरत्ववदित्यनुमानेनेति पाठ ।

सा च चतुर्विधा, अनित्ये नित्यत्वबुद्धिः, अशुचौ शुचित्वबुद्धिः, असुखे सुखत्वबुद्धिः, अनात्मन्यात्मबुद्धिश्चेति, तदुक्तम्,

---

मान्यविशेषयोर्वा सर्वत्र तादात्म्यमेव सम्बन्ध इति सिद्धम्[१]। अतस्तद्दृष्टान्तेन समष्टिव्यष्टिसूक्ष्मशरीरयोस्तादात्म्यप्रतिपादनं युक्तमेव।

नच व्यष्टिसूक्ष्मशरीरस्य भौतिकतया समष्टिसूक्ष्मशरीरोपादानत्वाभावात्कथं तयोस्तादात्म्यमिति वाच्यम् अपञ्चीकृतभूतानां हिरण्यगर्भोपाधिभूतसमष्टिसूक्ष्मशरीरान्तर्भावेन व्यष्टिसूक्ष्मशरीरस्य तदुपादानतया तयोस्तादात्म्योपपत्तेः। अथवा समष्टिकरणानामेवाध्यात्मिकाऽसङ्गपरिच्छेदाभिमानेन व्यष्टित्वमस्तु "स वै वाचमेव प्रथमामत्यवहत्[२] सा यदा मृत्युमत्यमुच्यत साग्निरभवदि"त्यादिश्रुतेः। तथाच समष्टिव्यष्टिलिङ्गशरीरयोस्तादात्म्यमुपपद्यते। एवञ्चानयोस्तादात्म्यादेतदुपहिततैजससूत्रात्मनोरपि तादात्म्यभवति, भिन्नत्वे सति अभिन्नसत्ताकत्वं तादात्म्यं ततश्च हिरण्यगर्भाद्यंशद्वोऽपास्या तत्प्राप्त्या सर्वोत्कृष्टानन्दावाप्तिः प्रयोजनं सम्भवतीति तज्ज्ञानमर्थवदिति भावः।

"पुर्य्यष्टकेन लिङ्गेन प्राणाद्येन स युज्यते"।

इति श्लोकोक्तपुर्य्यष्टकशब्दार्थे प्रक्रियान्तरमाह एतदेवेति। ननु केयमविद्येत्यत आह तचेति ॥२६॥

कार्य्या विद्यां विभजते साचेति। चातुर्विध्यमेवाह अनित्य

---

(१) ग सिद्धश्च इति पाठ। (२ ग, मन्ववहदिति पाठ।

"अनित्याशुचिदुःखानात्मसु
नित्यशुचिसुखात्मख्यातिरविद्येति" ॥

अस्यार्थोऽनित्ये ब्रह्मलोकादिसंसारफले नित्यत्वबुद्धिरेकाऽविद्या द्रष्टव्या ॥ २७ ॥

इति। असुखे सुखभिन्ने दुःखे तत्साधने सुखबुद्धिरिति तत्साधनबुद्धेरप्युपलक्षणम् । तत्र योगशास्त्रसम्मतिमाह तदुक्तमिति । सूत्रं व्याचष्टे अस्यार्थ इति ।

ननु "अशोकमहिमं तस्मिन् वसति शाश्वतीः समा" इत्यादि श्रुत्या ब्रह्मलोकस्य नित्यत्वावगमात्कथमनित्यत्वम् नच तस्य कर्मसाध्यत्वेन लौकिकक्षत्र्यादिफल-"वदन्तवत्तु फलन्तेषामि"त्यादिस्मृत्या "तद्यथेह कर्मचितो लोकः क्षीयते एव मेवामुत्र पुण्यचितो लोकः क्षीयते" इत्यादि श्रुत्या वा नित्यत्वमवगम्यत इति वाच्यम्। उपासनाविधेरप्रामाण्यप्रसङ्गात् । यथा स्वर्गादावनित्यत्वदोषदर्शनेन स्वर्गतत्साधनेच्छानिवृत्त्या प्रवृत्तिनिरोधेन नित्यफलोद्देशेन तत्साधनेऽप्रवृत्तिः । एवम्-ब्रह्मलोकादावनित्यत्वदोष दर्शनेन तदुद्देशेन तत्साधनानुष्ठाने प्रवृत्तिनिरोधात्त्वेषामन्यत्र प्रवृत्तिप्रसक्त्योपासनाविधायिशास्त्राप्रामाण्यम् प्रसज्येत ।

नच तदिष्टम्, ब्रह्मलोकातिरिक्तनित्यफले मानाभावात् । अन्यत्रापि दोषदर्शनेन प्रवृत्तिनिरोधात् मन्दिहानः सर्वोऽपि लोकोऽलयं प्राप्नुयात्, मोक्षशास्त्रं सर्वमनर्थकं प्रसज्जेतेत्यतः केवलकर्मसाध्यस्यानित्यत्वेऽपि यथोक्तशास्त्रप्रामाण्यात्, ज्ञानकर्मसमुच्चयसाध्यस्य ब्रह्मलोकस्य नित्यत्वमभ्युपगन्तव्यम् । एवं च सति श्रुतिस्मृती

श्रुत्यन्तरविरोधादितरविषये व्याख्येये। तस्मात् ब्रह्मलोकस्यानित्यत्वकथनमसङ्गतमेव इत्यत्र ब्रूमः नित्यत्वप्रतिपादकश्रुतेरर्थवादत्वात् ब्रह्मलोकोऽनित्य एव। तथाहि, "पूर्णाहुत्या सर्वान् कामान् वाप्नोती"ति वचनस्य विध्यपेक्षिततया इतरकर्म्मविध्यानर्थक्यप्रसङ्गेन च यथार्थवादत्वं तथाऽस्यापि तथात्वमेव। नचोपासनाविधिस्तन्नित्यत्वमपेक्ष्यते(१)। किं तर्हि फलमात्रम्। अन्यथा स्वर्गादिसाधनविधेरपि तथात्वेन कर्मफलानां तारतम्याभावप्रसङ्गेनाग्निहोत्रानुष्ठातुरुत्तरकालकर्म्मानुष्ठाने उपासनायाञ्च प्रवृत्तिर्नस्यादतोविधिः फलमेवापेक्षते, न तन्नित्यत्वमपि।

नच ब्रह्मलोकस्यानित्यत्वदोषदर्शनेन तत्साधनोपासनायामप्रवृत्त्या तद्विधायकशास्त्रस्याप्रामाण्यमानर्थक्यञ्च प्रसज्येतेति वाच्यम्। तर्हि कर्म्मविधायशास्त्रस्यापि तथात्वप्रसङ्गात्।

नच कर्मफलानित्यत्वज्ञानेऽपि रागवशात्प्रवृत्तिसम्भवेन कर्म्मशास्त्रस्य नाप्रामाण्यमानर्थक्यञ्चेति वाच्यम्। तर्हि प्रकृतेऽपि तुल्यत्वात्। किञ्च "तद्यथेह कर्म्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते" इत्यादि श्रुतेः श्रवणविध्यपेक्षततया भूतार्थवादत्वेन स्वर्गार्थवादवत् स्वार्थे प्रामाण्यसम्भवेन पुण्यकार्य्यस्य ब्रह्मलोकान्तस्यानित्यत्वमेव।

नच ब्रह्मलोकस्य विद्यासाध्यत्वेन कर्मफलवैलक्षण्येन नित्यत्वमिति वाच्यम्। तत्त्वविद्याया ब्रह्माभिन्नसर्वनिवर्त्तकत्वेन तत्साधनत्वाभा(२)-

(१) क, ग, मपेक्षते। इति पाठः।

(२) क, ग, अभावादिति न दृश्यते। चतत्साधनत्वादितिपाठो दृश्यते।

अशुचिषु स्वशरीरपुत्रभार्य्यादिशरीरेषु शुचित्वबुद्धिरपरा, दुःखेषु दुःखसाधनेषु च सुखतत्साधनबुद्धिरन्या, अनात्मनि देहा[२]दिष्वहमित्यात्मबुद्धिरितरा चेति। अविद्याचतुर्विधेति।

वादुपासनायास्तु मानसक्रियारूपत्वेन पुण्यान्तर्भूततया तत्साध्यब्रह्मलोकस्यानित्यत्वं स्यादेव।

किञ्च, "तद्यथा पेशस्कारी पेशसोमात्रामुपादायान्यन्नवतरं कल्याणतरं रूपं तनुत एवमेवायमात्मेदं शरीरं निहत्य अविद्याङ्गमयित्वान्यन्नवतरं रूपं कल्याणतरं रूपं कुरुते पैत्र्यं वा गान्धर्वं वा दैवं वा प्राजापत्यं वा ब्राह्मं वे"त्यादिना ब्रह्मलोकान्तस्य सर्वस्य[१] कर्मफलत्वेन संसारगोचरत्वमुक्त्वा "अथाकामयमान" इत्यारभ्य "ब्रह्माप्येती"त्यन्तेन संसारासंस्पृष्टमविद्या कामकर्मातीतं ब्रह्मभावं मोक्षं नित्यफलं ब्रह्मलोकातिरिक्तं दर्शयति श्रुतिः। अतस्तदतिरिक्तनित्यफले मानाभाव इत्युन्मत्तप्रलापः। किञ्च,

"योऽभूमा तदमृतमथ यदल्पं तन्मर्त्यम्" अतोऽन्यदार्त्तम्

"अविनाशितु तद्विद्धि येन सर्वमिदं ततं।
विनाशमव्ययस्यास्य न कश्चित्कर्त्तुमर्हति॥
अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः।
मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम्॥
नाप्नुवन्ति महात्मानः संसिद्धिं परमाङ्गताः।

(१) क, ख, सर्वस्येति न दृश्यते।

(२) क, ख, अनात्मसु देहेन्द्रियादिष्वहमित्यात्मबुद्धि पाठः।

कामो रागः, कर्म त्रिविधं सञ्चितमागामि प्रारब्धञ्चेति स्वकृतं फलमदत्त्वा अदृष्टरूपेण विद्यमानं सञ्चितं कर्म यथा सन्ध्यावन्दनाग्निहोत्रादि। आगामि अस्मिं-ञ्छरीरे क्रियमाणं कर्म। वर्त्तमानशरीरारम्भकं प्रारब्ध

आब्रह्मभुवनाल्लोकाः पुनरावर्त्तिनोऽर्जुन" ॥

इत्यादिश्रुतिस्मृतिभिरखण्डैकरसब्रह्मभावव्यतिरिक्तस्यानित्यत्व-दुःखहेतुत्वावगमात्, ब्रह्मलोकस्यानित्यत्वमेव। अपि च "यत्कार्य्यं तदनित्यमि"ति व्याप्त्या भावकार्य्यस्य सर्वस्यानित्यत्वावगमात्। ब्रह्मलोकस्यापि कर्मसाध्यत्वेन भावकार्य्यत्वेनानित्यत्वं स्यादेव तस्मा-"दशोकमहिममि"त्यादिवाक्यानां न्यायशून्यतया विध्यपेक्षिततया च गुणार्थवादत्वाद्ब्रह्मलोकस्य श्रुतिस्मृतिन्यायैरनित्यत्वावगमाच्च। तस्मिन्नित्यत्वबुद्धिरविद्येतिनिरवद्यं मलमूत्रपूर्णत्वाच्छरीरस्याशुचि-त्वम्। तदुक्तम्,

"बीजात्स्थानादुपष्टम्भान्निःस्यन्दान्निधनादपि।
कायमाधेयशौचत्वात्पण्डिता ह्यशुचिं विदुः" इति ॥

अन्यत्रापि,

अमेध्यपूर्णं कृमिजालसङ्कुलं
स्वभावदुर्गन्धमशौचमध्रुवम्।
कलेवरं मूत्रपुरीषभाजनं
रमन्ति मूढ़ा न रमन्ति पण्डिता" इति ॥२७॥

अतोऽशुचौ शुचित्वबुद्धिरविद्यत्याहाशुचिष्विति। शुचित्वं निर्म-

ङ्कर्म्म। सञ्चितागामिकर्म्मणोः फलभोगेन विरोधिकर्म्मान्तरेण वा ब्रह्मज्ञानेन वा विनाशः। प्रारब्धस्य तु भोगेनैव विनाशः॥ २८॥

त्वं प्रतिकूलवेदनीयं पीड़ात्मकं दुःखं तत्साधनं ब्रह्महननापेयपानादि अनुकूलवेदनीयं प्रीत्यात्मकं सत्त्ववृत्तिरूपं सुखं तत्साधनं ब्रह्मपूजनं गङ्गाजलपानादि दुःखतत्साधनेषु सुखतत्साधनभ्रमं मुचुकुन्द आह

"विमोहितोऽयं जन ईश मायया
त्वदीयया त्वां न भजत्यनर्थदृक्।
सुखाय दुःखप्रभवेषु सज्जते
गृहेषु योषित्पुरुषश्च(१) वञ्चित" इति।

इयमस्माकं सर्वेषां प्रत्यक्षसिद्धा चेत्यतो दुःखादिषु सुखादिबुद्धिरविद्येति। तदुक्तमित्याह दुःखेति। ग्रन्थं स्पष्टार्थम्, अविवेकेनाहङ्कारचिदात्मनोस्तादात्म्याध्यासपूर्वकमिदं मे भूयादितिजायमानान्तःकरणवृत्तिविशेषो रागः। कर्म्म विभजते कर्म्मेति। त्रैविध्यमेवाह सञ्चितमिति। सञ्चितं निरूपयति स्वेति। तदुदाहरति यथेति। तत्त्वज्ञानादूर्ध्वं क्रियमाणं कर्म्मागामीत्यभिप्रेत्याहागामीति। प्रारब्धकर्म्म लक्षयति वर्त्तमानेति।

"अवश्यमेव भोक्तव्यं कृतं कर्म्म शुभाशुभम्।
नाभुक्तं क्षीयते कर्म्म कल्पकोटिशतैरपि॥

(१) ग, योषित् पुरुषैश्चेति पाठः।

प्रायश्चित्तैरपैत्येनो यदज्ञानकृतम्भवेत् ।
कामतोऽव्यवहार्य्यस्तु वचनादिह जायते ॥
"क्षीयन्ते चास्य कर्म्माणि तस्मिन्दृष्टे परावरे"[१] ।
"तरति शोकं तरति सर्वपाप्मानं तरति" ।
"ज्ञानाग्निः सर्वकर्म्माणि भस्मसात्कुरुते [२]तथा" ।
सर्वपापप्रसक्तोऽपि ध्यायन्निमिषमच्युतम् ॥
भूयस्तपस्वी भवति पङ्क्तिपावनपावन ।
परोक्षं ब्रह्मविज्ञानं शाब्दं दैशिकपूर्वकम् ॥
बुद्धिपूर्वकृतं पापं कृत्स्नं दहति वह्निवत् ।
प्रारब्धं भोगतो नश्येच्छेषं ज्ञानेन दह्यते ॥
इतरदितयं कर्म्म तद्वेषि प्रियवादिनोः ॥

"तदधिगम उत्तरपूर्व्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् इतरस्याप्येवमसंश्लेषः पाते तु भोगेन त्वितरे क्षपयित्वा सम्पद्यते" इत्यादिश्रुतिस्मृतीतिहासपुराणन्यायैः सञ्चितागामिनोः फलभोगविरोधिकर्म्मब्रह्मज्ञाननाश्यत्वम्। प्रारब्धस्य भोगैकनाश्यत्वमित्याह सञ्चितेति ।

नच सञ्चितस्य कर्म्मणः प्रायश्चित्तज्ञानाभ्यां नाशोऽस्तु आगामिकर्म्मणः कथं नाशः स्यात्तस्य तदानीमनुत्पन्नत्वादिति[३] वाच्यम् । तस्याप्यश्लेषमभावेन फलाजनकतया नष्टप्रायत्वादिति तात्पर्य्यं न केवलं ब्रह्मसाक्षात्कारेण कर्म्मनाशः ॥ २८ ॥

---

(१) क म परावर इति पाठः । (२ म, उर्जुन इति पाठः ।
(३) क म, अनुत्पन्नत्वादिति न दृश्यते ।

किं बहुना प्रारब्धव्यतिरिक्तानामविद्यादीनां पञ्च-क्लेशानां तत्त्वज्ञानान्नाशः। तथाहि,

"अविद्यास्मितरागद्वेषाभिनिवेशाः पञ्चक्लेशाः"।

कार्य्यकारणरूपाद्विविधा विद्या निरूपिता। अहङ्कारस्य सूक्ष्मावस्थाऽस्मिता "इदमेवमहत्तत्त्वं" "सामान्याहङ्कार" इति चोच्यते। राग उक्तः, द्वेषः क्रोधः स्वीकृतस्य पुनस्त्यागासहिष्णुत्वमभिनिवेशः एतेषां पञ्चानाम्ब्रह्मसाक्षात्कारान्निवृत्तिः। "ज्ञात्वा देवं मुच्यते सर्वपाशै"रित्यादिश्रुतेः पाशैः पञ्चक्लेशैरित्यर्थः॥ २८॥

किन्त्वविद्यादिसर्वबन्धनिवृत्तिर्भवतीत्याह किमिति। के ते पञ्चक्लेशा इत्याकाङ्क्षायां तन्निरूपयितुमाह तथाहीति। पतञ्जलिसूत्रं पठति अविद्येति। तत्राविद्या पूर्वमेव निरूपितेत्याह कार्य्येति। अस्मितां निरूपयति अहङ्कारस्येति। सूक्ष्मावस्था कारणावस्थेत्यर्थः। कपिलपतञ्जलिभ्यामिदमेव महत्तत्त्वमित्युच्यते। वेदान्तिभिः सामान्याहङ्कार इत्युच्यते। ताभ्यां प्रकृतेर्महान्महतोऽहङ्कार इति सृष्टिक्रमाभ्युपगमादस्माभिर्व्यष्ट्यहङ्कारस्य सामान्याहङ्कारापरपर्य्यायभूतसूक्ष्माकाशादिमालिकांशसमुदायादुत्पत्तिस्वीकारात्, व्यष्ट्यहङ्कारसूक्ष्मावस्था सामान्याहङ्कारो वक्तुं शक्यते।

नच तत्र प्रमाणाभावः पूर्वमेवोक्तत्वादिति भावः। तत्र प्रमाणमाह ज्ञात्वेति। आदिशब्देन

"एतद्यो वेद निहितं गुहायां सोऽविद्याग्रन्थि

तिष्ठतु तावत्प्रासङ्गिकम्। एवं सूक्ष्मशरीरोत्पत्तिर्निरूपिता पञ्चीकृतभूतानि स्थूलभूतानि। पञ्चीकरणं तु पूर्वोक्तानामाकाशादीनां तामसांशान् एकैकं द्विविधा[1]

विकिरतीह सौम्य गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति"।

"यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिता"

अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते" इत्यादिश्रुतयो म्टह्यन्ते। स्मृतिरपि, "ज्ञानेन तु तदज्ञानं येषां नाशितमात्मन" इत्यादि "ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशै र्जन्ममृत्युप्रहाणिरिति" वाक्यशेषानुरोधेनोदाहृतश्रुतिं व्याचष्टे पाशैरिति। अस्यार्थः देवं स्वप्रकाशमहम्ब्रह्मास्मीति साक्षात्कृत्वा विद्यास्मितारागद्वेषाभिनिवेशैः पञ्चभिः क्लेशापरपर्य्यायपाशशब्दाभिधेयैर्मुच्यते इत्यर्थः। एतत्सर्वमभिप्रेत्य भगवता वार्त्तिकाचार्य्येणाप्युक्तम्

"यः पश्येत्सर्वगं शान्तमानन्दात्मानमद्वयम्।
न तेन किञ्चिदाप्तव्यं ज्ञातव्यं वावशिष्यते"॥
"कृतकृत्यो भवेद्विद्वान् जीवन्मुक्तो भवेत्सदा"॥ २८॥

इति प्रासङ्गिकं परिसमाप्य प्रकृतमनुसरति तिष्ठत्विति। प्रसङ्गादागतं प्रासङ्गिकमुपसंहरत्येवमिति। एवमुक्तरीत्या यथोक्तक्रमेणेति यावत्। एवं वार्त्तिककृदपि सृष्टिक्रममाह स्म,

"आसीदेकं परम्ब्रह्म नित्यमुक्तमविक्रियम्।
तत्स्वमायासमावेशाद्बीजमव्याकृतात्मकम्॥

---

(१) क ग द्विधा विभज्येति पाठः।

समं विभज्य तत्रैकैकं पुनश्चतुर्विधा विभज्य स्वांशं परित्यज्य इतरांशेषु योजनं पञ्चीकरणम्, "तासां त्रिवृतं त्रिवृतमेकैकं करवाणीति" त्रिवृतकरणश्रुतेः। पञ्चीकरणस्याप्युपलक्षणत्वात्। पञ्चीकरणं प्रामाणिकमेव ॥ ३० ॥

तस्मादाकाशमुत्पन्नं शब्दतन्मात्ररूपकम्।
स्पर्शात्मकस्ततो वायुस्तेजोरूपात्मकं ततः॥
आपोरसात्मकास्तस्मात्ताभ्यो गन्धात्मिका मही।
शब्दैकगुणमाकाशं शब्दस्पर्शगुणो मरुत्॥
शब्दस्पर्शरूपगुणैस्त्रिगुणं तेज उच्यते।
शब्दस्पर्शरूपरसगुणैरापश्चतुर्गुणाः॥
शब्दस्पर्शरूपरसगन्धैः पञ्चगुणा मही।
तेभ्यः समभवत्सूत्रं लिङ्गं सर्वात्मकं महत्" इति॥

तेभ्योऽपञ्चीकृतभूतसात्त्विकांशं राजसांशेभ्यः समष्टिव्यष्ट्यात्मकं लिङ्गशरीरमुत्पन्नमित्यर्थः। एवं सूक्ष्मशरीरोत्पत्तिं सप्रपञ्चां निरूप्य स्थूलभूतोत्पत्तिं वक्तुं तानि लक्षयति पञ्चीकृतेति। तान्यपञ्चीकृतभूतानां तामसांशेभ्यो जायन्त इति शेषः। पञ्चीकरणप्रक्रियामनुभाषते पञ्चीकरणन्त्विति।

ननु छान्दोग्ये तेजोऽबन्नानां सृष्टिमुक्त्वा त्रिवृत्करणप्रतिपादनात् पञ्चीकरणप्रक्रियाव्युत्पादनमसङ्गतम्, तत्र प्रमाणाभावात्।

न च सृष्टिपरिपूर्त्तये भूतत्रयगर्भश्रुतेर्वियदधिकरणन्यायेन। तैत्तिरीयकश्रुत्यनुसारेण "आकाशं वायुं च सृष्ट्वा तेजोऽसृजतेति"

व्याख्यातत्वेन पञ्चीकरणस्याप्युचितत्वादिति वाच्यम्, त्रिवृत्करणे-नापि सर्वव्यवहारोपपत्तेरित्याशङ्क्याह तासामिति। तासां पृथि-व्यप्तेजोरूपाणां मध्ये एकैकां देवतां त्रिवृतं यथा भवति तथा करवाणि एवाच प्रक्रिया पृथिव्यप्तेजसां त्रयाणां भूतानां मध्ये एकैकं भूतं द्विधा विभज्य तत्राप्येकं भागं द्विधा विभज्य स्वांशं परित्यज्ये-तरयोर्योजनीयं त्रिवृत्करणम्, एतदभिप्रायेण सूत्रकारोऽप्याह "सञ्ज्ञामूर्त्तिकॢप्तिस्तु त्रिवृत्कुर्वत उपदेशादि"ति श्रुतिसूत्रप्रसिद्धत्वेन।

"भूतानां त्रिवृत्करणमेव न पञ्चीकरणमिति"

वाचस्पतिमिश्राः। आचार्य्यास्तु छान्दोग्यश्रुतौ पञ्चभूतसर्गविव-क्षायां त्रिवृत्करणमेव न[1] पञ्चीकरणमिति प्रतिपादने प्रकरण-विरोधप्रसङ्गात्। आकाशवाय्वोः शब्दस्पर्शानुपलब्धिप्रसङ्गाच्चानिच्छ-तापि पञ्चीकरणमेवाभ्युपगन्तव्यम्[2]। यदि पञ्चीकरणाभावेऽपि आकाशवाय्वोः शब्दस्पर्शोपलब्धिः स्यात्तर्हि तद्वदेव त्रिवृत्करणा-भावेऽपि "तेजोऽवन्नेषु" रूपाद्युपलब्धिसम्भवात् व्यवहारोपपत्तौ त्रिवृत्करणमपि न सिद्ध्येत्। ततश्च श्रुतेरप्रामाण्यं प्रसज्येत्ततश्च श्रुतेरप्रामाण्यपरिहाराय सर्वत्र व्यवहारोपपत्तेश्च, श्रुतिसूत्रयोः "पञ्चीकरणं विवक्षितमेवे"ति त्रिवृत्करणश्रुतिसूत्रयोः पञ्चीकरण-स्याप्युपलक्षणत्वात्पञ्चीकरणं प्रामाणिकमित्याहुः ॥ २० ॥

---

(१) क, ख, त्रिवृत्करणमेव न पञ्चीकरणमिति पाठो न दृष्टः।

(२) क ख, अवश्यमिति पाठ दृश्यते।

"वैशेष्यात्तु" "तद्वादस्तद्वाद" इति न्यायेन स्वांशभूयस्त्वादिशेषव्यपदेशोऽपि सम्भवति। एवं च सति आकाशे शब्दोऽभिव्यज्यते, वायौ शब्दस्पर्शौ, तेजसि शब्दस्पर्शरूपाणि, जले शब्दस्पर्शरूपरसाः। पृथिव्यां शब्दस्पर्शरूपरसगन्धाः। तथाच पञ्चीकृतपृथिव्याः ब्रह्माण्डमुत्पन्नं तदन्तर्वर्त्तिलोकाः, चतुर्दशब्रह्माण्डान्यनुशतरूपे जाते, ब्रह्माण्डान्तर्वर्त्तिपृथिव्या ओषधय उत्पन्नाः, ओषधिभ्योऽन्नम्, पितृमातृभ्यां भुक्तान्नपरिणामरेतः शोणित, तद्द्वारा स्थूलशरीरमुत्पन्नं तच्चतुर्विधम्, जरायुजमण्डजं स्वेदजमुद्भिज्जञ्चेति। मनुष्यादिशरीरं जरायुजम्, पक्षिपन्नगादिशरीरमण्डजम्, यूकमशादिशरीरं स्वेदजम् तृणगुल्मादिशरीरमुद्भिज्जम् ॥ ३१ ॥

ननु यदि पञ्चीकरणेन सर्वेषां भूतानामेकीभावस्तर्हीयं पृथिवीदं जलमित्यादिविशेषव्यपदेशः कथं स्यादित्याशङ्क्य सूत्रेण परिहारमाह वैशेष्यादिति। विशेषस्य भावो वैशेष्यं स्वांशभूयस्त्वम्, तस्मात् तत्तद्वादः इयं पृथिवीदं जलमिति विशेषव्यपदेश इति सूत्रार्थः। उक्तमेवार्थमनुसन्दधाति स्वांशेति। पञ्चीकरणस्य प्रयोजनमाह एवञ्चेति। पञ्चीकरणे कृते सतीत्यर्थः। आकाशे पञ्चीकृताकाश एव सर्वत्र द्रष्टव्यम्।

"आपो वा अर्कस्तद्यदपां शर आसीत्तत्समहन्यत सा पृथिव्य-

उक्तम्, स्थूलशरीरं पुनः प्रकारान्तरेण द्विविधं समष्टिव्यष्टिभेदात्। पञ्चीकृतपञ्चमहाभूततत्कार्य्यब्रह्माण्डान्तं तदन्तर्वर्त्तिकार्य्यं सर्वं समष्टिरित्युच्यते। अथवा व्यक्तिषु गोत्वादिवत् सर्वव्यष्टिष्वनुस्यूतं पञ्चीकृतभूतकार्य्यं ब्रह्माण्डात्मकं व्यापकं समष्टिः वनवत्सकलस्थूलशरीरसमुदायो वा समष्टिरित्युच्यते। एतदुपहितं चैतन्यं विराट् वैश्वानर इति चोच्यते। विविधं राज-

---

भवत्तस्यामश्राम्यत्तस्य तप्तस्य(1) तेजो रसो निरवर्त्तताग्नि”-रिति श्रुतिमाश्रित्य पञ्चीकृतपृथिव्याः ब्रह्माण्डोत्पत्तिमाह तयेति।

“स वै नैव रेमे तस्मादेकाकी न रमते स द्वितीयमैच्छत् स हैतावानास यथा स्त्रीपुमांसौ सम्परिष्वक्तौ स इममेवात्मानं द्वेधापातयत्ततः पतिश्च पत्नी चाभवतामि”ति

श्रुतिमाश्रित्य ब्रह्माण्डात्मनो विराट्पुरुषात् मनुशतरूपयोरुत्पत्तिमाह ब्रह्माण्डादिति।

“पृथिव्या ओषधयः ओषधिभ्योऽन्नमन्नात्पुरुष”

इति श्रुत्युक्तक्रममाश्रित्य पृथिव्याः सकाशादोषध्याद्युत्पत्तिक्रमेण स्थूलशरीरोत्पत्तिमाह ब्रह्माण्डान्तर्वर्त्तीति। स्थूलशरीरं विभजते तदिति। जरायुजादीनि दर्शयति मनुष्यपश्वादीनीति॥२१॥

---

(1) क. ख. श्रान्तस्येति पाठः।

मानत्वात्, सर्वनराभिमानित्वाच्च प्रत्येकं स्थूलशरीरं गवादिव्यक्तिवद्व्यावृत्तं व्यष्टिरित्युच्यते। एतदुपहितं चैतन्यं विश्व इत्युच्यते। सूक्ष्मशरीरमपरित्यज्य स्थूलशरीरे प्रविष्टत्वात् ॥ ३२ ॥

अनयोः समष्टिव्यष्ट्योः सामान्यविशेषयोरिव तादात्म्याभ्युपगमादेतदुपहितं[1] विश्ववैश्वानरयोरपि तादात्म्यम् ॥ ३३ ॥

प्रकारान्तरेण स्थूलशरीरं विभजते उक्तमिति। समष्टिस्थूलशरीरं व्युत्पादयति पञ्चीकृतेति। पक्षान्तरमाह अथवेति। तत्रैव मतान्तरमाह वनवदिति। ततः किं तत्राह एतदिति। समष्टिस्थूलशरीरोपहितचैतन्ये विराड्वैश्वानरशब्दयोः प्रवृत्तिनिमित्तमाह विविधेति। व्यष्टिस्वरूपं व्युत्पादयति प्रत्येकमिति। व्यष्टिस्थूलशरीरोपहितचैतन्यस्य विश्वसंज्ञामाह एतदिति। तत्र युक्तिमाह सूक्ष्मेति ॥ ३२ ॥

ननु समष्टिस्थूलशरीरोपाधिकवैश्वानरज्ञानं व्यष्टिस्थूलशरीरोपाधिकविश्वज्ञानञ्च निष्प्रयोजनं सुखदुःखप्राप्तिपरिहारयोरसम्भवादित्याशङ्क्य विश्ववैश्वानरयोरभेदोपासनया वैश्वानरप्राप्त्या तदानन्दावाप्तिप्रयोजनं सम्भवादित्यभिप्रेत्य तदुपासनोपयोगित्वेन समष्टिव्यष्टिस्थूलशरीरयोस्तादात्म्यप्रतिपादनेन तदुपहितयोरपि

---

(१) क, पुस्तके चाभ्युपगमादिति न दृश्यते।

तादात्म्यं प्रतिपादयति अनयोरिति। यथा सत्ता सामान्यद्रव्यादिविशेषयोस्तादात्म्यं समवायस्य पूर्वमेव निराकृतत्वात्[1] तथा व्यष्टिस्थूलशरीरस्य समष्टिस्थूलशरीरान्तर्गतपञ्चीकृतभूतकार्यत्वेनोपादानोपादेयस[2]भावात्तयोस्तादात्म्यात्तदुपहितयोरपि विश्ववैश्वानरयोस्तादात्म्यम्, एवमनयोर्भेदासम्भवादभेदांशमादाय अहमेव वैश्वानरोऽस्मीति अभेदोपासनया तत्साक्षात्कारेण तदानन्दावाप्तेः[3] सम्भवात्। ज्ञानं[4] सप्रयोजनमिति भावः।

अथवा श्रुत्युक्तप्रकारेण विश्ववैश्वानरतैजससूत्रात्मप्राज्ञेश्वरान् ज्ञात्वा प्रथमं विश्वं वैश्वानरात्मत्वेनाहमेव वैश्वानरोऽस्मीति विभाव्य ततस्तैजसं सूत्रात्मत्वेनाहमेव सूत्रात्मास्मीति विभाव्यानन्तरं प्राज्ञमीश्वरात्मत्वेनाहमेवेश्वरोऽस्मीति विभाव्यानन्तरं समष्टि[5]व्यष्टिस्थूलसूक्ष्मकारणोपाधिकमोंकारवाच्यं परमब्रह्माहमस्मीति सर्वात्मत्वेन विभाव्य पश्चान्मनसैकाग्रतामापन्ने सति सर्वं जगत्स्थूलसूक्ष्मादिक्रमेण निर्विशेषचिन्मात्रेऽखण्डैकरसानन्दे परब्रह्मणि विलाप्य तदनन्तरमेकाग्रेण मनसा स्वस्याखण्डैकरसब्रह्मानन्दात्मतां साक्षात्कुर्यादित्यभिप्रायेण समष्टिव्यष्ट्योस्तादात्म्यनिरूपणेन तदुपहितयोस्तादात्म्यनिरूपणं[6] कृतम्। तदुक्तम्,

"समाधिकालात्प्रागेवं विचिन्त्यातिप्रयत्नतः।
स्थूलसूक्ष्मक्रमात्सर्वं चिदात्मनि विलापयेदिति॥"

---

(१) क, निरस्तत्वादिति पाठ। (२) ग, भाव इत्यधिक पाठः।
(३) क, वाप्तिसम्भवादिति पाठः। (४) क ग, तद् इत्यधिक पाठ।
(५) ख व्यष्टि इति न। (६) ग तादात्म्यमिति पाठ।

एक एव जीवो जाग्रदवस्थायां स्थूलसूक्ष्मकारणाविद्याभिमानी सन् विश्व इत्युच्यते। स एव स्वप्नावस्थायां सूक्ष्मशरीरकारणाविद्याभिमानी सन् तैजस इत्युच्यते। स एव सुषुप्तौ कारणाविद्याभिमानी सन् प्राज्ञ इत्युच्यते। स एव शरीरत्रयाभिमानरहितः सन् शुद्धपरमात्मा भवति॥

कल्पतर्वाचार्य्यैरप्युक्तम्,

निर्विशेषं परब्रह्म साक्षात्कर्त्तुमनीश्वराः।
ये मन्दास्तेऽनुकम्प्यन्ते सविशेषनिरूपणैः॥
वशीकृते मनस्येषां सगुणब्रह्मशीलनात्।
तदेवाविर्भवेत्साक्षादपेतोपाधिकल्पनमिति॥

एतदभिप्रायाश्रुतिरपि,

"एष सर्वेषु भूतेषु गूढात्मा न प्रकाशते।
दृश्यते त्वग्र्या बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरि"ति॥"

तस्माद्वैश्वानरादिज्ञानमर्थवदित्यर्थः॥ २२॥

ननु व्यष्टिस्थूलसूक्ष्मकारणाभिमानिनो विश्वतैजसप्राज्ञाः संसारिणः प्राङ्निरूपितास्ते किं स्वतन्त्रा जीवाः आहो स्विदेकस्यैवावस्थाविशेषाः। नाद्यः सर्वेषां स्वतन्त्रतया परस्परभेदाभ्युपगमे सुषुप्तिस्वप्नयोरनुभूतस्य पदार्थस्य जाग्रदवस्थायां विश्वस्य स्मरणाभावप्रसङ्गात् अन्यानुभूतपदार्थस्मरणायोगादन्यस्यान्यथातिप्रसङ्गात्। तस्माद्द्वितीयः परिशिष्यत इत्याह एक एवेति। अयम्भावः असङ्गोदा-

तस्यैवाभिमानिनो जीवस्यावस्थाः पञ्च जाग्रत्स्वप्न-सुषुप्तिमूर्च्छामरणभेदात् । दिगाद्यधिष्ठातृदेवतानुगृहीतैरिन्द्रियैः शब्दादिविषयानुभवावस्था जाग्रदवस्था । जाग्रद्भोगप्रदकर्मोपरमे सति इन्द्रियोपरमे जाग्रदनुभव-

---

मौन प्रत्यगात्माऽविद्यामात्मत्वेनोपगत प्राज्ञ इति उच्यते। स एव सूक्ष्मशरीरमात्मत्वेनोपगतस्तैजस स एव स्थूलशरीरमात्मत्वेनोपगतो विश्व ।

एव विश्वतैजसप्राज्ञा प्रत्यगात्मन एकस्यैवावस्थाविशेषा इतीममेवार्थं स्पष्टयति जाग्रदवस्थायामिति अर्थादनेन त्व पदार्थशोधनोपायान्वयव्यतिरेकौ दर्शितौ । •

तथाहि, जाग्रदवस्थाया शरीरत्रयसाक्षित्वेन, स्वप्ने शरीरद्वयसाक्षित्वेन, सुषुप्तौ कारणशरीरसाक्षित्वेन, समाधौ शुद्धस्य प्रकाशचिद्रूपेण भानमन्वय स्वप्ने स्थूलशरीराभान सुषुप्तौ सूक्ष्मशरीराभान समाधौ कारणशरीराभानञ्च। शरीरत्रयव्यतिरेक चित्तस्य वृत्तिशून्यतयात्मैकाकारावस्था समाधिस्तदानीं देहादिषु सर्वत्राभिमानस्य निवृत्तत्वात् समाध्यवस्थाया शरीराणा व्यतिरेको भवत्येव । तस्यामवस्थायामात्मा वस्तुत शुद्ध परमात्मा भवति सर्वाभिमानशून्यत्वादिदमेवान्वयव्यतिरेकाभ्या त्व पदार्थशोधन तज्ज्ञात्वा तत्त्वमनात्मेति निश्चित्य यदन्वित स आत्मेति निश्चय । तदुपायान्वयव्यतिरेकाविति शुद्धेति । समाधिरवस्थायामिति शेष ॥

जाग्रदाद्यवस्थानिरूपयितुमाह तत्रेति । ता एवोद्दिशति

जन्यसंस्कारोद्भूतविषय स्तज्ज्ञानावस्था स्वप्नावस्था। जाग्रत्स्वप्नोभयभोगप्रदकर्म्मोपरमेण स्थूलसूक्ष्मशरीराभिमाननिवृत्तिद्वाराविशेषविज्ञानोपरमात्मिकाबुद्धेः कारणात्मनावस्थितिः सुषुप्तिः ॥ ३४ ॥

जाग्रदिति। जाग्रदवस्था लक्षयति दिगिति। आदिशब्देन दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमृत्युकाः। तथा,

"चन्द्रश्चतुर्वक्त्रो रुद्र क्षेत्रज्ञ ईश्वर" इति

श्लोकोक्तदेवता वातादयो गृह्यन्ते। ताभिर्देवताभिरनुगृहीतानि अधिष्ठितानीन्द्रियाणि यानि श्रोत्रादीनि तैरिति यावत्। शब्दादिविषयानुभवावस्था, जाग्रदवस्थेत्युक्ते स्वप्नेऽतिव्याप्तिस्तत्रापि वासनामयविषयानुभवस्य सत्त्वात्तद्व्यावृत्त्यर्थं दिगादीत्युक्तम्, स्वप्नावस्थामिन्द्रियाणामुपरतत्वात्तज्जन्यविषयाननुभवान्नातिव्याप्तिः। विषयानुभवावस्था जाग्रदवस्थेत्युक्ते सुषुप्तावतिव्याप्तिस्तत्राप्यज्ञानविषयकसाक्ष्यनुभवस्य सत्त्वात्। अत उक्तं शब्दादीति। सुषुप्तौ शब्दादिविषयाणामन्त (१)करणवृत्तेस्तदाश्रयप्रमातृत्वलोपाच्चान्तःकरणादीनाञ्च(२) लीनत्वान्नातिव्याप्तिः शब्दादिविषयाकारान्तःकरणवृत्तिप्रतिबिम्बितचैतन्य शब्दादिविषयानुभव। अन्तःकरणवृत्तिमग्रे निरूपयिष्यते स्वप्नावस्था लक्षयति जाग्रदिति। विषयगतज्ञानावस्था स्वप्नावस्थेत्युक्ते सुषुप्तावतिव्याप्तिस्तद्वारणाय जाग्रदित्यादिविशेषणं सुषुप्तावज्ञानतत्साक्षिणोरनादिसिद्धत्वेन संस्कारोद्भूतत्वाभावान्नातिव्याप्तिः

---

(१) क ग तद्रोधरान्तःकरणेति पाठ।   (२) क ग, चकारोनास्ति।

मुद्गरप्रहारादिजनितविषादेन विशेषविज्ञानोपरमावस्था मूर्च्छावस्था तदुक्तम्, "मुग्धेऽर्द्धसम्पत्तिः परिशेषादि"ति। एतच्छरीरभोगप्रापककर्म्मोपरमेण द्विविधदेहाभिमाननिवृत्त्या सपिण्डितकरणग्रामावस्था भाविशरीरप्राप्तिपर्य्यन्तं मरणावस्था।

तावत्युक्ते जाग्रदवस्थायामतिव्याप्तिः रजतानुभवजन्यसंस्कारोद्भूतानिर्वचनीयविषयतज्ज्ञानस्य तादृशस्मृतेर्वा सत्त्वात्तदारणायेन्द्रियोपरम इति। उपरमे निमित्तमाह *जाग्रदिति*। सुषुप्तिलक्षणमाह जाग्रदिति। विशेषविज्ञानोपरमात्मिका सुषुप्तिरित्युक्ते जाग्रदवस्थायामतिव्याप्तिस्तदा समाधौ विशेषविज्ञानोपरमसत्त्वात्। अत उक्तं बुद्धेः कारणात्मनावस्थानमिति, समाधावन्तःकरणस्य स्वरूपेण सत्त्वान्नातिव्याप्तिरित्यर्थः। विशेषविज्ञानोपरमे निमित्तमाह स्थूलेति। तत्रापि निमित्तमाह जाग्रदिति ॥२४॥

मूर्च्छावस्थां लक्षयति मुद्गरेति। विशेषविज्ञानोपरमावस्था-मूर्च्छेत्युक्ते जाग्रदवस्थायामतिव्याप्तिरत उक्तं मुद्गरेति मुद्गरप्रहारजनितविषादावस्था मूर्च्छा इत्युक्ते जाग्रदवस्थायामतिव्याप्तिरत उक्तं विशेषेति मूर्च्छाया अवस्थान्तरत्वे व्याससूत्रं संवादयति तदुक्तमिति। तृतीये स्थितं मुद्गरादिप्रहारादिनिमित्ते सति पुंसां यां मूर्च्छामाचक्षते लोकाः सा मूर्च्छा *जाग्रदाद्यन्तर्भूता* आहोस्विदवस्थान्तरमिति संशयः। तत्र श्रुत्यादिष्ववस्थान्तरत्वेनाप्रसिद्धत्वाज्जाग्रदादिष्वन्तर्भूता। तत्रापि विशेषविज्ञानोपरमसाम्यात्

केचित्त्वस्या उक्तावस्थास्वन्तर्भावं वदन्ति। अत्र श्रुतिस्मृतिपुराणप्रमाणानि प्रसिद्धानि ॥ ३५ ॥

मूर्च्छा सुषुप्तावेवान्तर्भूता नावस्थान्तरमिति प्राप्तेऽभिधीयते। मूर्च्छा जाग्रदादिभ्योऽवस्थान्तरं परिशेषात्। सा तावन्न जाग्रत्स्वप्नयोरन्तर्भवति विज्ञानाभावात्। नापि मरणे पुनरुत्थानदर्शनात्। नापि सुषुप्तौ लक्षणवैलक्षण्यात्। तथाहि सुषुप्तस्य प्रसन्नवदनत्वनिष्कम्पत्वादिकं लक्षणं मुग्धस्य तु विकरालवदनत्वसकम्पत्वादिकमतो लक्षणवैलक्षण्यान्न सुषुप्तावन्तर्भवति मूर्च्छा।

किन्तु परिशेषादवस्थान्तरमेवेति सकम्पत्वादीनां सुषुप्तिवैलक्षण्येऽपि विशेषविज्ञानोपरमेण सुषुप्तिसाम्यादर्द्धसम्पत्तिमूर्च्छेति निर्णयः। मरणावस्थां लक्षयति एतदिति। देहाभिमानो द्विविधः सामान्याभिमानो विशेषाभिमानश्चेति। सुषुप्तौ सामान्याभिमान पुनरुत्थानदर्शनात्। जीवस्य निरभिमानस्योत्थानायोगात्। सुषुप्तौ जीवस्य देहे सामान्याभिमानस्तिष्ठत्येव जाग्रत्स्वप्नयोर्विशेषाभिमानः मनुष्योऽहम्ब्राह्मणोऽहमिति। मरणे भोगेन प्रारब्धक्षये द्विविधस्य सामान्यविशेषरूपस्याभिमानस्य निवृत्त्या भाविदेवादिशरीरप्राप्तिपर्यन्तं सपिण्डितकरणग्रामावस्था एकीकृतचतुर्दशकरणग्रामावस्था मरणावस्थेत्यर्थः। सूत्रकृता मरणावस्थाया जाग्रदादिवद्विर्भावेनानुक्तत्वात्। यथोक्तजाग्रदादिष्वन्तर्भाव इति। मतान्तरमाह केचित्त्विति। तत्रापि मरणावस्थाया न जाग्रत्स्वप्नयोरन्तर्भावः देहाभिमानाभावान्नापि सुषुप्तौ पुनरुत्थानाभावात्।

एवमेक एव परमात्मा समष्टिस्थूलसूक्ष्मशरीरतत्कारणमायोपहितः सन् वैश्वानर इत्युच्यते। "अहमेव वैश्वानरोऽस्मी"त्येतदुपासनया तत्प्राप्तिः फलम्भवति। वैश्वानराधिकरणे सूत्रकारभाष्यकाराभ्यां एवमेव श्रुत्यर्थस्य तथा(१) प्रतिपादनात्। स एव परमात्मा समष्टिसूक्ष्मशरीरतत्कारणमायोपहितः सन् हिरण्यगर्भ इत्युच्यते। एतदुपासनया तत्प्राप्तिः फलम्भवति ॥३६॥

अतः परिशेषान्मूर्च्छायामन्तर्भावः। तत्र कर्मशेषे सति पुनरुत्थानं भोगप्रदकर्मशेषाभावे मरणमिति भावः ॥३५॥

ननु सन्तु विश्वतैजसप्राज्ञा एकस्यैवावस्था विशेषाः वैश्वानरसूत्रात्मेश्वरेषु को निर्णय इति तत्राह एवमिति। यथा विश्वतैजसप्राज्ञा एकस्यैवावस्थाविशेषाः एवं वैश्वानरसूत्रेश्वरा इत्यर्थः।

ननु भयाऽरत्यादिश्रवणात् कथं वैश्वानरसूत्रात्मनोरीश्वरत्वं तस्य जीवलिङ्गत्वादीश्वरस्य तद्रहितत्वात्। तथाच श्रुतिः

"योऽशनाया पिपासे शोकं मोहं जरां मृत्युमत्येती"

त्याद्या अशनायाद्यतीतत्वमीश्वरस्य दर्शयति। तस्मादेकस्य परमेश्वरस्यावस्थाविशेषा इत्यसङ्गतमिति चेन्नैवम्। सूत्रकृता वादरायणेन

"वैश्वानरसूत्रात्मनोः सुखविशिष्टाभिधाना-
देव च वैश्वानरः साधारणशब्दविशेषादि"

त्यचेश्वरत्वस्योक्तत्वात्। कथं तर्हि

(१) म, पुस्तके मद्देनि न दृश्यते।

"हिरण्यगर्भं जनयामास पूर्वं-न्नामैतावतः कालस्य पुरस्तादसृजत ते जातमभिव्याददात्। सभाणकमकरोत् सो विभेत् स वै नैव रेमे कार्य्यात्यये तदध्यक्षेण सहातः परमभिधानात्"

"ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसञ्चरे।

परस्यान्ते कृतात्मानः प्रविशन्ति परम्पद"-

मित्यादिश्रुतिस्मृतिसूत्रैस्तयोर्जन्ममरणबन्धमोक्षभयाऽरत्यादिप्रतिपादनम्। शृणु। वैराग्यार्थं तत्प्रतिपादनम्।

तथाहि, श्रुत्यादिभिस्तयोर्जन्मादिषु प्रतिपादितेषु[१] तथापि दोषदर्शनेन वैराग्यमुत्पद्यत इति तत्प्रतिपादनम्।

नच तावता तयोर्जीवत्वम्, तथात्वे ईश्वरस्यापि तथात्वप्रसङ्गात्। तस्यापि कामनादिश्रवणात्। कामनादेर्जीवलिङ्गत्वात्। तस्मा-

"यः सर्वज्ञः स सर्वविद् यस्य ज्ञानमयं तपः

तमीश्वराणां परमं महेश्वरं आप्तकाममात्मकाम"-

मित्यादिश्रुत्या निरतिशयज्ञानैश्वर्य्यादिशक्तिमत्त्वावगमाद्यथाकामनादिश्रवणेऽपि न जीवत्वं तथा

"ज्ञानमप्रतिहतं यस्य वैराग्यञ्च जगत्पते।

ऐश्वर्य्यञ्चैव धर्मश्च सहसिद्धं चतुष्टयमि'-

ति स्मृत्या सूत्रात्मवैश्वानरयोरप्रतिहत[२] स्वतः सिद्धनिरतिशयज्ञानैश्वर्य्यादिमत्त्वावगमाज्जन्मादिप्रतिपादनस्य वैराग्यार्थत्वाच्च। न जीवत्वमत ईश्वरत्वमेव युक्तं चैतत्।

"यथा जीवस्य नात्माश्रुतेर्नित्यत्वाच्च ताभ्य" इति न्यायेन

(१) क, ग पुस्तके प्रतिपादनम् पाठः। (२) ग, ग पुस्तके प्रतिहतमत पाठः।

जन्माद्यभावे निश्चितेऽपि "चराचरव्यपाश्रयस्तु" "तद्व्यपदेशो[१] भाक्तस्तद्भावभावित्वादि"ति न्यायेनौपाधिकमुत्पत्तिविनाशवत्त्वं तथाऽसम्भवस्तु "सतोऽनुपपत्ते"रिति न्यायेन

"न जायते म्रियते वा विपश्चित् आकाशवत्सर्वगतश्च नित्य"-इत्यादिश्रुत्याजन्माद्यभावे निश्चितेऽपि समष्टिस्थूलसूक्ष्मोपाधिप्रयुक्तमुत्पत्त्यादीश्वरस्याप्यस्तु हिरण्यगर्भादिरूपेण। नच तावताजीवत्व[२] अनावृत्तस्वरूपत्वेन परिच्छेदाभिमानाभावात् आवृतस्वरूपेण परिच्छेदाभिमानस्यैव जीवत्वप्रयोजकत्वादन्यथोपाधिसम्बन्धमात्रेण जीवत्वे निरुपाधिकस्य ब्रह्मणो जीवत्वेश्वरत्वयोरनभ्युपगमेन सोपाधिकस्य तदभ्युपगमेन तस्य जीवत्वं प्रसज्येत। तस्मात् सूत्रात्मवैश्वानरयोः सूत्रकारेण ईश्वरत्वप्रतिपादनात्तत्प्रतिपादकश्रुतिस्मृतिसम्भवाच्च[३]। औपाधिकजन्मादिप्रतिपादनस्य वैराग्यार्थत्वाच्च निरतिशयज्ञानैश्वर्यादियोगाच्चानावृत्तस्वरूपत्वेन परिच्छेदाभिमानाभावाच्च तयोरीश्वरत्वम्।

एवञ्च तदुपासकानां तत्प्रसादेन क्रममुक्तिरुत्पद्यते। तस्मादेकस्यैव परमात्मनो वैश्वानरसूत्रेश्वरा[४] अवस्थाविशेषा इत्यभिप्रेत्येममर्थं स्पष्टयति एक एवेति। "तस्य हवा एतस्यात्मनो वैश्वानरस्य मूर्द्धैव सुतेजा" इत्यादिश्रुत्युक्तसकलगुणविशिष्टवैश्वानरोऽहमस्मीत्यर्थः। एतदिति वैश्वानरोपासनयेत्यर्थः। यथोक्तप्रकारेण वैश्वानरं

(१) क, ग पुस्तके तद्व्यपदेश इत्यादि न।

(२) ग नच तावज्जीवत्वमिति पाठः।

(३) ग, मत सदात्मकस्य ब्रह्मण उत्पत्त्यसम्भवः कुतोऽनुपपत्तेरित्यधिक पाठः।

(४) ग वैश्वानरसूत्रेश्वरावस्थाविशेषा इति पाठ।

परमात्मानं ज्ञात्वा तदुपासनेन साधकस्तद्भावं प्राप्नोतीत्यत्र सम्मतिमाह वैश्वानरेति[१]। शारीरके समन्वयलक्षणे स्थितं वैश्वानरः साधारणशब्दविशेषात्। को न आत्मा किम्ब्रह्मेत्यात्मानमेवेमं वैश्वानरं सम्प्रत्यध्येषितमेव नोब्रूहीत्युपक्रम्य[२] तेजस्त्वादिगुणयोगं द्युसूर्यप्रभृतीनामेकैकोपासननिन्दया मूर्धादिभावमुपदिश्याम्नायते "यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति तस्य। ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा सन्देहो बहुलो बस्तिरेव रयिः पृथिव्येव पादावुर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीय" इत्यादि तत्र संशयः।

किमिह वैश्वानरो जठराग्निरुत भूताग्निराहोस्विद्देवतात्माथवा शारीरः किं वा परमेश्वर इति वैश्वानरात्मशब्दाभ्यां संशयः। तत्र जाठराग्निर्वा भूताग्निर्वा देवतात्मा वा वैश्वानरः स्यात्। श्रुतिषु सर्वत्र वैश्वानरशब्दप्रयोगात्।

अथवा शारीरो वा स्याद्वैश्वानर आत्मशब्दादात्मशब्दस्य तत्रैव मुख्यत्वाद्वैश्वानरशब्दस्यापि लक्षणया तत्र प्रवृत्तिसम्भवात्। तस्माच्छारीरो वैश्वानरो न परमेश्वर इत्येवं प्राप्तेऽभिधीयते। वैश्वानरः परमेश्वरो भवितुमर्हति। कस्मात्साधारणशब्दविशेषात्। वैश्वानरशब्दस्तावत् साधारण आत्मशब्दो द्वयस्य साधारणस्तथापि विशेषो दृश्यते। "मूर्धैव सुतेजा" इत्यादिना।

---

(१) ग, सुतेजसस्त्वेति पाठः।

"अन्तर उपपत्ते"रित्यस्मिन्नधिकरणे सूत्रकारभाष्यकाराभ्यामुपकोशलविद्यायां तथैव प्रतिपादनात् । स एव केवलमायोपाधिकः सन् ईश्वर इत्युच्यते । तदुपासनया तत्प्राप्तिः फलम्भवति ॥ ३७ ॥

नचाय जठरादीनां सम्भवत्यतः परमेश्वरो वैश्वानरस्तस्य सर्वकारणत्वात् सर्वात्मत्वोपपत्तेः । तस्मिन् यथोक्तविशेषणसम्भवात् ।

किञ्च, "स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ती"ति वैश्वानरस्य परमेश्वरत्वे तदुपासकस्य तद्भावप्राप्त्या सर्वलोकाश्रयाश्रात्त्व(१) सम्भवति । अन्यथा तन्न स्यात् । अपि च "तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते" इति वैश्वानरस्य परमेश्वरत्वे तदुपासकस्य तद्भावमापन्नस्य सर्वपापदाह उपपद्यते । इतरथा तदयोगात् ।

एवञ्च सति वैश्वानरादिशब्दा भाष्यकारोक्तप्रकारेण परमेश्वरे यथासम्भवं योजनीयाः । तस्माद्वैश्वानरः परमेश्वर इति सूत्रकारभाष्यकाराभ्या श्रुत्यर्थ. प्रतिपादितस्तस्माद्वैश्वानरस्येश्वरत्व तदुपासकस्य तत्प्राप्तिफलम्भवतीति भाव । हिरण्यगर्भस्वरूपमाह स एवेति । श्रुत्युक्तगुणोपेतः सूत्रात्मा हिरण्यगर्भोऽहमस्मीत्युपासकस्य तद्भावापत्तिफलमाह एतदिति । हिरण्यगर्भोपासनयेत्यर्थः ॥ २६ ॥

हिरण्यगर्भस्येश्वरत्वे तदुपासकस्य तत्प्राप्तौ च सम्मतिमाह अन्तर उपपत्तेरिति । समन्वयलक्षणे स्थितमन्तर उपपत्ते "य एषो-

---

(१) क -स्रादत्वमिति पाठ ।

ऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाच एतदमृतमभयमेतद्ब्रह्मेति, तद्यद्यप्यस्मिन्सर्पिर्वोदकं वा सिञ्चन्ति वर्त्मनीव गच्छती"ति श्रूयते। तत्र संशयः किमत्राप्यधिकरणे उपास्यत्वेनोपदिश्यते छायात्मा उत देवतात्मा आहोस्विच्छारीरः किं वा परमेश्वर इति तत्र दृश्यते इति निर्देशाच्छायात्मोपास्यत्वेनोपदिश्यते इति प्राप्तं तस्यैव चक्षुःसन्निधानात्।

अथ वा देवतात्मास्यादिन्द्रियानुग्राहकत्वेन सन्निहितत्वात्। यद्वा, शारीरः स्यात्तस्यापि करणस्वामित्वेन जाग्रदवस्थायां चक्षुर्विशेषतः सन्निहितत्वात्। तत्रैवात्मशब्दस्यापि मुख्यत्वादेवं निश्चिते सत्यमृतत्वादिकं शारीरे यथाकथञ्चिद्योजनीयम्।

तस्माच्छारीर उपास्यो न तु परमेश्वर इत्येवं प्राप्ते ब्रूमः अक्षिस्थाने परमेश्वर एवोपास्यत्वेन निर्दिश्यते न च्छायादिः। कस्माद्वाक्यशेषगतसम्पद्धामत्वामनत्वभा[१]मनत्वामृतत्वादिगुणजातस्य परमेश्वर एवोपपत्तेः, इतरत्रासम्भवात्।

किञ्च वाक्योपक्रमे "प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मे"ति सुखविशिष्टब्रह्माभिधानात् "य एषोऽक्षिणि पुरुषो दृश्यत" इत्यत्रापि य एष सर्वनाम्नः प्रकृतपरामर्शित्वेन तस्यैव प्रत्यभिज्ञानात्। आचार्यास्तु ते गतिं वक्तेत्यग्नीनां वचनाच्च। वाक्योपनिर्दिष्टं सुखविशिष्टं ब्रह्म इहाक्षिस्थाने ध्येयत्वेनोपदिश्यत इति गम्यते। अन्यथा प्रकृतहाना प्रकृतप्रक्रिया प्रसङ्गात्। परमेश्वरस्यापि उपासनार्थमक्षिस्थानत्वमुपपद्यते। तस्मात्परमेश्वर एवोपास्यः। उपकोशलेनाधीता

(१) प्रधामभत्वमित्यधिं क्षत (ख) पुस्तके।

विद्योपकोशलविद्या तत्रामियमाख्यायिका "उपकोशलो ह वै काम-लायनः सत्यकामे जाबाले ब्रह्मचर्य्यमुवासे"ति श्रुतिनियमाम्नाता। उपकोशलो नाम कश्चिद्ब्रह्मचारी सत्यकामस्य गुरोर्निकटे ब्रह्मचर्य्यं क्रतवान् तमुपकोशलं शिष्यमग्निपरिचर्य्यानिमित्तं गृहे स्थापयित्वा गुरुः सत्यकामो द्रव्यार्जनार्थं देशान्तरं जगाम तदोपकोशलस्य परिचर्य्यया सन्तुष्टास्त्रेताग्नयो ब्रह्मविद्यामुपदिदिशुः "प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मे"त्यनन्तरं स्वस्वविद्यास्तु पश्चाद्गतिप्रश्ने कृते, आचार्य्यस्तु ते गतिं वक्तेत्यग्नय ऊचुः, अनन्तरमागतेनाचार्य्येण प्रणतं शिष्यं प्रति ब्रह्मविन्मुखमिव त्वन्मुखं प्रतिभाति केनोपदिष्टा ब्रह्मविद्येति पृष्टे अग्निरुपदेष्टा आचार्य्यो गतिं वक्ष्यतीत्युक्तमित्युक्तोपकोशल आचार्य्यं शरणं प्रतिपेदे शरणागतं शिष्यं सत्यकामो गुरुरुपदिदेश। "य एषोऽक्षिणि पुरुषो दृश्यते" इत्यादिना अत इयं विद्योपकोशलेनाधीतत्वादुपकोशलविद्येत्युच्यते। तस्मिन्नुपकोशल-विद्यावाक्यविचारे सूत्रकारभाष्यकाराभ्यां समष्टिप्राणोपाधिकसुख-विशिष्टपरमात्मोपास्त्या तत्प्राप्तिः प्रतिपादितेति भावः। इदानी-मपीश्वरस्वरूपमाह स एवेति। मायास्वरूपं प्राङ्निरूपितं समष्टिस्थूल सूक्ष्मशरीरराहित्यं कैवल्यम्। "य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको(१)विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः" "स क्रतुं कुर्वीत मनोमयः प्राणशरीरो भारूप" इत्यादि श्रुत्युक्त-गुणकः परमात्माहमस्मीत्युपासनया तत्प्राप्तिफलम्भवतीत्याह तदिति ईश्वरभावापत्तिः फलम्भवतीत्यर्थः॥ ३७॥

(१) क, विमृत्युशोकाविति पाठः।

"सर्वत्र प्रसिद्धोपदेशादि"ति शाण्डिल्यविद्यायां दहर उत्तरेभ्य इति दहरविद्यायाञ्च सूत्रकारभाष्यकाराभ्यां यथोक्तेश्वरोपासनया तत्प्राप्तिप्रतिपादनात् "तं यथा यथोपासते तत्तथैव भवतीति श्रुतेश्च" ॥ ३८ ॥

तत्र सम्मतिमाह सर्वत्रेति। समन्वयलक्षणे स्थितं सर्वत्र प्रसिद्धोपदेशात्। "सर्वं [1]खल्विदम्ब्रह्म तज्जलानिति शान्त उपासीत" "अथ खलु क्रतुमयः पुरुषो यथा क्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत"। "मनोमयः प्राणशरीरो भारूप" इत्यादि श्रूयते। तत्र संशयः किमत्र मनोमयत्वादिगुणकः शरीर उपास्यत्वेनोपदिश्यते, आहोस्वित्परम्ब्रह्मेति तत्र शरीर एवोपास्यत्वेनोपदिश्यते। मनोमयत्वादिगुणजातस्य तस्यैव मुख्यत्वेनोपपत्तेः। "न परम्ब्रह्म अप्राणो ह्यमनाः शुभ्र" इत्यादि श्रुत्या प्राणादिसम्बन्धप्रतिषेधेन तस्मिन्मनोमयत्वादिगुणानुपपत्तेः। यद्यपि जीवोऽप्रकृतो वाक्योपक्रमगतं ब्रह्म प्रकृतम् तथापि शमगुणविध्यर्थवादगतत्वेन ब्रह्मणोऽप्यप्रकृतत्वादिलिङ्गाच्छारीर[2] एवोपास्य। एवं निश्चिते वाक्यशेषगतगुणजातं शारीरे योजयितव्यम्।

तस्माच्छारीर एवोपास्यो न ब्रह्मेति प्राप्तेऽभिधीयते। परमेव ब्रह्म मनोमयत्वादिगुणकमुपास्यतया प्रतिपत्तव्यम्, कस्मात्सर्वेषु वेदान्तेषु तस्यैवोपास्यत्वेन प्रसिद्धतयोपदेशात्।

---

(१) सामवेदीयछान्दोग्योपनिषदि १३ खण्डे इयं श्रुतिः ।

(२) अप्रकृतत्वादिलिङ्गं शारीर इति पाठः ।

अत्रापि प्राणः शरीरमस्येति समासान्तर्गतसर्वनामश्रुत्या सन्निहितस्य ब्रह्मणः परामर्शात्। तद्धितार्थस्य सामान्यरूपतया-पेक्षया निवर्त्तकत्वाभावाच्च। वाक्यशेषगतानां सत्यकामत्वादिगुणानां ब्रह्मण्येवोपपत्तेश्च शारीरेऽनुपपत्तेः। शमविधिपरादपि वाक्या-द्ब्रह्मैवोपास्यत्वेन ग्राह्यम्। एवं निश्चिते शारीरपरात्मनोरभेदान् मनोमयत्वादिकम्ब्रह्मण्यपि सम्भवति। यद्यपि वैपरीत्यं तथापि

समारोप्यस्य रूपेण विषयो रूपवान् भवेत्।
विषयस्य तु रूपेण समारोप्यं न रूपवत्॥

इत्याचार्य्यवाचस्पतिमिश्रैरुक्तत्वान्न वैपरीत्यम्।

किञ्च, "एतमितः प्रेत्याभिसम्भवितास्मि"

"ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया॥
तमेव शरणं गच्छ सर्वभावेन भारत"।

इति श्रुतिस्मृतिभ्यामुपास्योपासकयोः शारीरपरब्रह्मणोर्गन्तृ-गन्तव्यभावेन भेदव्यपदेशात्। अनन्तकल्याणगुणकं सर्वज्ञं सर्वशक्ति-नित्यशुद्धबुद्धमुक्तसत्यपरमानन्दाद्वयं परब्रह्मोपास्यम्। यद्यपि "नान्योऽतोऽस्ति द्रष्टा" "क्षेत्रज्ञञ्चापि मां विद्धि सर्वक्षेत्रेषु भारत" इति श्रुतिस्मृतिभ्यां परमात्मनोऽन्यशरीरो नास्ति तथाप्यविद्या-कल्पितभेदमादाय तद्व्यपदेशः।

एवञ्च यथोक्तपरमेश्वरोपासनया शारीरस्योपासकस्य तत्प्राप्तिः फलम्भवति। "यथा क्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवति" "मद्भक्ता यान्ति मामपि" "मत्प्रसादात्परां शान्तिं स्थानं

शास्यति शाश्वतमि"त्यादि श्रुतिस्मृतिभ्यः । तस्माद्ब्रह्मैवोपास्यमिति शाण्डिल्यविद्यावाक्ये निश्चितं सूत्रकारभाष्यकाराभ्याम् । एवमन्यत्रापि । दहर उत्तरेभ्यः । "अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमि"त्याम्नाये अत्राकाशशब्देन भूताकाशः प्रतिपाद्यते शारीरः परमेश्वरो वेति संशयः । आकाशशब्दस्य भूतविशेषे रूढत्वात्तदेवेह प्रतिपाद्यत इति प्राप्तम् । अथवा शारीरो वा प्रतिपाद्यते । दहराकाशशब्देन तस्मिन्नात्मशब्दस्य मुख्यत्वात् ।

तस्माच्छारीर एव दहरो न परमेश्वर इति प्राप्ते ब्रूमः । दहराकाशः परमेश्वरो भवितुमर्हति कस्मादुत्तरेभ्यो हेतुभ्यः । तथाहि उत्तरहेतुवान् वायमाकाशस्तावानेषोऽन्तर्हृदयाकाश इति वाह्याकाशेन दहराकाशस्योपमानोपमेयभावः प्रतिपद्यते । स च भूताकाशपरिग्रहेणोपपद्यते तेन तस्योपमेयत्वायोगात् । तथा जीवपरिग्रहेऽपि तस्योपाधिपरिच्छिन्नस्य तेन तद्योगात् ।

किञ्च, "य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्प" इति वाक्यशेषगतानां गुणानां शारीरभूताकाशयोरनुपपत्तेः । दहराकाशः परमेश्वर एव । अपि च, "तद्य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामांस्तेषां सर्वेषु लोकेषु कामचारो भवति य एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतीरूपं संपद्य स्वेन रूपेणाभिनिष्पद्यते" इति दहराकाशोपासकस्य तद्भावापत्तिफलं दर्शयति । तच्च शारीरभूताकाशपरिग्रहेणोपपद्यते । तस्माद्दहराकाशः परमेश्वर एवेति दहरविद्यावाक्ये

भावनामान्द्येतु तत्तारतम्येन सार्ष्टि सारूप्य सामीप्य सालोक्य फलानि भवन्ति। "साम्नः सायुज्यं सालोकतां जयती"त्यादि श्रुतेः। ये पुनः साधनचतुष्टयसम्पन्ना विचारासमर्थाः मन्दप्रज्ञाः तेषां गुरुमुखाद् ब्रह्म

सूत्रकारभाष्यकाराभ्यामीश्वरोपासनया तद्भावापत्तिः प्रतिपादिता। तस्मात्तदुपासनया तत्प्राप्तिः फलम्भवतीति निरवद्यम्। ईश्वरोपासनया तत्प्राप्तिः फलम्भवतीत्यत्र श्रुत्यन्तरं संवादयति तं यथेति। तं परमात्मानं यथा येन प्रकारेण यादृग्गुणविशिष्टत्वेनोपासते अहमेवेश्वरोऽस्मीतिध्यायति। तथैव तादृशमेव फलम्भवति। तदुक्तम् सदाशिवेन रघुनाथं प्रति

"येनाकारेण ये मर्त्या मामेवैकमुपासते।
तेनाकारेण तेभ्योऽहं प्रसन्नो वाञ्छितं ददे" ॥

इति। चकारेण स्मृतिं समुच्चिनोति।

"यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम्।
तं तमेवैति कौन्तय! सदा तद्भावभावितः" ॥

इति स्मृतेश्चेत्यर्थः ॥ २८ ॥

ननु भावनोत्कर्षेण तत्साक्षात्कारवतस्तत्फलम्भवतु भावनामान्द्ये किं स्यादिति तत्राह भावनेति। मनुष्यत्वविस्मृतिपूर्वकं तद्भावापत्तिर्भावनोत्कर्षः।· देहे मनुष्योऽहमिति यथा तद्वत् ईदृग्मनुष्यत्वस्मरणपूर्वकं तद्भावापत्तिर्भावनामान्द्यम्। तत्तारतम्येन परमेश्वरेण समानैश्वर्यभोगवत्त्वं सार्ष्टिः जगद्व्यापारवर्जम्[१]। तदुक्तम्,

(१) क, वर्ज्जमिति पाठ.।

निश्चित्य सर्वोपाधिविनिर्मुक्तं सच्चिदानन्दलक्षणं ब्रह्माऽहमस्मीति निर्गुणब्रह्मोपासनया अस्मिन्नेव शरीरे जीवदवस्थायां मरणावस्थायां वा ब्रह्मलोके वा उत्पन्नब्रह्मसाक्षात्कारेण तत्प्राप्तिफलम्भवति . श्रुते[१]र्न्याय सामान्यात्। "ॐमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत। स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते। ॐमित्यात्मानं युञ्जीत ॐमित्येवं ध्यायथा आत्मान"मित्यादि श्रुतिभ्यः। भगवताप्युक्तम्,

"ॐमित्येकाक्षरम्ब्रह्म व्याहरन्मामनुस्मरन्।
यः प्रयाति त्यजन् देहं स याति परमाङ्गतिमि"ति॥ ३८॥

"जगद्व्यापारवर्जं[२] प्रकरणादसन्निहितत्वाच्चेति" समानरूपत्वं सारूप्यं समीपवर्त्तित्वं सामीप्यं समानलोकत्वं सालोक्यम्, एवं भावनातारतम्येन फलतारतम्ये श्रुतिं प्रमाणयति साम्न इति। साम्न. प्राणस्य सायुज्यं तादात्म्यं तद्भावापत्तिरित्यर्थः। नचान्यस्यान्यभावापत्तिः कथं विरोधादितिवाच्यम्, समष्टिकारणानामेव परिच्छेदाभिमानेन व्यष्टित्वप्राप्तिरिति अपरिच्छिन्नोपासनया परिच्छेदाभिमाननिवृत्त्या व्यष्टित्वनिवृत्तिसम्भवेन तद्भावापत्तेरविरोधादुपासकस्येमसेवार्थं श्रुतिराह "देवोभूत्वा देवानप्येति"। एतादृश फलम्भावनोत्कर्षेण भवति तस्मात्सो पूर्वोक्तमेव भवतीति दर्शयति सा-

(१) क ग श्रुतिन्यायसाम्यादिति पाठः।
(२) क [illegible] पाठः।

लोकतामिति। आदिशब्देन "एतासां(१) देवतानां सायुज्यं सार्ष्टितां समानलोकतां यान्तीति" इत्यादि श्रुतयो गृह्यन्ते। सालोक्यादिफलभेदःपुराणेषु स्फुटः। एवं सगुणोपासकानां तत्पद-वाच्यार्थनिरूपणप्रसङ्गेन तत्तदुपासनया तत्तत्प्राप्तिफलमुक्तोपासना-प्रसङ्गेन सर्वतोविरक्तानां मन्दप्रज्ञानां विचाराक्षमाणां ब्रह्म-जिज्ञासूनां निर्गुणब्रह्मोपासनया तत्साक्षात्कारद्वारा "ईक्षतिकर्म-व्यपदेशात्स" इति न्यायेन मणिप्रभायां मणिबुद्ध्या प्रवृत्तस्य मणि-प्राप्तिवन्निर्गुणब्रह्मप्राप्तिं दर्शयति ये पुनरिति। नित्यानित्यवस्तु-विवेकादिसाधनचतुष्टयम्। एतच्च अग्रेनिरूपयिष्यति ब्रह्मविचा-रासमर्था इत्यर्थः। तत्र हेतुमाह मन्देति। नच मन्दप्रज्ञानां ब्रह्मज्ञाने कथं प्रवृत्तिः स्यादिति वाच्यम्, मुमुक्षावशात्। तथाच श्रुतिस्मृतीतिहासपुराणेषु मन्दप्रज्ञानां मैत्रेयीप्रभृतीनां मुमुक्षूणां मोक्षसाधने ज्ञानादौ प्रवृत्तिदर्शनात् प्रायः स्त्रीणां मन्दप्रज्ञत्वाच्च। एवं पुरुषाणामपि तत्सम्भवात्। न काप्यनुपपत्तिरितिभावः। अत्रैवाक्षरयोजना ये मन्दप्रज्ञा गुरुमुखाद्ब्रह्म निश्चित्य निरुपाधिकं ब्रह्माहमस्मीत्युपासते तेषां निर्गुणब्रह्मोपासनयोत्पन्नब्रह्मसाक्षात्का-रेण तत्प्राप्तिः फलम्भवतीति। कदाभवतीत्याकाङ्क्षायामाह अस्मि-न्नेवेति। निर्गुणब्रह्मोपास्ते निदिध्यासने पर्यवसानान्निदिध्यासनस्य ब्रह्मसाक्षात्कारं प्रत्यन्तरङ्गसाधनत्वावगमात्तेनानात्मन्यात्मबुद्धिनिवृत्तौ तत्संस्कृतान्तःकरणस्य भावनापरिपाकतारतम्येनास्मिन्नेवशरीरे जीव-दवस्थायां मरणावस्थायां ब्रह्मलोके वा ब्रह्मसाक्षात्कारो भवति।

(१) क, एतासामेवेति पाठः।

ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्यायमानं ध्यानयोगेन सम्यग्ध्यात्मन्यात्मानमात्मना ध्यानेनात्मनं पश्यन्ति "केचिदात्मनमात्मने"ति श्रुतिभ्यः। ततः प्रारब्धे क्षीणे स्व स्वरूपेण ब्रह्मप्राप्नोतीत्यर्थः।

ननु मन्दप्रज्ञानां ब्रह्मस्वरूपस्याज्ञातत्वेन निर्गुणब्रह्मोपासि· कथं स्यात्, नह्यज्ञातत्वं केनचिदुपासितु शक्यत इत्यत आह गुरुमुखादिति। तद्विज्ञानार्थं "स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियम्ब्रह्मनिष्ठ" "शान्तोदान्त उपरतस्तितिक्षु श्रद्धान्वितो भूत्वा-त्मन्येवात्मानं पश्येत्।"

"आचार्य्यवान् पुरुषो वेदः" "यस्य देवे पराभक्तिः।"

"तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया॥
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः।
श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः॥"

इत्यादि श्रुतिस्मृत्युक्तप्रकारेण गुरुमुपसृत्य तत्प्रसादात्तदुपदेशेन मह्यतत्पदार्थं त्वं पदार्थञ्च विवेकेन देहेन्द्रियमनोबुद्ध्यहङ्कारा ज्ञानविलक्षणत्वेन मायाविलक्षणत्वेन स्थूलसूक्ष्मकारणशरीरा-धिष्ठानभूतं प्रत्यगात्मानं मायाधिष्ठानं सच्चिदानन्दलक्षणमद्वितीयं परमात्मानञ्च निश्चित्य निश्चयेन ज्ञात्वा "यत्तदद्रेश्यमग्राह्यमशब्द-मस्पर्शमरूपमव्ययमस्थूलमनण्वह्रस्वमदीर्घमप्राणोह्यमनाह्यशुभ्रोऽमह्नो-ऽयं पुरुष"।

"निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्।"

"अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च॥

नित्यः सर्वगतस्थाणुरचलोऽयं सनातनः ।
अव्यक्तोऽयमचिन्त्योऽयमविकार्य्योऽयमुच्यते ॥"

तदव्यक्तमाह अचरधियान्त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तमित्यादिश्रुतिस्मृतिन्यायैर्ब्रह्मणो निरुपाधिकत्वावगमान्निर्गुणब्रह्मोपासनं सम्भवत्येव स्वस्य विचारासमर्थत्वेऽपि गुरूपदेशेन तज्ज्ञानस्य परोक्षस्य सम्भवादित्यर्थः। निर्गुणोपासनमभिनीय दर्शयति सर्वेति। उक्तलक्षणं 'ब्रह्मैवाहमस्मि अहम्ब्रह्मास्मी'ति व्यतिहारेणोपासनं कर्त्तव्यं (१)"त्वम्वाहमस्मि भगवोदेवते अहं वै त्वमसि भगवोदेवते तद्योऽहं सोऽसौ योऽसौ सोऽहं व्यतिहारो विशिषन्ति हीतरवदि"त्यादि सूत्रेभ्यः। तथा चोक्तम्,

"चिदात्माहं नित्यशुद्धबुद्धमुक्तसदद्वयः ।
परमानन्दसन्दोहो वासुदेवोऽहमस्मी"ति ॥

वक्ष्यमाणविलापनेन ब्रह्मण उपाधिविनिर्मोको द्रष्टव्यः। एवं यथोक्तोपासनेन यथोक्तं फलम्भवतीति कुतो ज्ञायते इत्याकाङ्क्षायामाह श्रुतिरिति। "तं यथा यथोपासते तत्तथैव भवती"त्युदाहृत श्रुतेः। "तन्मूलस्याप्रतीकालं वनात्रयतो"ति वादरायणः। "उभयथादोषात्तत्(२) क्रतुश्चे"ति न्यायस्य प्रकृतेऽपि तुल्यत्वादेवं ज्ञायत इत्यर्थः। यथोक्तब्रह्मोपासनेन तत्प्राप्तौ प्रमाणत्वेन श्रुत्यन्तराण्युपन्यस्यति। ॐइत्येतेनेति। अत्र तृतीया द्वितीयार्थे द्रष्टव्या ॐकारवाच्यः परमात्माहमस्मीति। "यः परं पुरुषं परमात्मानमभिध्यायीत उपासीत स उपासकः पुरुषमीक्षत"

(१) क, ख त्वमेति पाठः। (२) ख, उभयथाप्यदोषादिति पाठः।

"अन्ये त्वेवमजानन्तः श्रुत्वान्येभ्य उपासते।
तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणा॥"

इति च। एवं तत्पदार्थस्य मायोपहितस्य ब्रह्मण-स्तटस्थलक्षणं जगज्जन्मादिकारणत्वं निरूपितम्। अय-मेवाध्यारोप इत्युच्यते। अस्यापवादश्चेदानीमुच्यते। अपवादो नाम अधिष्ठाने भ्रान्त्या प्रतीतस्य तद्व्यतिरेके-णाभावनिश्चयः। यथा शुक्त्यादौ भ्रान्त्या प्रतीतस्य रजतादेः शुक्तिव्यतिरेकेण नेदं रजतं किन्तु शुक्तिरि-त्यभावनिश्चयः। अयमेव बाधोविलापनमिति चोच्यते। स च बाधस्त्रिविधः॥ शास्त्रीयो यौक्तिकः प्रत्यक्ष-श्चेति॥४०॥

इति श्रुतौ योजना अयमेवार्थः श्रुत्यन्तराणामपि। आदिशब्देन "ॐ कम्ब्रह्म खम्ब्रह्म पुराण"मित्यादि श्रुतिर्गृह्यते। तथ स्मृति-मप्याह भगवतेति। प्रणवजपङ्कुर्वन् ममां तत्पदलक्ष्यं परमात्मानं वासुदेवमहम्ब्रह्मास्मीत्यनुस्मरन्ननुसन्धानं कुर्वन् देहन्त्यजन् यः पूर्वोक्तयोगधारणवान्मरण प्राप्नोति स परमाङ्गतिम्ब्रह्मभावलक्षणां मुक्तिं याति प्राप्नोतीत्यर्थः॥३९॥

अथोदासाध्यायप्रोक्तमप्यर्थवोदाहरति। अन्येत्विति। अन्ये साधनचतुष्टयसम्पन्ना मन्दप्रज्ञा एवमजानन्तोऽपि विचारं कर्त्तु-मशक्ताः। अन्येभ्य आचार्येभ्यो ब्रह्मस्वरूपं श्रुत्वा सम्यं पदार्थौ विवेकेन परिशोध्य श्रुतिपरायणाः सन्तोऽहम् ब्रह्मास्मीत्युपासते

ध्यानङ्कुर्वन्ति तेऽपि सर्वानर्थहेतु मृत्युमज्ञानमतितरन्त्येव अतितरान्नाशयन्त्येव नास्त्यत्र सन्देह ।

"तेषा नित्याभियुक्तानां भजता प्रीतिपूर्वकम् ।
ददामि बुद्धियोग त येन मामुपयान्ति ते ॥
तेषामेवानुकम्पार्थमहमज्ञानज तम ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥"

इति भगवतोक्तत्वात् । तेऽपि चातितरन्तीत्यनेन विचारकुशलानां मृत्युतरण कौमुतिकन्यायप्रसिद्धमिति सूचयत्यपि कारणेति श्लोकतात्पर्यार्थ । किम्बहुना सर्वासा सगुणनिर्गुणोपासनाना चित्तैकाग्र्यद्वारा ब्रह्मसाक्षात्कार एव मुख्यफल ज्ञानप्रकरणे पठितत्वात् । एतदभिप्रायेणैव सूत्रकृता वादरायणेनोपासनाविचारो ज्ञानकाण्डे कृत । ब्रह्मलोकादिफलन्तु नान्तरीयकमिति भाव । एव सृष्ट्यादिनिरूपणप्रसङ्गागतमुपासनाविचार परिसमाप्य परमप्रकृतमुपसहरति एवमिति । एवमुक्तरीत्या । नन्वध्यारोपापवादयोर्ब्रह्मप्रतिपत्तिहेतुत्वात्तावपि निरूपणीयावित्याशङ्क्य ब्रह्मणोमायाद्वारासूक्ष्मस्थूलप्रपञ्चसृष्टिनिरूपणमुखेन जगज्जन्मादिकारणत्वनिरूपणमेवाध्यारोपनिरूपणमित्याह अयमेवेति । अतस्मिंस्तद्बुद्धिरध्यारोप । अपवादनिरूपण प्रतिजानीते अस्येति। इदानीमध्यारोपनिरूपणानन्तर प्रसक्तस्य प्रतिषेधसम्भवादिति भाव । कोऽयमपवाद इत्याकाङ्क्षाया तत्स्वरूपमाह अपवादोनामेति। तद्व्यतिरेकेण तद्भिन्नत्वेन 'इत्थभावे तृतीया' उक्तमेवार्थमुदाहरति यथेति । ननु तत्त्वमस्यादिवाक्यार्थज्ञानादज्ञानतत्कार्य्यं बाध्यते ।

तथाहि, मायादिसमष्टिस्तदुपहितचैतन्यमेतदाधारानुपहितमखण्डचैतन्यञ्च तप्तायः पिण्डवत्। एतत्त्रयमविविक्तमेकत्वेनावभासनं तत्पदवाच्यार्थो भवति। विविक्तमखण्डचैतन्यं तत्पदलक्ष्यार्थो भवति ॥ ४२ ॥

स्थौति निश्चित्य तद्दिकृत्य कारणैकगोचरं स्मरणं विलापनमिति स्थूलभूतानि स्वस्वकारणीभूततामसांशेष्वन्तःकरणं ज्ञानेन्द्रियाणि स्वस्वकारणीभूतसात्त्विकांशेषु प्राणकर्मेन्द्रियाणि स्वस्वकारणीभूतराजसांशेषु विलाप्येत्यर्थः। इदानीं सूक्ष्मभूतानामुत्तरोत्तरविलापनमाह तत्रापीति। इदानीं परमकारणस्य मूलाज्ञानस्य चिन्मात्रे विलापनमाह अज्ञानमिति। उक्तक्रमे प्रमाणत्वेन विष्णुपुराणवचनमुदाहरति तथा चेति। तत्र वार्त्तिककृत्सम्मतिमाह उक्तञ्चेति। अध्यारोपापवादनिरूपणेन फलितमर्थं दर्शयति आभ्यामिति ॥ ४१ ॥

तदेवोपपादयति तथाहीति। तत्पदार्थं शोधयति मायेति। माया आदिर्यस्याः स्थूलसूक्ष्मभूतायाः(१) समष्टेः सा तथोक्ता मायादिश्चासौ समष्टिश्चेत्यनन्तरं कर्मधारयः। अयम्भावः। समष्टिस्थूलसूक्ष्मशरीरमाया तदुपहितवैश्वानरसूत्रात्मेश्वरचैतन्यमेतदाधारानुपहिताखण्डचैतन्यमेतत्त्रयं तप्तायःपिण्डवदविविक्तमेकत्वेनावभासमानं तत्पदस्य वाच्यार्थ इति। तत्पदलक्ष्यार्थमाह विविक्तमिति। समष्टिस्थूलसूक्ष्मशरीरमायाभ्यो विविक्तं विवेकेनान्वयव्यतिरेकाभ्यां पृथक्कृत्य निश्चितमखण्डचैतन्यं तत्त्वमसिवाक्येन(२) तत्पदलक्ष्यार्थ इत्यर्थः। एतावन्वयव्यतिरेकौ तत्पदार्थशोधनोपायौ तथाहि, स्थूल-

(१) क ख भूताया इति पाठः। (२) क, ख, वाक्य इति पाठः।

अविद्यादिव्यष्टिरेतदुपहितचैतन्यः। एतदाधारानुपहितं प्रत्यक्चैतन्यम्, एतत्त्रयं तप्तायःपिण्डवदविविक्तमेकत्वेनावभासमानं त्वंपदवाच्यार्थो भवति। विविक्तं

प्रपञ्चस्थित्यवस्थायां तत्साक्षिलेन पञ्चीकरणात्पूर्वं सूक्ष्मभूततत्कार्य्यसाक्षित्वेनाकाशादिसृष्टेः। पूर्वं प्रलयावस्थायां मायासाक्षित्वेन तत्त्वज्ञानेनाज्ञाननिवृत्तौ भोगेन प्रारब्धे च क्षीयमाणे जीवस्य वर्त्तमानदेहपातोत्तरविदेहमुक्तावस्थायामखण्डस्वप्रकाशचिद्रूपेण भानं तत्पदार्थस्य परमात्मनोऽन्वयः समष्टिस्थूलशरीरस्य पञ्चीकरणात्पूर्वमभानं समष्टिसूक्ष्मशरीरस्याकाशाद्युत्पत्तेः। पूर्वं मायाया मुक्त्यवस्थायां व्यतिरेकः। जीववत्परमात्मनोजाग्रदादिसम्बधाभावात्। कार्य्यस्य कारणात्मनारम्भणाधिकरणन्यायेनारोपितस्य चाधिष्ठानात्मनासत्त्वाङ्गीकारादसदुत्पत्तिवादनिराकरणाच्च। यथोक्तप्रकारेण समष्टिस्थूलसूक्ष्मशरीरतत्कारणमायानां यथोक्तावस्थास्वभानं व्यतिरेकः। तत्पदार्थस्य परमात्मनोभानमन्वय इत्येवमन्वयव्यतिरेकावभ्युपगन्तव्यौ, नलन्यादृशौ। तयोरचासम्भवात्। "अन्यत्र धर्मा"दित्यादिश्रुत्या परमात्मन. पुण्यापुण्यसम्बन्धानवगमाच्च। तस्मादाभ्यामन्वयव्यतिरेकाभ्यां शोधिततत्पदार्थो माया तत्कार्य्याभ्यामपरामृष्टाखण्डसच्चिदानन्दस्वरूपः परमात्मा तत्पदस्य लक्ष्यार्थ इति भावः ॥४२॥

त्वं पदार्थं शोधयति अविद्यादीति। अविद्या आदिर्यस्याः सा तथा सा चासौ व्यष्टिश्चेत्यविद्यादिव्यष्टिः। अयमभिप्रायः

प्रत्यक्चैतन्यं त्वं पदलक्ष्यार्थो भवति। एतौ लक्ष्यार्थावुपादाय समन्वयत्रयेण सहितं तत्त्वमस्यादिवाक्यं लक्षणया अखण्डार्थबोधकम्भवति ॥४३॥

व्यष्टिस्थूलसूक्ष्मशरीरतत्कारणविद्या। एतदुपहितविश्वतैजसप्राज्ञाश्च। एतदाधारानुपहितप्रत्यक्चैतन्यं तन्नायः पिण्डवदेकत्वेनावभासमानं त्वं पदवाच्यार्थ इति। त्वं पदस्य लक्ष्यार्थमाह विविक्तमिति। अन्वयव्यतिरेकाभ्यां स्थूलसूक्ष्मकारणशरीरेभ्यो विविक्तं पृथक्कृत्य-निश्चितं प्रति-प्रतियम् जडानृतदुःखात्मकाहङ्कारादिभ्यः प्रातिलोम्येन सच्चिदानन्दलक्षणतयाञ्चतिप्रकाशत इति प्रत्यक्, प्रत्यक् च तच्चैतन्यं प्रत्यक्चैतन्यं चेतनस्य भावश्चैतन्यं ज्ञप्तिस्वरूपमिति यावत्। (१)(तत्त्वं पदार्थौ शोधनीयौ) अन्वयव्यतिरेकौ दर्शितौ। अभाने स्थूलदेहस्य स्वप्ने यद्भानमात्मनः सोऽन्वयव्यतिरेकः। तद्भानेऽन्यानवभासमानं लिङ्गाभाने सुषुप्तौ स्यादात्मनो भानमन्वयः। व्यतिरेकस्त्वात्मभाने लिङ्गस्याभानमुच्यते। सुषुप्त्यभाने भानन्तु समाधावात्मनोऽन्वयः। व्यतिरेकस्त्वात्मभाने सुषुप्त्यनवभासनमिति। एवं तत्त्वं पदार्थौ शोधयित्वा वाक्यार्थविचारयितुं प्रतिजानीते एताविति। पदार्थज्ञानस्य वाक्यार्थज्ञानकारणत्वात्। तत्त्वं पदार्थशोधनोपायान्वयव्यतिरेकाभ्यां "सत्य ज्ञानमनन्तम्ब्रह्म विज्ञानमानन्दम्ब्रह्म योऽयं विज्ञानमयः। प्राणेषु हृद्यन्तर्ज्योतिः पुरुष" इत्याद्यवान्तरवाक्यैः शोधितौ तत्त्वं पदार्थौ लक्ष्यौ स्वीकृतावित्यर्थः ॥ ४३ ॥

---

(१) क, ख, पुस्तके नास्ति।

सम्बन्धत्रयं तु पदयोः सामानाधिकरण्यम्। सामानाधिकरण्यं नाम भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः। "यथा सोऽयं देवदत्त" इत्यत्र तत्कालविशिष्टदेवदत्तवाचकशब्दस्य एतत्कालविशिष्टदेवदत्तवाचकायं शब्दस्य च एकस्मिन्देवदत्तपिण्डे वृत्तिः सामानाधिकरण्यं पदार्थयोर्विशेषणविशेष्यभावः। यथा तत्रैव स शब्दार्थतत्कालविशिष्टायं शब्दार्थे तत्कालविशिष्टयोरन्योऽन्यभेदव्यावर्त्तकतया विशेषणविशेष्यभावः। "सोऽयमयं स" इति पदयोरर्थयोर्वा अविरुद्धवाक्यार्थेन सह लक्ष्यलक्षणभावः। यथा तत्रैव "सोऽयमि"त्यादि वाक्ये सशब्दायंशब्दयोस्तदर्थयोर्वाऽविरुद्धदेवदत्तपिण्डेन वाक्यार्थेन सह लक्ष्यलक्षणभावः। यथा "तत्त्वमस्या"दिवाक्ये तत्त्वं पदयोः परोक्षत्वापरोक्षत्वविशिष्टेश्वरजीववाचकयोरखण्डचैतन्ये तात्पर्य्येण वृत्तिः। सामानाधिकरण्यम् तथा, तत्त्वं पदार्थयोरीश्वर

सम्बन्धेति। सामानाधिकरण्यं विशेषणविशेष्यभावो लक्ष्यलक्षणभावश्चेति त्रय सम्बन्धाः. पदयोः सामानाधिकरण्यं पदार्थयो विशेषणविशेष्यभावः पदयोर्वा पदार्थयोर्वाऽखण्डचैतन्येन सह लक्ष्यलक्षणभावः। एतैः सहितं महावाक्यमखण्डार्थबोधकमित्यर्थः। लक्षणामग्रे निरूपयिष्यति।

जीवयोरन्योन्यभेदव्यावर्त्तकतया तत्त्वमसि त्वं तदसि इति विशेषणविशेष्यभावः। तथा तत्त्वं पदयोस्तदर्थयोर्वा वाक्यार्थेनाविरुद्धखण्डचैतन्येन सह विरुद्धांशपरित्यागेन लक्ष्यलक्षणभावः। तदुक्तम्,

"सामानाधिकरण्यञ्च विशेषणविशेष्यता लक्ष्यलक्षणभावश्च। पदार्थप्रत्यगात्मनामि"ति,

अस्यार्थस्तु उक्त एव। एतदभिप्रायेण वाक्यवृत्तावपि उक्तम्। तत्त्वमस्यादिवाक्यञ्च तादात्म्यप्रतिपादने लक्ष्यौ तत्त्वं पदार्थौ द्वावुपादाय प्रवर्त्तत इति। तादात्म्यप्रतिपादने, अखण्डस्वरूपप्रतिपादन इत्यर्थः॥ ४४॥

ननु समानेनाधिकरणेन सम्बन्धः सामानाधिकरण्यं तत्कथं वाक्यार्थज्ञानोत्पत्तौ हेतुः स्यादित्याशङ्क्याह सामानाधिकरण्यमिति। शब्दानामेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यमित्युक्ते घटकलशयोरपि सामानाधिकरण्यं स्यात्ततश्च ताभ्यामपि वाक्यार्थबोधः स्यात्। नच तदस्ति तयोः पर्य्यायत्वात्। अतस्तदारणायोक्तं भिन्नेति। तत्रोदाहरणमाह यथेति। विशेषणविशेष्यभावसम्बन्धमाह पदार्थयोरिति। पदजन्यज्ञानविषयत्वं पदार्थत्वम्, व्यावर्त्तकं विशेषणं व्यावर्त्त्यं विशेष्य तमुदाहरति यथेति। तत्रैव सोऽयं देवदत्त इति। वाक्ये लक्ष्यलक्षणभावसम्बन्धमाह पदयोरिति। लक्ष्यतेऽर्थोऽनेनेति व्युत्पत्त्या पदस्य पदार्थेनालक्षणम्, अविरुद्धोऽस्पष्टार्थो लक्ष्य, वाक्यजन्यज्ञानविषयो वाक्यार्थस्तेनेति यावत् उदाहरति यथेति।

संसर्गस्य वा विशिष्टस्य वा विशिष्टैक्यस्य वा प्रत्यक्षादिविरुद्धत्वेन "तत्त्वमस्या"दिवाक्यप्रतिपाद्यत्वायोगात्। अखण्डत्वं नाम विजातीयसजातीयस्वगतभेदशून्यत्वम्, सर्वस्य प्रपञ्चस्य ब्रह्मव्यतिरिक्तस्य कल्पितत्वेन मिथ्यात्वाद्विजातीयभेदशून्यता जीवपरमात्मनोरत्यन्तैक्यात्, सजातीयभेदशून्यता एकरसत्वात् स्वगत-

---

प्रत्यभिज्ञावाक्यं सम्मत्यर्थः, लौकिके सोऽय मित्यादि वाक्ये समन्वयं व्युत्पाद्य वैदिके "तत्त्वमस्या"दिवाक्ये तद्दर्शयति तथेति। तत्र सम्मतिमाह तदुक्तमिति। लक्षणया तत्त्वमस्यादिवाक्यमखण्डार्थबोधकमित्यत्राचार्य्यसम्मतिमाह एतदिति॰।

ननु किमिदं तादात्म्यं तन्निष्टसाधारणधर्मो भेदसहिष्णुरभेदो वा नोभयथापि सम्भवति। अद्वैतसिद्धाऽपसिद्धान्तप्रसङ्गादित्यत आह तादात्म्येति। स चासावात्मा च तदात्मा तदात्मनोभावस्तादात्म्यमिति व्युत्पत्त्या तादात्म्यशब्दस्याखण्डार्थस्वरूपमर्थ इति [१]तात्पर्य्यार्थः ॥ ४ ४ ॥

ननु घटमानयेत्यादौ संसर्गो वा विशिष्टो वा वाक्यार्थः सर्वसम्मतः न त्वखण्डवाक्यार्थः कैश्चिदभ्युपगम्यत इत्याशङ्क्याह संसर्गस्येति। सत्यमेवं तथापि संसर्गत्वं वा विशिष्टत्वं वा न वाक्यप्रतिपाद्यत्वे तन्त्रमनभिमतसंसर्गादेरपि वाक्यार्थत्वापत्तेः। किं तर्हि तात्पर्य्य-

---

(१) स, तात्पर्य्यमिति पाठः।

भेदशून्यता। अथवा [1]त्रिविधभेदशून्यत्वम् अखण्डत्वं विभुत्वात्। देशपरिच्छेदशून्यत्वं नित्यत्वात्। कालपरिच्छेदशून्यत्वं सर्वात्मकत्वात्। वस्तु परिच्छेदशून्यत्वम् ॥४५॥

विषयत्व तात्पर्य्यञ्चाखण्डे ब्रह्मण्युपक्रमादिभिर्लिङ्गैर्वेदान्तानामवधृतमित्यखण्ड ब्रह्मवाक्यार्थः। अनभ्युपगमस्य पुरुषदोषत्वात्।

किञ्च तत्त्वमस्यादिवाक्यप्रतिपाद्यत्वे संसर्गादेः प्रत्यक्षविरोधपरिहारासम्भवेन तस्य तदयोगात्। नच नाहमीश्वर इति प्रत्यक्षादिविरोधात्कथमखण्डवस्तुनो महावाक्यप्रतिपाद्यत्वमिति वाच्यम्, श्रुतिविरोधे प्रत्यक्षादीनामाभासत्वात् योग्यानुपलम्भेरसम्भवेन जीवनिष्ठेश्वरभेदस्य प्रत्यक्षायोग्यत्वात्। मनसोऽनिन्द्रियत्वेन तथात्वाच्च जीवाधिकरणेश्वरभेदस्य साक्षिभास्यतया प्रातीतिकत्वेन तद्विषयप्रत्यक्षस्य श्रुत्या बाधसम्भवाच्चन्द्रगत प्रादेशकत्वप्रत्यक्षवत्तद्गतद्वित्वादिप्रत्यक्षवच्च भेदप्रत्यक्षस्याज्ञानोपाधितं तत्त्वेन स्वाभाविकाखण्डार्थस्य महावाक्यस्य तेन सम विरुद्धत्वेन तन्निवर्त्तकतया भेदप्रत्यक्षस्य भ्रान्तित्वाच्च।

नन्वेवं "द्वासुपर्णे"त्यादिश्रुत्या जीवपरयोर्भेदप्रतिपादनात् कथं महावाक्यस्याखण्डार्थत्वमिति चेन्न, भेदस्य मानान्तरसिद्धत्वेन श्रुतिप्रतिपाद्यत्वायोगात् फलवत्यज्ञातेऽर्थे श्रुतेस्तात्पर्य्यात्। तस्मात्तदनुवादेनोदाहृत श्रुतेरखण्डे ब्रह्मण्येव तात्पर्य्यात्। पैङ्गिरहस्य

---

(१) म, त्रिविधपरिच्छेदशून्यत्वमिति पाठः।

ब्राह्मणेन श्रुत्यैव तथा व्याख्यानत्वाच्च, अखण्डब्रह्मैव तत्त्वमस्यादिवाक्यप्रतिपाद्यम्. तस्मात्संसर्गस्याविशिष्टस्य वा महावाक्यप्रतिपाद्यत्वायोगात्तादात्म्यप्रतिपादने इत्यस्याखण्डस्वरूपप्रतिपादन इति व्याख्यानमुचितमेव तदुक्तम्,

"संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र सम्मतः ।
अखण्डैकरसत्वेन वाक्यार्थो विदुषां मतः" ॥ इति ।

ननु किमिदमखण्डत्वं जातिरूपाधिर्वा नाद्यः । अविद्यातिरिक्तजड़जातेरनङ्गीकारात् ॥

ननु घटोऽयं घटोऽयमित्यनुगताकारप्रतीत्या जातिसिद्धेः कथमनङ्गीकार इति चेन्न, अनुगताकारप्रतीत्या घटत्वादिसिद्धावपि तस्य जातित्वे मानाभावात् । नच घटत्वादिकं जातिर्द्रव्यगुणकर्मविशेषभिन्नत्वे सति समवेतत्वात् व्यतिरेकेणाभाववदित्यनुमानेन तस्य जातित्वसिद्धिरिति वाच्यम्, समवायस्य निरस्तत्वेन हेत्वसिद्धेः साध्यप्रसिद्धेरनुमानाङ्गत्वेन जातित्वस्य मानान्तरासिद्धत्वेन व्याप्तिग्रहाभावेन तदनुमानायोगाच्च । अन्यथातिप्रसङ्गात् । तस्मादखण्डत्वं न जातिः । नचाविद्यातिरिक्तजड़जात्यनङ्गीकारेऽपि सा विद्यैवास्तामिति वाच्यम्, तथात्वे तस्य श्रुतिभेद्यत्वाभावप्रसङ्गात् । न द्वितीयः तस्यानिर्वचनत्वात् । तथाहि, न तावद्भेदशून्यत्वमखण्डत्वं भेदस्य प्रसिद्धत्वेन तच्छून्यत्वस्यासम्भवात् । अप्रसिद्धत्वेऽप्रसक्तप्रतिषेधासम्भवेन तच्छून्यत्वस्य ग्रहीतुमशक्यत्वात् । नापि परिच्छेदशून्यत्व तत्परिच्छेदो नामावयवो वस्त्वन्तरं वा ऽभावो वा । नाद्यः ब्रह्मणो निरवयवत्वेन नावयवाऽप्रसक्तौ तन्निषेधायोगेन तच्छून्यत्वस्य

ग्रहणायोगात्। न द्वितीयः भवन्मते ब्रह्मव्यतिरिक्तवस्त्वन्तरप्र-
मानान्तरासिद्धतया तन्निषेधायोगेन, तदनुपपत्तेः। न तृतीय
"अनाद्यनन्तमजोनित्य" इत्यादि श्रुत्या ब्रह्मणोऽनादि नित्यत्व
ध्वंसप्रागभावयोरसम्भवात्। अद्वितीय श्रुत्या ब्रह्मणस्त्रैकालिका-
नादिनित्यात्यन्ताभावस्यासम्भवात्। अत एव तदन्योऽन्याभावस्या-
सम्भवात्। तस्मादप्रसक्तप्रतिषेधायोगेनाभावः। परिच्छेदस्तच्छून्यत्व-
मखण्डत्वमित्यसङ्गतमेतत्। एतेनानेकपर्य्यायशब्दप्रकाश्यत्वे सत्य-
विशिष्टत्व तदिति निरस्तम्, पूर्वोक्तदोषस्यात्रापि तुल्यत्वात्, तस्मा-
दखण्ड ब्रह्मवाक्यार्थ इत्यसङ्गतमित्याशङ्क्याह अखण्डत्वं नामेति।
अखण्डत्वमुपाधिरेव। नच तन्निर्वचनासम्भव इत्याह विजाती-
येति। नच विजातीयादिभेदस्याप्रसिद्धतयाऽप्रसक्तप्रतिषेधानुपपत्त्या
तच्छून्यत्वं दुर्ग्रहमिति वाच्यम्, भ्रान्त्या प्रसिद्धसम्भवेन तच्छून्यत्वग्रह-
सम्भवात्। वृक्षादीनां विजातीयो घटादिस्तद्भेदो वृक्षेषु प्रसिद्धो
लोकानामेकस्य वृक्षस्य वृक्षान्तर सजातीयं तत्रान्योन्यभेदोऽन्यो-
न्यस्मिन्प्रसिद्धः। स्वगत शाखापत्रादितद्भेदो वृक्षेऽप्रसिद्धः प्रत्यक्षा-
दिना नैवम्ब्रह्मणि सम्भवतीत्याह सर्वस्येति। "वाचारम्भणं विकारो-
नामधेयं मृत्तिकेत्येव सत्यं" "ऐतदात्म्यमिद सर्वं तदन्यत्वमार-
म्भणशब्दादिभ्यः" इत्यादि श्रुतिसूत्राभ्यां कार्यस्य कारणाद्व्यति-
रेकासत्त्वस्य कल्पितत्वम्। नचाज्ञानस्या कार्यतया ब्रह्मव्यतिरेकाद-
कल्पितत्वप्रसङ्ग इति वाच्यम्, "एकमेवाद्वितीय"मैतदात्म्यमिदं
सर्व"मिति श्रुत्या साऽज्ञानस्य कार्याकार्यसर्वप्रपञ्चस्य ब्रह्मव्यति-
रेकावगमेनाज्ञानस्यापि कल्पितत्वसम्भवात्। कल्पितस्य सर्वस्य

प्रपञ्चस्य मिथ्यात्वेन परमार्थतोऽधिष्ठानेऽसत्त्वेन विजातीयभेद-शून्यत्वमूब्रह्मण उपपद्यते। एवं "तत्त्वमसि" "अहम्ब्रह्मास्मि" "क्षेत्रज्ञं चापि मां विद्धी"त्यादि श्रुतिस्मृतिभिर्जीवपरमात्मनोरत्यन्तैक्य-प्रतिपादनेन चेतनान्तरस्यासम्भवाज्जीवभावस्य मिथ्यात्वेनाज्ञान-कल्पितत्वाद्ब्रह्मणः सजातीयभेदशून्यत्वं तथा

"निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्।

"केवलोनिर्गुणश्चासङ्गोह्ययं पुरुषः"।

नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः"।

इति श्रुतिस्मृतिभिरवयवगुणक्रियाजातिसम्बन्धप्रतिषेधेन स्वप्ना-दिवाकैर्ज्ञायमानावयवगुणादीनां श्रुतिप्रतिपाद्यत्वाभावेन माया-कल्पितत्वेन च मिथ्यात्वाद्ब्रह्मणः स्वगतभेदशून्यत्वमिति भावः। "स्वगतभेदशून्यत्वमखण्डत्व" मित्युक्ते, साङ्ख्यात्मन्यतिव्याप्तिः सांख्यै-रप्यात्मनोऽवयवगुणक्रियाजातिशून्यत्वाभ्युपगमेन स्वगतभेदशून्यत्व-सम्भवात् तद्वारणाय सजातीयेत्युक्तम्। तैर्जीवानां परस्परभेदाभ्युप-गमेन सजातीयभेदशून्यत्वाभावान्नातिव्याप्तिः। सजातीयस्वगत-भेदशून्यत्वमखण्डत्वमित्युक्ते आकाशेऽतिव्याप्तिस्तद्वारणाय विजाती-येति। विजातीयभेदशून्यत्व तदित्युक्ते सजातीयस्वगतभेदयोरभ्युप-गमः स्यात्तञ्चाद्वितीयश्रुतिविरोधापत्तिः। तद्वारणाय सजातीये-त्यादि। एकरसत्वसिद्धये स्वगतेति। एवं पदप्रयोजन द्रष्टव्यं प्रकारान्तरेणाखण्डत्वं निर्वक्ति अथवेति। ब्रह्मणि लक्षणमुपपाद-यति विभुत्वेति। परिच्छेदोऽभावो घटत्वादीनां देशपरिच्छेदः पटादिषु तदात्यन्ताभावः स च ब्रह्मणो विभुत्वान्नास्त्येव। अन्यथा

“वेदाहमेतमजरं पुराणं सर्वात्मकं सर्वगतं विभुत्वा”-दित्यादि श्रुतेः। यद्वा अपर्य्यायानेकशब्दप्रकाश्यत्वे सति अविशिष्टत्वमखण्डत्वम्, तदुक्तम्,

“अविशिष्टमपर्य्यायाऽनेक शब्द प्रकाशितम्।
एकं वेदान्तनिष्णाता[1] अखण्डं प्रतिपेदिरे”॥ इति

विभुत्वमेव न स्यात्। घटादिव्यक्तीनां कालपरिच्छेदः स्वोपादाने ध्वंसः स च ब्रह्मणो नित्यत्वात् नास्त्येव। नित्यत्वञ्च ब्रह्मणः श्रुतिप्रसिद्धं घटादीनां वस्तुपरिच्छेदः पटादिषु घटादिप्रतियोगिकभेदो वा घटादिषु पटादिप्रतियोगिकभेदो वा द्विविधभेदोऽपि ब्रह्मणः सर्वात्मत्वान्नास्त्येव सर्वस्य स्वप्नकल्पित गजादिवत्। ब्रह्मण्यारोपितत्वादारोपितस्याधिष्ठानव्यतिरेकेणाभावाद्ब्रह्मणः सर्वात्मत्वमत एकैकरसत्वं सर्वात्मकत्वं ब्रह्मणः श्रुतियुक्त्यनुभवसिद्धमतो नोक्तविकल्पावकाशः॥ ४५॥

उक्तार्थे श्रुतिमुदाहरति वेदेति। कल्पतर्वाचार्य्यनिर्वचनमाह यद्वेति। तत्रैव तेषां सम्मतिमाह तदुक्तमिति। घटादौ नीलोत्पलादौ चातिव्याप्तिवारणाय विशेषणद्वयम्, यद्यपि, “यतो वाचो निवर्त्तन्ते” इत्यादिश्रुत्या ब्रह्मणो वाङ्मनसाऽतीतत्वप्रतिपादनात्, साक्षाच्छब्दप्रकाश्यत्वमनुपपन्नम्, तथापि, वाच्यार्थमादायान्तःकरणद्वारा लक्षणया शब्दप्रकाशितत्वं सम्भवत्येव। अन्यथा “तन्त्वौपनिषद”मित्यादिश्रुतिविरोधापत्तेः। तस्मात्तत्त्वमस्यादिवाक्यं लक्ष्या-

---

(१) स निपुणा इति पाठः।

एवं तत्त्वमस्यादिवाक्यजन्याखण्डापरोक्षज्ञानादज्ञाननिवृत्तिरानन्दावाप्तिश्च। तदुक्तम्,

"प्रत्यक् बोधो य आभाति सोऽद्वयानन्दलक्षणः।
अद्वयानन्दस्वरूपश्च प्रत्यग्बोधैकलक्षणः॥
इत्थमन्योऽन्य तादात्म्य प्रतीतिर्यदा भवेत्।
अब्रह्मत्वं त्वमर्थस्य व्यावर्त्येत तदैव हि॥
तदर्थस्य च पारोक्ष्यं यद्येवं किं ततः शृणु।
पूर्णानन्दैकरूपेण प्रत्यग् बोधो ऽवतिष्ठते"॥

इत्यन्योऽन्यतादात्म्यप्रतिपत्तिः। अहम्ब्रह्मास्मीति

र्थावुपादाया खण्डस्वरूपप्रतिपादने प्रवर्त्तंते इति निरवद्यम्,। अस्तु तत्त्वमस्यादिवाक्यमखण्डार्थबोधकम्,। ततः किं स्यादित्यत आह एवमिति। एवमुक्तप्रकारेणाहमेव ब्रह्म ब्रह्मैवाहमस्मीति महावाक्यजन्याखण्डापरोक्षज्ञान(१) ततोऽनर्थनिवृत्तिरानन्दावाप्तिश्च भवतीति शेषः। तत्राचार्य्यसम्मतिमाह तदुक्तमिति। आचार्य्यश्लोक व्याचष्टे अन्योन्येति। अहम्ब्रह्मास्मीतिज्ञानेन ब्रह्मणः परोक्षत्वनात्मत्वनिवृत्तिः। "ब्रह्मैवाहमस्मी"तिज्ञानेन जीवस्य परिच्छिन्नत्वाब्रह्मत्वनिवृत्तिः। किम्बहुना ज्ञानेन सर्वसंसारनिवृत्तिः ततश्च "प्रत्यगात्माऽखण्डैकरसब्रह्मानन्दात्मनावतिष्ठति" ब्रह्मवेद ब्रह्मैव भवति"

(१) म, परोक्षनिरखण्डापरोक्षज्ञानमिति पाठः।

ब्रह्मैवाहमस्मीत्यखण्डाकारवृत्तिः । तथा वृत्त्याऽज्ञाने निवृत्ते अब्रह्मत्वपरोक्षत्वादीनां निवृत्तत्वात् । प्रत्यगात्मनः अखण्डानन्दस्वरूपावस्थितिर्भवतीति श्लोकतात्पर्य्यार्थः ॥ ४६ ॥

इति प्रथम परिच्छेदः समाप्तः ॥

क्षेत्रक्षेत्रज्ञयोरेवमन्तरं ज्ञानचक्षुषा ।
भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम्" ॥
इत्यादि श्रुतिस्मृतिगतेभ्यः ॥ ४६ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्स्वयं प्रकाशानन्दसरस्वती पूज्यपादशिष्य भगवन्महादेवानन्दसरस्वती मुनिवरविरचिते तत्त्वानुसन्धानेऽद्वैतचिन्ताकौस्तुभे प्रथमपरिच्छेदः ॥ १ ॥

अथ द्वितीयपरिच्छेदः।

श्रीगणेशायनमः।

[1]ॐ, वृत्तिर्नामविषयचैतन्याभिव्यञ्जकोऽन्तःकरणाज्ञानयोः परिणामविशेषः। अभिव्यञ्जकत्वं नामापरोक्षव्यवहारजनकत्वमावरणनिवर्त्तकत्वं वा। परिणामो नाम उपादानसमसत्ताकोऽन्यथाभावः। उपादानविषमसत्ताकोऽन्यथाभावो विवर्त्तत इति भेदादनयोः परिणामविवर्त्तयोर्वृत्तिः। उपादानान्तःकरणाज्ञानापेक्षया परिणामः। चैतन्यापेक्षया विवर्त्त इति न सिद्धान्तविरोधः॥१॥

ॐ श्रीगणेशाय नमः।

प्रमातारं मानं फलमपि च मेयं त्रिजगताम्
नियन्तारं जीवं विगलितमिदं शुद्धममलम्।
यमाहु र्योगीन्द्रा जड़तनुसमासङ्गवशतो
नमामस्तं कृष्णं व्रजयुवतिचित्तालिकमलम्॥ १॥

तत्त्वमस्यादिवाक्यजन्याखण्डापरोक्षवृत्त्याऽज्ञाननिवृत्तिरानन्दावाप्तिश्च भवतीत्युक्तम्। तत्र केयं वृत्तिः किं वा तत्र प्रमाणं कथं वा तदुत्पत्तिर्वृत्त्या वा किम्प्रयोजनमित्याकाङ्क्षायां प्रमाऽप्रमाभेदेन

---

(१) ख, ग, ॐ इति न।

द्विविधा वृत्तिं निरूपयितुं प्रथमं वृत्तिं लक्षयति वृत्तिर्नामेति। यद्यपि प्रमेयसिद्धिः प्रमाणादिति प्रथमं प्रमाणनिरूपणमुचितम् तथापि तन्त्रान्तरे प्रमेयस्य जड़तया प्रमाणाधीना सिद्धिर्भवतीति तन्निरूपणमुचितम्। इह त्वद्वितीयात्मसाक्षिचैतन्यस्य सर्वप्रमाणादि व्यवहारसाधकस्य वेदान्तप्रमेयतया तन्निरूपणं कृतमनन्तरं प्रमाणादिनिरूपणमुचितमेवेत्यतो न काप्यनुपपत्तिः। यथाहुः।

'मानेन मेयाधिगतिस्तु युक्ता प्रमेयजाड्यादिविधिनिष्ठकाण्डे।
मेयेन मानाधिगतिस्तुयुक्ता वेदान्तवाक्यादजडं हि मेय' मिति

वृत्तिर्वृत्तिज्ञानं घटाद्यवच्छिन्नचैतन्यं विषयचैतन्यं क्रोधादि ष्वतिव्याप्तिवारणाय पूर्वदलं चक्षुरादावतिव्याप्तिवारणायोत्तर-दलम्। तेषामपि स्वजन्यवृत्तिद्वारा विषयचैतन्याभिव्यञ्जकत्वा त्तद्व्यावृत्त्यर्थमपेक्षितम्।

ननु किमिदमभिव्यञ्जकत्वमित्याशङ्क्याह अभिव्यञ्जकत्वं नामेति। नन्वनुमित्यादिवृत्तीनां प्रत्यक्षव्यवहारजनकत्वाभावादव्याप्तिरित्य-रुचेराह आवरणनिवर्त्तकत्वं वेति। यद्यपि प्रत्यक्षवृत्तेरेवावरण-निवर्त्तकत्वमित्यव्याप्तिस्तदवस्था तथाप्यनुमित्यादेरसत्त्वापादकमौ-ढ्याज्ञानावरणनिवर्त्तकत्वान्नाव्याप्तिरिति ध्येयम्।

ननु पूर्वरूपपरित्यागेन रूपान्तरापत्तिः परिणामः। स चा-नुपपन्नः पूर्वरूपे स्थिते नष्टे वा रूपान्तरापत्तेरदर्शनात्।

किञ्च वेदान्तवादस्तु विवर्त्तवाद इत्यभ्युपगमात्परिणामवादा-श्रयणे सिद्धान्तविरोधापत्तिरित्यत आह परिणामो नामेति। अन्यथाभावः परिणाम इत्युक्ते विवर्त्तेऽतिव्याप्तिः स्यादत उक्तमुपा-

"तन्मनोऽकुरुते"त्यादिश्रुत्यान्तःकरणस्य कार्य्यद्रव्यत्वेन सावयवतया परिणामित्वोपपत्तिः। सा च वृत्तिर्द्विविधा प्रमाऽप्रमाभेदात्। अत्र बोधेद्धा वृत्तिर्वृत्तीद्धबोधो वा प्रमा। सा च द्विविधा ईश्वराश्रया जीवाश्रया चेति॥२॥

दानसमसत्ताक इति। अन्यथाभावो विवर्त्त इत्युक्ते परिणामेऽतिव्याप्तिवारणायोपादानविषमसत्ताक इत्युक्तम् ॥ १ ॥

नन्वन्तःकरणस्य निरवयवत्वात्कथं परिणामः सावयवस्य क्षीरादेः परिणामदर्शनात्। नहि निरवयवं परिणम्यमानं दृष्टं लोके। अन्यथा स्वरूपनाशप्रसङ्गात् इत्याशंक्याह तदिति। वृत्तिज्ञानस्यान्तःकरणधर्मत्वे "कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धाधृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एवे"ति श्रुतिरेव तत्र प्रमाणं द्रष्टव्यम्।

ननु जानामीच्छामीत्यात्मधर्मत्वेनानुभूयमानानां ज्ञानेच्छादीनां कथमन्तःकरणधर्मत्वमनुभवविरोधात्। न चानुभवो भ्रमो बाधकाभावादिति चेन्न, तप्तायःपिण्डवदन्योऽन्यतादात्म्याध्यासेनान्तःकरणात्मनोरयोर्दहतीतिवज्जानामीत्याद्यनुभवोपपत्तेः। नचाध्यासे मानाभावः स्वानुभवस्यैव प्रमाणभावात्। तथाहि, जानामीति ज्ञातृत्वमनुभूयते, तच्चान्तःकरणस्य केवलस्य न सम्भवति जडत्वात्सापि तदात्मनस्सम्भवति। "असंगोह्ययं पुरुषः केवलो निर्गुणश्च" "अव्यक्तोऽयमचिन्त्योऽयमविकार्य्योऽयमुच्यते" इत्यादि श्रुतिस्मृतिभिरसङ्गत्वावगमात्तयाहमित्यात्मन्यन्तःकरणमध्यस्यान्तःकरणेऽप्येतेन इत्यात्मतादात्म्यमध्यस्यान्योऽन्यधर्मांयान्योऽन्यस्मिन्नध्यस्यं

तत्रेक्षणापरपर्य्यायस्रष्टव्यविषयाकारमायावृत्तिप्रतिबिम्बितचिदीश्वराश्रया। "तदैक्षत बहुस्यां प्रजाये-

---

जानामीति ज्ञातृत्वमनुभवति जीवः। अतः स्वानुभव एवाध्यासे प्रमाणं तदाह भगवान्भाष्यकारः।

"अहमिद ममेदमिति नैसर्गिकोऽयं लोकव्यवहार" इति "यत्तु जन्यज्ञानेच्छादीनामात्मनः संयोगादुत्पत्ति"रिति न्यायमतं तन्नोपपद्यते। आत्ममनसोर्निरवयवतया संयोगासम्भवात्। तथाहि, अव्याप्यवृत्तिर्हि संयोगः। अव्याप्यवृत्तित्वं नाम स्वाधिकरणनिष्ठात्यन्ताभावप्रतियोगित्वं ततश्च विरुद्धयोः प्रतियोगितदभावयोरवच्छेदकभेदमन्तरेणात्मनि निःप्रदेशेऽसम्भवेनात्मनि ज्ञानादयो जायन्त इत्यनुपपन्नम्। अपि च ज्ञानस्यात्मकार्य्यत्वे उपादानमात्मा वक्तव्यस्तस्योपादानत्वमारम्भकत्वेन वा स्यात्, परिणामित्वेन वा। नाद्य, एकस्यानारम्भकत्वात्। न द्वितीयः निरवयवस्य परिणामायोगात्सावयवत्वेऽनित्यत्वप्रसङ्गात्। तस्मादसंगत्वान्न्यायमतस्य वृत्तिज्ञानमन्तःकरणधर्म्म एवेति वृत्तिं विभजते सा चेति। प्रमां निरूपयति बोधेति। बोधेनेद्धाञ्ज्वलिता प्रकाशिता सा चासौ वृत्तिश्चेति। तथा वृत्ताविद्धः प्रतिबिम्बितो वृत्तीद्धः स चासौ बोधश्च स तथा वृत्त्यभिव्यक्तचैतन्यमिति यावत्। प्रमां विभजते सा चेति ॥ २ ॥

प्रथमां निरूपयति तत्रेति। तयोर्मध्य इति सप्तम्यर्थः। तत्र प्रमाणमाह तदिति। तत्प्रकृतं सच्छब्दवाच्यमैक्षत ईक्षणं कृतवत् ईक्षणमभिनयति बह्विति। बहुस्यां बहुभवेयं प्रजायेय उत्पद्येय

ये"त्यादिश्रुतेः। अनधिगताबाधितविषयाकारान्तःकरणवृत्तिप्रतिबिम्बितचिज्जीवाश्रयात्[१] द्वितीया। ब्रह्मात्मैक्यप्रमायास्तथात्वान्नासम्भवः। प्रपञ्चस्य संसारदशायामबाधितत्वात्। तत्प्रमायान्नाव्याप्तिः शुक्तिरजतादेर्ज्ञातसत्ताकत्वेनाज्ञातसत्त्वा[२]कत्वाभावात् नातिव्याप्तिः। तत्करणं प्रमाणम्। सा जीवाश्रया प्रमा द्विविधा, परमार्थिकी व्यवहारिकी चेति। तत्र "तत्त्वमस्या"दिवाक्यजन्या प्रमा पारमार्थिकी। सा च निरूपिता अग्रे निरूपयिष्यते। प्रपञ्चप्रमा व्यवहारकी। सा च षड्विधा

जीवाश्रयां प्रमां निरूपयति अनधिगतेति। अनधिगतोऽज्ञात. बोधेनाविषयीकृतो योऽर्थो विषयस्तदाकारायान्तःकरणवृत्तिः तत्प्रतिबिम्बिताचित् द्वितीया जीवाश्रयाविषयाकारान्तःकरणवृत्तिप्रतिबिम्बिताचिज्जीवाश्रयप्रमेत्युक्ते भ्रान्तिज्ञानेऽतिव्याप्तिस्तद्वारणाया बाधितेति भ्रमविषयीभूतस्य रजतस्य बाधितत्वान्नातिव्याप्तिस्तावत्युक्ते स्मृतावतिव्याप्तिरत उक्तमनधिगतेति। स्मृतेरनुभूतविषयत्वान्नातिव्याप्तिः सम्पूर्णमभ्रंशमाशङ्क्याह ब्रह्मेति। तथात्वादनधिगताबाधितार्थविषयाकारान्तःकरणवृत्तिप्रतिबिम्बितचित्त्वात्।

ननु प्रपञ्चस्य ब्रह्मज्ञानबाध्यत्वेन तत्प्रमायामव्याप्तिरित्याशंक्याह प्रपञ्चस्येति। ननु भ्रान्तिज्ञाने यथोक्तलक्षणसद्भावादतिव्याप्तिरित्याशंक्याह शुक्तीति। एवं प्रमालक्षणे निर्दिष्टे फलितमाह तदिति।

---

(१) क, ख जीवाश्रया तु इति पाठो न। (२) ग, सत्ता इति पाठ।

प्रत्यक्षानुमित्युपमितिशब्दार्थापत्यभावप्रमाभेदात्। तत्र विषयचैतन्याभिन्नप्रमाणचैतन्यं प्रत्यक्षप्रमा। तथाहि, एकमेव चैतन्यमुपाधिभेदाच्चतुर्विधं प्रमातृचैतन्यं प्रमाणचैतन्यं विषयचैतन्यं फलचैतन्यं चेति ॥ ३ ॥

तस्याः प्रमायाः करणं प्रमाणं अत्र प्रमाणं लक्ष्यं प्रमाकरणं लक्षणं करणं प्रमाणमित्युक्ते कुठारेऽतिव्याप्तिः स्यात्तस्यापि छिदक्रियाप्रतिकरणत्वात्। तद्व्यावृत्त्यर्थं प्रमेति प्रमा प्रमाणमित्युक्ते चक्षुरादावव्याप्तिस्स्यात्तस्य द्रव्यत्वेन प्रमात्वाभावात्तत्परिहाराय करणमित्युक्तं करणस्वरूपमग्रे व्युत्पादयिष्यति। जीवाश्रयां प्रमां विभजते सेति। पारमार्थिकीं व्युत्पादयति तत्रेति। तर्हि पारमार्थिकीप्रमानिरूपणीयेत्याकाङ्क्षायामाह साचेति। अग्रे शाब्दिप्रमानिरूपणावसरे व्यवहारकीं प्रमां निरूपयति प्रपञ्चेति। तां विभजते सा चेति। प्रत्यक्षप्रमां लक्षयति तत्रेति। तासु मध्य इत्यर्थः। अत्र नैयायिकाः

प्रमाकरणं प्रमाणं यथार्थानुभवः प्रमा तद्वति तत्प्रकारकत्वं याथार्थ्यं स्मृतिभिन्नज्ञानमनुभवः। सा चतुर्विधा प्रत्यक्षानुमित्युपमितिशब्दप्रमाभेदात्। तत्रेन्द्रियत्वेनेन्द्रियजन्यं ज्ञानं ज्ञानाकरणकज्ञानं वा प्रत्यक्षमिति वदन्ति। तच्चिन्त्यम् भ्रमज्ञानेऽतिव्याप्तेः। नच तद्वति तत्प्रकारकानुभवस्य प्रमात्वेन भ्रमस्यातथात्वान्नातिव्याप्तिरिति वाच्यम्, भ्रमविषयकरजतस्य गुञ्जावभ्युपेयत्वेन भ्रमस्यापि तद्वति तत्प्रकारकत्वात्। अन्यथा ख्यातेर्निरमिष्यमाणत्वात्। किञ्च, घटे

रूपमिति प्रमायामव्याप्तिः स्यात् तद्वति तत्प्रकारकत्वाभावात्। स्वरूपसम्बन्धेन तथात्वे भ्रमेऽतिव्याप्त्यापत्तेश्च। तस्माद्यथोक्तमेव साधु।

ननु भवन्मते धारावाहिकज्ञानेऽव्याप्तिस्तस्याधिगतविषयत्वादिति चेन्न। तत्रापि तत्तत्क्षणविशिष्टघटस्यानधिगतत्वेन धारावाहिकज्ञानस्यापि तथात्वात्।

ननु क्षणस्यातीन्द्रियत्वेन तस्य तद्विशिष्टविषयत्वमनुपपन्नमिति चेन्न, धारावाहिकस्थले विरोधिवृत्त्युत्पत्तिपर्यन्तं यावद्घटस्फुरणं तावद्वृत्तेरेकत्वेन ज्ञानभेदाभावेन व्याप्तिशङ्कानवतारात्। वृत्तिभेदे मानाभावश्च। किञ्च, प्रमाचातुर्विध्यमप्यसङ्गतं पीनत्वदर्शनाद्रात्रिभोजनप्रमाऽभावप्रसङ्गात्। नच व्यतिरेकानुमानात् सा भविष्यतीति वाच्यम्। तस्यापि परिहरिष्यमाणत्वात्। तथानुपलब्ध्याभावप्रमादर्शनात्। प्रमितिश्चातुर्विध्यमसङ्गतम्, इन्द्रियान्वयव्यतिरेकयोरधिकरणज्ञानोपक्षीणत्वेनेन्द्रियस्य सम्बन्धार्थप्रकाशकत्वेन चाभावेनेन्द्रियस्य सम्बन्धाभावेन च तेन तद्ग्रहणायोगात्। तस्मादनिच्छतामप्यच्छमतिनाऽर्थापत्त्यनुपलब्धेः पृथक् प्रामाण्यमभ्युपगन्तव्यं ततः षड्विधैव प्रमा।

किञ्च इन्द्रियत्वेनेन्द्रियजन्यं ज्ञानं प्रत्यक्ष(१)मित्यसङ्गतम्, इन्द्रियस्यातीन्द्रियतया तद्घटितप्रत्यक्षत्वविशिष्टज्ञानस्याप्यतीन्द्रियत्वप्रसङ्गात्। न चेष्टापत्तिः, साक्षात्करोमीत्यनुभवविरोधप्रसङ्गात् जन्यतावच्छेदकग्रहमन्तरेण जन्यत्वस्य दुर्ग्रहत्वाच्च। नच साक्षात्त्वजातिरेव *जन्यतावच्छेदिकास्त्विति वाच्यम्, जातेर्निरस्तत्वात्।*

---

(१) ख, प्रत्यक्षप्रमेत्येति पाठ।

अपिच, द्वितीयमप्यमङ्गतमेव तत्त्वमाक्षात्कारस्य श्रवणमननादि(१)जन्यतया तत्राव्याप्तिप्रसङ्गात् । तस्मादसङ्गतमेतत् प्रमाणचैतन्य प्रत्यक्षप्रमेत्युक्तेऽनुमित्यादावतिव्याप्तिः स्यात । तद्वारणाय विषयेति । विषयचैतन्याभिन्न वृत्त्यवच्छिन्नचैतन्य प्रत्यक्षप्रमेत्युक्ते भ्रमप्रत्यक्षेऽति व्याप्तिस्स्यात्तद्वारणार्थं प्रमाणेति । न चैव(२) विषयचैतन्याभिन्नप्रमाण चैतन्यमिदमाकारवृत्त्यवच्छिन्नभ्रमविषयरजतभासकसाक्षिचैतन्यमिति पुनरतिव्याप्तिरिति वाच्यम् । अबाधितत्वस्यापि विषयविशेषणत्वात् । न चैव घटादेर्ब्रह्मज्ञानबाध्यतयाऽव्याप्तिरिति वाच्यम् । संसारदशायामबाधितस्य विवक्षितत्वात् । न चैवमपि धर्माधर्मानुमित्यादावतिव्याप्तिरिति वाच्यम् । योग्यत्वस्यापि विषयविशेषणत्वात् । एव स्मृतावतिव्याप्तिपरिहाराय वर्त्तमानेति (३)विशेषण देयम् । तथा चायमर्थः सम्पन्नः संसारदशायामबाधितवर्त्तमानयोग्यविषयचैतन्याभिन्न(४)प्रमाणचैतन्य प्रत्यक्षप्रमेति । अथवाऽबाधितापरोक्षार्थविषयज्ञान प्रत्यक्षप्रमा भ्रमविषयस्य बाधितत्वान्नातिव्याप्तिः घटादीना संसारदशायामबाधितत्वान्नातिव्याप्तिः । पूर्वं(५) प्रत्यक्षविषयस्यापरोक्षत्व नाम साक्षितादात्म्यम् । तथा चान्योऽन्याश्रय । विषयत्व नाम ज्ञाने स्वाकारसमर्पकत्वम् । विषयित्व नाम तदवभासकत्वम् । ननु वृत्तीद्धबोधस्य प्रमातेनाखण्डचैतन्यस्य स्वप्रकाशत्वेन तद्भास्यत्वाभावात् ज्ञानज्ञेययो कथ विषयविषयीभाव इति चेन्न । बोधेद्ध-

---

(१) ग श्रवणकरणतयेति पाठः । (२) ग, नचैवमपीति पाठः ।
(३) क ग विषयविशेषणमिति पाठः । (४) ग चैतन्यभिन्नमिति पाठः ।
(५) क ग पुस्तके (पूर्वं प्रत्यक्ष) इति पाठो न ।

तत्रान्तःकरणविशिष्टचैतन्यं प्रमातृचैतन्यम्। अन्तः-करणवृत्त्यवच्छिन्नचैतन्यम् प्रमाणचैतन्यम्। घटाद्यव-च्छिन्नचैतन्यम् विषयचैतन्यम्। अन्तःकरणवृत्त्यभिव्यक्त-चैतन्यम् फलचैतन्यम्। तत्र वृत्तिविषययोर्युगपदेकदेशा-वस्थाने तदुपहितचैतन्ययोरप्यभेदो भवति। तथाहि तडागोदकं छिद्रान्निर्गत्यकुल्याद्वारा केदारं प्रविश्य

वृत्तेरेव प्रमात्वाभ्युपगमेनाखण्डचैतन्यस्य तद्विषयतया विषयविषयी-भावोपपत्ते ।

अथवा विषयत्व नाम व्यङ्ग्यत्वम्। विषयित्व नाम व्यञ्जकत्वम्, विषयनिष्ठावरणनिवर्त्तकत्वमिति यावत्। ततश्च ब्रह्मै[१]क्यप्रमाया अखण्डचैतन्यनिष्ठावरणनिवर्त्तकत्वाद्विषयविषयीभाव उपपद्यते।

यद्वा, अध्यस्तत्व विषयत्व चित्त विषयित्व ततश्चाज्ञानादि-समस्त जगद्विषय श्चिदात्मावृत्त्यारूढो विषयीति। चैतन्यभेदे ज्ञाते विषयचैतन्याभिन्न[२]प्रमाणचैतन्य [३]प्रत्यक्षप्रमेति ज्ञातु शक्यमिति। उपाधिभेदात्तद्भेद व्युत्पादयति एकमिति।

अथवा चैतन्यस्याद्वितीयत्वेन विषयचैतन्याभिन्न प्रमाणचैतन्य-मित्यनुपपन्नमित्याशङ्क्योपाधिभेदात्तद्भेद व्युत्पादयत्येकमिति ॥ २ ॥

एव चैतन्यभेद व्युत्पाद्य प्रमाणचैतन्यस्य विषयचैतन्याभेद

---

(१) ग ब्रह्मात्मैक्यति पाठ।

(२) ग चैतन्याभिन्न प्रमाणचैतन्यमिति पाठ।

(३) ग चैतन्यमित्यनुपपन्नमित्याशङ्क्योपाधिभेदात्तद्भेद व्युत्पादयतीति पाठ।

सुखादिगोचरा चेति। आत्मगोचरा द्विविधा। विशिष्टात्मविषया शुद्धात्मविषया चेति। 'अहञ्जीव' इत्यादि-विशिष्टात्मविषया 'अहं ब्रह्मास्मी'ति शुद्धात्मविषया-चेति अहं सुखीत्यादिसुखादिविषया "अन्तरिन्द्रियं मन आन्तरप्रमाकरणमि"ति वाचस्पतिमिश्राः ॥ ५ ॥

ननु कोऽयं साक्षीत्याशङ्क्याह अन्तःकरणेति। ननु साक्षित्व नाम उदासीनत्वे सति बोद्धृत्व तच्चात्मन एव। ततश्च बोद्धृत्व नाम बोधाश्रयत्वमिति कथं साक्षिणा विषयस्फुरणं स्यादतोऽयं घट इति व्यवसायज्ञानानन्तरं घटमहं जानामीत्यनुव्यवसायेन घटः स्फुरतीति वक्तव्यं न साक्षिणा तस्य बोधाश्रयत्वेन तत्स्फोरकत्वायोगात्। न चात्मनश्चिद्रूपतया घटादिस्फोरकत्वमिति वाच्यम्। तर्हि सर्वदा सर्वस्फुरणप्रसङ्गात्।

किञ्च, ज्ञानवानहमिति ज्ञानाश्रयत्वेनानुभूयमानस्य चिद्रूपत्वे मानाभावात्। नच श्रुत्या तथात्वमिति वाच्यम्। प्रत्यक्षविरोधे श्रुतेरन्यपरत्वात्। तस्मात्साक्षिणा घट स्फुरतीत्यसङ्गतमिति चेन्नैव "योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुष" इत्यादि श्रुतेरर्थान्तरत्वासम्भवेनात्मनश्चिद्रूपतानवगमात्। नच प्रत्यक्षविरोध प्रत्यक्षेणाहङ्कारस्यैव ज्ञानाश्रयत्वेनानुभूयमानत्वात्। नच स एवात्मेति वाच्यम्। तस्याध्यस्तत्वेनासात्मत्वेनानात्मत्वस्य वक्ष्यमाणत्वात्, प्रमाण-प्रमेयावभासकस्य श्रुत्यादिसिद्धस्यापन्हापायोगात्।

सत्यात्मनश्चिन्मयत्वेऽपि कथं प्रमात्राद्यवभासकत्वमिति चेन्न,

स्वप्रकाशतया तदुपपत्तेः। नच स्वप्रकाशत्वे मानाभाव इति वाच्यम्। "अयं पुरुषः स्वयं ज्योतिर्भवती"त्यादि श्रुतेरेव प्रमाणत्वात्, तस्या अर्थान्तरत्वकल्पनायां श्रुतहान्यश्रुतकल्पनाप्रसङ्गात्। लाघवादेकेन स्वप्रकाशसाक्षिणा सर्वव्यवहारोपपत्तावनन्तज्ञानकल्पनायां गौरवप्रसङ्गात्।

किञ्चानुव्यवसायेन घटः स्फुरतीत्यसङ्गतं साक्ष्यतिरिक्तानुव्यवसायकल्पनायां मानाभावात्। नच प्रत्यक्षमेव तत्र प्रमाणमिति वाच्यम्। अनवस्थाप्रसङ्गात्।

किञ्चानुव्यवसायस्य मानसत्वेन तेन घटादिस्फुरणं कथं स्यान्मनसो वहिरस्वातन्त्र्यात्, अन्यथातिप्रसङ्गात्। नच व्यवसायज्ञानद्वारा तद्विषयतीति वाच्यम्। व्यवसायस्य मानसप्रत्यक्षत्वेऽपि वाह्यस्य घटादेस्तद्योगात्। नच ज्ञानप्रत्यासत्त्या तद्विषयतीति वाच्यम्। ज्ञानस्य प्रत्यासत्तित्वेऽतीन्द्रियमात्रोच्छेदापत्तेः। तस्मात्स्वप्रकाशसाक्षिणा घटः स्फुरतीति निरवद्यम्। प्रत्यक्षप्रमां विभजते सेयमिति। प्रथमां विभजते तत्रेति। शब्दप्रमा, स्पर्शप्रमा रूपप्रमा रसप्रमा गन्धप्रमेति पञ्चविधेत्यर्थः। तत्करणभेदमाह तदिति। द्वितीयां विभजते आन्तरेति। आत्मप्रमां विभजते आत्मेति। आन्तरप्रमायां करणमाह अन्तरिन्द्रियमिति। इन्द्रियत्वलक्षणलक्षितत्वान्मन इन्द्रिय मान्तरप्रमाकरणं सुखादिप्रमाकरणं यथारूपादिसाक्षात्प्रमितिकरणत्वेन चक्षुरादीन्द्रियं सिध्यति। एवं सुखादिसाक्षात्प्रमितिकरणत्वेन मनोऽन्तरिन्द्रियं सिध्यति। सुखादीनां व्यवहारिकत्वेन तद्गोचरज्ञानस्यापि व्यवहारिकप्रमात्वात्। नच

आचार्य्यास्त्वेवं वर्णयन्ति "इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः" "इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मन" इति श्रुतिस्मृतिभ्यां मनस इन्द्रियेभ्यः पृथक्करणात् मनोनेन्द्रियम्। वृत्तिं प्रत्युपादानत्वान्न करणं मनः सुखादिसाक्षात्कारस्य प्रमाणाजन्यत्वेनाप्रमात्वमिष्टमेव ॥ ६ ॥

मनसस्तत्करणत्वेऽपि शुद्धात्मप्रमाकरणत्वमनुपपन्नं श्रुतिविरोधादिति वाच्यम्। "मनसैवानुद्रष्टव्यमि"त्यादिश्रुत्या मनसः शुद्धात्मप्रमाकरणत्वे निश्चिते श्रुत्यन्तरस्यार्थान्तरत्वोपपत्तेः। नचात्मनो मानसत्वे औपनिषदत्वश्रुतिविरोध इति वाच्यम्। शास्त्राचार्य्यसंस्कृतस्य मनस एव ब्रह्मसाक्षात्कारकरणत्वेनाविरोधादौपनिषदत्वश्रुतेः।

किञ्च, विशिष्टात्मसाक्षात्कारे मनसः करणत्वेन क्लृप्तत्वाच्छुद्धात्मसाक्षात्कारेऽपि तदेव करणं वाच्यम्। विजातीयकरणान्तरकल्पनेऽतिप्रसङ्गात्, मानाभावाच्च। तस्मादान्तरप्रमायां मन एव करणमिति वाचस्पतिमिश्रमतानुसारिणामाशयः ॥ ५ ॥

आचार्य्यमतमाह, आचार्य्यास्त्विति। एवं वक्ष्यमाण प्रकारेण मनस आन्तरप्रमाकरणत्वमनुपपन्नमिति वक्तुमिन्द्रियत्वं दूषयति इन्द्रियेभ्य इति। नच श्रुतिकृतिभ्यां बाह्येन्द्रियेभ्यः पृथक्त्वं प्रतिपाद्यते न लिन्द्रियेभ्य इति वाच्यम्। संकोचे मामाभावात्। नच त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठादित्यस्मिन्नधिकरणे एकादशानाममुख्यप्रमानामिन्द्रियत्वनिर्णयात् मनसोऽनिन्द्रियत्वे तद्विरोधा-

अत एवान्तःकरण तद्धर्माणां च शुक्तिरजतादिवत् प्रातीतिकत्वम् शुद्धात्मसाक्षात्कारस्य वेदान्तवाक्यजन्यत्वात्प्रमात्वं वाक्यस्यापरोक्षज्ञानजनकत्वं वक्ष्यत इति

पत्न्या संकोचो युक्त इति वाच्यम्। "यजमानपञ्चमा इडां भक्षयन्ती"त्यादौ ऋत्विग्भिन्नेन यजमानेन तद्गतपञ्चत्वसंख्यापूरणाद्-निन्द्रियेणापि मनसा इन्द्रियगतसंख्यापूरणसम्भवेन तदधिकरणाविरोधात्।

किञ्च, मनसः करणत्वे सिद्धे इन्द्रियत्वं स्यात्। नच तस्य करणत्वं सम्भवति निखिलवृत्त्युपादानत्वेन तस्य तदयोगात् इत्याह वृत्तिं प्रतीति।

ननु सुखाद्युपलब्धिः करणसाध्यासाक्षात्प्रमितित्वाद्रूपाद्युपलब्धिवदित्यनुमानेन मनसः करणत्वसिद्धेन्द्रियत्वसिद्धिरन्यथा सुखादिसाक्षात्कारस्याप्रमात्वप्रसङ्ग इति चेदों इत्याह सुखेति। ईश्वरस्य देहेन्द्रियादिशून्यत्वेन तदीयसुखानि प्रमायां व्यभिचारादनुमानस्य मनसः करणत्वासिद्धाविन्द्रियत्वं दू[१]रनिरस्तम्। एवञ्च सुखादिसाक्षात्कारस्य प्रमाणजन्यत्वाभावेनाप्रमात्वाङ्गीकरणमुचितमिति भावः ॥ ६ ॥

ननु सुखादीनां साक्षा[२]त्कारस्य प्रातीतिकत्वे सुखादीनां व्यावहारिकत्वं न स्यादित्याशङ्ख्याह अत एवेति। सुखादिसाक्षात्कारस्याप्रमात्वादेवेत्यर्थः। नच सुखादीनां प्रातीतिकत्वे हर्षाद्यर्थ-

---

(१) क' दूरे निरस्तम् इति पाठः। (२) ग, साक्षात्कारस्ये पाठो न

प्रत्यक्षप्रमाणं लिङ्गज्ञानजन्यं ज्ञानमनुमितिः। व्याप्त्याश्रयो लिङ्गं साधनसाध्ययोर्नियत सामानाधिकरण्यं व्याप्तिः प्रतिबन्धकाभावे सति सहचारदर्शनेन सा व्याप्तिर्गृह्यते। तस्यां गृहीतायां लिङ्गज्ञानेन व्याप्त्यनुभवजन्यसंस्कारोद्बोधे सति अनुमितिर्जायते। सा द्विधा स्वार्था परार्था चेति। इयं स्वार्थानुमितिरुक्ता। परार्थानुमितिस्तु न्यायसाध्या। न्यायोऽवयवसमुदायः। अवयवास्त्रयः ॥७॥

क्रियाकारित्वं न स्यादिति वाच्यम्। प्रातीतिकस्यापि शुक्तिरजतादेस्तद्दर्शनात्। अतोऽन्तःकरणतद्धर्माणां प्रातीतिकत्वमुपपन्नमिति भावः।

नन्वेवमात्मसाक्षात्कारस्यापि प्रमाणाजन्यतयाऽप्रमात्वापत्तिः, न चेष्टापत्तिरिति वाच्यम्। तर्ह्यन्तःकरणादिवदात्मनोऽपि प्रातीतिकत्वापत्तिरतस्तद्व्यावृत्त्यर्थमात्मसाक्षात्कारं प्रति मनसः करणत्वमेवेष्टव्यमित्याशङ्क्य किं विशिष्टात्मसाक्षात्कारस्याप्रमात्वमापद्यते आहोस्विच्छुद्धात्मसाक्षात्कारस्य। नाद्य,

विशिष्टा[1]त्मविषयकज्ञानस्याप्रामाण्यम्।

इष्टापत्तेः न द्वितीय इत्याह शुद्धेति।

ननु वाक्यस्य परोक्षज्ञानजनकत्वनियमात्कथं वेदान्तवाक्यादात्मसाक्षात्कार इत्याशङ्क्याह वाक्यस्येति। वक्ष्यत इति शाब्दप्रमानिरूपणवेलायामिति शेषः। अत्र वैशेषिका[2]।

---

(१) क, (विशिष्टेत्यादि) पाठो न। (२) ग, मन्यन्त इत्यधिक पाठः।

साक्षात्कारिप्रमा द्विविधा सविकल्पकनिर्विकल्पकभेदात्। निःप्रकारकं वैशिष्ट्यानवगाहि वा ज्ञानं निर्विकल्पकं सप्रकारकं वैशिष्ट्यावगाहि वा ज्ञानं सविकल्पकं तत्कारणमिन्द्रियं प्रत्यक्षमिति वदन्ति तदसङ्गतम्। अशाब्दनिर्विकल्पकज्ञाने मानाभावात्। नच विशिष्टज्ञानस्य विशेषण ज्ञानजन्यत्वनियमेन तत्सिद्धिरिति वाच्यम्। विशेषणसन्निकर्षादिविशिष्टज्ञानोपपत्तेः। निर्विकल्पकज्ञा[1]न-वत्सविकल्पकज्ञानं प्रत्यक्षमिति वाह्याः। तदसत्। निर्विकल्पकज्ञानवत् सविकल्पकस्यापि प्रमात्वे बाधकाभावात्। न चालीकसामान्यविषय-तया तस्याप्रमात्वमिति वाच्यम्। सामान्यस्यालीकत्वासिद्धेः। प्रत्युत निर्विकल्पकज्ञानस्यैवाप्रमाणिकत्वात्। तस्माद्यत्किञ्चिदेतत्। तदेवं प्रत्यक्षप्रमानिरूपिता प्रत्यक्षोपजीव्यत्वात्। प्रत्यक्षनिरूपणानन्तर-मनुमितिं लक्षयति लिङ्गेति। पर्वतोऽयं वह्निमान् धूमवत्त्वात्। यो यो धूमवान् स सोऽग्निमान् यथा महानस इत्यत्र पर्वतः पक्षः वह्निः साध्यं धूमो लिङ्गं ततश्च स एव पक्षधर्मः। तथा चायं धूमवानिति व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानं लिङ्गज्ञानं तेन जन्यमयं पर्वतो वह्निमानिति ज्ञानमनुमितिः। यद्वा जीवो ब्रह्माभिन्नः सच्चिदानन्दलक्षणत्वात् ब्रह्मवदित्यत्र जीवः पक्षो ब्रह्माभेदः साध्य-सच्चिदानन्दलक्षणत्वं लिङ्गमयमेव पक्षधर्मः। एवञ्च व्याप्यतावच्छेदक-प्रकारकपक्षधर्मताज्ञानं लिङ्गज्ञानं तेन जन्यं जीवो ब्रह्माभिन्नमिति ज्ञानमनुमितिः पक्षताश्रयः पक्षः सिषाधयिषा विरहसहकृतसिद्ध्य-भावः पक्षता। एवं च व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेन

(१) ग, सविकल्पकज्ञानं न प्रत्यक्षमिति पाठः।

लिङ्गज्ञानजन्यत्वमनुमितेर्विवक्षितमतो न स्मृत्यादावतिव्याप्तिः। न तृतीयलिङ्गपरामर्शेन तज्जन्यत्वमनुमितेः। तृतीयलिङ्गपरामर्शस्या-प्रमाणिकत्वेन तज्जन्यत्वस्य दूरनिरस्तत्वात्। किं तल्लिङ्गमित्या-काङ्क्षायामाह व्याप्तीति। केयं व्याप्तिरित्यत आह साधनेति। व्याप्त्याधारत्वं साधनत्वं व्याप्तिनिरूपकत्वं साध्यत्वम्, अव्यभिचरितत्वं नियतत्वं अव्यभिचरितत्वं नाम साधनसमानाधिकरणात्यन्ताभावा-प्रतियोगित्वम्, साध्यवदन्यावृत्तित्वं वा तथा चायं निष्कर्षः साधन-समानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यं व्याप्ति-रिति। द्वितीयपक्षे तु साधनवन्निष्ठान्योऽन्याभावाप्रतियोगिसाध्य-वत्कत्वं व्याप्तिः। अस्ति चेयं धूमे साधनेन धूमादिना समानाधि-करणोयोऽत्यन्ताभावो घटादिप्रतियोगिकस्तदप्रतियोगि यत्साध्यं तेन सामानाधिकरण्यं धूमादेर्व्याप्तिः। अत्र यद्यपि हेतुसमानाधि-करणात्यन्ताभावाः। तत्तद्वह्न्यात्यन्ताभावास्तत्प्रतियोगितस्तत्तद्वह्नयः। पर्वतीयधूमसमाधिकरणात्यन्ताभावप्रतियोगित्वान्महानसीयवह्नेर्महा-नसीयधूमसमानाधिकरणात्यन्ताभावप्रतियोगित्वात्, पर्वतीयवह्ने-स्तथाच लक्षणमव्याप्तम्। अप्रतियोगिसाध्यसामानाधिकरण्याभावात्। नच समानाधिकरणयोरेव व्याप्तिर्विवक्षितेति वाच्यम्। तर्हि गुणवान् द्रव्यत्वादित्यत्राव्याप्तिर्वज्रलेपायिता। तथापि हेतुतावच्छेदकाव-च्छिन्नहेतुसमानाधिकरणात्यन्ताभावप्रतियोगिताऽनवच्छेदकं यत्सा-ध्यतावच्छेदकं तदवच्छिन्नसाध्यसामानाधिकरण्यं हेतोर्व्याप्तिर्विवक्षिता तथाच नाव्याप्तिः। न चैवमपि संयोगिद्रव्यत्वादित्यत्राव्याप्तिरिति वाच्यम्। अत्यन्ताभावस्य प्रतियोगिव्यधिकरणत्वस्य विवक्षितत्वात्।

अस्मिन्मते संयोगस्य व्याप्यवृत्तित्वादा न दोषः, अवच्छेदकत्वमन-तिरिक्तदेशवृत्तित्वम्, तथाच नात्माश्रयदोषोऽपि। अत्र विस्तरस्तु न्यायचिन्तामणितट्टीकासु द्रष्टव्यः। अस्माभिरत्र दिङ्मात्रप्रदर्शि-तम्। पारमार्थिकतत्त्वनिरूपणे प्रवृत्तत्वादिति। एवमन्योऽन्यघटि-तव्याप्तिलक्षणेऽपि द्रष्टव्यम्। नन्वियं व्याप्तिः केन प्रकारेण गृह्यत इत्यत आह प्रतिबन्धकेति। प्रतिबन्धकत्वं नाम कार्यानुकूलकिञ्चि-द्धर्मविघटकत्वम्, कार्यानुत्पादप्रयोजकत्वं वा, तच्च व्यभिचारज्ञानं साक्षाद्व्याप्तिग्रहणप्रतिबन्धकमुपाधिज्ञानं परम्परया, साध्यवदन्यवृत्तित्वं व्यभिचारः साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधिः। तथाहि क्रत्वन्तर्वर्त्तिनी हिंसाऽधर्मसाधनं हिंसात्वादक्रतुहिंसावदित्यत्र निषि-द्धत्वमुपाधिः। तत्रास्तीदं लक्षणं साध्यस्याधर्मसाधनत्वस्य व्यापकं निषिद्धत्वम्। व्यापकत्वं नाम तदन्निष्ठात्यन्ताभावा[१]प्रतियोगित्वं निषिद्धत्वस्य। तथा एवं साधनस्य हिंसात्वस्य निषिद्धत्वमव्यापकम्। अव्यापकत्वं नाम तदन्निष्ठात्यन्ताभावप्रतियोगित्वं निषिद्धत्वस्य तथा। अग्नीषोमीयहिंसायां तदभावात्। एवं धूमवान् वह्नेरित्य-त्रार्द्रेन्धनसंयोग उपाधिः। अत्राप्युक्तप्रकारेण लक्षणं योजनीयम्। एवं यथोक्तप्रतिबन्धकाभावे सति सहचारदर्शनेन व्याप्तिर्गृह्यते।

ननु यथोक्तप्रतिबन्धकाभावः कस्मान्निर्णीयत इति चेत्। अनुकूलतर्कादिना स निर्णीयत इति गृहाण। एवमनुकूलतर्कादिना प्रतिबन्धकाभावे निर्णीते सत्युत्पन्नसहचारदर्शनेन व्याप्तिनिर्णय-समारं लिङ्गज्ञानेन संस्कारोद्बोधे सत्येवानुमितिरुत्पद्यते। तत्र

(१) ख, [illegible] ।

प्रतिज्ञाहेतूदाहरणरूपाः, उदाहरणोपनयनिगमनरूपा वा। तथाहि, जीवः परस्मान्न भिद्यते सच्चिदानन्दलक्षणत्वात् परमात्मवदित्यत्र जीवः परस्मान्न भिद्यत इति प्रतिज्ञा। सच्चिदानन्दलक्षणत्वं हेतुः। इदमेव लिङ्गमित्युच्यते यः सच्चिदानन्दलक्षणः स परस्मान्न भिद्यते यथा परमात्मेत्युदाहरणम्। अहमस्मीति भामीति कदाप्यप्रियो न भवामीत्यनुभवाज्जीवस्य सच्चिदानन्दलक्षणत्वमतो न हेत्वसिद्धिः ॥ ८ ॥

व्याप्तिः(१) ज्ञानं कारणं तत्संस्कारोऽवान्तरव्यापारः। अनुमितिः फलम्। नच संस्कारजन्यत्वे स्मृतित्वापत्तिरिति वाच्यम्, तत्प्रागभावजन्यत्वस्य वा संस्कारमात्रजन्यत्वस्य वा स्मृतित्वप्रयोजकत्वात्। अन्यथा प्रत्यभिज्ञायामपि स्मृतित्वापत्तेरित्यभिप्रेत्य फलितमाह तस्यामिति। उद्बोधः सहकारिलाभः सहकारिणः सदृशदर्शनादयः स्वस्य व्याप्तिनिश्चयानन्तरं परोपदेशमन्तरेण व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानाद्याऽनुमितिर्जायते सास्वार्थानुमितिरित्यर्थः। परार्थानुमितिं व्युत्पादयति परार्थेति। कोऽसौ न्याय इत्यपेक्षायामाह न्याय इति। कियन्तोऽवयवा इत्यत आह अवयवा इति ॥ ७ ॥

के ते त्रय इत्याकाङ्क्षायामाह प्रतिज्ञेति। त्रीणि उदाहरणान्तानि यद्वा उदाहरणादिका इत्यभियुक्तोक्त्या प्रतिज्ञाद्यास्त्रयोऽवयवा उदाहरणाद्यास्त्रयो-वानुमानवाक्यैकदेशत्वं प्रतिज्ञाद्यन्य-

---

(१) म, व्याप्तिज्ञानमिति पाठः।

तमत्वं वाऽवयवत्वं साध्यविशिष्टधर्मिप्रतिपादकं वाक्यं प्रतिज्ञापक्षधर्मतावाचकपञ्चम्यन्तशब्दो हेतुः। सव्याप्तिकदृष्टान्तप्रतिपादकवाक्यमुदाहरणम्। पक्षे हेतूपसंहार उपनयः। पक्षे साध्योपसंहारो निगमनं तद्यथा 'पर्वतोऽयं वह्निमानि'ति प्रतिज्ञा धूमवत्त्वादिहेतुः। 'यो यो धूमवान् स सोऽग्निमान् यथा महानस' इत्युदाहरणं तथा चायमित्युपनयः। तस्मात्तथेति निगमनमेवं लौकिकोदाहरणे प्रतिज्ञादिविभागमभिप्रेत्य जीवस्य वैदिकब्रह्मात्मैक्य साधकानुमानवाक्ये प्रतिज्ञादिभेदं व्युत्पादयन्ननुमानप्रयोगमाह तथाहीति। अनुमानवाक्यं सप्तम्यर्थः। प्रतिज्ञादिविभागं दर्शयति जीव इत्यादिना लीनमर्थं गमयतीति व्युत्पत्त्या साध्यसाधकोहेतुर्लिङ्गशब्दवाच्य इत्याह इदमिति।

ननु जीवः परस्मादभिन्न इत्यत्र किमन्तः करणविशिष्टो जीवः पक्ष उत तत्साक्षी आहोस्विन्निरुपाधिकः प्रत्यगात्मा वा। नाद्यः, विशिष्टस्य कर्तृत्वादि धर्मिणस्तद्विपरीतब्रह्मात्मैक्यायोगात्। नहि श्रुतिरपि बाधितमर्थम्बोधयति। न द्वितीयः साक्षिणः सोपाधिकतया तद्विपरीतब्रह्मात्मैक्यायोगात्[1]। न तृतीयः। शुद्धस्य जीवशब्दवाच्यत्वायोगात्। लक्ष्यस्याद्वितीयतया तत्साधने सिद्धसाधनापत्तेः। तथा जीवस्य परस्माद्भेदः प्रसिद्धो न वा। नाद्यस्तदैक्य साधने बाधापत्तेः। न द्वितीयः अप्रसिद्धस्य शशशृङ्गस्येव निषेधायोगात्। तथा जीवस्य ज्ञानाश्रयत्वेन सच्चिदानन्दलक्षणहेत्वसिद्धेः[2] तत्स्वरूपत्वे मानाभावात्। तदाश्रयत्वस्य जानामीत्यनुभव-सिद्धत्वा

(१) ब, ब्रह्मैक्येति पाठः। (२) ब सिद्धिरिति पाठः।

देवब्रह्मणोऽपि द्रष्टव्यम् । तस्मादेवमनुमानमसङ्गतमिति अत्र ब्रूमो जीवशब्दवाच्यस्य ब्रह्मैक्यबाधेऽपि तल्लक्ष्यस्य तदैक्यसाधनेन स एव पक्ष । नच सिद्धसाधनतावाच्ययोर्भेददर्शनेन लक्ष्ययोरपि तद्भ्रान्तिसम्भवेन श्रुत्यनुगृहीतानुमानेन तद्वारणात् ।

किञ्च, परमते जीवपरयोर्भेदाभ्युपगमेन श्रुत्यनुगृहीतानुमानेन जीवपरयोरैक्यसाधनेन भेदस्य मिथ्यात्वोपपत्ते , न सिद्धसाधनता बाधोवेत्यभिप्रेत्य श्रुतिस्मृतियुक्तिविद्वदनुभवै-र्जीवस्य सच्चिदानन्दत्वावगमात्सिद्धो हेतुरित्याह अहमिति । "अत्रायम्पुरुष स्वयं ज्योतिर्भवतीति" "आत्मैवास्य ज्योतिर्भवति" "योऽयं विज्ञानमय प्राणेषु हृद्यन्तर्ज्योति पुरुष" ।

"त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत् ।
तेभ्यो विलक्षण साक्षी चिन्मात्रोऽहं सदा शिव " ॥

इत्यादि श्रुतय ॥

"यथा प्रकाशयत्येक कृत्स्नं लोकमिमं रवि ।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत" ॥

इत्यादि स्मृतय ॥

"यद्यात्मा चिद्रुपोनस्यात्तर्हि जगदान्ध्यमप्रङ्ग "

इति तर्किका युक्तय विद्वदनुभवस्त्वेतैरात्मन सच्चिदानन्दरूपतामङ्गीकर्त्तव्यमित्यभिप्रेत्य स्वानुभवमभिनीय दर्शयति अहमिति। अस्मीत्यात्मन सत्यत्वानुभव , भामीतिचिद्रूपत्वानुभव , अप्रियो न भवामीत्यप्रियम्निषेधामुखेनात्मन आनन्दत्व सिद्धम् ॥

नन्वस्त्यात्मन सच्चिदानन्दलक्षणत्वम्, तत किमित्यत आह

अत इति । यतः कारणादात्मनः सच्चिदानन्दलक्षणत्वं स्वानुभवसिद्धमतः कारणादित्यर्थः । हेत्विति । हेतौ त्रिविधा असिद्धयो न भवन्तीत्यर्थः । तथाहि, हेत्वाभासाः पञ्च । अनैकान्तिक विरुद्धासिद्धप्रकरणसमकालात्ययापदिष्टभेदात् । सव्यभिचारोऽनैकान्तिकः । स च द्विविधः साधारणोऽसाधारणश्चेति । साध्यवदन्यवृत्तिः साधारणः । सपक्षाद्वृत्तिरसाधारणः । साध्यव्यापकीभूताभावप्रतियोगी विरुद्धः । अनिश्चितपक्षवृत्तिरसिद्धः । स च त्रिविधः । आश्रयासिद्धः, स्वरूपासिद्धः, व्याप्यत्वासिद्धश्चेति । पक्षतावच्छेदकाभाव आश्रयासिद्धः । पक्षे हेतुस्वरूपाभावः स्वरूपासिद्धः । साध्याप्रसिद्धिः, हेत्वसिद्धिर्वा व्याप्यत्वासिद्धः । साध्यविपरीतसाधकं हेत्वन्तरं प्रकरणसमः । अयमेव सत्प्रतिपक्ष इत्युच्यते, पक्षे साध्यशून्यत्वं बाधः । अयमेव कालात्ययापदिष्ट इति चोच्यते । ततश्चात्मनः सच्चिदानन्दलक्षणत्वस्य श्रुत्यादिभिर्निश्चितत्वादसिद्ध्यादिदोषाणामसम्भवात्तेन ब्रह्मैक्यसाधनं युक्तमिति भावः । ननु-

"द्वासुपर्णा सयुजा सखाया
समानवृक्षं परिषस्वजाते
ऋतं पिबन्तौ सुकृतस्य लोके
गुहां प्रविष्टौ परमे परार्द्धे"
"द्वाविमौ पुरुषौ लोके-
क्षरश्चाक्षर एव च"।
"जीव परमात्मानौ भिन्नौ विरुद्धधर्म्मा-
क्रान्तत्वाद्दहनतुहिनवन्नाहमीश्वर"

इत्यादि श्रुतिस्मृत्यनुमानप्रत्यक्षैर्जीवब्रह्मैक्यस्य बाधितत्वात् कथं सच्चिदानन्दलक्षणत्वेन ब्रह्मैक्यसिद्धिः। न चाद्वितीय श्रुतिस्मृत्यनुमानविरोधादन्येषामप्रामाण्यं किं न स्यादिति वाच्यम्। सर्वतन्त्रविरोधापत्त्या तद्योगादद्वैतश्रुत्यादीनामुपासनपरत्वोपपत्तेः। तस्मादनुमानेन ब्रह्मैक्यसाधनं बाधितमिति चेन्न। एवं द्वैतश्रुतिस्मृत्योरतत्परत्वात्। तथाहि, फलवत्यज्ञातेऽर्थे श्रुतेस्तात्पर्य्यं वक्तव्यं जीवपरभेदस्य मानान्तरसिद्धत्वेन तज्ज्ञानस्यापुरुषार्थत्वेन च श्रुतेस्तात्पर्य्यायोगात्॥

किञ्च, "मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यती"ति भेददर्शिनोऽनर्थश्रवणाच्च। श्रुतेस्तत्र तात्पर्य्यमसम्भवति। अपिच "अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति" "न स वेद यथा पशुः"। एवं मदेवानामिति भेददर्शिनोऽनर्थश्रवणान्न(१) तत्र श्रुतितात्पर्य्यम्। किञ्च,

उपक्रमादि षड्विधलिङ्गैरद्वितीये ब्रह्मणि तात्पर्य्यस्य निश्चितत्वात्तद्विरोधान्न भेदश्रुतेः स्वार्थे तात्पर्य्यम्। किञ्च "कस्मिन्नपि प्रकरणे कस्मिन् भगवतो विज्ञाते सर्वमिदं विज्ञातं भवती"त्येकविज्ञानेन सर्वविज्ञानोपक्रमेणाद्वितीयमब्रह्म प्रतिज्ञाय "परेऽव्यये सर्वे एकी भवन्ति" "ब्रह्मविद्ब्रह्मैव भवती"त्यद्वितीय ब्रह्मण एवोपसंहारात्तन्मध्यपाति"द्वासुपर्णाद्" वाक्यमपि प्रत्यक्षसिद्धभेदानुवादेनानन्दैकरसमद्वितीयं ब्रह्म तात्पर्य्येण प्रतिपादयतीति श्रिष्टतरमन्यथोपक्रमादिबाधप्रसङ्गः।

एवं स्मृतेरपिद्रष्टव्यम् अनुमानस्य विम्बप्रतिविम्बयोर्व्यभिचारात्

(१) स, निन्दाश्रवणादिति पाठ।

"सत्यं ज्ञानमनन्तं ब्रह्म" "आनन्दोब्रह्मेति व्यजनात्" इत्यादिश्रुत्या ब्रह्मणः सच्चिदानन्दलक्षणत्व-मतो न दृष्टान्तासिद्धिः। एवं गुरु-मुखाच्छ्रुतवेदान्तस्य शोधितत्वं-पदार्थस्य स्वस्मिन् सच्चिदानन्दलक्षणत्वदर्शनात् 'अहं ब्रह्मे'ति *ब्रह्माभिन्नानुमितिरुत्पद्यते*। न चौपनिषदस्य ब्रह्मात्मैक्यस्यानुमानगम्यत्वानुपपत्तिः। "आत्मा वारे द्रष्टव्यः श्रोतव्योमन्तव्योनिदिध्यासितव्य" इति श्रुत्या मननविधानात्। वेदान्तसहकारित्वे-नानुमानप्रामाण्य-स्वीकारात् परार्थानुमितिस्तु न्यायोपदेशेनोत्पद्यते न्यायोदर्शितः॥ ९॥

प्रत्यक्षस्य "नेह नानास्ति किञ्चन" इत्यादिशास्त्रबाधितत्वेन भ्रमत्वाच्च ब्रह्मैक्य-बाधकत्वम्। तस्माद्बाधकाभावादनुमानेन ब्रह्मैक्य-साधनमुपपन्नम्। एतेन सर्वतन्त्रविरोधोऽपि निरस्तः।

नन्वेवमपि दृष्टान्ताभावादिदमनुमानं नावतरति जीवातिरिक्त *ब्रह्मसद्भावे मानाभावात् भावे वा तस्य ज्ञानाश्रयत्वेन सच्चिदानन्द-लक्षणत्वे मानाभावात्* ॥ ८ ॥

नच श्रुत्या तत्सिद्धिरिति वाच्यम्। तस्यार्थान्तरत्वोपपत्तेरित्या-शङ्क्याह सत्यमिति। अयमभावः पारमार्थिकभेदाभावेऽपि जीव-परयोरौपाधिकभेदस्य व्यवहारिकस्याभ्युपगमेन दृष्टान्तसम्भवादनु-*मानमवतरत्येव। नच परस्य ज्ञानाश्रयत्वं श्रुत्या तदात्मकत्वाव*-गमात्। नच श्रुतेरर्थान्तरत्वं वक्तुं शक्यं गौरवात्। श्रुत्यन्तरविरोध

एवं ब्रह्मव्यतिरिक्तस्य प्रपञ्चस्य मिथ्यात्वसाध्यानु-
मितिर्दृश्यत्वादिहेतुभिरुत्पद्यते । मिथ्यात्वन्नामानिर्वच-

प्रसङ्गात् । आनन्त्यानुपपत्तेश्चेति भाव । ब्रह्मणः सच्चिदानन्दल-
क्षणत्वे फलितमाह अत इति ।

ननु व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानेन व्याप्त्यनुभवसंस्का-
रोद्बोधे सति स्वार्थानुमितिरुत्पद्यते इत्युक्तम्। सा किं सर्वेषामुत्पद्यते,
आहोस्वित्केषां-चिन्नाद्य', अदर्शनान्नद्वितीयः । तदुपायाभावादि-
त्याशङ्क्य विवेकेन तदुपायलिङ्गज्ञानसम्भवान्नैवमित्याह एवमिति ।
उक्तप्रकारेणान्वयव्यतिरेकाभ्यां शोधितस्त्वपदार्थो येन स तथोक्त
तस्य स्वस्मिन् सच्चिदानन्दलक्षणत्वलिङ्गज्ञानादहम्ब्रह्मास्मीति ब्रह्मा-
भिन्नाऽनुमितिःस्वार्थोत्पद्यते ।

ननु "तन्त्वौपनिषदं पुरुषं पृच्छामी"त्यादि श्रुत्या धर्मवद्ब्रह्मणो
वेदैकगम्यत्वात्कथमनुमानगम्यत्वमित्याशङ्क्य निराकरोति नचेति ।
किम्ब्रह्मण्यनुमानस्य स्वतन्त्रप्रामाण्यं निराक्रियते, आहोऽस्विदे-
दान्तसहकारित्वमिति । नाद्य', इष्टापत्तेः । न द्वितीय इत्याह
मन्तव्य इति । अन्यथा मननविधानवैयर्थ्यं स्यादितिभाव' । कथं
परार्थानुमितिरुत्पद्यते इत्याशङ्क्याह परार्थानुमितिस्त्विति । अव-
यव-समुदायात्मकानुमानवाक्यप्रयोगेणेत्यर्थः ॥ ८ ॥

उक्तन्यायमन्यत्राप्यतिदिशति एवमिति । व्यावहारिकः प्रपञ्चोमिथ्या
दृश्यत्वात् । शुक्तिरूप्यवदित्यनुमानप्रयोगोद्रष्टव्य' । आदिशब्देन
ब्रह्मव्यतिरिक्तत्व बाधनादयो गृह्यन्ते ।

नीयत्वम्। दृश्यत्वन्नाम चैतन्यविषयत्वं अतो ब्रह्मणि न व्यभिचारः। तच्चानुमानमन्वयिरूपमेकमेव। नतु केवलान्वयी। अस्मन्मते ब्रह्मव्यतिरिक्तस्य सर्वस्यात्यन्ताभावप्रतियोगित्वेन तदप्रतियोगित्वरूपकेवलान्वयित्वस्याप्रसिद्धेः ॥ १० ॥

ननु किमिदं मिथ्यात्वं न तावदत्यन्ताभावप्रतियोगित्वं सिद्धसाधनत्व-प्रसङ्गात्। नापि स्वाधिकरणनिष्ठात्यन्ताभावप्रतियोगित्वं तदिति वाच्यम्। संयोगादिकमादायार्थान्तरत्वोपपत्तेः। नापि संसृज्यमानाधिकरणनिष्ठात्यन्ताभावप्रतियोगित्वं तदिति वाच्यम्। परैरपि घटवति भूतले सम्बन्धान्तरेण तदत्यन्ताभावाभ्युपगमेन सत्यत्वविरोधिमिथ्यात्वासिद्धेः। नाप्येकावच्छेदेन येन सम्बन्धेन प्रतियोगिसत्त्वं तेनैव सम्बन्धेन तत्त्वं विवक्षितमिति वाच्यम्। तादृशस्य लोकेऽप्रसिद्धत्वात्। नापि ज्ञाननिवर्त्यत्वं तदिति वाच्यम्। यतो ज्ञानमज्ञानस्यैव निवर्त्तकमिति नियमेन प्रपञ्चस्य तदभावेन मिथ्यात्वाभावप्रसङ्गात्। तस्मान्मिथ्यात्वस्यानिरूपणात् न तत्साधकमनुमानमित्याशङ्क्याह मिथ्यात्वंनामेति। न च प्रपञ्चस्यानिर्वचनीयशब्देन निरूच्यमानत्वात्कथमनिर्वचनीयत्वमिति वाच्यम्। सत्त्वासत्त्वाभ्यामन्यत्वस्यैव तत्त्वात्। नच विरोधादुभयान्यत्वमनुपपन्नमिति वाच्यम्। घटात्यन्ताभावस्य स्वभावप्रतियोग्यनधिकरणत्वदृष्टत्वेन प्रकृतेऽप्युपपत्तेः। नचैवं क्लिष्टकल्पनायां किम्प्रयोजनमिति वाच्यम्। प्रकारान्तरस्यासम्भवात्। तथाहि, सत्त्वे बाधायोगादसत्त्वे प्रपञ्चस्या-

परोक्षत्वायोगात्। सदसदात्मकत्वस्य विरोधेनासम्भवात्। तस्मादुभयविलक्षणत्वमभ्युपगन्तव्यम्। न चासतोऽप्रसिद्धत्वेन तद्वैलक्षण्यस्याप्रसिद्धत्वादसङ्गतमिति वाच्यम्। तर्हि सदन्यत्वमेवानिर्वचनीयत्वमस्तु। न चासत्यतिव्याप्तिः असन्नामकिञ्चिदस्ति चेदसत्त्वव्याघातः। नास्ति चेत् कुत्रातिव्याप्तिः। तस्मात्सदन्यत्वमेवानिर्वचनीयत्वे वाधायोग्यमत्। तदन्यत्वं वाधयोग्यत्वम्, अथवैकावच्छेदेन स्वसंसृज्यमानाधिकरणनिष्ठात्यन्ताभावप्रतियोगित्वं मिथ्यात्वं समानसत्ताकयोः प्रतियोगितदभावयोरेकत्र विरोधेऽपि भिन्नसत्ताकयोरविरोधाचासम्भवः। प्रतियोगिमति सम्बन्धान्तरेण तदभावस्य प्रतियोगिसत्त्वस्याभावविरोधित्वेनासम्भवात्प्रतीतेरन्यथाप्युपपत्तेर्नैतद्दोषः। यद्यभावस्य प्रतियोगिसत्ताधीनसत्ताकत्वेन प्रपञ्चाभावस्यापि तत्समानसत्ताकतया तत्सामानाधिकरण्यमनुपपन्नमिति मन्यसे। तर्हि सत्यत्वावच्छिन्नप्रतियोगिकत्वात्यन्ताभावसमानाधिकरणत्वं मिथ्यात्वमस्तु तत्प्रतियोगिवत्प्रतियोगितावच्छेदकस्यापि तन्निरूपकत्वात् सत्त्वावच्छिन्नप्रतियोगिकात्यन्ताभावस्य पारमार्थिकत्वेन तत्सामानाधिकरण्यं प्रपञ्चस्योपपद्यते अभावस्य भिन्नसत्ताकत्वात्। यद्यपि विरहैकस्वभावाभावस्य प्रतियोगिसत्ताकतया(१) भिन्नसत्ताकत्वमभ्युपगम्यते। तर्हि कल्पितस्याभावोऽधिष्ठाने प्रतीयमानत्वादात्मक एव यत्राधिकरणसत्तापेक्षयाऽभिन्नसत्ताकः प्रतियोगी। तत्रैवाधिकरणाभावोभिद्यते। स एवानुपपत्त्या त्यज्यते। नेतरत्र। तथाच

(१) क, समसत्ताकतयेति पाठ।

स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वं मिथ्यात्वमेतदेवानिर्वचनीयत्वम् ।

ननु दृश्यत्वं नाम दर्शनविषयत्वम् । दर्शनं नाम वृत्तिज्ञानं तद्विषयत्वं ब्रह्मणि वर्त्तते (उक्तसाध्य नास्ति)[१] ब्रह्मणः पारमार्थिकत्वादतो व्यभिचार इत्याशंक्याह दृश्यत्वं नामेति । ब्रह्मणः स्वप्रकाशत्वेन स्वपरविषयत्वाभावान्नोक्तदोष इत्यर्थः। शुक्तिरूप्यमग्रे निरूपयिष्यते। अतो न दृष्टान्तासिद्धिरिति द्रष्टव्यम् । नैयायिकादयस्त्वनुमानं त्रिविधं केवलान्वयी केवलव्यतिरेक्यन्वयव्यतिरेकीचेति वर्णयन्ति । स्वमतमुपपादयंस्तान्निराकरोति तच्चेति । एवकारव्यवच्छेद्यमाह नत्विति । वृत्तिमदत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वं तच्चास्मन्मतेन भवतीत्याह अस्मन्मत इति । ब्रह्मभिन्नस्य सर्वस्य कल्पितत्वेन मिथ्यात्वान्मिथ्यावस्तुनोऽधिष्ठाननिष्ठात्यन्ताभावप्रतियोगित्वेन निरुक्तं केवलान्वयित्वमसिद्धमेव । नच प्रमेयत्वादीनां तथात्वात् कथमसिद्धिरिति वाच्यम् । प्रमाविषयत्वं प्रमेयत्वं प्रमाया भिन्नाभिन्नत्वेन तन्निरूपितविषयत्वस्यापि तथात्वेन केवलान्वयित्वासिद्धेः । न चेश्वरप्रमाविषयत्वं केवलान्वयित्वमिति वाच्यम् । ईश्वरप्रमायाः स्वविषयत्वेऽपसिद्धान्तापत्तेस्तदभावे कुतः केवलान्वयित्वम् । न चाकाशात्यन्ताभावः केवलान्वयीति वाच्यम् । तस्य स्वप्रतियोगिन्याकाशेऽसत्त्वेन तत्त्वायोगात् । प्रतियोगितदभावयोः सामानाधिकरण्यवदाधाराधेयभावस्यापि विरुद्धतयाऽसम्भवादन्यथाकाशस्यासत्त्वप्रसङ्गात् । किञ्चाकाशवदाकाशात्यन्ताभावस्यापि ब्रह्मणि कल्पितत्वेन

---

(१) म (उक्त साध्यं नास्ती'ति पाठो न दृश्यते ।

नापि व्यतिरेकी साधनेन साध्यानुमितौ साध्याभावे साधनाभावनिरूपितव्याप्तिज्ञानस्यानुपयोगात्। अन्वयव्याप्तिमविदुषः साध्यप्रमार्थापत्तिप्रमाणादिति वक्ष्यत इत्यनुमानम्। सादृश्यप्रमितिरूपमितिवाक्यकरणिका प्रमाशाब्दी। आकांक्षा योग्यता सन्निधिमत्पदसमुदायो वाक्यम् ॥ ११ ॥

तन्निष्ठात्यन्ताभावप्रतियोगितया केवलान्वयित्वदूरनिरस्तम्। एवमन्यदपि निरूपणीयम् ॥१०॥

एव केवलव्यतिरेक्यनुमानमपि न सम्भवतीत्याह नापीति। साधनसाध्ययोर्व्याप्तिज्ञानात्साध्यानुमितिर्भवति नतु साध्याभावसाधनाभावव्याप्तिज्ञानात्। नह्यन्यव्याप्तिज्ञानादन्यानुमितिर्भव-त्यतिप्रसङ्गात्। नच प्रतियोग्यनुयोगिभाव(1)स्तत्रानियामकत्वमिति वाच्यम्। प्रतियोगित्वादेरनिरूपणात्। किञ्च

व्याप्तिप्रकारकपक्षधर्मताज्ञानादनुमितिरिति ते मतम्। ततश्च साधनाभावव्याप्तेः साध्याभावनिष्ठत्वेन तत्प्रकारकपक्षधर्मताज्ञानासम्भवात् कथं व्यतिरेकलिङ्गज्ञानेन साध्यानुमितिस्स्यात्। किञ्च

साध्यप्रसिद्धेरनुमानाङ्गत्वेन पृथिवीतरभेदस्य कुत्राप्यप्रसिद्धत्वेन तदनुमितिर्नसंभवत्येव। अन्यथाऽप्रसिद्ध-साध्यानुमिता-वप्रसिद्धशशशृङ्गाद्यनुमितिः कुतो न स्यात्। नच घटादावितरभेदः प्रत्यक्ष

---

(1) ग, भाव स्तत्रानियामक इति पाठ।

इति वाच्यम्। तर्हि तदनुमानं न स्यात्। निश्चितेऽर्थे तदयोगात् तस्माद्व्यतिरेक्यनुमानमनुपपन्नम्।

नन्वेवं सत्यन्वयव्याप्तिमविदुषो व्यतिरेकव्याप्तिज्ञानादह्न्यनुमितिः कथं स्यादिति तत्राह अन्वयेति। तस्मादन्वयिरूपमनुमानमेकमेवेति भावः। एवमनुमितिप्रमां निरूप्य क्रमप्राप्तामुपमितिं निरूपयति सादृश्येति। अयम्भावः नगरदृष्टगोपिण्डोगवयार्थी पुरुषो वनमुद्दिश्य प्रस्थित आरण्यकपुरुषात् गोसदृशो गवय इति श्रुत्वा वनं गतो गोसादृश्यविशिष्टपिण्डमनुभवति गोसदृशो गवय इति पश्चादेतत्सदृशी मदीया गौरिति स्वगेहस्थां गा-मुपमिनोति। तत्र गवयनिष्ठगोसादृश्यज्ञानकरणं गोनिष्ठ-गवयसादृश्यज्ञानं फलं सेयमुपमितिरिति।

"भक्ताभीष्टदमन्नानं गोपीजनमनोहरम्।
सत्यभामायुतं कृष्णं वन्दे सच्चित्सुखात्मकम्"॥

क्रमप्राप्तां शाब्दप्रमां लक्षयति वाक्येति। किं तद्वाक्यमित्याकाङ्क्षायां वाक्यस्य लक्षणमाह आकाङ्क्षेति। वर्णसमूहः पदम्। नच वर्णानां क्षणिकानां क्रमेणोत्पद्यमानानां कथं समूहः स्यादिति वाच्यम्। एकज्ञानविषयत्वस्यैव तत्त्वात्। न चैकज्ञान-विषयत्वं वा कथं क्षणिकानामिति वाच्यम्। वर्णानां क्षणिकत्वे मानाभावात्। नचोत्पन्नो गकारोनष्टो गकार इत्यनुभवः प्रमाणमिति वाच्यम्। तस्योच्चारणोत्पत्त्यादिविषयत्वेन तथा-प्रमाणत्वात्। नच प्रत्यु[1]च्चारणे गकारादिष्वनुत्पत्तिः कुतो न भवतीति वाच्यम्। सोऽयंगकार इति

(१) ग, प्रत्युच्चारणमिति पाठः।

प्रत्यभिज्ञा-विरोधात् । नच प्रत्यभिज्ञानस्य सादृश्यविषयतया जातिविषयतया वाऽन्यथासिद्धत्वेनाविरोध इति वाच्यम् । मुख्यत्वे बाधकाभावादुत्पत्तिविनाशप्रत्ययस्यान्यथा-सिद्धत्वस्योक्तत्वात् ।

ननु तर्हि वर्णानां नित्यत्वेऽद्वैत श्रुति-विरोधस्स्यादिति चेन्न, प्रत्यभिज्ञा-विरोधेन तेषां क्षणिकत्वमात्रनिराकरणात् । आकाशादिवत् स्वर्गाद्यकाल उत्पत्तेः, प्रलयकाले विनाशस्य चोपपत्तेर्नाद्वैतश्रुतिविरोधः । अत एव तत्समुदायात्मकं पदं न क्षणिकम् । अत एव पदसमुदायात्मकं वाक्यं न क्षणिकं अत एव वाक्यसमुदायात्मको वेदोऽपि न क्षणिकः । अतएवोक्तं भगवता सूत्रकारेण "अतएव च नित्यत्व"मिति नित्यत्वं प्रलयपर्य्यन्तावस्थायित्वंविवक्षितं प्राकृतप्रलये सकलकार्य्यविनाशस्य प्रतिपादनात् । ननु ध्वंसाप्रतियोगित्वं तदितिविवक्षित-मद्वैतश्रुतिविरोधापत्तेः । "छन्दांसि यज्ञिरे तस्माद्यजुस्तस्मादजायत अस्य महतो भूतस्य निःश्वसित-मेवैतदृग्वेदो यजुर्वेद" इत्यादि श्रुत्या वेदस्य कार्य्यत्वावगमात् । तस्य चानित्यत्वावश्यंभावाच्च "वाचाविरूपनित्यये"ति श्रुतेरप्ययमेवार्थः । अन्यथा "एकमेवाद्वितीयमि"ति श्रुतिविरोधापत्तेः ।

नन्वेवं वेदस्योत्पत्तिविनाशाभ्युपगमे पौरुषेयतया स्वतः प्रामाण्यं व्याहन्येतेति चेत्, नहि पुरुषाधीनोत्पत्तिकत्वं पौरुषेयत्वमप्रयोजकत्वात् । किन्तु सजातीयोच्चारणमनपेक्ष्योच्चार्य्यमा(१)णत्वं पौरुषेयत्वम् । ईश्वरस्तु पूर्वपूर्वानुपूर्वीयमपेक्ष्य सर्गादौ वेदं विरचितवान् इति वेदस्यापौरुषेयत्वेन न स्वतः प्रामाण्यव्याहतिरित्यलमतिविस्तरेण,

(१) म, स्वोच्चारणमिति पाठः ।

अन्वयानुपपत्तिराकांक्षा, वाक्यार्थावाधो योग्यता, अविलम्बेनोच्चारणं सन्निधिः, अव्युत्पन्नस्य संगतिग्रहाभावान्न वाक्यार्थप्रमा। पदपदार्थयोः स्मार्य्यस्मारकभावः संगतिः। सा च द्विविधा शक्तिर्लक्षणाचेति। शक्तिर्नाम मुख्यावृत्तिः पदपदार्थयोर्वाच्यवाचकभावः सम्बन्ध इति यावत्। सा च द्विविधा योगोरूढ़िश्चेति। अवयवशक्तिर्योगः। यथा पाचकादिपदानाम्। रुढ़िः समुदायशक्तिः। यथा घटादिशब्दानाम्। सा च व्यवहारादिना गृह्यते। तथाहि उत्तमवृद्धस्य घटमानयेति वाक्यश्रवणानन्तरं मध्यमवृद्धः प्रवर्त्तते ॥ १२ ॥

पदसमुदायो वाक्यमित्युक्ते विलम्बोच्चारितपदसमुदायेति व्याप्तिरतस्तद्व्यावृत्त्यर्थमुक्तं सन्निधीति। तावत्युक्तेऽग्निना सिञ्चेदिति वाक्येऽतिव्याप्तिःस्यात्तद्वारणाय योग्यतेति। तथापि गौरश्वः पुरुषो हस्तीत्यत्रातिव्याप्तिस्यात्तन्निवृत्तये आकांक्षेति। अत्रापि पदसमुदायत्वमेकज्ञानविषयत्वं विवक्षितमतो नासम्भवः ॥ ११ ॥

नन्वकाङ्क्षादिमत्पदसमुदायो वाक्यमित्युक्तम्, अथाकाङ्क्षाया इच्छात्मकत्वेन चेतनधर्मत्वात्कथं पदानां साकाङ्क्षत्वमित्याशङ्क्याकाङ्क्षाजनकत्वेन पदानां साकाङ्क्षत्वमित्यभिप्रेत्याकाङ्क्षालक्षणमाह अन्वयेति। यस्य पदस्य येन पदेन विनाऽन्वयानुपपत्तिस्तस्य पदस्य तेन पदेन समभिव्याहार आकाङ्क्षा। योग्यतालक्षणमाह वाधेति। सन्निधिलक्षणमाह अविलम्बेनेति। पदानामविलम्बोच्चारणसन्निधिरित्यर्थः।

ततो बाल स्तत् प्रवृत्तिं दृष्ट्वा ज्ञानमनुमिनोति। तथाहि इयं प्रवृत्ति र्ज्ञानसाध्या प्रवृत्तित्वात् । मदीयप्रवृत्तिवत्

ननूक्तलक्षण वाक्यं शाब्दप्रमाकरण चेदव्युत्पन्नस्यापिश्रुत-वाक्याद्वाक्यार्थप्रमाप्रसङ्ग इत्याशंक्याह अव्युत्पन्नस्येति । सङ्गतिग्रहस्यापि वाक्यार्थप्रमोत्पत्तौ कारणत्वादव्युत्पन्नस्य तदभावान्न वाक्यार्थप्रमेत्यर्थः ।

ननु केयं सङ्गतिरित्यतश्चाह पदेति । सङ्गतिस्सम्बन्ध इत्यर्थः । सङ्गति विभजते साच द्विविधेति। द्वैविध्यमेवाह शक्तिरिति। यद्यपि शक्तिर्गौणी लक्षणाचेति वृत्तिस्त्रिविधा तथापि वक्ष्यमाणविधया गौणीं लक्षणायामन्तर्भाव्य द्वैविध्यकथनमितिध्येयम्। प्रथमोद्दिष्टां शक्ति निरूपयति शक्ति र्नामेति। कासौ मुख्यावृत्तिरित्याशंक्याह पदेति। पदजन्यज्ञानविषयत्वं वाच्यत्व पदार्थस्मृतिजनकत्वं वाचकत्वम्। तदुक्तम्, "पदम[1]भ्यधिकाभावात्स्मारकान्नविशिष्यते" इति । शक्तिं विभजते साचेति । यथोद्देशयोग लक्षयति अवयवेति । केषां पदानां योग इत्याशंक्योदाहरणमाविस्करोति यथेति। पाचकादि पदानां योग इत्यनुषज्यते। रूढिलक्षयति रूढिरिति। उदाहरति यथेति । शक्तिग्रहप्रकारमाह साचेति । व्यवहारेण शक्तिग्रहप्रकारमुपपादयति तथाहीत्यादिना उत्तमवृद्धस्य प्रयोजकवृद्धस्य मध्यमवृद्धः प्रयोज्यवृद्धः शिष्यपुत्रादिरिति यावत् ॥ १९ ॥

ननु मध्यम वृद्धस्य प्रवृत्त्या किमायातमित्यत आह बाल इति ।

(१) क पदमभ्यधिकाभावादिति न पाठ ।

इति ज्ञानमनुमाय तस्य वाक्यजन्यत्वमनुमिनोति। इदं ज्ञानमेतद्वाक्यजन्य-मेतद्वाक्यान्वयव्यतिरेकानुविधायित्वात्। दण्डजन्यघटादिवत् इत्यनन्तरमवापोद्वापाभ्यां घटपदस्य घटव्यक्तौ शक्तिमवधारयति। सा च शक्तिः पदार्थे इति नैयायिकाः ॥ १३ ॥

प्रवृत्ति गमनागमनादिव्यवहारं तत्रानुमानं प्रयुज्य दर्शयति तथाहीत्यादिना। ननु ज्ञानस्य कथं वाक्यजन्यत्वमनुमिनोतीत्याशंक्यानुमानप्रकारमाह इदमिति। प्रवृत्त्यानुमितं ज्ञान यो यदन्वयव्यतिरेकाविधायी स तज्जन्यः। यथा दण्डान्वयव्यतिरेकानुविधायी घटो दण्डजन्य इति सामान्यव्याप्तिमभिप्रेत्य दृष्टान्तमाचष्टे दण्डेति।

ननु ज्ञानस्य वाक्यजन्यत्वमस्तु प्रकृते किमायातमित्याशङ्क्याह इत्यनन्तरमिति। पदानां पदार्थे शक्तिः पदात्पदार्थस्मरणस्यैव जायमानत्वात् समभिव्याहाराद्वाक्यार्थलाभः। अन्यथा लक्षणामात्रोच्छेदप्रसङ्गादनन्यलभ्यस्यैव शब्दार्थत्वादिति पूर्वपक्षत्वेन नैयायिकमतमाह सा चेति। ननु कार्य्यान्विते शक्तिः गौरवात्। नच कार्य्यान्विते पदार्थे शक्त्यनङ्गीकारे कार्य्यताज्ञानस्याभावात् कथं शक्तिग्रह इति वाच्यम्। कार्य्यपरवाक्यश्रवणानन्तरं कार्य्यताज्ञानात्प्रवृत्त्या ज्ञानानुमानवत्सिद्धार्थवाक्यश्रवणानन्तरं सुखविकाशादिना[१] हर्षादिना ज्ञानानुमानसम्भवात्। किञ्च प्रथम[२]व्युत्पत्तौ तदपेक्षायामपि लाघवेनानन्तरं तदुपेक्ष्य पदार्थमात्रे शक्तिग्रहसम्भवात्।

---

(१) क ग हर्षादिना इतिपाठोन। (२) ग, प्रथम प्रवृत्ताविति पाठः।

"कार्य्यान्वित" इति मीमांसकाः । "अन्वित इति" वेदान्तिनः । एवं व्याकरणादिना शक्तिर्गृह्यते । उक्तञ्च ।

"शक्तिग्रहं व्याकरणोपमान कोशाप्तवाक्यात् व्यवहारतश्च। वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धा" इति लक्षणा शक्यसम्बन्धः ॥ १४ ॥

अन्यथा कथं कविकाव्यादिरचना स्यात् । तस्मात्पदानां पदार्थ एव शक्तिरिति नैयायिकाना-माशयः ॥ १३ ॥

मतान्तरमाह कार्य्यान्वित इति । तेषामयमाशयः पदानां कार्य्यान्विते पदार्थे शक्तिर्न केवलपदार्थे वाक्याद्वाक्यार्थप्रमानुत्पत्तिप्रसङ्गात् । तथाहि, पदार्थमात्रे शक्तानि पदानि कथं वाक्यार्थं बोधयेयुः । तेषां तत्राशक्तत्वात् । नच समभिव्याहारात्तद्बोध इति वाच्यम् । पदानां तत्र सामर्थ्याभावेन समभिव्याहारेणापि तद्बोधासम्भवात् ।

किञ्च, समभिव्याहारेणापि भवन्नपि घट खदिरपलाश इति वाक्यादिवत्पदार्थानां समूहालम्बनबोध एव स्यात् । नच संसर्गरूप-वाक्यार्थबोधः पदानां तत्र सामर्थ्याभावात् ।. किञ्च पदानां पदार्थमात्रे शक्त्यभ्युपगमे सङ्गतिप्रयोगस्यात् । तथाहि, प्रवृत्त्या ज्ञानाद्यनुमानद्वारा पदानां पदार्थे शक्तिनिश्चयः । प्रथमं बालस्य बाध्यः कार्य्यताज्ञानं प्रवृत्तौ हेतुः । कार्य्यत्वं नाम कृतिसाध्यत्वम् ।

एवञ्च वाक्यश्रवणानन्तरं कार्य्यताज्ञानाभावे प्रवृत्त्यभावेन ज्ञाना-

द्यनुमानासम्भवेन कथं शक्तिनिश्चयःस्यात्। नच हर्षादिना ज्ञानानुमानेन तन्निश्चय इति वाच्यम्। व्युत्पन्नस्य तदभावेऽप्यतिबालस्य प्रथमव्युत्पत्तौ तदयोगात्। किञ्च हर्षादीनामन्यतोऽपि सम्भवेन ततस्तदनुमानायोगात्। तस्मात् पदानां कार्य्यान्विते पदार्थे शक्तिरभ्युपगन्तव्या।

एवञ्च वाक्यश्रवणानन्तरं कार्य्यताज्ञानात्प्रवृत्त्या ज्ञानाद्यनुमानेन शक्तिनिश्चय उपपद्यते। न चेष्टसाधनता-ज्ञानात्प्रवृत्तिसम्भवेन कार्य्यताज्ञानमकिञ्चित्करमिति वाच्यम्। सुधामरीचिमण्डले तत्सत्त्वेऽपि प्रवृत्तेरदर्शनात्। नच कार्य्यताज्ञानस्य प्रवर्त्तकत्वे कूपपतनादावपि प्रवृत्तिप्रसङ्ग इति वाच्यम्। इष्टसाधनताज्ञानसमानकालस्य तस्य प्रवर्त्तकत्वस्वीकारात्। तस्मात्कार्य्यताज्ञानमेव प्रवर्त्तकम्। अत एव कार्य्यपराणां लिङ्‌लोट् तव्य प्रत्ययादिघटितानां वाक्यानामेव प्रामाण्यं नेतरेषाम्। कथं तर्हि वाक्यार्थबोधः, असंसर्गाग्रहादिति वदाम-स्तस्मात्पदानां कार्य्यान्विते पदार्थे शक्तिरिति। इदानीं स्वसिद्धान्तमतमाह अन्वित इति। पदानां लाधवादितरान्विते पदार्थे शक्तिः। न कार्य्यान्विते गौरवान्मानाभावाच्च। यद्यपि प्रथमव्युत्पत्तौ कार्य्यान्विते पदानां शक्तिर्गृह्यते। तथापि पर्य्यायान्तरे कार्य्यांश-गौरवबलेनोपेक्ष्यतरान्विते पदार्थे पदानां सामर्थ्यमवधार्य्यते तावता व्यवहारोपपत्तेः। न चैवं कार्य्यताज्ञानाभावे प्रवृत्त्यभावात् कथं शक्तिग्रह इति वाच्यम्। पुत्रस्ते जात इति वाक्यश्रवणानन्तरं सिद्धार्थज्ञानादपि मुखविकासनेन हर्षमनुमाय ततस्तस्य ज्ञानजन्यत्वमनुमायानन्तरन्तस्य वाक्य-

अन्यत्वमन्वयव्यतिरेकाभ्यां निश्चित्यावापोद्वापाभ्यां जनिमतिपुत्रपदस्य शक्तेरवधारणेन कार्य्यता ज्ञानस्य सर्वत्रातन्त्रत्वात्। तदुक्तं वाचस्पतिमिश्रैः,

"कार्य्यबोधे यथा चेष्टा लिङ्गं हर्षादयस्तथा।
सिद्धबोधेऽर्थवत्ता च शास्त्रत्वं हितशासनात्" इति॥

एतेन कार्य्यपराणामेव वाक्यानां प्रामाण्यं न सिद्धवस्तुपराणां वाक्यानामिति प्रत्युक्तम्, उक्तरीत्या सङ्गतिग्रहसम्भवात् प्रयोजनवत्त्वाच्च, अनधिगतार्थबोधकतया प्रामाण्योपपत्तेः॥

नन्वेवं सति ततो लाघवात्पदानां पदार्थ एव शक्तिरस्तु नत्वन्वयांशे गौरवात्। न चैवं पदानामन्वयांशे शक्त्यभावे ततो वाक्यार्थबोधः कथमिति वाच्यम्। समभिव्याहारादेव तदुपपत्तेरिति चेन्नातिप्रसङ्गात्।

तथाहि पदानां यत्र सामर्थ्यमवधारितं तद्बोधकत्वमेवावश्यमभ्युपगन्तव्यम्। अन्यथा घटपदात् पटबोधोऽपि स्यात्। ततश्चाशक्तपदसमभिव्याहारात्कथं वाक्यार्थबोधः स्यात्। नच क्रियापदसमभिव्याहृतेनाकांक्षादिमत्पदवृन्देन स्वस्वार्थे गृहीतसंगतिकेन बाधकाभावात्सम्बोधोऽस्तीति वाच्यम्। तत्तत्पदश्रवणेन तत्तत्पदार्थोपस्थितावप्यन्वयांशे शक्त्यभावेन पदानां समभिव्याहारात्कथं तद्बोधः स्यात्। तस्मात् समभिव्याहाराद्वाक्यार्थबोधस्यासम्भवात्पदानामितरान्विते पदार्थे शक्तिरवधार्यते इति सर्वैरवश्यमभ्युपगन्तव्यम्। सा च शक्तिर्जातावेव न व्यक्तौ व्यक्तीनामानन्त्यात्। कथं तर्हि पदश्रवणानन्तरं व्यक्तिबोधस्तथाशक्त्यादिति चेदाक्षेपाल्लक्षणया वा

सा च द्विधा केवललक्षणालक्षितलक्षणा चेति। केवला त्रिविधा, जहल्लक्षणाऽजहल्लक्षणा जहदजहल्लक्षणा चेति। शक्यार्थपरित्यागेन तत्संबन्ध्यर्थान्तरे प्रवृत्तिर्जहल्लक्षणा, यथा गङ्गायां घोष इत्यत्र गङ्गापदस्य तीरे लक्षणा शक्यार्थापरित्यागेन तत्संबन्ध्यर्थान्तरे

व्यक्तिबोधः। अथवा जातिविशिष्टव्यक्तौ शक्तिरस्तु तथापि जातौ ज्ञातोपयुज्यते। व्यक्तौ स्वरूपसती तज्ज्ञानं विना व्यक्तिधीविलम्बाभावादित्यलमतिविस्तरेण। एवं व्यवहाराच्छक्तिग्रहमुक्त्वान्यतोऽपि शक्तिग्रहमाह एवमिति। तत्र सम्मतिमाह उक्तञ्चेति। इदानीं लक्षणां निरूपयति लक्षणेति। शक्तिविषयः शक्यस्तेन सम्बन्धो लक्ष्यमाणपदार्थस्य लक्षणा। यथा मण्डपं भोजयेत्यत्र मण्डपपदस्य तन्निष्ठपुरुषे शक्यसम्बन्धो लक्षणा ॥ १४ ॥

तां विभजते सा चेति। शक्यसाक्षात्सम्बन्धः केवललक्षणेति(१)। केवललक्षणाया लक्षणमभिमेत्य केवलां विभजते केवलेति। त्रैविध्यमेवाह जहल्लक्षणेति। जहल्लक्षणां लक्षयति शक्येति। अजहल्लक्षणायामतिव्याप्तिवारणाय शक्यार्थपरित्यागेनेत्युक्तम्। तत्रोदाहरणमाह यथेति। अजहल्लक्षणां लक्षयति शक्यार्थापरित्यागेनेति। जहल्लक्षणायामतिव्याप्तिवारणाय शक्यार्थपरित्यागेनेति विशेषणम्(२)। तत्रोदाहरणमाह यथेति। जहदजहल्लक्षणां निरूपयति शक्यैक-

---

(१) ग केवललक्षणेति पाठो न। (२) त्यक्तमिति पाठ.।

प्रवृत्ति-रजहल्लक्षणा। यथा शोणोधावतीत्यत्र शोणपदस्य शोणगुणविशिष्टाश्वादिद्रव्येषु। अथैकदेशपरित्यागेनैकदेशवृत्तिर्जहदजहल्लक्षणा। इयमेव भागलक्षणेत्युच्यते। यथासोऽयं देवदत्त इत्यत्र सोऽयमिति पदयोः केवलदेवदत्तपिण्डे। यथा वा तत्त्वमसीत्यत्र तत्त्वं पदयोरखण्डचैतन्ये लक्षणा ॥ १५ ॥

देशेति। तत्र लौकिकोदाहरणमाह यथेति। वैदिकमपि तदाह यथेति[1]। मायोपहितं चैतन्यं तत्पदस्य वाच्यार्थः। स्थूलसूक्ष्मादिशरीरोपहितचैतन्यं त्वं पदस्य वाच्यार्थः। ततश्च तत्पदवाच्यैकदेशो माया तत्परित्यागेनैकदेशे चैतन्यवृत्तिस्तत्पदस्य। एवं त्वं पदस्य वाच्यार्थेऽपि स्थूलसूक्ष्मादिशरीरमेकदेशस्तत्परित्यागेनैकदेशे चैतन्ये वृत्तिस्त्वं पदस्य जहदजहल्लक्षणेत्यर्थः ॥

ननु तत्त्वं पदयोरखण्डचैतन्ये लक्षणास्वीकारे एकेनैव पदेन ब्रह्मसाक्षात्कारसम्भवात् पदान्तरवैयर्थ्यमिति चेन्नैष दोषः। पदस्य स्मारकत्वेन पदान्तरं विना साक्षात्काराजनकत्वात्। ततश्च प्रथमं प्रत्येकं तत्त्वं-पदाभ्यां निर्विकल्पाखण्डचैतन्यस्मरणमुपपद्यते। ततः पदसमुदायात्मकवाक्याद्ब्रह्मात्मैक्यापरोक्षानुभव उपपद्यते "अहम्ब्रह्मास्मी"ति अतो न पदान्तरवैयर्थ्यं स्यादेतत् "तत्त्वमस्या"दिवाक्ये लक्षणाङ्गीकारो निरर्थकः। वाच्ययोरेवैक्यबोधसम्भवात्। न च

---

(१) क, यथावेति।

विरुद्धधर्म्माक्रान्तयोस्तयोः कथमैक्यबोध इति वाच्यम्। विशेषणांशयोर्विरुद्धत्वेनैक्यबोधासंभवेऽपि योग्यतया प्राप्युपस्थितयोर्विशेष्ययोरैक्यबोधसम्भवात्। तथाहि, यथा अनित्योघट इत्यत्र विशेषणांशस्य घटत्वस्यनित्यत्वान्वयासम्भवेऽपि योग्यतया विशेष्यांश व्यक्तेस्तदन्वयः। तथा प्रकृतेऽप्युपपद्यते। यत्रोपसर्जनत्वेनोपस्थितस्य वाक्यार्थान्वयः स्यात्[१]। विशेष्यस्य वाक्यार्थान्वययोग्यता नास्ति, तत्रैव स्वतन्त्रोपस्थित्यर्थं पदार्थैकदेशपरित्यागेनैकेदेशे लक्षणापदस्य विशिष्टवाचकस्य यथा घटो नित्य इत्यत्र विशेष्यांशव्यक्तेर्नित्यत्वान्वयायोग्यतया घटत्वस्य स्वतन्त्रोपस्थित्यर्थम्, तस्मिन्विशिष्टवाचकघटपदस्य लक्षणा। ततश्च प्रकृते प्राप्युपस्थितयोर्विशेष्ययोर्योग्यतयैक्यबोधसम्भवात्रलक्षणा। अन्यथा गेहे घटो घटमानय इत्यादावपि लक्षणाप्रसङ्ग इति। अत्रोच्यते येन रूपेण पदार्थोपास्थितिस्तेन रूपेण पदार्थानां वाक्यार्थान्वयो वाच्यः। अन्यथातिप्रसङ्गात्। एवं विषिष्टरूपेणोपस्थितयोस्तत्त्वं पदार्थयोरत्यन्तविरुद्धत्वेन कथमभेदवाक्यार्थान्वयस् स्यात्, ततो निर्व्विकल्पकचिद्रूपेणोपस्थित्यर्थं तत्त्वं-पदार्थयोस्तत्त्वमस्यादि वाक्येषु लक्षणाङ्गीकारः। न चानित्यो घट इत्यत्रापि लक्षणा स्यादिति वाच्यम्। तत्र विशिष्टव्यक्तेरनित्यत्वान्वये वाधकाभावादत्र विशिष्टैक्यस्य प्रत्यक्षादिप्रमाणविरुद्धत्वाच्च। गेहे घट इत्यादावपि घटादेर्विशिष्टवृत्तित्वे वाधकाभावान्न लक्षणा तस्मान्निर्विकल्पकचिद्रूपेण तत्त्वं-पदार्थयोरुपस्थित्यर्थं तत्त्वमस्यादिवाक्येषु लक्षणाङ्गीकरणमितिदिक्॥ १५॥

---

(१) ख स्यादिति पाठो नास्ति।

शक्यपरम्परासम्बन्धो लक्षितलक्षणा। यथा द्विरेफपदस्य मधुकरे गौण्यपि लक्षितलक्षणैव। एवं व्युत्पन्नस्य गृहीतसंगतिकवाक्याद्वाक्यार्थस्य प्रमोत्पत्तौ। आकांक्षा योग्यता आसक्तिस्तात्पर्यज्ञानञ्चेति चत्वारि कारणानि। आकांक्षायोग्यते निरूपिते शक्तिलक्षणान्यतरसम्बन्धेना-

---

लक्षितलक्षणां निरूपयति शक्येति। तत्रोदाहरणमाह यथेति। द्विरेफपदस्य शक्यं रेफद्वयं तस्य भ्रमरपदेन सम्बन्धः। भ्रमरपदस्य मधुकरेणसम्बन्धः। तथाच द्विरेफपदस्य मधुकरेण परंपरा सम्बन्धो लक्षितलक्षणेत्यर्थः। सिंहोदेवदत्त इत्यत्र सिंहपदस्य देवदत्ते गौणीवृत्तिः सा लक्षितलक्षणायामन्तर्भूता। तथाहि सिंहपदस्य सिंहमृगः शक्यस्तस्य क्रौर्य्येण सम्बन्धः क्रौर्य्यस्य देवदत्तेन सम्बन्धः। ततश्च सिंहपदस्य लक्षेण देवदत्तेन शक्यपरंपरा सम्बन्धोवर्त्तत इति। गौण्यपि लक्षितलक्षणैवेत्याह गौण्यपीति। एवं सङ्गतिग्रहस्यान्वयव्यतिरेकाभ्यां वाक्यार्थप्रमोत्पत्तौ कारणत्वमभिप्रेत्य शक्तिलक्षणभेदेन सङ्गतिं व्युत्पाद्य वाक्यार्थप्रमोत्पत्तौ कारणान्तराण्यपि दर्शयति एवमिति। यथा वाक्यार्थप्रमोत्पत्तौ सङ्गतिग्रहः कारणम्। एवं व्युत्पन्नस्य गृहीतसङ्गतिकस्य गृहीतसङ्गतिकाद्वाक्यात्तदर्थप्रमोत्पत्तावाकांक्षादीन्यपि कारणानीति योजना। नच वाक्यस्या-शक्तत्वाद्गृहीतसङ्गतिकवाक्यादित्यसङ्गतमिति वाच्यम्, वाक्यस्याशक्तत्वेऽपि तस्य पदसमुदायात्मकतया पदानां शक्तत्वाद्गृहीतसङ्गतिकवाक्यादिति

व्यवधानेन पदजन्यपदार्थोपस्थितिरासक्तिरिति तात्पर्य्यम्। द्विविधं वक्तृतात्पर्य्यं शब्दतात्पर्य्यञ्चेति। पुरुषाभिप्रायो वक्तृतात्पर्य्यं तज्ज्ञानं वाक्यार्थज्ञानेन कारणं तदभावेऽपि अव्युत्पन्नस्य वाक्याद्वाक्यार्थज्ञानदर्शनात्॥१६॥

वक्तुं युक्तमितिभावः। तर्हि तानि चत्वार्य्याकांक्षादीनि निरूपणीयानीत्याकांक्षायां द्वयं निरूपितमवशिष्टं द्वयं निरूप्यत इत्यभिप्रेत्याह आकांक्षेति। वाक्यलक्षणनिरूपणप्रस्तावे अन्वयानुपपत्तिराकांक्षावाक्यार्थबाधोपयोगितेति निरूपित इत्यर्थः। आसक्तिं लक्षयति शक्तीति। शक्तिलक्षणान्यतरत्वं नाम तदन्योन्यत्वं पदार्थोपस्थितिरासक्तिरित्युक्ते प्रमाणान्तरजन्यायाः पदार्थोपस्थितेरप्यासक्तित्वप्रसङ्गस्तद्वारणाय पदजन्येति। लिङ्गविधया पदजन्यपदार्थोपस्थितेरासक्तित्ववारणाय शक्तीत्यादि शक्तिलक्षणे निरूपिते व्यवहितपदजन्यपदार्थोपस्थितेरासक्तित्ववारणाय-व्यवधानेनेति। तात्पर्य्यज्ञानस्य वाक्यार्थप्रमां प्रतिकारणत्वमुपपादयितुं तात्पर्य्यं विभजते तात्पर्य्यमिति। तदर्थप्रतीतीच्छयोच्चरितत्वं वक्तृतात्पर्य्यमिति केचिदाहुः। तत्र मौनिश्लोकादौ तदभावादित्यभिप्रेत्य वक्तृतात्पर्य्यं व्युत्पादयति पुरुषेति। तज्ज्ञानस्य वाक्यार्थप्रमाप्रतिकारणत्वं न सम्भवति व्यभिचारादित्यभिप्रेत्याह तदिति। तज्ज्ञानं वाक्यार्थप्रमां प्रति कुतो न कारणमित्याशंक्याह तदभावेऽपीति। अव्युत्पन्नस्य वाक्यार्थज्ञानाभावेन तदिच्छायाः सुतरामसम्भवात्। तस्य तज्ज्ञानाभावेऽपि तद्वाक्याद्वाक्यार्थप्रमादर्शनाच्च तत्कारणमित्यर्थः॥ १६ ॥

तदितरप्रतीतिमात्रेच्छयानुच्चरितत्वे सति तदर्थप्रतीतिजननयोग्यत्वं शब्दतात्पर्य्यम्। तच्च षड्विधैर्लिङ्गैर्निर्णीयते। वेदे लिङ्गानि तु दर्शितानि।

"उपक्रमोपसंहारावभ्यासोऽपूर्व्वताफलम्।
अर्थवादोपपत्ती च लिङ्गं तात्पर्य्यनिर्णये" ॥

इत्यस्यार्थः प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुनः आद्यन्तयोः प्रतिपादनमुपक्रमोपसंहारौ। यथा छान्दोग्यस्य षष्ठे "स देव सौम्येदमग्र आसीदेकमेवाद्वितीयं ब्रह्म ऐतदात्म्यमिदं सर्व्वमि"त्युपक्रमोपसंहारा-

---

शब्दतात्पर्य्यं निरूपयति तदिति। तस्मात्प्रकृतवाक्यार्थादितरो वाक्यार्थस्तत्प्रतीतिमात्रेच्छया अनुच्चरितत्वे सति तदर्थप्रतीतिजननयोग्यत्वं शब्दतात्पर्य्यमित्यर्थः। भोजनप्रकरणे सैन्धवमानयेत्युक्ते लवणानयनप्रतीतिवदश्वानयनप्रतीतिरपि स्यात् तद्योग्यत्वस्य विद्यमानत्वात्तद्वारणाय पूर्व्वदलं तथाप्युभयेच्छया सैन्धवमानयेत्युक्ते वाक्येऽव्याप्तिः स्यादत उक्तं मात्रेति। उभयेच्छया प्रयुक्तत्वेऽपि तदितरप्रतीतिमात्रेच्छयानुच्चरितत्वस्य सत्त्वान्नाव्याप्तिः। तर्हि तत्तात्पर्य्यं केन प्रमाणेन निर्णीयत इत्याकांक्षायामाह तच्चेति। शब्दतात्पर्य्यमित्यर्थः। कानि तात्पर्य्यलिङ्गानीत्याकांक्षायां लिङ्गानिलिति। मद्वृद्धश्लोकं पठत्युपक्रमेति श्लोकं व्याचष्ट अस्यार्थः। कौतावुपक्रमोपसंहाराविल्याकांक्षायामाह प्रकरणेति। उभयाकांक्षं प्रकरणम्। तत्प्रतिपाद्यस्य वस्तुन आदौ प्रतिपादनमुपक्रमः। अन्ते प्रतिपादनमुप-

वाद्यन्तयोः प्रकरणप्रतिपाद्यस्य पुनःपुनः प्रतिपादनमभ्यासः यथा तत्रैव "तत्त्वमसी"ति नवकृत्वोऽभ्यासः प्रकरणप्रतिपाद्यस्य मानान्तराविषयताऽपूर्व्वता यथा तत्रैवाद्वितीयवस्तुनो मानान्तराविषयता प्रकरणप्रतिपाद्यस्य श्रूयमाणं तज्ज्ञानात्तत्प्राप्तिः[1] प्रयोजनं फलम्। यथा तत्रैवा"चार्य्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य" इति अद्वितीयवस्तुज्ञानात्तत्प्राप्तिः फलम्। प्रकरणप्रतिपाद्यस्य प्रशंसनमर्थवादः। यथा

संहार। एतद्द्वयं तात्पर्य्यनिर्णायकमेकं लिङ्गमित्यर्थः। तदुभयमुदाहरति यथेति। हे सौम्य ? सोमवत्प्रियदर्शन" इदं दृश्यमानं सर्व्वं अग्रे सृष्टेः पूर्व्वं सदेवासीत् एकमेवाद्वितीयं तद्भिन्नं विजातीयं सजातीयं वा किमपि नासीदित्यर्थः। एवं छान्दोग्ये षष्ठे आदावद्वितीयवस्तुप्रतिपादनमुपक्रमः। तथैतदद्वितीयवस्तु आत्मा यस्य तदेतदात्मा एतदात्मनो भाव ऐतदात्म्यं इदं सर्व्वं दृश्यमानम् अद्वितीयवस्तुव्यतिरेकेण नास्तीत्यर्थः। एवमन्तेऽद्वितीयवस्तुप्रतिपादनमुपसंहार इत्यर्थः। अभ्यासं निरूपयति प्रकरणेति। अभ्यासमुदाहरति यथेति। तत्रैव छान्दोग्ये षष्ठे एव नवकृत्वो नववारं अपूर्व्वतां निरूपयति प्रकरणप्रतिपाद्येति उदाहरति यथेति। श्रुत्यतिरिक्तमानं मानान्तरं तदगोचरत्वमपूर्व्वत्वमित्यर्थः। फलं निरूपयति प्रकरणेति। तत्राप्युदाहरणमाह

---

(१) क ख तत्प्राप्तिप्रयोजनमिति पाठः।

तत्रैव येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमित्यद्वितीयवस्तुप्रशंसनम् ॥ १७ ॥

प्रकरणप्रतिपाद्यस्य दृष्टान्तैः प्रतिपादनमुपपत्तिः। यथा तत्रैव "यथा सौम्यैकेन मृत्पिण्डेन (विज्ञातेन[1]) सर्वं मृण्मयं विज्ञातं 'भवति[2]' वाचारम्भणं विकारो नामधेयम्[3] मृत्तिकेत्येव सत्यमि"त्यादि वाक्यप्रतिपादित-

---

यथेति। आचार्य्यवन् गुरुमुखाच्छ्रुतवेदार्थः। वेदब्रह्मास्मीति साक्षात्करोति तत्त्वमस्यादिवाक्यैरिति शेषः। तस्य ब्रह्मसाक्षात्कारवतो यावन्न विमोक्ष्ये प्रारब्धफलभोगेन बन्धान्न मुच्यते। तावदेव चिरं तावत्कालमवस्थानम्। अथ भोगेन प्रारब्धे क्षीणे सम्पत्स्ये ब्रह्म सम्पद्यते परमात्मा भवतीत्यर्थ. ॥ १७ ॥

अर्थवाद निरूपयति प्रकरणेति। उदाहरणं दर्शयति यथेति। "येन श्रुतेन ब्रह्मणाऽश्रुतं श्रुतं भवति तमादेशमप्राक्षः पृष्टवानसी"ति पूर्वेण सम्बन्धः। एवं सर्वत्र द्रष्टव्यम्। उपपत्तिमाह प्रकरणेति। लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः। (?)तैर्दृष्टान्तैः प्रकरणप्रतिपाद्यप्रतिपादनमुपपत्तिरिति योजना। उदाहरति यथेति। यथैकेन मृत्पिण्डेन विज्ञातेन सर्वं मृण्मयं घटशरावादिकं विज्ञातं स्यात्, मृदात्मना नामधेयं[4]) विकारश्चेति द्वयं वाचारम्भणमनृतं

---

(१) ख, ग, विज्ञातेति पाठो न।
(२) ग धेयमिति पाठ।
(२) ख, ग, स्यादिति पाठ'।
(३) ग, धेयमिति पाठः।

मृदादिदृष्टान्तैरद्वितीयवस्तुप्रतिपादनम्। एवं षड्विधतात्पर्य्यलिङ्गैर्वेदान्तानामद्वितीये ब्रह्मणि तात्पर्य्यनिश्चयः। इदमेव श्रवणमित्युच्यते। श्रुतस्यार्थस्योपपत्तिभिश्चिन्तनं मननं विजातीयप्रत्ययतिरस्कारेण सजातीयप्रत्ययप्रवाहीकरणं निदिध्यासनम्। तदुक्तम्।

मृत्तिकेत्येव सत्यम्। अतो मृद्‌ज्ञानेन घटादिज्ञानं युक्तमित्यर्थः। एवं लिङ्गानि निरूप्य तैर्वेदान्तानाम्ब्रह्मणि तात्पर्य्यनिश्चयो भवतीत्युपसंहरति एवमिति। तत् किमित्यत आह इदमिति। उपक्रमादिषड्विधलिङ्गैरद्वितीये ब्रह्मणि वेदान्तानां तात्पर्य्यनिश्चयानुकूलव्यापाररूपं श्रवणमित्यर्थः। प्रसङ्गान्मननं निरूपयति श्रुतस्येति। निदिध्यासनं निरूपयति विजातीयेति। (१)अनात्मबुद्धिर्द्वैतदर्शनञ्च विजातीयप्रत्ययः। अहम्ब्रह्मास्मीति प्रत्ययान्तिर(२)स्कारेणेत्यर्थः। अत्र श्रवणेन मानगता असम्भावना निवर्त्तते। मननेन मेयगतासम्भावना निदिध्यासनेन विपरीतभावना अनन्तरं तत्त्वमस्यादिवाक्याद्ब्रह्मापरोक्षज्ञानं शोधिततत्त्वपदार्थस्य ततोऽज्ञाननिवृत्तिः। एवं श्रवणादीनां ब्रह्मसाक्षात्कारद्वारा मोक्षे विनियोगः। एतच्चाग्रे व्युत्पादयिष्यति। तत्र सम्मतिमाह तदुक्तमिति। उपदानां वेदान्तानां शक्तिविषयं निरूपणं शक्तितात्पर्य्यधारणानुकूलव्यापार इत्यर्थः।

---

(१) ख, अनात्मबुद्धिर्द्वैतदर्शनमिति पाठः। (२) ख तिरस्कारेणेति पाठः।

"शब्दशक्तिविषयं निरूपणं युक्तितः श्रवणमुच्यते बुधैर्वस्तुतत्त्वविषयं निरूपणं युक्तितो मननमित्युदीर्य्यते चेतसस्तु चित्तिमात्रशेषता ध्यान मित्यभिवदन्ति वैदिकाः। अन्तरङ्गमिदमित्यमीरितं तत्कुरुष्व परमात्मबुद्धये" इति। इदं श्रवणादित्रयं साधनसम्पन्नस्य

युक्तितो न्यायतो बुधैर्वेदान्तशास्त्रार्थरहस्यविद्भिर्वस्तुतत्त्वविषयं निरूपणमद्वितीयब्रह्मतत्त्वनिर्णयानुकूलव्यापार इत्यर्थः। युक्तित उपपत्तितः सा व्याख्याता। चेतस अन्तःकरणस्य चितिमात्रशेषता विजातीयप्रत्ययतिरस्कारेण सजातीयप्रत्ययप्रवाहिता वैदिकाः वेदान्तार्थचिन्तकाः। द्वितीयश्लोकस्योत्तरार्द्धं व्याचष्टे इदमिति। ज्ञानं प्रति ब्रह्मसाक्षात्कारं प्रति तत्र प्रमाणमाह आत्मेति। आदिशब्देन "तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्पाण्डित्यञ्च बाल्यञ्च निर्विद्याथ मुनिः तद्विजिज्ञासस्व" इत्यादि श्रुतयो गृह्यन्ते ॥

ननु साधनसम्पन्नस्य सन्यासिनः श्रवणादित्रयं ज्ञानं प्रत्यन्तरङ्गसाधनमित्युक्तम्। तत्र कानि साधनानि यैः सम्पन्नः श्रवणाद्यधिकारी स्यात्तत्राह साधनानीति। "अजो नित्यः शाश्वतोऽयं पुराण आकाशवत्सर्वगतश्च नित्यः तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते"।

"अविनाशि तु तद्विद्धि येन सर्वमिदं ततम्।
विनाशमव्ययस्यास्य न कश्चित् कर्तुमर्हति"॥

संन्यासिनो ज्ञानं प्रत्यतरङ्गसाधनम् "आत्मावारे द्रष्टव्यः श्रोतव्यो निदिध्यासितव्य" इत्यादि श्रुतेः। साधनानि नित्यानित्यवस्तुविवेकः, इहामुत्रार्थफलभोगविरागः शमादिषट्क सम्पत्तिर्मुमुक्षुत्वञ्चेत्येवं रूपाणि ॥ १८ ॥

"अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिण."।
यत्कृतक तदनित्य यथा घट"

इत्यादि श्रुतिस्मृतिन्यायैरात्मा नित्यः। आत्मनोऽन्यदखिलं ब्रह्मलोकान्तमनित्यं पुण्यकार्य्यत्वात्। नच "कर्म्मणा पितृलोको विद्यया देवलोक" इत्यादि श्रुत्या ब्रह्मलोकस्य विद्यासाध्यत्वावगमात् पुण्यकार्य्यत्वानुपपत्तेः कथमनित्यत्वमिति वाच्यम्। "विद्ययादेवलोक" इत्यत्र विद्याशब्देनोपासनाया विवक्षितत्वात् तस्याः कर्त्तुमकर्त्तुमन्यथा कर्त्तुं शक्यत्वेन मानसक्रियारूपत्वाद् ब्रह्मलोकस्यापि पुण्यकार्य्यत्वेनानित्यत्वोपपत्तेः, एतच्चास्माभिः प्रागेव विस्तरेण प्रतिपादितं तत्तश्च आत्मनोऽन्यदखिलमनित्यं आत्मा नित्य इति विवेचनं नित्यानित्यवस्तुविवेकः॥

ननु कश्चित् स्वयमेव श्रुतिस्मृत्यर्थं न्यायञ्च कथमनुसन्धत्ते नास्तीति चेत् तर्हि नित्यानित्यवस्तुविवेकः कथं स्यात्, किञ्च, "अक्षय्यं ह वै चातुर्मास्य याजिनः सुकृतम्भवतो" तिश्रुत्या कर्म्मफलस्याक्षय्यत्वावगमात् कथमात्मभिन्नस्यानित्यत्वनिश्चय इति नायं दोषो जन्मान्तरकृतस्य सदसद्भेऽपि निष्कामतयाऽनुष्ठितनित्यनैमित्तिकप्रायश्चित्तोपासनैराराधितात्माध्यपादश्रीश्वरभगवदनुग्रहीतस्यात्यन्त-

निर्मलत्वान्तस्य श्रुत्याद्यनुसन्धानेन नित्यानित्यवस्तुविवेकोपपत्ते। कर्मफलाक्षय्यत्ववचनस्य विध्यपेक्षिततया गुणार्थवादत्वात्। "तद्यथेह कर्मचितोलोकः क्षीयत" इत्यादिवचनस्य श्रवणविध्यपेक्षितत्वेन न्यायोपोद्बलितत्वेन च भूतार्थवादतया ततोबलवत्त्वाच्च। तत श्रात्म भिन्नस्यानित्यनिश्चोभवत्येव। अर्थवादस्त्रिविध. गुणवादोऽनुवादो भूतार्थवादश्चेति। तदुक्तम्।

"विरोधे गुणवादः स्यादनुवादोऽवधारिते।
भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मत" इति।

"श्रादित्यो यूपो भवति अग्निर्हिमस्य भेषज यच्च इ खेऽ मभिन्नमि"त्यादिवाक्यानि यथाक्रममुदाहरणीयानि। तथाच विधि फलापेक्षायामपि नित्यत्वानित्यत्वयोरौदासीन्याच्चातुर्मास्य फल नित्यत्वे ज्योतिष्टोमाश्वमेधादिविधीनामानर्थक्यप्रसङ्गात्तदक्षय्यत्ववचन गुणार्थवाद एव पूर्णाहुत्या सर्वकामावाप्तिवचनवत् "तद्यथेह कर्मचितोलोक क्षीयत" इत्यादि वाक्य तु श्रवणविध्यपेक्षितत्वान्मानान्तराविरुद्धत्वात् 'यत्कृतक तदनित्य'मिति न्यायोपोद्बलितत्वादज्ञातार्थबोधकतया भूतार्थवादत्वात् स्वार्थे मानमेवानेन न्यायेन नित्यानित्यवस्तुविवेके सम्यक् सम्पन्ने कर्मफलेष्वनित्यत्वदोषदर्शनेनेहामुत्रार्थफलभोगविरागो भवति। स्रवान्तपायसादाविवैहिकभोगसाधन स्रक्चन्दनवनितादिविषयेष्वमुत्रामृतादिविषयेषु चानित्यत्वदोषदर्शनेनात्यन्तजिहासा सम्पद्यते अयमेवेहामुत्रार्थफलभोगविरागः। नव सयमसेतादृश वैराग्यमिद्धौ 'कि रंहति पादारम्भेण वैराग्यफलके' नेति वाच्यम्। एतदाद्यांय तदारम्भोपपत्ते। ततः शमदमोपरति-

"परीक्ष्यलोकान्कर्मचिन्तान्ब्राह्मणो निर्वेदमाया-न्नास्त्यकृतः कृतेन तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्स-मित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्" "कश्चिद्धीरः प्रत्यगात्मा-नमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्" "शान्तोदान्त उपर-तस्तितिक्षुस्समाहितो भूत्वा आत्मन्येवात्मनं पश्येदि"-त्यादिश्रुतिभ्यः ॥ १९ ॥

तितिक्षा श्रद्धा समाधानानि भवन्ति तान्यग्रे व्युत्पादयिष्यति। ततो मुमुक्षा एवं साधनानि भवन्तीत्यर्थः ॥

अत्र विवेकादिसाधनचतुष्टयं समुचितमधिकारिविशेषणमित्याचार्य्याः। अन्ये तु मुमुक्षैवाधिकारिविशेषणं विवेकादिकं तु तत्साधनत्वेन प्रणाड्याः। अन्यथा प्रसज्यप्रतिषेधादिति वदन्ति ॥१८॥

विवेकादीनामधिकारिविशेषणत्वे प्रमाणमाह परीक्ष्येति। कर्म-चितान्कर्मसम्पादितान् लोकान् ब्रह्मलोकादीन् परीक्ष्यानित्यत्वेन निश्चित्य ब्राह्मणो ब्रह्मजिज्ञासुर्निर्वेदं वैराग्यमायात् प्राप्नुयात्। किमिति यतः, अकृतो मोक्षः कृतेन कर्म्मणा नास्ति न सम्भवति। ततः किं कुर्य्यादित्यत आह तदिति। विरक्तः सर्वकर्माणि नित्यादीनि सन्यस्य तद्विज्ञानार्थं मोक्षसाधनीभूतब्रह्मविज्ञानार्थं गुरुमेवाभिगच्छेत् समित्पाणिरुपहारपाणिः श्रोत्रियं शास्त्रज्ञान-वन्तं ब्रह्मनिष्ठं करामलकवदखण्डैकरसानन्दब्रह्मसाक्षात्कारवन्तमिति मुण्डकश्रुतेरक्षरार्थः। कठवल्लीवाक्यमप्युदाहरति कश्चिदिति।

यथोक्तसाधनसम्पन्नस्य संन्यासाधिकारः। विहितानां कर्म्मणां विधिना परित्यागः संन्यासः। स च वैराग्यहेतुकः॥ २०॥

धीरो विवेकी जडानृतदुःखाहङ्कारेभ्य प्रातिलोम्येन सच्चिदानन्दतया अञ्चति प्रकाशत इति प्रत्यङ् स चासावात्मा च प्रत्यगात्मा त अनावृत विषयेभ्यो व्यावृत्त चक्षुर्यस्य स तथोक्त। चक्षुरिति सर्वेन्द्रियाणामुपलक्षणम्, जितेन्द्रिय इत्यर्थ। वृहदारण्यकवाक्यमुदाहरति शान्त इति। आत्मनि मनसि आत्मान-मद्वयात्मान पश्यत्यहम्ब्रह्माऽस्मीति साक्षात्करोति। आदिशब्देन "आत्मनस्तु कामाय सर्वं प्रियम्भवति"।

"असुर्या नाम ते लोका अन्धेन तमसावृत्ता।
तांस्ते प्रेत्याभिगच्छन्ति ये के च आत्महनो जना॥"

"उदरमन्तर कुरुतेऽथ तस्य भयम्भवति न[१] त्वेव भय विदुषो मन्वानस्य तस्य यथोऽस्यास्तस्य स्वप्ना" इत्यादिवाक्यानि गृह्यन्ते ॥१८॥

तत किमित्यत आह यथोक्तेति। यथोक्तसाधनसम्पन्नस्य विवेकादिसाधनसम्पन्नस्य जिज्ञासोरिति शेष। "एतमेव प्रव्राजिनो लोकमिच्छन्त प्रव्रजन्ती'त्यादि श्रुते।

ननु साधनसम्पन्नस्य जिज्ञासा नोपपद्यते कुत इति चेत् सद्धा-

(१ स तस्य इति पाठः।

ज्ञातं ज्ञातं वा नाद्यः, अज्ञाते जिज्ञासायोगात्। तस्याधर्मज्ञान-साध्यत्वात्। न द्वितीयो ज्ञाने सुतरां तदयोगात्। नच तज्ज्ञान-मापातस्वरूपमेवेति वाच्यम्। किमिदमापातत्वं सामान्यरूपत्वं वा संशयरूपत्वं वा परोक्षरूपत्वं वा नाद्यः, निःसामान्यविशेषे ब्रह्मणि सामान्यलक्षणापातताया असम्भवात्। न द्वितीयः, ब्रह्मणो मानान्तरा गम्यत्वेन वेदान्तगम्यत्वेन तज्ज्ञानस्य संशयत्वायोगात्। न तृतीयः नित्यापरोक्षे ब्रह्मणि परोक्षाज्ञानायोगात्। "यत् साक्षादपरोक्षाद्ब्रह्मे"ति श्रुत्या ब्रह्मणो नित्यापरोक्षत्वावगमात्। तस्मात्साधन-सम्पन्नस्य जिज्ञासाऽनुपपन्नेति उच्यते, यद्यपि ब्रह्मणो मानान्तरा-गोचरत्वात् स्वप्रकाशसाक्ष्यभिन्नतया नित्यापरोक्षत्वाच्च। तस्मिन्वे-दान्तवाक्यादपरोक्षमेव ज्ञानं जायते। तथापि तज्ज्ञानमापात-रूपमेव। अग्रे संशयादिदर्शनात् तस्यापातत्वं नामाविचारितवाक्य-जन्यत्वं संशयादिग्रस्तत्वं वा नतु संशयत्वं भासमानविरुद्ध-नाना-कोटिजन्य ज्ञानस्यैव संशयत्वात् वाक्यजन्य-ज्ञानस्यैककोटिकत्वात्। निर्दोष वेदान्तवाक्यजन्य-ज्ञानस्य संशयत्वायोगाच्च। अन्ये तु क्वचिदेककोटिकज्ञानमप्यनवधारणात्मकम्, अन्यथाऽनभ्यासदशायां जलज्ञानानन्तरं प्रामाण्यसंशयाहितसंशयो न स्यात्। जलज्ञानस्य तस्य सतो निश्चयरूपत्वात्। न चैककोटिकज्ञानस्य संशयत्वे निश्चयसंशययोः को भेद इति वाच्यम्। संशयविरोधिज्ञानस्यैव निश्चयत्वात्। न चान्योऽन्याश्रयः। एकस्मिन् धर्मिणि स्वाकार-विरुद्धद्वय-वैशिष्ट्यावगाहिज्ञानाविरोधि ज्ञानत्वस्य संशयत्वात्। एवञ्च वाक्यजन्यमपि ज्ञानमेककोटिकमपि अग्रे संशयादिदर्शनाद्-

"यदहरेव-विरजे त्तदहरेव प्रव्रजेदि"त्यादि श्रुते "वैराग्यं परमेतस्य मोक्षस्य परमोऽवधिरि"ति स्मृतेश्च स च वैराग्यस्य[1] तारतम्येन चतुर्विधः कुटीच[2]कबहूदकहंसपरमहंसभेदात्। वैराग्यं द्विविधम्। अपरम्पर

नवधारणात्मकमेवेति वदन्ति। तथाच साधनसम्पन्नस्य जिज्ञासो संन्यासाधिकार इति निरवद्यम्।

ननु यथोक्तसाधनसम्पन्नस्य सन्यासाधिकार इत्युक्तम्। तत्र कोऽसौ संन्यास इत्याकाङ्क्षायां तं व्युत्पादयति विहितानामिति। अविहित-निषिद्धत्यागिनां सन्यासित्वाभावाद्विहितानामित्युक्तम्। आलस्यादिनाऽविहितत्यागिनां भ्रष्टानां सन्यासित्ववारणाय विधिनेत्युक्तम् ॥ २० ॥

सन्यासस्य वैराग्य हेतुकत्वे प्रमाणमाह यदहरेवेति। यस्मिन्दिने वैराग्यं प्राप्नुयात् तदहस्तस्मिन्नेव दिने प्रव्रजेत् सर्वकर्म्म सन्यास कुर्य्यात् इति श्रुतेरचरार्थ.। मोक्षस्य संन्यासस्य। सन्यास विभजते स चेति। वैराग्य[3]तारतम्यमुपपादयितु वैराग्यं विभजते वैराग्यमिति। अपरवैराग्यं विभजते तत्रेति। तयोर्मध्य इत्यर्थ। यतमानवैराग्यं निरूपयति। अस्मिन्निति। व्यतिरेकवैराग्यं निरूपयति

---

(१) क, ग वैराग्यस इति पाठ।
(२) क चरक इति पाठ।
(३) ग तारतम्यमिति पाठो न।

श्चेति। तच्चापरं चतुर्विधम्। यतमानव्यतिरेकैकेन्द्रियत्ववशीकारभेदात्। अस्मिन् संसारे इदं सारमिदमसारमिति सारासारविवेको यतमानवैराग्यम्। चित्तगतदोषाणां मध्ये एतावन्तः पक्वा एतावन्तोऽपक्वा इति विविच्यापक्वदोषनिरोधे[१] यत्नोव्यतिरेकवैराग्यम्। विषयेच्छासत्त्वेऽपि मनसी[२]न्द्रियनिरोधावस्थानमेकेन्द्रियत्वं[३]वैराग्यम्। वशीकारवैराग्यमैहिकामुष्मिकविषयजिहासा। तदुक्तम्, "दृष्टानुश्राविकविषयवितृष्णस्य वशीकार[४]-सञ्ज्ञावैराग्यमिति"। तच्चिविधम्। मन्दं तीव्रं तीव्रतरञ्चेति। पुत्रदारादिवियोगे धिक् संसारमिति

चितेति। एकेन्द्रियत्ववैराग्यमाह विषयेति। चतुर्थमाह वशीकारेति। तत्र पतञ्जलिसूत्रं संवादयति तदुक्तमिति। ऐहिकाः स्रक्चन्दनवनितादयो दृष्ट-विषया आमुष्मिकाः अनुश्राविकास्तेषु विगता तृष्णा यस्य स तथा तस्यैहिकामुष्मिकविषये जिहासायुक्तस्येत्यर्थः। तादृशस्य वशीकारनामकं वैराग्यम्भवतीति शेषः। अर्थाद्यतमानादित्रयं सूचितं द्रष्टव्यं तदपि विभजते तदिति।

---

(१) ग, निरोधे यत्न इति पाठ।

(२) ग मनसेन्द्रिय इति पाठ।

(३) ग, ख (त्व)मिति पाठो न।

(४) क, वशीकारसञ्ज्ञामिति पाठ।

बुद्ध्या विषयजिहासा मन्दवैराग्यम्। अस्मिन् जन्मनि पुत्रदारादि मास्त्विति स्थिरबुद्ध्या विषयजिहासा तीव्रम्। पुनरावृत्तिसहितब्रह्मलोकादि पर्य्यन्तं मास्त्विति स्थिरबुद्ध्या विषयजिहासा तीव्रतरम्। तत्र मन्दवैराग्ये संन्यासाधिकार एव नास्ति ॥ २१ ॥

"यदा मनसि वैराग्यं जायते सर्ववस्तुषु।
तदैव संन्यसेद्विद्वानन्यथा पतितो भवेदि"ति ॥

स्मरणात्। तीव्रवैराग्ये सति यात्राद्यशक्तौ कुटी[1]चकाधिकारः। तच्छक्तौ बहूदक-संन्यासाधिकारः।

मन्दवैराग्यस्वरूप दर्शयति पुत्रेति। तीव्रवैराग्य निरूपयति अस्मिन्निति। तीव्रतर निरूपयति पुनरावृत्तीति। न चैद वैराग्यतारतम्य कुतोऽवगम्यते इति वाच्यम्। परवैराग्ये मृदुमध्यतीव्रभेदेन तारतम्यावगमात्। अपरे स्वानुभवानुरोधेन तदुपपादितमिति भाव। कस्मिन्वैराग्ये सति को वा सन्यासः कर्त्तव्य इत्याकाङ्क्षायां तदक्तु मन्दवैराग्ये सति सन्यासानधिकारमाह तत्र मन्देति ॥ २१ ॥

तत्र गमकमाह यदेति। यात्राद्यशक्तिशक्तिभ्या तीव्रतरविरक्तस्य सन्यासद्वयमाह तीव्रेति। तीव्रतरविरक्तस्य हंससन्यासाधिकारमाह

---

(१) क कुटीचराधिकार इति।

तीव्रतरवैराग्ये सति हंससंन्यासाधिकारः। एते चयः संन्यासाः। एतेषामाचाराश्च स्मृतौ प्रसिद्धाः। तीव्रतरवैराग्ये मुमुक्षोः परमहंस-संन्यासाधिकारः। स च परमहंसो द्विविधः। विविदिषा-संन्यासोविद्वत्संन्यासश्चेति। साधनसम्पन्नेन तत्त्वज्ञानमुद्दिश्य क्रियमाणः संन्यासोविविदिषा-संन्यासः। "एतमेव प्रव्राजिनोलोक-

---

तीव्रतरेति। तर्हि ते संन्यासानिरूपणीया स्तेषामाचाराश्च वक्तव्या इति तत्राह एत इति। मुमुक्षोः परमहंससंन्यासाधिकारमाह तीव्रतरेति। परमहंस-संन्यासं विभजते स चेति। विविदिषा संन्यासस्य लक्षणमाह साधनेति। तत्र प्रमाणमाह एतमेवेति। लोको द्विविधः। आत्मलोकोऽनात्मलोकश्चेति। तत्रानात्मलोकः श्रुत्या त्रिविधः प्रतिपादितः। "अथ त्रयो वावलोका मनुष्यलोक" इति श्रुतिः। आत्मलोकोऽपि श्रुत्या प्रतिपादितः।

"अथ यो ह वास्माल्लोकात्स्वं लोकमदृष्ट्वा प्रैति स एतमविदितो न भुनक्ति यथा ह वेदेन[१] त्वक्तोऽन्यदा कर्मकृतं यदि ह वाप्यन् एवं विन्महत् पुण्यं कर्म करोति तद्धास्यं ततः चीयत एवात्मानमेव लोकमुपासीत् स य आत्मानमेव लोकमुपास्ते किं प्रजया करिष्यामो येषां नोऽयमात्माऽयंलोक" इत्याद्याश्श्रुतयः। ततश्च एतमिति सर्वनाम्नः प्रकृतिपरामर्शित्वात् "स वा एष महानज आत्मा" इत्यात्मनः प्रकृतत्वादिहापि लोकमिति लोकशब्देनात्मलोको विवक्षित इति

---

(१) म, वेदो ननूक्त इति पाठः।

मिच्छन्तः प्रव्रजन्ती"त्यादि श्रुतिस्तत्र [१]मानम् । स च द्विविधः जन्मापादकः कर्म्मत्यागात्मकः । "प्रैषोच्चारणपूर्वकं दण्डधारणाद्याश्रमरूपश्चे"ति "न कर्म्मणा न प्रजया न धनेन न त्यागेनैकेऽमृतत्वमानशु"रित्यादि श्रुतिराद्ये मानम् ॥ २२ ॥

गम्यते। एवञ्च लोक्यतेऽनेनेति व्युत्पत्त्या लोकमात्मानं[१] भवमिच्छन्तः प्रव्राजिनो विरक्ताः प्रव्रजन्ति संन्यासं कुर्वन्तीत्यर्थः। अत्रापूर्वत्वात्संन्यासं कुर्य्युरिति विधिर्द्रष्टव्यः। "उपांशुयाजमन्तरा यजती"त्यत्र यथा तद्वत् तदुक्तम्, "विधिर्वा धारणवदि"ति। विविदिषा संन्यासं विभजते स चेति। जन्मापादक[२] कर्म्मकाम्यं फलाभिसन्धिकृतं, नित्यादि कर्म्म तस्य त्यागः काम्यकर्म्मणां स्वरूपेण त्यागो विवक्षितः। नित्यादीनां फलाभिसन्धित्यागमात्रं विवक्षितं न स्वरूपेणान्यथावान्तरभेदो न स्यादिति भावः। तत्र प्रथमं विविदिषा संन्यासे प्रमाणमाह नेति। कर्म्मणा काम्येन फलाभिसन्धिकृतनित्यादिना वा कर्म्मणाऽमृतत्वं नाप्नुयुरेवं सर्वत्र योजनीयं प्रजया पुत्रेण धनेन हिरण्यादिना, एके विरक्तास्त्यागेन यथोक्त-जन्मापादक-कर्म्मत्यागात्मकसंन्यासेनामृतत्वं मोक्षसाधनं ब्रह्मसाक्षात्कारमानशुः, प्राप्नुयुरित्यक्षरार्थः ॥ २२ ॥

---

(१) ख ग, प्रमाणमिति पाठः ।

(२) ग मात्मानुभवमिति पाठः ।

(३ ग, जन्मापादकमिति पाठः ।

विरक्तस्य गृहस्थादेः प्रबलनिमित्तवशेन संन्यासप्रतिबंधे आद्ये संन्यासेऽधिकारः। अत्र स्त्रीणामप्यधिकारः। जनकादीनां मैत्रेयी-प्रभृतीनां तत्त्वविदां श्रुतिस्मृतिपुराणेतिहासेषूपलम्भात्। द्वितीये तु "दण्डमाच्छादनं कौपीनं परिगृह्येच्छेषं विसृजेदिति संसारमेव निःसारं दृष्ट्वा सारदिदृक्षया प्रव्रजन्त्य-कृतोद्वाहाः परं वैराग्यमाश्रिता" इत्यादि वचनानि प्रमाणानि। गृहस्थाश्रमादौ कृतश्रवणादिभिरुत्पन्नसाक्षात्कारेण गृहस्थादिना

कस्य तत्राधिकार इत्याकाङ्क्षायामाह, विरक्तस्येति। संन्यासप्रतिबन्धे दण्डधारणाद्याश्रमरूपसंन्यासप्रतिबन्धे जन्मापादक कर्म्मत्यागात्मकसंन्यासे स्त्रियोऽप्यधिक्रियन्त इत्याह अत्रेति। तत्र गमकमाह जनकादीनामिति। आदिशब्देनाजातशत्रु-याज्ञवल्क्यकहोलप्रभृतयो गृह्यन्ते। मैत्रेयी प्रभृतीनामिति। नच स्त्रीणामुपनयनाभावात् वेदाध्ययनानर्हतया कथम्ब्रह्मज्ञानाधिकारस्तस्य महावाक्यजन्यत्वादिति वाच्यम्। अतीतानेकजन्मसुकृतपरीपाकवशेन नितान्तनिर्मलस्वान्तानां मनुष्याणां पुराणश्रवणादिना तत्त्वज्ञानोत्पत्तौ बाधकाभावात्। त्रैवर्णिकानामेव वेदान्त-श्रवणादिना ज्ञानोत्पत्तिः। एतदभिप्राया श्रुतिरपि "यद्ब्रह्मविद्यया सर्वं भविष्यन्तो मनुष्या मन्यन्त" इति। अत एवेतिहासपुराणेषु विदुरादीनां तत्त्वज्ञानं श्रूयते। किमु वक्तव्यं ब्राह्मणीनां मैत्रेय्या---

विक्षि[१]प्तचित्तस्य चित्तविश्रान्ति-लक्षणां जीवन्मुक्तिमुद्दिश्य क्रियमाणः संन्यासोविद्वत्संन्यासः। तच्चैतमेव विदित्वामुनिर्भवति। "अथ योगिनां परमहंसानामि"-त्यादि परमहंसोपनिषत्।

तत्त्वज्ञानाऽधिकारे त्रैवर्णिक स्त्रीणां ज्ञानमात्रोपयोगी[२] श्रुत्यभ्यासेन विरोध इति केचित्तदाह श्रुतिस्तीति। द्वितीय विविदिषा संन्यासे प्रमाणमाह द्वितीय इति।

"यदि वेतरथा ब्रह्मचर्य्यादेव प्रव्रजेद् गृहाद्वनाद्वा यदहरेव विरजेत्तदहरेव प्रव्रजेत् प्रवृत्तिलक्षणोयोगोज्ञानं संन्यासलक्षणं तस्माज्ज्ञानं पुरस्कृत्य संन्यसेदिह बुद्धिमान् त्यज धर्म्ममधर्म्मञ्च उभे सत्यानृते त्यज उभे सत्यानृते त्यक्त्वा येन त्यजसि तं त्यज कर्म्मणा बध्यते, जन्तुर्विद्यया च विमुच्यते तस्मात्कर्म्म न कुर्वन्ति यतयः पारदर्शिन"

इत्यादि-वचनान्यादिशब्देन गृह्यन्ते। विद्वत्संन्यासमुपपादयति गृहस्थाश्रमादाविति। उत्पन्नो ब्रह्मसाक्षात्कारो यस्य स तथा तेनेति यावत्। आदि शब्देन ब्रह्मचारि वानप्रस्थौ गृह्येते। चित्तविश्रान्तिर्नाम विक्षेपोपशमः। विद्वत्संन्यासे प्रमाणमाह तच्चेति।

---

(१) क विक्षेपित इति पाठः।
(२) ग (ज नि) श्रुत पाठ।

"यदा तु विदितं तत्त्वं परं ब्रह्म सनातनम् ।
तदैव[1]दण्डं संगृह्य सोपवीतां शिखां त्यजे"दि-
त्यादि श्रुतिस्मृतिवचनानि प्रमाणानीति। तत्राद्यसंन्यासो जन्मान्तरीये[2]ऽपि ज्ञाने उपकरोति ॥ २३ ॥

एतं परमात्मानं विदित्वा ब्रह्माप्नोति साक्षात्कृत्य मुनिर्मननशीलो भवतीत्यर्थः । तच्च मननशीलत्वमसति कर्त्तव्यान्तरे सम्भवतीति संन्यासो विधीयते। तस्य जीवन्मुक्तिरेव फलं तत्त्वज्ञानस्य सम्पन्नत्वादितिभावः। आदिशब्देन "एतमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति, न दण्डं न शिखां न यज्ञोपवीतं नाच्छादनं चरति परमहंसः" ।

"कन्था-कौपीनवासास्तु दण्डधृग्ध्यानतत्परः ।
एकाकी रमते नित्यं तं देवा ब्राह्मणं विदुः ॥
कपालं वृक्षमूलानि कुचेलमसहायता ।
समता चैव सर्वस्मिन्नेतन्मुक्तस्य लक्षणम्" ॥

इत्यादि-वचनानि गृह्यन्ते ।

ननु विविदिषा-संन्यासस्तत्त्वज्ञानहेतुरित्युक्तं तदयुक्तम् । याज्ञवल्क्यजनकप्रभृतीनां तत्त्वज्ञानोपलम्भादित्याशंक्याह तथेति । सर्वांशेष्व इत्यर्थः ॥ २३ ॥

---

(१) [illegible]
(२) [illegible]

जनकादीनां तत्त्वज्ञानोपलम्भाच्छ्रुत्यादिषु। "यद्यातुरःस्यान्मनसा वाचा वा संन्यसेदि"त्यातुर-संन्यास-विधानाच्च। आतुरेऽपि विरक्तस्यैवाधिकारात्। न

जन्मान्तरीय-संन्यासस्य ज्ञानोपकारित्वे गमकमाह जनकादीनामिति बृहदारण्यकश्रुत्यादिष्वित्यर्थः। गमकान्तरमाह यदीति। "यदहरेव विरजेत्तदहरेव प्रव्रजेदिति" वैराग्यहेतुकं संन्यासं साङ्गकर्त्तव्यत्वेन विधाय दशाविशेषे यद्यातुरः स्यान्मनसा वाचा वा संन्यसेदिति पूर्वविहितं वैराग्यहेतुकं संन्यासमनूद्येतराङ्गव्यावृत्तये विकल्पेन वाङ्मनसरूपसाधनद्वयं विधीयते "मनसा वाचा वा संन्यसेदिति" तदानीं मुमूर्षोः श्रवणाद्यसम्भवेन तत्त्वज्ञानासम्भवात्। स च संन्यासो जन्मान्तरे ज्ञाने[१] उपकरोतीत्यङ्गीकर्त्तव्यमन्यथा संन्यासस्य वैयर्थ्यं स्यादिति भावः।

नन्विदं ब्रह्मलोकसाधनं संन्यासान्तरमस्तु नच तत्र प्रमाणाभावः। "संन्यासाद्ब्रह्मणः स्थानमिति" स्मृतेः सत्त्वात्। तथाच न वैयर्थ्यमित्याशंक्याह आतुरेऽपीति। तथाच "संन्यासाद्ब्रह्मणः स्थानमिति" स्मृतिः। तस्यैव नान्तरीयकफलं प्रतिपादयति। अथवा स्मार्त्तसंन्यासस्य तत्फलमस्तु प्रकृतस्य वैराग्यहेतुकस्य संन्यासस्य नैकफलत्वादिति भावः। विपक्षे दण्डमाहान्यथेति। तच्च सम्मतिस्य तदुक्तमिति। एवं संन्यासं सप्रपञ्चं निरूप्य साधनसम्पत्ते

---

(१) स च समुपकरोतीति पाठः ।

संन्यासान्तरम् । अन्यथा प्रकरणविरोधप्रस
तदुक्तम् ।

"जन्मान्तरेषु यदि साधनजातमासीत्संन्यासपू

संन्यासिनः श्रवणादिकं तत्त्वज्ञानहेतुः । (१)तस्यैवान्वयव्यतिरेक विधानादित्युपसंहरति तदेवमिति । यस्मात्कारणात्साधनचतु संपन्नस्य जिज्ञासोः श्रवणादिकं तत्त्वज्ञानं प्रत्यन्तरङ्गसाधनं तस्मात्कारणादित्यर्थः । नच "तत्त्वज्ञानोद्देशेन श्रोतव्य" इत्यादि श्रवणादिविधिः किं न स्यादिति वाच्यम् । विधेरप्राप्तविषयत्वात् यद्यपि साक्षात्कारं प्रति श्रवणादीनां कारणत्वं मानान्तरेणाप्रा तथापि षड्जादि-स्वरसाक्षात्कारं प्रति गान्धर्वशास्त्राभ्यासस्य कार पतापहकाले श्रवणेन दुर्ज्ञेय-वस्तु साक्षात्कारत्वेनान्वयव्यतिरेकाभ्य सामान्याकारेण कार्यकारणभावस्य निश्चितत्वात् । ब्रह्मणोऽप्यति-सूक्ष्मतया दुर्ज्ञेयत्वात् तत्साक्षात्कारं प्रत्यपि श्रवणादीनामन्वय-व्यतिरेकाभ्यां कारणत्वं प्राप्तमेवेति न तत्र विधिरिति भावः ।

ननु "श्रोतव्य" इत्यादितव्यप्रत्ययानां का गतिरित्याशंक्याह अर्हार्थ इति । नियमादृष्टसाध्यस्य परमापूर्वस्यासम्भवेन नियमविध्य-सम्भवादर्हार्थे श्रोतव्य इत्यादितव्यप्रत्ययो युक्त इति वाचस्पतिमिश्रा-णामाशयः । मतान्तरमाह आचार्यास्त्विति ।

---

(१) म -

जनकादीनां तत्त्वज्ञानोपलम्भाच्छ्रुत्यादिषु। "यद्यातुरःस्यान्मनसा वाचा वा संन्यसेदि"त्यातुर-संन्यास-विधानाच्च। आतुरेऽपि विरक्तस्यैवाधिकारात्। न

जन्मान्तरीय-संन्यासस्य ज्ञानोपकारित्वे गमकमाह जनकादीनामिति बृहदारण्यकश्रुत्यादिष्वित्यर्थः। गमकान्तरमाह यदीति। "यदहरेव विरजेत्तदहरेव प्रव्रजेदिति" वैराग्यहेतुकं संन्यासं साङ्गकर्त्तव्यत्वेन विधाय दशाविशेषे यद्यातुरः स्यान्मनसा वाचा वा संन्यसेदिति पूर्वविहितं वैराग्यहेतुकं संन्यासमनूद्येतराङ्गव्यावृत्तये विकल्पेन वाङ्मनसरूपसाधनद्वयं विधीयते "मनसा वाचा वा संन्यसेदिति" तदानीं मुमूर्षोः श्रवणाद्यसम्भवेन तत्त्वज्ञानासम्भवात्। स च संन्यासो जन्मान्तरे ज्ञाने[1] उपकरोतीत्यङ्गीकर्त्तव्यमन्यथा संन्यासस्य वैयर्थ्यं स्यादिति भावः।

नन्विदं ब्रह्मलोकसाधनं संन्यासान्तरमस्तु नच तत्र प्रमाणाभावः। "संन्यासाद्ब्रह्मणः स्थानमिति" श्रुतेः सत्त्वात्। तथाच न वैयर्थ्यमित्याशंक्याह आतुरेऽपीति। तथाच "संन्यासाद्ब्रह्मणः स्थानमिति" स्मृतिः। तस्यैव नान्तरीयकफलं प्रतिपादयति। अथवा स्मार्त्तसंन्यासस्य तत्फलमस्तु प्रकृतस्य वैराग्यहेतुकस्य संन्यासस्य ज्ञानैकफलत्वादिति भावः। विपक्षे दण्डमाहान्यथेति। तत्र सम्मतिमाह तदुक्तमिति। एवं संन्यासं सप्रपञ्चं निरूप्य साधनमध्यस्थ

---

(१) [illegible]

पूर्वोक्ताधिकारिणः श्रवणादीनां तत्त्वज्ञानकारणत्वम-न्वयव्यतिरेकाभ्यां निश्चीयते 'अर्हार्थं श्रोतव्य' इत्यादि

कर्त्तव्यत्वेन विहितास्तान्यङ्गानि "फलवत्सन्निधावफलं तदङ्गमिति" न्यायात् तानि चाङ्गानि द्विविधानि स्वरूपोपकारीणि फलोपकारीणि चेति । तत्र प्रोक्षणादयः स्वरूपोपकारिणस्त-एव सन्निपत्योपकारिण इत्युच्यन्ते । प्रयाजादयस्तु चेत्फलोपकारिण आरादुपकारिण इति भाष्यन्ते । एवं प्रकृतेऽपि वेदान्तश्रवणं प्रमाण-विचारात्मकतया साक्षाद्ब्रह्मसाक्षात्कारफलसाधनत्वेन[1] विहितत्वादङ्गी विवेकादि-शुद्धमदनां तानि तत्सन्निधौ विहितानि स्वरूपाकार्य्यङ्गानि ज्ञाना-तिरिक्त-फलाश्रवणान्मननादिफलोपकार्य्यङ्गं फलं विना तत्सन्निधौ विहितत्वात् । तथा च मनन-निदिध्यासनाभ्यां फलोपकार्य्यङ्गाभ्यां श्रवणं सामाङ्गी विधीयते श्रोतव्योमन्तव्योनिदिध्यासितव्य इति ।

नच तद्विषये श्रूयमाणा लिङ्गादयोऽनियोज्यविषयत्वात्कुण्ठी-भवन्तीत्यादीना भाष्यकृता निराकृतत्वात्कथं श्रवणविधिरिति वाच्यम्, ज्ञानविधिरेव तत्र निराकृतः नतु श्रवणादिविधिस्तत्र प्रवृत्त्यभाव प्रसङ्गात् ।

नच, फलेच्छया तत्र प्रवृत्तिरिति वाच्यम् । द्वैतात्मविचारे पुराणादि विचारे च प्रवृत्तिप्रसङ्गेनाद्वैतविचारे वेदान्तविचारे च नियमेन मुमुक्षोः प्रवृत्त्यभावप्रसङ्गात् । तस्माच्छ्रवणादिविधि-

(१) ब साधनत्वविहितत्व मृ इति च ह ।

मिदं श्रवणादि(१)कञ्च विद्यामवाप्स्यति जनः सकलोऽपि यत्र तत्राश्रमादिषु वसन्न निवारयाम" इति । तदेवं

"आचिनोति हि शास्त्रार्थमाचारे स्थापयत्यपि ।
स्वयमाचरते यस्मादाचार्य्यस्तेन चोच्यते' ॥

इति श्लोकोक्तलक्षणा पञ्चपादिकाचार्य्यमतानुसारिणो विवरणाचार्य्य-प्रभृतय आचार्य्या इत्युच्यन्ते। एव वक्ष्यमाणरीत्या एव शब्दार्थमाह यथेति। साधनचतुष्टयसम्पन्नस्य जिज्ञासो कृतसन्न्यासस्येत्यर्थ ।

"यथा तुषनिवृत्तिमुद्दिश्य व्रीहीनवहन्ती' त्यवघातो विधीयते एव द्रष्टव्य इति । ब्रह्मसाक्षात्कारमुद्दिश्य श्रोतव्यो मन्तव्यो निदिध्यासितव्य । तस्माद्ब्राह्मण पाण्डित्य निर्विद्य बाल्येन तिष्ठासेत्पाण्डित्य बाल्यञ्च निर्विद्याथ मुनि-स्त तद्विजिज्ञासस्वे"त्यादि वाक्यै (२ साङ्गोपाङ्ग श्रवण नामाङ्गी विधीयते । यत्साक्षात् फलसाधनत्वेन श्रुत तदङ्गी शेषी प्रधानमिति चोच्यते तत्सन्निधौ फल विना यत्कर्त्तव्यत्वेन श्रुत तदङ्ग शेष सहकारीत्यभिधीयते । 'यथा दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते'ति दर्शपूर्णमासाग्नेयादय षट् यागा साक्षात्फल-साधनत्वेन विहिता स्त एवाङ्गिनस्तत्प्रकरणे 'व्रीहीन्प्रोक्षति समिधो यजती'त्यादिना प्रोक्षणादय समिदादयश्च साक्षात्स्वर्गफलमन्तरेण

(१) क श्रवणादिकाश्चेति पाठ ।
(२ ग साङ्ग श्रवण नाम इति पाठ ।

पूर्वोक्ताधिकारिणः श्रवणादीनां तत्त्वज्ञानकारणत्वम-न्वयव्यतिरेकाभ्यां निश्चीयते 'अहार्थे श्रोतव्य' इत्यादि

कर्त्तव्यत्वेन विहितास्तान्यङ्गानि "फलवत्सन्निधावफलं तदङ्गमिति" न्यायात् तानि चाङ्गानि द्विविधानि स्वरूपोपकारीणि फलोपकारीणि चेति । तत्र प्रोक्षणादयः स्वरूपोपकारिणस्त-एव सन्निपत्योपकारिण इत्युच्यन्ते । प्रयाजादयस्तु चेत्फलोपकारिण आरादुपकारिण इति भाष्यन्ते । एवं प्रकृतेऽपि वेदान्तश्रवणं प्रमाण-विचारात्मकतया साक्षाद्ब्रह्मसाक्षात्कारफलसाधनत्वेन[1] विहितत्वादङ्गी विवेकादि-शुद्धपमदनां तानि तत्सन्निधौ विहितानि स्वरूपाकार्य्यङ्गानि ज्ञाना-तिरिक्त-फलाश्रवणान्मननादिफलोपकार्य्यङ्गं फलं विना तत्सन्निधौ विहितत्वात् । तथा च मनन-निदिध्यासनाभ्यां फलोपकार्य्यङ्गाभ्यां श्रवणं नामाङ्गी विधीयते श्रोतव्योमन्तव्योनिदिध्यासितव्य इति ।

नच तद्विषये श्रूयमाणा लिङ्गादयोऽनियोज्यविषयत्वात्कुण्ठी-भवन्तीत्यादीना भाष्यकृता निराकृतत्वात्कथं श्रवणविधिरिति वाच्यम्, ज्ञानविधिरेव तत्र निराकृतः नतु श्रवणादिविधिस्तत्र प्रवृत्त्यभाव प्रसङ्गात् ।

नच, फलेच्छया तत्र प्रवृत्तिरिति वाच्यम् । द्वैतात्मविचारे पुराणादि विचारे च प्रवृत्तिप्रसङ्गेनाद्वैतविचारे वेदान्तविचारे च नियमेन मुमुक्षोः प्रवृत्त्यभावप्रसङ्गात् । तस्माच्छ्रवणादिविधि-

---

(१) स साधनत्वविहितत्वात् इति पाठः ।

तव्यप्रत्यय" इति वाचस्पतिमिश्राः। आचार्यास्त्वेवं वर्णयन्ति, "यथोक्ताधिकारिणो द्रष्टव्यः श्रोतव्य" इत्यादि

रपेक्षित । तदुक्तम् भगवता सूत्रकारेण "सहकार्यन्तरविधि पक्षेण तृतीय तद्वतोविध्यादिवदिति" ।

नच सहकारिध्यानविधिरेव तत्र स्वीकृत न श्रवणादि-विधिरिति वाच्यम्। प्रधानविध्यभावे सहकारिविध्ययोगात्। तस्माच्छ्रवणाविधेयमेव। पुरुषप्रवर्त्तको विधि । स च द्विविध अभिधानविधिरभिधेयविधिश्चेति। लिङ्गादिघटित वाक्यमभिधान-विधि । स चतुर्विध उत्पत्तिविधिर्नियोगविधिरधिकारविधि प्रयोगविधिश्चेति। तत्र कर्मस्वरूपबोधकोविधिरुत्पत्तिविधि स यथा "अग्निहोत्र जुहोति सोमेन यजेते' त्यादि । श्रुतिलिङ्गवाक्य प्रकरणस्थान समाख्यानामन्यतमसहायेनाङ्गताबोधको विधिर्नियोग विधि । स यथा "दध्ना जुहोति पशुना यजेते"त्यादि । उत्पन्नस्य कर्मण फलसम्बन्धबोधकोविधिरधिकारविधि । स यथा "अग्नि-होत्र जुहुयात् स्वर्गकाम ज्योतिष्टोमेन स्वर्गकामो यजेते' त्यादि'। साङ्गे कर्मणि अनुष्ठापकोविधि प्रयोगविधि स यथा "पौर्णमास्यां यजेत अमावस्याया यजेते"त्यादि । एव प्रकृतेऽपि तस्माद्ब्राह्मण पाण्डित्य निर्विद्ये'त्यादि रुत्पत्तिविधिर्मन्तव्य इत्यादिविनि-योगविधिस्तदिजिज्ञासस्वेत्यधिकारविधि । तथाहि सन्प्रत्यय वा-च्याया इच्छाया प्रष्टव्यर्थ ज्ञानस्य च कर्मणमशक्यतया सन्प्रत्ययेना-

वाक्यैर्दर्शनमुद्दिश्य मननिदिध्यासनाभ्यां फलोपकार्य्यङ्गाभ्यां सह श्रवणं नामाङ्गी विधीयते ॥ २४ ॥

तस्य च दृष्टफलत्वान्ना पूर्वविधिः अप्राप्तार्थविधायको ह्यपूर्वविधिः किन्तु नियमविधि र्वा परिसंख्याविधि

त्मनीतिं विचारं लक्षयित्वा प्रकृत्या फलीभूतं ज्ञानं च लक्षयित्वाऽद्वितीय-ब्रह्मज्ञानाय तत्कर्त्तव्यता विधीयते । ब्रह्मसाक्षात्कारकामो वेदान्त श्रवणं कुर्य्यादिति । अतोयमधिकारविधिः साधनचतुष्टय सम्पन्नोऽधिकारी जिज्ञासुर्म्मुमुक्षुः साङ्गवेदान्तश्रवणं कुर्य्यादिति प्रयोगविधिः कल्पः इतिसाध्यत्वे सतीष्टसाधनत्वमविधेयविधिरयमेव लिङ्गार्थः । नतु भावनाविनियोगोवा प्रमाणाभावादिति भावः ॥ २४ ॥

ननु श्रोतव्य इत्यादि वाक्ये श्रवण(१)विधिरित्युक्तं किमयं व्रीहीन्प्रोक्षतीति प्रोक्षणविधिवत् श्रवणविधिरपूर्वविधिराहोस्विद्व्रीहीन वहन्तीत्यवघातविधिवन्नियमविधिरथवा "इमामगृभ्णन्रशना मृतस्ये' त्यश्वाभिधानी मादत्ते इति गर्दभरशना ग्रहण-व्यावृत्ति-विधिवत्परिसंख्याविधिर्वानाद्यः। श्रवणस्य दृष्टफलकत्वेन तदयोगात्। अन्वयव्यतिरेकाभ्यां श्रवणस्य तत्त्वज्ञानसाधनत्वावगमेन दृष्टफलत्वम्। अप्राप्तार्थ-बोधकस्यैवापूर्वविधित्वेन श्रवणादेस्तथात्वाभावात्। न

---

(१) ग श्रवण विधीयत इति पाठ ।

वा। यत्रप्राप्तस्याप्राप्तांशपूरको विधिर्नियमविधिः 'यथा-व्रीहीनवहन्यादित्यवघातविधिः। उभयप्राप्तावितर-

---

द्वितीयः। अवघातनियमादृष्टसाध्यपरमापूर्ववच्छ्रवणनियमादृष्ट-साध्यस्याभावात्। न च ज्ञानमेव तत्साध्यमस्त्विति वाच्यम्। अन्यत्र तथादृष्टत्वात्। न तृतीयः उपनिषदेकगम्यतया ब्रह्मणस्तत्त्वज्ञानं प्रत्युभयप्राप्त्यभावात्। भावे वा प्रत्यवायाभाव-प्रसङ्गात्। नहि पक्ष नखभक्षणाभावे प्रत्यवायो हि श्रूयते श्रूयते च प्रकृते प्रत्यवायः। "अरुन्मुखान्यतीन् सालावृकेभ्यः प्रायच्छमिति" मास्तु श्रवणादौ विधिरिति चेत्तर्हि तत्र प्रवृत्त्यभावप्रसङ्गात्। तस्मात् कोऽयमत्र-विधिर्विवक्षित इत्याशङ्क्य प्राप्तत्वेनापूर्वविध्यसम्भवं वदन्नियमादिक माह तस्येति। श्रवणादेरित्यर्थः। दृष्टेति। अन्वय व्यतिरेकसिद्ध फलत्वादित्यर्थः। तथाप्यपूर्वविधिः कुतो न सम्भवतीत्याशङ्क्य तल्लक्षणलक्षितत्वाभावादिति तदसम्भवसम्भवं वक्तुमपूर्वविधेर्लक्षण-माह अप्राप्तेति। मानान्तरेणाप्राप्तस्यार्थस्य विधायकः कर्त्तव्यत्वेन बोधकोऽपूर्वविधिः कर्त्तव्यत्वबोधको विधिरपूर्वविधिरित्युक्ते नियमादिविधावतिव्याप्तिरत उक्तं मानान्तराप्राप्तेति। तर्हि कोऽसौ-विधिर्विवक्षित इति पृच्छति किन्त्विति। उत्तरमाह नियमेति। नियमविधेर्लक्षणमाह पक्षेति। तुष-निवृत्तिं प्रति एकस्मिन् पक्षेऽवघातः प्राप्त एकस्मिन् पक्षे नखविदलनादिः। यदा नखविदलनादिः प्राप्तस्तदाऽवघातो न प्राप्तस्ततश्च तुषनिवृत्तिं प्रतिपक्ष प्राप्तस्यावघातादेरप्राप्तांश पूरयति व्रीहीनवहन्तीति वाक्यं

व्यावृत्तिबोध[1]कोविधिः परिसङ्ख्याविधिः "यथेमामगृभ्णन्न-रशनामृतस्येत्यश्वाभिधानी-मादत्ते" इति गर्दभरशनाग्रहणव्यावृत्तिविधिः। एवं प्रकृतेऽपि जिज्ञासु-

अवघातेनैव तुषनिवृत्तिः सम्पादनीयेति। तत्रार्थान्नखविदलनादिव्यावृत्तिः अप्राप्तांशपूरकोविधिर्नियमविधिरित्युक्ते अपूर्वविधावतिव्याप्तिस्तद्वारणायोक्तं पक्षप्राप्तेति। तत्रोदाहरणमाह यथेति। परिसङ्ख्याविधेर्लक्षणमाह उभयेति। यथा "पञ्च पञ्चनखा भक्ष्या" इत्यत्र रागतः पञ्चनखा-पञ्चनखभक्षणयोरुभयोः प्राप्तौ अपञ्चनखभक्षणव्यावृत्तिं बोधयति "पञ्च पञ्चनखाः भक्ष्या" इति वाक्यं नतु पञ्चनखभक्षणं कर्त्तव्यत्वेन बोधयति तस्य रागतः प्राप्तत्वादितरव्यावृत्तिबोधकोविधिः परिसङ्ख्याविधिरित्युक्ते "न कलञ्जं भक्षयेदि"-त्यादिनिषेधवाक्येऽतिव्याप्तिरतस्तद्वारणायोक्तमुभयप्राप्ताविति वैदिकोदाहरणमाह यथेति। अत्र मन्त्रलिङ्गेन गर्दभरशनाऽश्वरशनयो[2]र्ग्रहणप्राप्तावश्वाभिधानीमादत्त इति गर्दभरशनाग्रहणव्यावृत्तिर्विधीयते न त्वश्वरशनाग्रहणं विधीयते। तस्य मन्त्रलिङ्गप्राप्तत्वादतः परिसङ्ख्याविधिः। एतत्सर्वमभिप्रेत्योक्तं भट्टपादैः।

"विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति।
तत्र चान्यत्र च प्राप्तौ परिसङ्ख्येति गीयते"॥

(१) ख, व्यावृत्तिबोधकोविधिरिति पाठः।
(२) क, ख, रशनयोरिति पाठः [illegible]।

वेदान्तश्रवणमेव कुर्य्यादिति नियमविधिः। वेदान्तश्रवणव्यतिरिक्तं न कुर्य्यादिति परिसंख्याविधिर्वा॥२५॥

नन्वस्त्वेवमन्यत्र प्रकृते किमायातमित्याशंक्याह एवमिति। एवमुक्तरीत्या प्रकृते व्यवहारभूमौ। ननु पक्षे साधनद्वयप्राप्तौ पक्षप्राप्तस्याप्राप्तांशपूरको विधिर्नियमविधिरित्युक्तत्वाद्ब्रह्मणोमानान्तरागोचरत्वेन शास्त्रैकगम्यतया तज्ज्ञानं प्रति वेदान्तव्यतिरिक्तसाधनान्तराप्राप्तेः कथं नियमविधिः श्रवणादौ। नच ब्रह्मज्ञानं प्रति पक्षे पुराणादिश्रवणस्य साधनतया प्राप्तौ नियमोयुक्त इति वाच्यम्। अध्यात्मपुराणस्य वेदान्तमूलतया तच्छ्रवणस्य साधनान्तरत्वाभावात्। नच पक्षे रामगीतादिश्रवणस्य साधनत्वप्राप्तौ नियमोयुक्त इति वाच्यम्। तस्य वचनान्तरेण वारितत्वात्। नच द्वैतशास्त्रश्रवणस्य पक्षे साधनत्वप्राप्तौ स युक्त इति वाच्यम्। तस्य विरुद्धत्वेनाद्वितीय ब्रह्मज्ञान प्रति साधनत्वायोगात्। "यतो वाचोनिवर्त्तन्ते यन्मनसा न मनुते" इत्यादि श्रुत्या ब्रह्मणो वेदान्तव्यतिरिक्तवाङ्मनसयोरविषयत्वेन तज्ज्ञानं प्रति प्रत्यक्षादीनां साधनत्वाप्राप्तेश्च अतएव न परिसङ्ख्याविधिस्तस्मान्नियमः परिसङ्ख्यावेति विकल्पाश्रयणमनुपपन्नमिति मैवम्। वेदान्तश्रवणवद्भ्रान्त्या पुराणादिश्रवणस्यापि ब्रह्मज्ञानं प्रति स्वातन्त्र्येण साधनत्वप्राप्तौ श्रवणादौ नियमविधिरुपगम्यते। नचापूर्वविधिरेवास्तु किमनेन क्लेशेनेति वाच्यम्। श्रवणादौ[१] दृष्टफलत्वेन तदसम्भवस्योक्तत्वात्। नन्वन्यत्रनियमादृष्टस्य

(१) ग, श्रवणादेरिति पाठ।

तदुक्तम्

"नियमः परिसङ्ख्या वा विध्यर्थो हि[1] भवेद्यतः।
अनात्मादर्शनेनैव परमात्मनमुपास्महे" ॥

परमापूर्वोपयोगदर्शनात् प्रकृते तदभावात् तस्य कुत्रोपयोग इति शृणु तत्त्वज्ञाने तस्योपयोगः। नच परमाणपरतन्त्रस्य कथमदृष्टसाध्यत्वमिति वाच्यम्। साक्षात् तदभावेऽपि प्रतिबन्धकनिवृत्तिद्वारा तदुपपत्तेः। किञ्चात्यल्पमिदमुच्यते सर्वादृष्टसाध्यत्वाद्ब्रह्मसाक्षात्कारस्य। नच तत्र प्रमाणाभावः "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन" "कषाये कर्मभिः पक्वे ततोज्ञानं प्रवर्त्तते" इत्यादि श्रुतिस्मृत्योः सत्त्वात्। तस्माज्जिज्ञासु-र्वेदान्तश्रवणमेव कुर्य्यादिति नियमविधिरिति निरवद्यम्। अत एव जिज्ञासु-र्वेदान्तश्रवणव्यतिरिक्तं न कुर्य्यादिति परिसङ्ख्याविधिरपि सम्भवति। नच नियमपरिसङ्ख्याविध्योः को विशेष उभयत्रेतरव्यावृत्तेरविशेषादिति वाच्यम्। नियमविधावितरव्यावृत्तिरार्थिकी परिसङ्ख्याविधौ विधेयेति विशेषः॥ २५॥

उक्तार्थे सम्मतिमाह तदुक्तमिति। अनात्मादर्शनेनानात्मदर्शनं व्यावृत्त्याहंब्रह्मास्मीति परमात्मानमुपास्महे ध्यायाम इत्यर्थः। वस्तुतस्तु श्रवणादौ नियमविधिरेव परिसङ्ख्याविधिर्नेत्यभ्युपगमवादत[2] इतरथाऽकरणे प्रत्यवायश्रवणविरोधप्रसङ्गादिति द्रष्टव्यम्।

---

(१) ग, ह्यैति पाठः। ख, ह्येति पाठः।

(२) वाद इति पा०।

इति तच्च श्रवणं संन्यासिनां नित्यम् ।

"नित्यकर्म्म परित्यज्य वेदान्त श्रवणं विना ।
वर्तमानस्तु संन्यासी पतत्येव न संशयः" ॥

इत्यकरणे प्रत्यवायश्रवणात् "आसुप्तेरामृतेः कालं नयेद्वेदान्तचिन्तये"ति स्मृत्या "यावज्जीवमग्निहोत्रं

ननु श्रवणं विधीयत इत्युक्तं तत्किंकाम्यमुत नित्यम् अहो-नैमित्तिकं प्रायश्चित्तं वा। नाद्यः "स्वर्गकामो यजेते"ति वद्विध्युद्देशे फलाश्रवणात्। नच रात्रिसत्रन्यायेन तत्कल्प्यमिति वाच्यम्। गृहस्थादीनां ब्रह्मज्ञानकामनाया असम्भवात्, प्रत्युत ब्रह्मज्ञानाद्-द्वेषदर्शनात्। अतएव रागिगीतमपि श्लोकमुदाहरति।

"अपि वृन्दावने शून्ये शृगालत्वं स इच्छति।
नतु निर्विषयं मोक्षं कदाचिदपि गौतम"! इति ॥ किञ्च, "वेदानिम लोकममुञ्च परित्यज्यात्मानमन्विच्छेदि"त्यादिश्रुत्या साधनचतुष्टयसम्पन्नस्य जिज्ञासोः सान्यासिनः श्रवणादिकर्त्तव्यताव-गमेन गृहस्थादीनां तत्रानधिकारात्। अस्तु तर्हि सन्यासिनामे-तत्काम्यमिति चेन्न। श्रवणादिरहितस्य सन्यासिनः प्रत्यवायाभाव-प्रसङ्गात्। नचेष्टापत्तिः "अरून मुखान् यतीन् शालावृकेभ्य. प्रायच्छ" "नित्यं कर्म परित्यज्ये"त्यादि श्रुति-स्मृति-विरोधप्रसङ्गात्। तस्मान्न श्रवणादिकाम्यम्। न द्वितीयः अग्निहोत्रादिवच्छ्रुत्या जीवनं निमित्तीकृत्याविधानात्। न तृतीयः, गृहदाहादिवन्निमित्ता श्रवणात्। न चरमः पापनिवृत्तिमुद्दिश्याविधानात्। "तरति ब्रह्म-

जुहुयादि"त्यादि श्रुत्या जीवनं निमित्तीकृत्याग्निहोत्रा-दिविधानवद् जीवनं निमित्तीकृत्य श्रवणादिविधानात्

"त्वं पदार्थविवेकाय संन्यासः सर्वकर्म्मणाम् ।
श्रुत्याभिधीयते यस्मात्तत्त्यागी पतितो भवेत् ॥

कारकस्य करणेन तत्क्षणात्, भिक्षुरेव पतितो यथा भवेत् । व्यञ्जकस्य परिवर्जनादसौ, सद्य एव पतितो न

इत्यां योऽश्वमेधेन यजते उपचैनमेवं वेदे"त्यादिवत् तस्या-श्रवणात्। तस्माच्छ्रवणादिविधानमुपपन्नमित्याशङ्क्य तस्य नित्यत्वकाम्यत्वयोः सम्भवादिधिरुपपद्यते इत्यभिप्रेत्याह तत्रेति। यथा चतुर्णामाश्रमाणामुपकुर्वाणस्य ब्रह्मचारिणः काम्यत्वेऽपि गृहस्थाश्रमं प्राप्तस्याकरण-प्रत्यवायश्रवणात् जीवनं निमित्तीकृत्य विधानाच्च अग्निहोत्र-सोमयागसन्ध्यावन्दनादिनित्यं, एवं स्वीकृतसंन्यासाश्रमस्य परमहंसस्य विविदिषोरपि श्रवणादिनित्यं "अहन् मुखान् यतीन् शालावृकेभ्यः प्रायच्छं" "श्रवणायापि बहुभिर्यो न लभ्यः" "नित्यं कर्म्म परित्यज्य वेदान्तश्रवणं विने"त्यादि श्रुतिस्मृतिषु संन्यासिनां श्रवणाद्यकरणे प्रत्यवायश्रवणात्, "आसुप्ते"रित्यादि स्मृतिषु जीवनं निमित्तीकृत्य विधानाच्च श्रवणादिनित्यम् । न"चासुप्तेरामृतेः कालं नयेद्वेदान्त-चिन्तये"त्यादि स्मृतावेव जीवनं निमित्तीकृत्य श्रवणं विधीयते न श्रुताविति वाच्यम् । तद्बलेन तत्रापि तत्कल्पनासम्भवात्। न केवलं प्रत्यवायश्रवणजीवननिमित्तविधिबलाभ्यामस्माभिरेव श्रवणनित्यत्व-मभ्युपगम्यते किन्त्वचार्य्यैरङ्गीकृतं श्रवणादिरहितस्य पातित्याभि-

संशयः"॥ इति वार्त्तिकाचार्य्यसंक्षेपशारीरकाचार्य्याभ्या श्रवणादिरहितस्य संन्यासिनः पातित्याभिधानाच्च गृहस्थादीनां श्रवणादिकाम्यम् ॥ २६ ॥

धानादित्याह त्व पदार्थेति । "तत्त्वमसी"त्यत्र त्व पदस्य योऽय वाच्यार्थ अन्त करणविशिष्टचैतन्य तद्विवेकायान्त करणपरित्यागेन तदेकदेशलक्ष्यार्थप्रत्यक् चैतन्यज्ञानायेत्यर्थ । सर्वकर्मणा नित्यादीना विहिताना 'मेतमेवे"त्यादिश्रुत्या तत्त्यागी श्रवणादित्यागी व्यञ्जकस्येति श्रवणादेरित्यर्थ । असौ सन्यासी । ननु विवरणाचार्य्यतत्त्वदीपनाचार्य्याभ्या श्रवणविधि काम्यत्वमुक्त क पुनरस्य प्रसङ्ग इत्याचिप्य समाधानावसरे तत्कथमुपपद्यत इत्याशङ्क्य तस्य गृहस्थादिविषयत्वान्नाकाम्यनुपपत्तिरित्याह गृहस्थादीनामिति ।

ननु गृहस्थादीना साधनचतुष्टयसम्पत्त्यभावाद्ब्रह्मजिज्ञासा न सम्भवतीत्युक्त सत्यमुक्तम्, अत्यन्तबहिर्मुखानामसम्भवेऽपि केषाञ्चित् परमेश्वरानुगृहिताना फलासक्तिरहितकर्म्मानुष्ठायिना साधनसम्पत्त्या ब्रह्मजिज्ञासा सम्भवत्येव । निमित्तान्तरप्रतिबन्धेन सन्यासाश्रमस्वीकाराभावेऽपि श्रवणादौ प्रवृत्तिरूपपद्यते । तेषा श्रवणविधि काम्योऽन्यथा गृहस्थाश्रमादावुत्पन्नब्रह्मसाचात्काराणा जीवन्मुक्तिमुद्दिश्य विद्वत्सन्यासविधान कथ स्यात् । नच विद्वत्सन्यास एव नास्तीति वक्तु शक्य प्रमाणबलेन विविदिषाविद्वत्सन्यासयोर्निरूपितत्वात् । किञ्च विविदिषासन्यासे जिज्ञासुरधिकारी उत्पन्नसाचात्कारो विद्वत्सन्यासे। यथा विविदिषा सन्यासस्य तत्त्वज्ञान फल तथा विद्वत्-

"दिने दिने तु वेदान्त-श्रवणाद्भक्तिसंयुक्तात् ।
गुरुशुश्रूषया लब्धात् कृच्छ्राशीति फलं लभेत्" ॥

इति फलश्रवणात् । अन्ये तु वेदान्तश्रवणे साधनचतुष्टयसम्पन्नस्यैवाधिकारात् गृहस्थादेः श्रवणाधिकार एव नास्ति; श्रुतिषु याज्ञवल्क्यजनकप्रभृतीनां तत्त्वज्ञानप्रतिपादकोपाख्यानस्य ब्रह्मात्मनि तात्पर्य्यात्स्वार्थे

संन्यासस्य जीवन्मुक्तिः । यथा तत्त्वज्ञानसाधनं श्रवणादिर्विविदिषासंन्यासिनानुष्ठेयः तथा जीवन्मुक्तिसाधनं वासनाक्षयादभ्यासः । विद्वत्संन्यासिनेत्यधिकारिफलानुष्ठेयानां भेदात् विविदिषाविद्वत्संन्यासयोर्महान् भेदोऽस्त्येव । नच जीवन्मुक्तिरेव नास्ति प्रमाणाभावादिति वाच्यम् । स्वानुभवश्रुतिस्मृतीतिहासपुराणानां सत्त्वात् पुनश्चोत्तरत्र व्युत्पादयिष्यति । उक्तञ्च,

"जीवन्मुक्तिस्तावदस्ति प्रतीते-र्द्वैतच्छाया तत्र चास्ति प्रतीतेः ।
द्वैतच्छायारक्षणायास्तिलेशोऽस्मिन्नर्थे स्वानुभूतिः प्रमाणमिति" ।

तस्माद्गृहाश्रमादावुत्पन्नतत्त्वसाक्षात्कारिणां विद्वत्संन्यासविधानानुरोधेन गृहस्थादीनामेव श्रवणविधिः काम्य इति विवरणाचार्य्यतत्त्वदीपनाचार्य्ययोस्तात्पर्य्यं द्रष्टव्यम् ॥ २६ ॥

गृहस्थादीनां श्रवणविधेः काम्यत्वे गमकमाह दिने दिन इति। ननु विवरणाचार्य्यैस्तृतीयवर्णके सन्न्यासस्य श्रवणाङ्गत्वमभिधीयते, तथाच वार्त्तिकाचार्य्यैरपि ।

तात्पर्य्यमेवनास्तीत्याहुः। तदसत् याज्ञवल्क्यप्रभृतीनां गृहस्थस्य तुलाधारस्य च ज्ञानित्वस्मरणात् परवै[1]राग्यं गुणवैतृष्ण्यम् गुणेषु जिहासेति यावत्। तदुक्तम् "तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यमि"ति तच्चासम्प्रज्ञात समाधेरन्तरङ्गसाधनम्। उक्तञ्च "तीव्रसंवेगानामासन्नः समाधिलाभ" इति अलमतिप्रसङ्गेन ॥ २७ ॥

"त्यक्ताशेषक्रियस्यैव संसारं प्रजिहासतः ।
जिज्ञासोरेव चैकात्म्यं त्रय्यन्तेष्वधिकारिता ॥
सर्वकर्मपरित्यागात् संन्यस्ताशेषसाधनात् ।
श्रुत्युक्तपरिव्राट् स्यादैकात्म्यज्ञानजन्मने" ॥

इत्यादिभिः। तत्र भाष्यकारैरपि "ब्रह्मसंस्थोऽमृतत्वमेती"त्यत्र "संन्यासिनामेव ब्रह्मनिष्ठायामधिकार" इति श्रुत्यापि श्रुतः।

"संन्यस्य कर्माणि सर्वाण्यात्मावबोधतः ।
हित्वाऽविद्यां धियैवेयात् तद्विष्णोः परमं पदम्" ॥

"वेदानिमं लोकममुं च परित्यज्यात्मानमन्विच्छे"दित्याद्यया ततश्च गृहस्थादीनां श्रवणाधिकार एव नास्ति। तस्माद् गृहस्थादीनां श्रवणादिकाम्यं संन्यासिना नित्यमित्ययुक्तमिति चेत्तर्हि संन्यासिनामेव श्रवणादिनित्यं काम्यञ्च भवतु। यथा गृहस्थस्याग्निहोत्रादिनित्यं काम्यञ्च भवति तद्वत्पूर्वोक्तयुक्त्यैव श्रवणादीनां नित्यत्व

---

(१) ग, पर वैराग्यमि पा०

एवं कर्मवाक्यानामप्युपक्रमादिभिस्तात्पर्य्यनिर्णयः प्रकरणादिना लौकिकवाक्यानां तात्पर्य्यनिर्णयः। एतादृशतात्पर्य्यानुपपत्तिः पूर्वोक्तलक्षणावीजं नत्वन्वयानुपपत्तिः। तस्या "यष्टीः प्रवेशये"त्यादावसम्भवात्। "गङ्गायां घोष" इत्यादौ तात्पर्य्यानुपपत्तेः सम्भवात्। न केवलं लक्षणा पदमात्रवृत्तिः किन्तु वाक्यवृत्तिरपि "गभीरायां नद्यां घोष" इत्यादौ पदसमुदायात्मक-

---

कान्यलक्ष्म तथाच न विवरणविरोधः। नापि वार्त्तिकाचार्य्यादिवचनविरोध इत्यभिप्रेत्य मतान्तरमाह अन्येत्विति। वैराग्यतारतम्येन सन्यासभेदनिरूपणप्रसङ्गात्। श्रवणादिविधिं सप्रपञ्चं निरूप्य क्रमप्राप्तं परं वैराग्यं निरूपयति परवैराग्य[1]मिति। उक्तार्थे पतञ्जलिसूत्रं संवादयति तदुक्तमिति। प्रासङ्गिकं परिसमापयत्यलमिति ॥ २७॥

उक्तन्यायमन्यत्राप्यतिदिशति एवमिति। ननूपक्रमादिभिर्वेदवाक्यानां तात्पर्य्यनिर्णयेऽपि लौकिकवाक्यानां कुतः तात्पर्य्यनिर्णय इत्यत आह प्रकरणादिनेति। लिङ्गादिकमादिशब्दार्थः। एवं तात्पर्य्यं सप्रपञ्चं निरूप्य प्रसङ्गात् पूर्वोक्तलक्षणाया बीजं दर्शयति एतादृशेति।

नन्वन्वयानुपपत्तिरेव लक्षणावीजमस्तु "गङ्गायां घोष" इत्यत्र तस्यास्तथात्वेन दृष्टत्वादित्याशङ्क्याह नत्विति। प्रतिज्ञातेऽर्थे हेतु-

---

(१) ख, परं वैराग्यमिति पा०।

वाक्यस्य तीरे लक्षणास्वीकारात्। अत एवार्थवादवाक्यानां प्राशस्त्ये लक्षणा। अन्यथा पदान्तरवैयर्थ्यं स्यात्। अत एव प्राशस्त्यपदार्थप्रत्यापकत्वेनार्थवादवाक्यानां पदस्थानीयतया पदैकवाक्यत्वम्। स्वार्थतात्पर्य्यवतां "समिधो यजति" "दर्शपौर्णमासाभ्यां स्वर्गकामो यजेते"त्यादि वाक्यानामुपकार्य्योपकारकाकांक्षायामेकवाक्यत्वं वाक्यैकवाक्यत्वम् ॥ २८ ॥

माह तस्या इति। यद्यन्वयानुपपत्तिर्लक्षणाबीजं तर्हि 'यष्टीः प्रवेशये'त्यत्र यष्टीनां प्रवेशान्वययोग्यतायां[1] तदनुपपत्तेरभावेन लक्षणा न स्यादतो न सा लक्षणा बीजमिति भावः। नन्वत्र तात्पर्य्यानुपपत्तिर्लक्षणाबीजमस्तु अन्यत्रान्वयानुपपत्तिः। न चाननुगमः अनुगतालाभे तस्याप्याश्रयणीयत्वादित्याशङ्क्य तात्पर्य्यानुपपत्तेः सर्वत्रानुगतत्वेन लक्षणाबीजमङ्गीकर्त्तव्यमित्याह गङ्गायामिति। आदिशब्देन 'शोणो धावती'त्यादि गृह्यते एव लक्षणाबीजं निरूप्य लक्षणापदमात्रवृत्तिस्तस्य शक्तत्वादिति नैयायिकास्तान्निराकर्त्तुमाह न केवलमिति।

ननु वाक्यस्याशक्तत्वात्कथं वाक्य[2]वृत्तिर्लक्षणा स्याच्छक्यसम्बन्धस्यैव लक्षणात्वात् उच्यते यथा शक्तिज्ञाप्यः पदार्थस्तथा वाक्यार्थोऽपीति

---

(१) ख, बैशमनवेति पाठः।

(२) ख, वाक्यपदार्थमिति पाठः।

एवं चावान्तरवाक्यार्थज्ञानमपि महावाक्यार्थज्ञाने कारणम्। तथान्वयव्यतिरेकानुविधानात्। एवं यथोक्त-सहकारिसम्पन्नं वाक्यं परोक्षापरोक्षभेदेन द्विधा

लक्षणावाक्यवृत्तिरपि भवत्येव पदानामितरान्विते पदार्थे सामर्थ्यावधारणादन्वयांशे समुदाय शक्त्यभावेऽपि प्रातिस्विकशक्तेः सत्त्वाद्वाक्यस्यापि शक्यसम्बन्धसम्भवाल्लक्षणोपपद्यते क तर्हि वाक्ये लक्षणास्वीकार इत्यत आह गम्भिरायामिति। नच नदीपदस्यैव लक्षकत्वम्भीरपदं तात्पर्यग्राहकमित्युपपत्तेः वाक्ये लक्षणाङ्गीकरणं मुधेति वाच्यम्। प्रकरणादिना तात्पर्यग्रहसम्भवेन पदान्तरवैयर्थ्याद्वाक्ये लक्षणाङ्गीकरणमर्थवदिति भावः। तत्रोपोद्बलकमाह अत एवेति। यतो वाक्ये लक्षणा स्वीकृता अत एवार्थस्तावकवाक्यं अर्थवादः स्तवः स्तुतिः सा च गुणिनि गुणसंकीर्त्तनं प्राशस्त्य इति स्तुतावित्यर्थः। विपचे दण्डमाहान्ययेति। एवञ्चार्थवादवाक्यानां प्राशस्त्ये लक्षणास्वीकारे पदैकवाक्यत्वं सिद्धमित्याह अत एवेति। केषां तर्हि वाक्यैकवाक्यता इत्याकाङ्क्षायामाह स्वार्थेति। उपकार्य्योऽङ्गी उपकारकमङ्गम्। तदुक्तम्,—

"स्वार्थबोधे समाप्तानामङ्गाङ्गित्वाद्यपेक्षया।

वाक्यानामैकवाक्यत्वं मिथः संहत्य जायते" इति ॥२८॥

नन्वस्तु वाक्यैकवाक्यत्वं ततः किमित्यत आह एवञ्चेति। नच तत्र प्रमाणाभाव इत्याह तथेति। परमप्रकृतमुपसंहरति एवमिति। शक्तिग्रह आकाङ्क्षाज्ञान योग्यताज्ञानं आसत्तिस्तात्पर्यज्ञानमवान्तर-

प्रमामुत्पादयति। तत्र परोक्षार्थप्रतिपादकवाक्यं परोक्षप्रमोत्पादकं यथा "स्वर्गकामो यजेत्" "स देव सौम्येदमग्र आसीत्" "दशमोऽस्ती"त्यादिवाक्यं परोक्षत्वन्नाम

वाक्यार्थज्ञानञ्चेत्येते यथोक्तसहकारिणस्तैः सम्पन्नमित्यर्थः। वाक्यं परोक्षापरोक्षभेदेन द्विविधां प्रमामुत्पादयति इत्युक्तं तदसङ्गतमदर्शनादित्याशङ्क्य तदुपपादयति तत्रेति। परोक्षार्थस्य धर्माधर्मादेः प्रतिपादकं किमिदं परोक्षत्वमर्थस्येत्याशङ्क्याह परोक्षत्वं नामेति। विषयस्यानावृतसंवित्तादात्म्याभावः परोक्षत्वमित्युक्ते धर्माधर्मयोः परोक्षत्वं न स्यादत उक्तं योग्यस्येति। धर्माधर्मयोः संवित्तादात्म्यसत्त्वेऽप्ययोग्यत्वात् परोक्षत्वमित्यर्थः। 'योग्ये'ति विशेषणव्यावर्त्त्यमाह धर्मेति। परोक्षार्थविषयत्वं प्रमायाः परोक्षत्वं विषयचैतन्याभिन्नत्वं वा द्रष्टव्यं किं तर्ह्यपरोक्षप्रमोत्पादकमित्याशङ्क्याह अपरोक्षेति। अपरोक्षत्वमर्थस्य निर्वक्ति अपरोक्षत्वं नामेति। नच धर्माधर्मयोरनावृतसंवित्तादात्म्यादपरोक्षत्वापत्तिरिति वाच्यम्। तयोरयोग्यत्वादत एवात्रापि योग्यस्य विषयस्यानावृतसंवित्तादात्म्यमिति विशेषणीयम्।

ननु (१)शब्दादीनां घटादीनां च जडत्वात्कथमनावृतसंवित्तादात्म्यं चेतनाचेतनयोस्तादात्म्यायोग्यत्वात्। किञ्च भवतां मते संविदोऽधिष्ठानत्वे मायावृतत्वे एतस्य प्रपञ्चस्य तत्कार्यत्वेन तादात्म्यसम्भवेन सर्वदा प्रत्यक्षत्वापत्तिः। अपि च संवित्तादात्म्यं प्रत्यक्ष-

(१) क, शब्दानामिति पाठः।

अनावृतसंवितादात्म्याभावोयोग्यस्य विषयस्य धर्म्माधर्म्मायोग्यत्वान्न प्रत्यक्षत्वम्, अपरोक्षार्थप्रतिपादकं वाक्यम् अपरोक्षप्रमोत्पादकं यथा "दशमस्त्वमसीति

मित्येवास्तु तस्याः स्वतो नित्यापरोक्षत्वेन विषयभानसम्भवादनावृतेति विशेषणं व्यर्थम्; आवृतस्य संविदन्तरस्याप्रसिद्धत्वात् संविदावृतत्वाभ्युपगमे जगदान्ध्यप्रसङ्गात्तर्ह्येतावद्[1]देवास्त्विति चेन्न। उक्तदोषानपायात्। तस्मादिन्द्रियजन्यज्ञानविषयत्वं विषयस्यापरोक्षत्वं तद्भिन्नत्वं परोक्षत्वमिति। अत्र ब्रूमः, अनावृत्ता[2]दात्म्यमेव विषयस्यापरोक्षत्वमभ्युपगन्तव्यम्, न त्विन्द्रियजन्यज्ञानविषयत्वमिन्द्रियजन्यत्वस्य ज्ञाने जन्यतावच्छेदकधर्म्ममन्तरेण तद्दुर्ग्रहत्वात्। नच साक्षात्त्वमेव तदवच्छेदकमिति वाच्यम्। तस्यानिर्वचनात्। न चेन्द्रियजन्यज्ञानत्वं तदिति वाच्यम्। आत्माश्रयापत्तेः इन्द्रियस्यातीन्द्रियत्वेन तद्घटितसाक्षात्त्वस्यापि तथात्वेन साक्षात्करोमीत्यनुभवाविषयत्वप्रसङ्गाच्च। नच ज्ञानाकरणकज्ञानत्वं तदिति वाच्यम्। मनः करणकानुमितिपक्षे तत्रातिव्याप्तेः। नच तस्य निराकरणत्वात्नोक्तदोष इति वाच्यम्। परामर्शस्य व्यापाराभावेनानुमितिकरणत्वायोगात्। द्वितीयज्ञानस्य नष्टत्वेन तदयोगात् व्याप्तिज्ञानस्य विशकलितस्थले व्यभिचारेण तदयोगाच्च। अतः परिशेषादनुमितेः मनः करणकत्वस्यावश्यकत्वात्तत्रातिव्याप्तिर्दुर्वारैव। कथं तर्हि सिद्धान्ते व्याप्तिज्ञानस्यानु-

---

(१) ग, इतोनावृतदेवास्त्विति पाठः।

(२) ग, अनावृतसंविदादात्म्यमिति पाठः।

तत्त्वमसी"त्यादिवाक्यम्, अपरोक्षत्वं नाम अनावृत-संवित्तादात्म्यम् ॥ २९ ॥

मितिकरणत्वं विशकलितस्थले व्यभिचारात्तस्मादविशकलितस्थले पक्षवृत्तिहेतौ तदुभयवैशिष्ट्यभानादनुमितिर्भवतीत्यत्र मानाभावात् सर्वत्र व्याप्तिज्ञानमेवानुमितिकरणमन्यथा सिद्धान्तविरोधप्रसङ्गात्। ततश्च कुत्रातिव्याप्तिरिति चेत्सत्यं तत्त्वसाक्षात्कारेण श्रवणादीनां व्यापारवत्त्वेन करणतयाऽव्याप्तेर्दुष्परिहरत्वादतो न ज्ञानाकरण(१)कज्ञानत्वं साक्षात्त्वं, नापि साक्षात्त्वं जातिः। अविद्यातिरिक्तजडजातेर्निरस्तत्वात्। किञ्चेश्वरज्ञानस्य भवन्मतेऽप्रत्यक्षत्वापत्तेश्च। तस्येन्द्रियजन्यज्ञानाविषयत्वादीश्वरस्य शरीरेन्द्रियादेरनङ्गीकारादन्यथा "न तस्य कार्यं कारणञ्च विद्यते" इति श्रुतिविरोधप्रसङ्गादस्मदादीन्द्रियस्य तत्रासामर्थ्यात्तस्मादिन्द्रियजन्यज्ञानविषयत्वमपरोक्षत्वं तद्भिन्नत्वं परोक्षत्वमिति यदुक्तं तन्मनोरथमात्रं। किं तर्ह्यपरोक्षत्वं विषयस्येति चेदुक्तमेव गृहाण स्वरूपेण संविदैक्यात्। तस्या नित्यापरोक्षत्वेऽप्यौपाधिकभेदाभ्युपगमेन कार्यत्वनादन्तःकरणोपहित-चैतन्यमनावृतं घटाद्यधिष्ठानचैतन्यमावृतमिति गम्यते। घटादिष्वनवभाससंशयविपर्यासदर्शनादन्तःकरणोपहिते तदभावात्। एवञ्च सर्वदा न सर्वप्रत्यक्षतापत्तिः। तत्तदाकारवृत्तिदशायां तु विषयावरणनिवृत्तिमयत्रादिविषयचैतन्यप्रमातृप्रमाणाभिन्नाभिकोपाध्यवच्छेदैनैक्यादन्तःकरणादिवद्घटादिकमपि साक्षिप्रत्यक्षमेवेति; घटादेरनावृतसंवि-

---

(१) ज, ज्ञानाकरणकर्मिति पाठः।

अनावृतसंवित्साक्षिचैतन्यम्। अन्तःकरणोपहित-
चैतन्यं साक्षी। तस्यावृतत्वे सति जगदान्ध्यप्रसङ्गः।

त्तादात्म्यात्प्रत्यक्षत्वं तत्तदाकारवृत्तिविरहदशायां तु तदभावान्न प्रत्यक्षत्वम्।

नन्वेवं सति परोक्षस्थलेऽपि तत्तदाकारवृत्तिदशायां तु वह्न्यादेरपि प्रत्यक्षत्वापत्तिः। न तत्रेन्द्रियसन्निकर्षाभावादिन्द्रियद्वारा बहिर्निर्गतान्तःकरणस्य विषयसम्बन्धेन तदाकारवृत्त्या तन्निष्ठावरणनिवृत्त्याविषयप्रत्यक्षत्वाभ्युपगमेन परोक्षस्थले सन्निकर्षाभावेन मनसो बहिरस्वतन्त्रतया बहिर्गमनाभावेन विषयासम्बन्धात् तत्तदाकारवृत्तिदशायां न वह्न्यादेःप्रत्यक्षत्वापत्तिः। कथं पुनर्वह्न्यादेर्भानमिति, शृणु; अन्तःकरणोपहितचैतन्यस्य वह्न्याद्यधिष्ठानचैतन्यस्य च वास्तवैक्याल्लिङ्गज्ञानादिना तत्तदाकारवृत्त्याऽसत्त्वापादकमौढ्याज्ञाननिवृत्त्या वह्निरस्तीति परोक्षतया वह्न्यादेर्भानं, नापरोक्षतया अत एव वह्निरस्तीत्यनुभवो न त्वयमिति। एतेन संविदःस्वभावैक्यादपरोक्षत्वेन तत्तादात्म्यमेव तत्प्रयोजकमस्तु अनावृतेति विशेषणं व्यर्थमिति प्रत्युक्तम्। औपाधिकभेदप्रतिपादनेन तदर्थवत्त्वस्योक्तत्वाज्जडाजडयोर्वास्तवावास्तवयोस्तादात्म्यासम्भवेऽप्यवास्तवस्य वास्तवेन तादृशतादात्म्ये बाधकाभावात्तस्याद्योग्यस्य विषयस्यानावृतसंवित्तादात्म्यमपरोक्षत्वमिति निरवद्यम् ॥२८॥

केयमनावृतसंविदित्याकाङ्क्षायामाह अनावृतेति। कोऽयं साक्षीत्याकाङ्क्षायामाह अन्तःकरणेति। "स च नित्यो न हि द्रष्टु-

तत्तादात्म्यं नाम तद्भिन्नत्वे सति तदभिन्नसत्ताकत्वम्। तथा च "दशमस्त्वमसी"त्यत्र दशमस्य त्वंपदार्थाभिन्नतया परोक्षत्वेन वाक्याद्दशमा परोक्षप्रमैव जायते। दशमोऽस्मीति न तु वाक्यात्परोक्षज्ञानं मनसा तत्सा-

---

दृष्टेर्विपरिलोपो विद्यते अविनाशित्वादि"ति श्रुतेः। प्रातरारभ्य प्रहरमिदमद्राक्षमिति परामर्शात्साक्षिसिद्धिरिति भावः। ननु साक्षिचैतन्यमप्यावृतमस्तु को दोषः इत्याशङ्क्याह तस्येति। ननु घटादीनां किमिदं संवित्तादात्म्यं तन्निष्ठासाधारणधर्मो वा स्वाभावात्मा तादात्मा तदात्मनो भावस्तादात्म्यमैक्यमित्यर्थो वा, भेदसहिष्णुरभेदस्तादात्म्यमित्यर्थो वा। नाद्य जडस्य तदयोगात्। न द्वितीयः जडाजडयोस्तमःप्रकाशवद्विरुद्धत्वेनैक्यस्य दूरनिरस्तत्वात्। न तृतीयः समानसत्ताकयोर्भेदाभेदयोर्विरुद्धत्वेन तदयोगादित्याशङ्क्य घटादेः कल्पितत्वेन साक्षिसत्तातिरिक्तसत्ताशून्यत्वमेव तत् तादात्म्यं विवक्षितमित्यभिप्रेत्याह तदिति। नन्वेवमर्थस्यानावृतसंवित्तादात्म्यमपरोक्षत्वं भवतु, तथापि तत्प्रतिपादकवाक्यस्य कथमपरोक्षप्रमोत्पादकत्वं "गामानये"त्यादिवाक्यानां परोक्षप्रमाजनकत्वस्यैव दृष्टत्वादित्याशङ्क्याह तथाचेति। गोकर्मकानयनस्यानावृतसंवित्तादात्म्याभावेन परोक्षत्वाद्वाक्यस्य परोक्षप्रमाजनकत्वेऽपि दशमस्त्वमसीत्यत्र दशमस्य त्वंपदार्थाभिन्नतया सदैवापरोक्षत्वाद्वाक्यस्यापरोक्षप्रमाजनकत्वमुपपद्यते इतरथा अपरोक्षे वस्तुनि परोक्षप्रमाजनकं वाक्यमप्रमाणं स्यादित्यर्थः।

साक्षात्कारो ; मनसोऽनिन्द्रियत्वस्योक्तत्वात् वृत्तिं प्रत्युपादानत्वेन करणत्वायोगाच्च[1] प्रमाणजन्याऽपरोक्षज्ञानस्यैव भ्रमनिवर्त्तकत्वाच्च ॥ ३० ॥

नन्वेवमपि वाक्यस्य परोक्षप्रमाजनकत्वस्वाभाव्याद्ब्रह्मत्वमसीति वाक्याज्जन्यं परोक्षमेव ज्ञानं[2] जायतेऽनन्तरं मनसा ब्रह्मत्वसाक्षात्कारः। आत्मतद्धर्म्मसाक्षात्कारस्य करणजन्यत्वस्यावश्यकत्वेन चक्षुरादीनां तत्रासामर्थ्यात्परिशेषादन्वयव्यतिरेकाभ्यां मन एव तत्र करणम्। अन्यथा सुखादिसाक्षात्कारस्याप्रमात्वापत्तेः। किञ्च परोक्षप्रमाजनकस्वभावस्य यद्यपरोक्षप्रमाजनकत्वं कल्प्यते तर्हि कुटजबीजादवटाङ्कुरोत्पत्तिरपि कल्प्यते। तस्मान्मनसैव ब्रह्मत्वसाक्षात्कारो न वाक्यादित्याशङ्कां निराकरोति मनसेति। सुखादिसाक्षात्कारकरणत्वेन मनस इन्द्रियत्वे सिद्धे वाक्यात्परोक्षज्ञाने मनसा साक्षात्कार इति वक्तुं शक्येत तत्पूर्वमेव निरस्तमित्याह मनस इति। "इन्द्रियेभ्यः परं मन" इति प्रथमकरणान्मनोऽनिन्द्रियमित्युक्तं प्रत्यक्षनिरूपणावसरे इति भावः। ननु सुखाद्युपलब्धिरिन्द्रियकरणिका जीवाश्रयापरोक्षप्रमात्वात् रूपोपलब्धिवदित्यनुमानेन "इन्द्रियाणि दशैकञ्च"इत्यादिस्मृत्या च मनस इन्द्रियत्वसिद्धेः कथमनिन्द्रियत्वोक्तिः पृथक्करणस्यान्यथाप्युपपत्तेरिति नैतत्सुखाद्युपलब्धेर्नित्यसाक्षिरूपतया

---

(१) ख, चेति पाठः।

(२) ख, ज्ञानम् इति पाठः।

सकरणिकत्वासिद्धेः। नच सुखादिसाचात्कारस्य नित्यसाचिस्वरूप[1]-तया दुःखज्ञानं नष्टं सुखज्ञानमुत्पन्नमित्यनुभवस्य विरोधः स्यादिति वाच्यम्। साक्षिणो नाशाभावेऽपि सुखादिविषयनाशात्तदुपपत्तेः। नहि सुखादिविषये सति तज्ज्ञानोत्पत्तिविनाशौ कश्चिदनुभवति, स्मृतिस्त्वन्यथापि भविष्यति। न चैवमप्यात्मसाचात्कारकरणत्वेनेन्द्रियत्वं मनस इति वाच्यम्। निरुपाधिकात्मनो वाङ्मनसयोरविषयतया साचात्कारत्वस्य तत्करणत्वायोगात्। अस्तु तर्हि सोपाधिकात्म-साचात्कारे तत्करणमित्याशङ्क्याह वृत्तिमिति। निमित्तकारणस्य कुठारादेः करणत्वदर्शनादुपादानस्य मृदादेस्तददर्शनात् वृत्त्युपा-दानस्य मनसः करणत्वमयुक्तं। "कामः सङ्कल्पो विचिकित्से"त्यादि-श्रुत्या वृत्त्युपादानत्वं मनसोऽवगम्यते इति। किञ्चालोकादिवत्प्रमाण-सहकारित्वेन मनसः पृथक्प्रमाणत्वमनुपपन्नमेवेति। अपि च पृथक्-विषयाभावादपि न तत्प्रमाणं भवति। न हि चक्षुरादेरिव मनसः पृथग्-विषयोऽस्त्यन्तःकरणतद्धर्माणां साचिभास्यत्वात्। तदुक्तम्,

> "प्रमाणसहकारित्वाद्विषयस्याप्यभावतः।
> न प्रमाणं मनोऽस्माकं प्रमादेराश्रयत्वतः" इति॥

किञ्चात्ममनसोः सन्निकर्षानिरूपणाच्च तत्साचात्कारकरणत्वं मनस इति भावः॥ ननु माभून्मनसः प्रमाणत्वं तेन ब्रह्म-साचात्कारो भवतु को दोष इत्याशङ्क्याह प्रमाणेति। अप-रोक्षभ्रमनिवर्त्तकत्वादित्यर्थः॥३०॥

(१) म, स्वरूपेण नित्यत्वेति पाठः।

एवं "तत्त्वमसी"त्यत्रापि तत्पदलक्ष्यस्य ब्रह्मणस्त्वंपदलक्ष्य साक्ष्यभिन्नतयाऽनावृतसंवित्तादात्म्यात् नित्यापरोक्षत्वेन शोधितत्वंपदार्थस्याधिकारिणो मनननिदिध्यासनसंस्कृतान्तःकरणसहकृतविचारित-तत्त्वमस्यादिवाक्यादहं ब्रह्मास्मी त्यपरोक्षप्रमा जायते । एवं

एवं दृष्टान्ते वाक्यस्यापरोक्षप्रमाजनकत्वमुपपाद्य दार्ष्टान्तिकेन तस्य तदुपपादयति एवमिति । तत्त्वमस्यादिवाक्यादपरोक्षप्रमा जायते इति सम्बन्धः । ननु श्रवणरहितस्यासम्भावनादिग्रस्तत्वात् कथं वाक्यादपरोक्षप्रमेत्याशङ्क्याह विचारितेति । तथापि कथं विषयप्रवणचित्तस्य चित्तैकाग्र्यशून्यस्य वाक्यात्सेत्यत आह मनन इति । श्रवणेन मानगतासम्भावनायां मननेन मेयगता सम्भावनायां निदिध्यासनेन विपरीतभावनायां निवृत्तायां निर्मलचित्तदर्पणसहकृतवाक्यात्सा जायत इत्यर्थः ।

नन्वेवमपि साधनचतुष्टयसम्पत्तिशून्यस्याविवेकिनो यथोक्तवाक्यात्कथं सा स्यादित्यत आह शोधितत्वंपदार्थस्येति । अधिकारिणः साधनचतुष्टयसम्पन्नस्येत्यर्थः । ननु ब्रह्मणोऽतीन्द्रियतया धर्मादिवत्परोक्षत्वेन कथं वाक्यादपरोक्षप्रमा स्यात्तत्राह नित्यापरोक्षत्वेनेति । "यत्साक्षादपरोक्षाद्ब्रह्मे"ति श्रुत्या ब्रह्मणो नित्यापरोक्षतया वाक्यात्तदपरोक्षप्रमा भवत्येवेत्यर्थः ।

ननु ब्रह्मणो जगत्कर्तृत्वेन तटस्थतया श्रुत्यापि कथं तदपरोक्षत्वमवगन्तुं शक्यमित्याशङ्क्य वाच्यार्थस्याऽतथात्वेऽपि लक्ष्याखण्डचैतन्यस्य

च सति "सर्वे वेदा यत्पदमामनन्ति" "तं त्वौपनिषदं पुरुषं पृच्छामी"ति "नावेदविन्मनुते तं बृहन्तमि"त्यादिश्रुतयः सामञ्जस्येनोपपद्यन्ते । "मनसैवानुद्रष्टव्यमि"त्यादिश्रुतिस्तु मनसो वाक्यसहकारित्वप्रतिपादनपरा । अन्यथा "यन्मनसा न मनुते" इत्यादिश्रुतिविरोधप्रसङ्गात् ॥ ३१ ॥

प्रत्यग्रूपतया ताटस्थ्याभावेन श्रुत्या तदपरोक्षत्वं प्रतिपादयितुं शक्यत एवेत्यभिप्रेत्याह तदिति । अनावृतसंवित्स्वरूपत्वादेवेत्यर्थः । एवं तत्त्वमस्यादिवाक्याद्ब्रह्मापरोक्षप्रमोत्पत्त्यभ्युपगमे "शास्त्रदृष्ट्या तूपदेशो वामदेववदि"ति सूत्रं "तन्त्वौपनिषद"मित्यादिश्रुतिवाक्यञ्च नाननुकूलम्भवतीत्याह एवञ्च सतीति । ननु वाक्यादपरोक्षप्रमोत्पत्त्यभ्युपगमे "मनसैवानुद्रष्टव्य"मित्यादिश्रुतिविरोधः स्यात्तत्र तृतीयाविभक्त्या मनसः करणत्वावगमात् । न च सा सहकारित्वप्रतिपादनपरेति वाच्यम् । तर्हि "तन्त्वौपनिषद"मित्यादिश्रुतिरपि वाक्यस्य मनःसहकारित्वप्रतिपादनपरा किं न स्यात् न्यायस्य तुल्यत्वात् । न च "यन्मनसा न मनुत" इत्यादि श्रुत्या मनसः करणत्वप्रतिषेधाद्वाक्यसहकारित्वं मतमिति वाच्यम् । तर्हि "यद्वाचानभ्युदितमि"त्यादिश्रुत्या वाक्यस्यापि तत्प्रतिषेधात् । न च मुख्यया वृत्त्या तत्प्रतिषेधेऽपि वाक्यस्य लक्षणया तदपरोक्षप्रमाकरणत्वमिति वाच्यम् । तद्वत्संस्कृतस्य मनसः करणत्वप्रतिषेधेऽपि शास्त्राचार्यसंस्कृतस्य तस्य तत्सम्भवात् ।

एवं शाब्दीप्रमा निरूपिता। अनुपपद्यमानार्थदर्शनात् तदुपपादकभूतार्थान्तरकल्पनमर्थापत्तिप्रमा। यथा दिवाऽभुञ्जानस्य देवदत्तस्य रात्रिभोजनं विना अनु-

---

अन्यथा श्रुतिविरोधापत्तेरित्याशङ्क्याह मनसैवेति। अयम्भावः सत्यमेतत् यदि मनसः करणत्वं सम्भवेत्तत्प्रागेव निरस्तं वाक्यस्य प्रमाकरणत्वं उभयवादिसिद्धं श्रुतिस्मृतितन्त्वान्तरसिद्धश्चैयांस्तु विशेषः त्वया वाक्यस्य परोक्षप्रमाकरणत्वमभ्युपगम्यतेऽस्माभिः श्रुतिस्मृतिन्यायविद्वदनुभवबलात्परोक्षापरोक्षभेदेन द्विविधप्रमाकरणत्वं वाक्यस्य प्रतिपाद्यते तच्च प्रमाणकुशलैः प्रतीतिशरणैर्यदुचितं तदभ्युपगन्तव्यम् ॥२१॥

प्रकृतमुपसंहरति एवमिति। क्रमप्राप्तामर्थापत्तिप्रमां लक्षयति अनुपपद्यमानेति। तत्रोदाहरणमाह यथेति। अत्र नैयायिकादयः रात्रिभोजनं व्यतिरेक्यनुमानेनैव ज्ञायते। तथाहि अयं देवदत्तो रात्रौ भुङ्क्ते दिवाऽभुञ्जानत्वे सति पीनत्वात्। यस्तु रात्रौ न भुङ्क्ते नासौ दिवाऽभुञ्जानत्वे सति पीनः। यथा दिवारात्रावभुञ्जानोऽपीन इत्येवं व्यतिरेक्यनुमाने नैव रात्रिभोजनस्य प्रतीयमानत्वात् कथमर्थापत्तेः पृथक्प्रमाणत्वं कल्पनीयं गौरवादिति वदन्ति। तान्निराकरोति तत्रेति। अयमाशयः व्यतिरेक्यनुमानस्य प्रागेव निरस्तत्वात् कथं तेन रात्रिभोजनानुमितिर्भवेत्; कथं तर्हि अन्वयव्याप्तिमजानानस्य व्यतिरेकिव्याप्तिज्ञानात् रात्रिभोजनप्रतीतिरित्युच्यते रात्रिभोजनेन विना पीनत्वानुपपत्त्या तत्प्रतीतिः। अन्यथाऽन्य-

पपद्यमानपीनत्वज्ञानात्तदुपपादकरात्रिभोजनकल्पनम्। तच्चानुपपद्यमानपीनत्वज्ञानं करणं रात्रिभोजनं कल्पनं फलम्। सा चार्थापत्तिर्द्विविधा दृष्टार्थापत्तिः श्रुतार्थाप-

---

व्याप्तिज्ञानादन्यानुमितावतिप्रसङ्गात्। नच प्रतियोग्यनुयोगिभावस्य नियामकस्य सत्त्वान्नातिप्रसङ्ग इति वाच्यम्। तस्य सर्वत्र सुलभत्वेन सर्वत्र सर्वानुमित्यापत्तेः। तथाहि केवलप्रतियोग्यनुयोगिभावस्याप्रयोजकत्वेन साध्याभावव्यापकीभूताभावप्रतियोगित्व नियामकं वाच्यम्। तच्च घटत्वादीना सम्भवतीति तेनाप्यनुमिति स्यात्। न चेष्टापत्तिरिति वाच्यम्। तर्हि भवन्मते सुवर्णघटस्यापि पृथिवीत्वापत्तेः। नच तदिष्ट अपसिद्धान्तापत्तेः। नच सुवर्णघटे घटत्वमेव नास्तीति वाच्यम्। तत्र घटोऽयमित्यनुभवस्य सार्वजनीनत्वात् मृद्घटे घटोऽयमित्यनुभवो घटत्वगोचरो नान्यत्रेति नियन्तुमशक्यत्वात्। कथ तर्हि व्याप्यत्वात्यनुमानमिति काच कथ वा पृथिवीत्वादिना वा द्रव्यत्वादिना वा तदनुमाने बाधकाभावादत एव न घटत्वादिकं जातिरिति वदन्ति साङ्ख्यात्। तस्माच्छ्रुतिरैक्यनुमानेन रात्रिभोजनप्रतीतिरिति शिष्यवञ्चनमात्रम्। तर्हि सिद्धान्ते वा कथमन्यानुपपत्त्याऽन्यकल्पनमतिप्रसङ्गस्य तुल्यत्वादिति चेन्नैवम्। रात्रिभोजनपीनत्वयोः कार्य्यकारणत्वमधायेन कार्य्यं कारण विनाऽनुपपन्न सत्तत्कल्पयति। किमिद तेन विना तस्यानुपपन्नत्वमिति तदभाव-व्यापकीभूताभावप्रतियोगित्वमिति निर्गलितम्। नच घटत्वादीनां तत्सम्भवति तेषां कार्य्यत्वाद्यसिद्धेः। अत एवात्मय-

त्तिश्चेति । दृष्टार्थापत्तिर्यथा शुक्ताविदं रजतमित्यनुभूयमानस्य रजतस्य नेदं रजतमिति बाध्यत्वं दृष्टं तस्य मिथ्यात्वमन्तरेण सत्यत्वेऽनुपपन्नम् सन्मिथ्यात्वं कल्प-

---

व्याप्तिं धूमवह्न्योरजानानस्य व्यतिरेकव्याप्तिज्ञानदशायां दृश्यमानधूमानुपपत्त्या वह्निप्रतीतिरिति न व्यतिरेक्यनुमानावकाशः। तस्मादर्थापत्तिः प्रमाणान्तरमेवेति शिष्यबुद्धिसौकार्य्याय। करणफले व्युत्पादयति अनुपद्यमानेति। अर्थापत्तिं विभजते सा चेति। दृष्टार्थापत्तिमुदाहरति दृष्टेति। सा यथा स्पष्टं तथोच्यत इत्यर्थः। ननु भ्रमस्थले इदं रजतमिति विशिष्टज्ञानमेव नास्ति प्रमाणाभावात्। तथा हि सर्वेधियां यथार्थत्वेन भ्रान्तिज्ञानस्यैवासिद्धेः। नच पुरोवर्त्तिनिप्रवृत्त्यनुपपत्त्या रजतत्वविशिष्टभ्रमानुभवसिद्धिरिति वाच्यम्, प्रवृत्तेरन्यथाप्युपपत्तेः। तथाहि इदमिति। ग्रहणात्मकं ज्ञानं रजतमिति स्मरणात्मकं प्रमुष्टतत्ताकमनयोर्ग्रहणयोरसंसर्गाग्रहणेन पुरोवर्त्तिरजतयोरसंसर्गाग्रहात् दोषदुष्टकरणस्य रजतार्थिनः पुरोवर्त्तिनि प्रवृत्तिरुपपद्यते। अन्यथा ज्ञानस्यायथार्थत्वेनाविश्वासप्रसङ्गात्। यथाङ्गज्ञानस्य व्यभिचारित्वे विश्वासः किं निबन्धन इति। तस्माद्रजतत्वविशिष्टभ्रमानुभवाभावादनुभूयमानरजतस्य दृष्टं बाधत्वं मिथ्यात्वं कल्पयतीत्यनुपपन्नमित्याशङ्क्य निराकरोति नचेति। *इदमत्राकूतं पुरोवर्त्तिनि रजतार्थिप्रवृत्तिर्विशिष्टानुभवसाध्यप्रवृत्ति*त्वात् संवादिप्रवृत्तिवदित्यनुमानमेव विशिष्टज्ञाने प्रमाणम्। नच सर्वधियां यथार्थत्वादिशिष्टभ्रान्त्यसम्भवेन बाध इति वाच्यम्। ज्ञान-

यति। न चेदं रजतमिति ज्ञानद्वयम्, पुरोवर्त्तिनि प्रवृत्त्यभावप्रसङ्गात् रजतस्यासत्त्वे तज्ज्ञानस्य प्रत्यक्षत्वाभावप्रसङ्गात् ॥ ३२ ॥

मात्रस्य स्वरूपेण यथार्थत्वेऽपि विषयबाधाबाधाभ्यां यथार्थत्वायथार्थत्वे बाधकाभावाद् अन्यथा नेदं रजतमिति बाधः कथं स्यात् अप्रसक्तप्रतिषेधायोगात्। नच व्यवहार एव बाध्यते न ज्ञानं विषयो वेति वाच्यम्। विषयनिषेधस्यानुभवसिद्धत्वात्। अन्यथा नेदं रजतव्यवहार[1] इत्येवोल्लेखः स्यात्। नचाप्रयोजकत्वं भेदाग्रहात् प्रवृत्तेरुपपत्तेरिति वाच्यम्। तर्हि सर्वदा प्रवृत्तिप्रसङ्गात्। न चोपस्थितेऽष्टभेदाग्रहात्सेति वाच्यम्। तर्ह्यभावप्रतियोगीदं रजतमिति ज्ञानान्तरमपि प्रवृत्तिप्रसङ्गात्। नच स्वतन्त्रोपस्थितेऽष्टभेदाग्रहात्प्रवृत्तिरिति वाच्यम्। तर्हि लाघवादिष्टोपस्थितेरेव प्रवर्त्तकत्वोपपत्तेः। नच तर्हि रजतस्मरणमेव तदस्तीति वाच्यम्, स्मर्यमाणस्य देशान्तरस्थत्वेन पुरोवर्त्तिनि प्रवृत्तिर्निप्रवृत्त्यभावप्रसङ्गात् इदमिति ज्ञानस्य प्रवर्त्तकत्वेऽतिप्रसङ्गात्। तस्माद्दोषवशेन स्मर्यमाणं रजतं पुरोवर्त्तिनि शुक्त्यादावारोप्य तत्प्रकारकपुरोवर्त्तिविशेष्यकज्ञानं प्रवर्त्तकमभ्युपगन्तव्यम्। अन्यथा सत्यरजतस्थलेऽप्यसंसर्गाग्रहात्प्रवृत्त्युपपत्तौ विशिष्टज्ञानं प्रवर्त्तकं न सिध्येत्। तस्मादकामेनापि रजतत्वविशिष्टभ्रमानुभवोऽवश्यमभ्युपगन्तव्यः। स च निर्विषयो न सम्भवतीति सविषयो वाच्यः। एवञ्च तस्य बाध्य-

---

(१) स, नेदं रजतमिति बाधके व्यवहार इति पाठः।

सत्त्वे बाधाभावप्रसङ्गात् देशान्तरसत्त्वे रजतेन्द्रियसन्निकर्षाभावेन प्रत्यक्षत्वाभावप्रसङ्गात् रजतं साक्षा-

---

त्वानुपपत्त्या मिथ्यात्वमिति। ननु भ्रमविषयरजतमसदेवास्तु नच तत्र प्रमाणाभावः। असदेव रजतमभादित्यनुभवस्य सत्त्वादित्याशङ्क्याह रजतस्येति। न हि शशशृङ्गं साक्षात्करोमीति कश्चिदनुभवति। अतो रजतस्यासत्त्वे तज्ज्ञानस्य प्रत्यक्षत्वमनुपपन्नमेव। किञ्चासन्नाम किञ्चिदस्ति न वा। नाद्यः व्याघातात्। न द्वितीयः कुतस्तज्ज्ञानं तस्माद्रजतस्यासत्त्वमनुपपन्नमिति भावः॥२२॥

भवतु तर्हि भ्रमविषयस्य रजतस्याधिष्ठाने सत्त्वं सदिदं रजतमिति प्रत्यक्षसत्त्वादित्याशङ्क्याह सत्त्व इति। अयमभिसन्धिः यद्यधिष्ठाने रजतं सत्स्याच्चेदं रजतमिति बाधो न स्यात्। नहि सतो बाधोऽस्ति तस्य बाधायोग्यत्वादतो न सद्रजतम्। नच सदिदं रजतमिति प्रत्यक्षं कथमिति वाच्यम्। आरोपितस्य स्वतः सत्ताभावेन प्रत्यक्षस्याधिष्ठानसत्ताविषयत्वादिति। अस्तु तर्हि भ्रमविषयस्य देशान्तरसत्त्वं पुरोवर्त्तीन्द्रियसन्निकर्षानन्तरं दोषवशेन देशान्तरीयरजतात्मना पुरोवर्त्ति शुक्त्यादि गृह्यते। इदं रजतमितीयमेवान्यथाख्यातिरिति वदन्ति। ततश्च भ्रान्त्या प्रसक्तस्य बाधोऽप्युपपद्यते। नच रजतेन्द्रियसन्निकर्षाभावेन रजतज्ञानस्य प्रत्यक्षत्वं न स्याद्, विशिष्टप्रत्यक्षे विशेषणसन्निकर्षस्य कारणत्वात्। नच तत्र ज्ञानमेव सन्निकर्षोऽतिप्रसङ्गादिति वाच्यम्। विशेषणज्ञानविशेष्येन्द्रियसन्निकर्षविशेषणविशेष्ययोरसंसर्गाग्रहादीनां विशिष्टप्रत्यक्षसाम-

त्करोमीत्यनुभवस्य सर्वानुभवसिद्धत्वात् तस्माद्भ्रमकाले शुक्तिकाशकले रजतमुत्पद्यते इत्यङ्गीकर्त्तव्यम् ।

षीत्वेन तत्सत्त्वेन रजतप्रत्यक्षसम्भवाद्रजतेन्द्रियसन्निकर्षस्याप्रयोजकत्वादन्यथा सोऽयं देवदत्त इति प्रत्यभिज्ञानं प्रत्यक्षं न स्यात् तत्ताया अतीतत्वेन विशेषणसन्निकर्षाभावात् । न चेष्टापत्तिः अनुभवविरोधात् । अत एव ज्ञानस्य सन्निकर्षत्वमभ्युपगन्तव्यम् । नच तत्तांशे प्रत्यभिज्ञानस्य स्मृतित्वान्न सन्निकर्षापेक्षेति वाच्यम् जातिसाङ्कर्य्यप्रसङ्गात् । तस्माद्विशेषणज्ञानादिविशिष्टप्रत्यक्षसामग्र्या रजतविशिष्टप्रत्यक्षसम्भवेन देशान्तरीयरजतत्वप्रकारकपुरोवर्त्तिविशेष्यकमिदं रजतमिति ज्ञानमन्यथा ख्यातिरेव । अतो न भ्रमविषयस्य मिथ्यात्वमित्याशङ्क्याह देशान्तरेति । भ्रमविषयरजतस्य देशान्तरसत्त्वे तत्सन्निकर्षाभावेन तज्ज्ञानस्य प्रत्यक्षत्वं न स्यादित्यक्षरार्थः । नच विशेषणज्ञानविशेष्येन्द्रियसन्निकर्षादिविशिष्टप्रत्यक्षसामग्र्या तत्प्रत्यक्षत्वं[1] स्यात्तस्याः प्रत्यक्षमात्रे कारणत्वानवधारणात् । नच सोऽयं देवदत्त इति[2] प्रत्यक्षं न स्याद्विशेषणसन्निकर्षाभावादिति वाच्यम् तत्तांशेऽप्रत्यक्षत्वस्येष्टत्वात्तत्तांशे ज्ञानस्य स्मृतित्वात् । नच जातिसाङ्कर्य्यप्रसङ्ग इति वाच्यम् तस्यादोषत्वात् अविद्यातिरिक्तजडजातेर्निरस्तत्वाच्च । एवं तर्हि ज्ञानमेव तत्सन्निकर्षोऽस्त्विति चेन्न

---

(१) क, तत्प्रत्यक्षं न स्यात् विशिष्टप्रत्यक्षमात्रे विशेषणसन्निकर्षस्य कारणत्वावधारणादिति पाठः ।

(२) क, प्रत्यभिज्ञानमित्यपि क्वचित् ।

रजतोत्पादकलौकिकसामग्र्यभावेऽपि पुरोवर्त्तीन्द्रियस-

अतिप्रसङ्गात्। तथाहि अनुमा[१]नादिस्थलेऽपि विशेष्येन्द्रियसन्निकर्ष-विशेषणज्ञानादिविशिष्टप्रत्यक्षसामग्रीसत्त्वेन पर्वते वह्निप्रत्यक्षमेव स्यात्। किञ्च यदवच्छेदेन[२] रजतस्य पूर्वमनुभूतं तदवच्छेदेन तज्ज्ञानं प्रत्यासत्तिरिति वाच्यम्। शुक्तित्वावच्छेदेन रजतस्य पूर्वमननुभूतत्वेन कथं तज्ज्ञानं प्रत्यासत्तिः। नच दोष एव प्रत्यासत्तिरस्त्विति वाच्यम्। स्वतन्त्रान्वयव्यतिरेकाभ्यां भ्रमकारणत्वेन क्लृप्तस्य तत्त्वे मानाभावात्। किञ्च विशेष्येन्द्रियसन्निकर्षत्वेन कारणत्वे गौरवात् विषयेन्द्रियसन्निकर्षत्वेन तद्वाच्यम्। तथापि यत्किञ्चिद्विषयेन्द्रियसन्निकर्षत्वेन कारणत्वेऽतिप्रसङ्गात् यावद्विषयेन्द्रियसन्निकर्षत्वेन प्रत्यक्षकारणत्वमवश्यं वक्तव्यम्। तथा च विशेषणसन्निकर्षोऽपि कारणं भवत्येव। अन्यथोष्णीषा छादिते कुण्डलिनि कुण्डलविशिष्टप्रत्यक्षत्वप्रसङ्गः। न चेष्टापत्तिः अननुभवात्। ततश्च भ्रमविषयस्य देशान्तरसत्त्वे तदिन्द्रियसन्निकर्षाभावेन तज्ज्ञानस्य प्रत्यक्षत्वं न सम्भवत्येव। न चेष्टापत्तिरित्याह रजतमिति।

नन्वेवं सति पुरोवर्त्तिनीदं रजतमिति विशिष्टप्रत्यक्षस्य का गतिस्तत्र विषयाभावादित्याशङ्क्याह तस्मादिति। यस्मात्कारणाद्रजतस्यासत्त्वं भ्रमाधिष्ठाने सत्त्वं देशान्तरसत्त्वञ्च नोपपद्यते उक्त-

---

(१) ग, अनुमित्यादिस्थल इति पाठः।

(२) ग, यदवच्छेदेन यदनुभूतं तदवच्छेदेन तद्ज्ञानमिति पाठः।

न्निकर्षानन्तरमिदमाद्याकारवृत्तौ सत्यामिदमवच्छिन्न

दोषवशात् तस्मादित्यर्थः। किञ्च भ्रमविषयस्य देशान्तरसत्त्वे रजतार्थिनस्तत्रैव प्रवृत्तिः स्याद् ज्ञानस्य स्वविषये प्रवर्त्तकत्वनियमात्। नच रजतज्ञानं शुक्तिमपि विषयीकरोतीति, पुरोवर्त्तिनि रजतार्थी[१] प्रवृत्तिरुपपद्यत इति वाच्यम् अन्याकारज्ञानस्यान्यविषयत्वे संविद्विरोधात्।

ननु ज्ञानं यच्चेष्टतावच्छेदकवैशिष्ट्यं विषयीकरोति तत्रैव पुरुषं प्रवर्त्तयतीति नियमाद्भ्रान्तिज्ञानमपि शुक्तौ रजतत्ववैशिष्ट्यं विषयीकुर्वन् रजतार्थिनं तत्र प्रवर्त्तयतीत्यदोष इति चेन्न, रजतत्वस्य स्वतन्त्रोपस्थित्यभावेन शुक्तौ तदारोपानुपपत्तेः। नहि पूर्वं रजतत्वं विशेष्यत्वेनानुभूतं येन तस्य स्वतन्त्रोपस्थितिः स्यात् किन्तु रजतविशेषणत्वेन तथाच तस्य स्वातन्त्र्येणानुपस्थिततया तत्संसर्गारोपोऽनुपपन्न एव। नच रजतोपस्थितिसामग्र्यां सत्यां रजतत्वस्य स्वातन्त्र्येणोपस्थितिरुपपद्यते रजतत्वस्य जातित्वेन तत्परतन्त्रत्वात्। अन्यथा संसर्गाभावधीसमये प्रतियोग्यारोपवत् प्रतियोगितावच्छेदकस्या[२]रोप्यसम्भवेनान्योन्याभावधीरेव स्यान्न संसर्गाभावधीः। तस्माच्छुक्तौ रजतत्वसंसर्गारोपोऽसम्भवत्येव रजततादात्म्यारोपे तु आरोप्यस्य देशान्तरे सत्त्वेन तत्रैव प्रवृत्तिः स्यात्। तस्मादपि भ्रान्तिकाले रजतं शुक्तावुत्पद्यत एवेत्यभ्युपगन्तव्यम्। किञ्चैवमन्यथा

(१) ख, रजतार्थिं इति पाठः। (२) ख, च्छेदकस्याध्यारोप इति पाठः।

चैतन्यनिष्ठाशुक्तित्वप्रकारकाविद्यासादृश्यदर्शनसमुद्बुद्ध-
संस्कारसहकृतारजताकारेण तज्ज्ञानाकारेण च परि-

ख्यातिपक्षे त्वारोप्यस्य देशान्तरसत्त्वेन[१] बाधोऽपि न स्यात् ज्ञानस्य स्वरूपेण बाधायोगेन विषयबाधात्तस्य वक्तव्यतया विषयस्यान्यत्र विद्यमानत्वेन तद्बाधानुपपत्तेः। नच तद्वैशिष्ट्यमेव बाध्यत इति वाच्यम्। तस्यासद्रूपतया ख्याति-बाधयोरसम्भवात्। तस्मादपि भ्रमविषयं रजतं तत्काले जायते तत्रैवेति स्वीकर्त्तव्यम्।

नन्वेवं रजतोत्पादकसामग्र्या रजतावयवादेरसम्भवात् कथं भ्रमकाले शुक्त्यादौ रजताद्युत्पत्तिः। न चादृष्टमेव तदुत्पादकमिति वाच्यम्, दृष्टसामग्रीमन्तरेण तस्य तदयोगात् अन्यथातिप्रसङ्गात्। इत्यत आह रजतोत्पादकेति। अयमभावः, नहि रजतोत्पादक लौकिकसामग्री भ्रमविषय रजतोत्पादिका किन्तु तदिलक्षणैव। तथाहि अधिष्ठानेनेन्द्रिय-सन्निकर्षानन्तरमिदमाकारवृत्तौ चाकचिक्याकारवृत्तौ च सत्यामन्तःकरणस्य बहिर्निर्गतस्य[२] सादृश्यसन्दर्शनसमुद्बुद्धसंस्कारदोषसहकारिसम्पन्नमिदमवच्छिन्नचैतन्यनिष्ठा[३] शुक्तित्वप्रकारकमज्ञानं रजताकारेण तज्ज्ञानाकारेण च परिणमते।

नन्वज्ञानं रजताकारेण परिणमते इत्यस्तु तज्ज्ञानाकारेण परिणमते इत्यनुपपन्नं प्रयोजनाभावात्। नच तस्य तद्व्यवहार एव

---

(१) ग, देशान्तरस्थत्वेनेति पाठः। (२) ग, बहिर्गतस्येति पाठः।
(३) ग, निष्ठं इति पाठ।

णमते। तस्य च मायाकार्यत्वान्मिथ्यात्वम्। एवं दृष्टार्थापत्तिर्निरूपिता ॥ ३३ ॥

प्रयोजनमिति वाच्यम्। तस्य साक्षिण्यध्यस्तत्वेन सुखादिवत्तेनैव रजतव्यवहारोपपत्तेः। नच रजतस्यापरोक्षत्वसिद्ध्यर्थमविद्यावृत्त्यभ्युपगम्यत इति वाच्यम्। अनावृतसंवित्तादात्म्यात्सुखादिवदविद्यावृत्तिं विनापि तदुपपत्तेः। न चानिर्वचनीय-रजतानुभवस्य साक्षिणो नित्यतया संस्कारजनकत्वासम्भवेन रजताकारा विद्यावृत्त्यभ्युपगमे तदुपहितत्वेन रूपेण साक्षिणो नाश-सम्भवेन संस्कारोत्पत्त्या रजतस्मृतिर्भवतीति वृत्त्यभ्युपगम इति वाच्यम्। इदमाकारवृत्त्युपहितत्वेन रूपेण साक्षिणो नाशसम्भवेन संस्कारोत्पत्त्या स्मृत्युपपत्तेः। अथवा रजतनाशाद्वा तदुपहितनाशसम्भवेन सुखादिनाशात्तदुपहितनाशवत्संस्कारोऽस्तु। तस्माद्रजताकाराविद्यावृत्त्यभ्युपगमो निष्प्रयोजन इति। अत्रोच्यते। संस्कारार्थमेवाविद्यावृत्तिरभ्युपगम्यते। न चेदमाकारवृत्त्युपहितसाक्षिनाशेन रजतस्मृतिजनकसंस्कारोऽस्तु इति वाच्यम्। अन्यानुभवसंस्कारेणान्यस्मारणायोगात् तथात्वेऽतिप्रसङ्गात्। नच विषयनाशात्तदुपहितनाशेन रजतस्मृतिजनकसंस्कारोऽस्त्विति वाच्यम् लोके तथा-दृष्टत्वात्। नच सुखादौ दृष्टमिति वाच्यम् तत्रापि तदाकारवृत्तेरभ्युपगमात्। अस्तु वान्तःकरणतद्धर्माणां वृत्तिं विना साक्षिभास्यत्वं तदुपहितनाशात् तत् स्मृतिजनकसंस्कारोऽपि अविद्याकार्याणां घटादीनां तदाकारवृत्तिनाशेन तत्संस्कारोत्पत्तेर्दृष्टत्वात् प्रातिभासिकरजतस्याप्यविद्याकार्यतया तदाकारवृत्तिनाशात्तत्सं-

श्रुतार्थापत्तिर्यथा "तरति शोकमात्मविदि"ति शोकोपलक्षितप्रमातृत्वादिबन्धस्य ज्ञाननिवर्त्यत्वं श्रुतम्।

स्कारो वाच्यः। न हि क्वचिद्गत्या विषयनाशात्तदुपहितनाशेन तत्संस्कारो दृष्ट इति सर्वत्र तथैव भवितव्यमिति नियमोऽस्ति। अन्यथा स्वप्नपदार्थाकारवृत्त्यभ्युपगमोऽपि न स्यात् तत्रापि साक्षिणां भानसम्भवात्। जाग्रत्स्वप्नयोरहमाकारान्तःकरणवृत्त्यभ्युपगमोऽपि न स्यात्। न चेष्टापत्तिः श्रुतिविरोध आचार्यग्रन्थविरोधश्च प्रसज्येत्। तस्मात् संस्कारार्थं प्रातिभासिकरजताकारा विद्यावृत्त्यभ्युपगम[१] इति वदन्ति। अन्ये तु कादाचित्क व्यवहारस्य कादाचित्कस्वगोचरज्ञानसाध्यत्वात् प्रातिभासिकरजतव्यवहारस्य कादाचित्कत्वात् तदाकाराऽविद्यावृत्त्यभ्युपेयते। अन्यथा घटादिष्वपि तदाकारान्तःकरणवृत्तिरपि न सिध्येत्। "तद्व्यवहारस्य साक्षिणैव सिद्धे"रित्याहुः।

नन्वेवं सति नृसिंहाश्रमैरविद्यावृत्तिः किमर्थं खण्डितेति चेत् प्रौढवादेनेति द्रष्टव्यम्। ननु भ्रमकालेऽपि[२] शुक्तौ रजतोत्पत्तिरस्तु, तथापि तस्य कथं मिथ्यात्वमित्याशङ्क्याह तस्य चेति। शुक्तिरजतादेर्मिथ्यात्वे यथोक्तार्थापत्तिरेव प्रमाणमित्यभिप्रेत्य दृष्टार्थापत्तिनिरूपणमुपसंहरति एवमिति। द्वितीयार्थापत्तिमुपपाद्-

---

(१) ग, वेदान्तिन इत्यधिक पाठः। ग श्रुपगमस्त्वा केचित् प्रातिभासिकरजतस्याऽपरोक्षतया तदाकाराविद्यावृत्त्यभ्युपगम इति वदन्ति इति पाठः।

(२) ग, अपीति पाठो न दृश्यते।

तस्य मिथ्यात्वमन्तरेण सत्यत्वेऽनुपपन्नं सन्मिथ्यात्वं कल्पयति। सेयं श्रुतार्थापत्तिः। अन्तःकरणविशिष्टं

यति श्रुतेति। ननु "तरति शोकमात्मविद्"-इत्यत्र शोकस्यैव ज्ञाननिवर्त्त्यत्वश्रवणात् कथमन्यथानुपपत्त्या बन्धस्य मिथ्यात्वसिद्धिरित्याशङ्क्य "छत्त्रिणो गच्छन्ती"त्यत्र छत्त्रिपदेन लक्षणया यथा छत्र्यछत्रिसमुदाय उपलक्ष्यते तथा शोकपदेन बन्ध उपलक्ष्यत इत्याह शोकोपलक्षितेति तस्येति बन्धस्येत्यर्थः। नच सत्यस्य दुरितविषादेः सेतुदर्शनतार्क्ष्यध्यानादिना निवृत्तिदर्शनाद्बन्धस्य सत्त्वे ज्ञाननिवर्त्त्यत्वानुपपत्तिः कथमिति वाच्यम्, दृष्टान्तदार्ष्टान्तिकयोर्वैधर्म्यात्। तथाहि न तावत्केवल-सेतुदर्शनेन ब्रह्महत्यादिपापनिवृत्तिः किन्तु नियमसहकृतेन। अन्यथा तत्रत्यम्लेच्छादीनामपि पापनिवृत्त्यापत्तेः। नच तदिष्टम्, नियमविधायि-धर्मशास्त्रस्याप्रामाण्यप्रसङ्गात्। ततश्च तस्य क्रियामिश्रतया तदात्मकत्वेन ततः सत्यस्य निवृत्तिरुपपद्यते। तथा तार्क्ष्यध्यानस्यापि मानसक्रियात्वेन ततो विषस्य सत्यस्य निवृत्तिः सम्भवति। प्रकृते साधनान्तरं निरपेक्ष्यात्मज्ञाननिवर्त्त्यत्वं श्रूयते। बन्धस्य सत्यत्वेन तदनुपपन्नमिति बन्धस्य मिथ्यात्वक्लृप्तिरिति महद्वैषम्यमिति नार्थापत्तेरन्यथोपपत्तिरिति भावः।

ननु प्रमातृत्वादिबन्धस्य ज्ञाननिवर्त्त्यत्वादुक्तं मिथ्यात्वम्। तत्र कोऽसौ प्रमाता आदिशब्देन वा किं विवक्षितम्? न तावदात्मा प्रमाता तस्यासङ्गत्वाद्यान्तःकरणं तस्य जडत्वेन तद्योगात्, प्रमातृ-

चैतन्यं प्रमाता कर्त्ता भोक्ता केवलस्यात्मनोऽसङ्गत्वेन प्रमातृत्वाद्यनुपपत्तेः मुक्तिरजतवदात्माऽज्ञानादन्तःकर-

त्वादेश्चेतनधर्मत्वाच्चेत्यामङ्क्याहान्तःकरणेति । न चात्मान्तःकरणयोः प्रत्येकं प्रमातृत्वाभावे कथं विशिष्टे तत्स्यादिति वाच्यम्, विशिष्टस्य पारमार्थिकप्रमातृत्वस्यासम्भवेऽपि तस्मिंस्तदारोपसम्भवात् । न चारोपस्य प्रमितिपूर्वकत्वात्कथं स इति वाच्यम्, अप्रयोजकत्वात्ताघवात्पूर्वानुभवस्यैव भ्रमनिमित्ततया तस्य पूर्वभ्रमलक्षणस्य सुलभत्वेन विशिष्टे प्रमातृत्वारोपोयुक्तः । आदिशब्दार्थमाह कर्त्तेति कृतिमानित्यर्थः । कृतिः प्रयत्नः स चोत्साहः । भोगाश्रयो भोक्ता । भोगः सुखदुःखानुभवः स च धर्माधर्महेतुकः इदं प्रमातृत्वादित्रयं विशिष्टस्यैव नात्मनः केवलस्य(१) न चान्तःकरणस्येति नोक्तदोष इति भावः ।

नैयायिकादयः केवलस्यात्मनः प्रमातृत्वादिकं वदन्ति तन्निरस्यति केवलस्येति । "साक्षी चेता केवलो निर्गुणश्च" "असङ्गो ह्ययं पुरुषः" । "अप्राणोह्यमनाः शुभ्रः" "अनन्तश्चात्मा विश्वरूपो ह्यकर्त्ता" "एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः" ॥

"अव्यक्तोऽयमचिन्त्योऽयमविकार्य्योऽयमुच्यते" ।
"शरीरस्थोऽपि कौन्तेय! न करोति न लिप्यते" ॥
"यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते ।
सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते" ॥

(१) ग, केवलस्य चान्तःकरणस्येति पाठः ।

णादिकं स्वरूपेण प्रत्यगात्मन्यध्यस्तम्। अध्यासो नाम

इति श्रुतिस्मृतिवाक्यशतैः केवलस्य निरुपाधिकस्यात्मनोऽसङ्ग[१]-त्वादिप्रतिपादनेन तस्य प्रमातृत्वादिकं नोपपद्यते। अतो विशिष्टस्यैव तत्, अन्यथोदाहृतशास्त्राप्रामाण्यप्रसङ्गात्। नैयायिकादीनामनिर्मोक्षप्रसङ्गश्च सत्यस्य ज्ञानेन निवृत्त्ययोगात्, शास्त्रस्य ज्ञापकत्वेन कारकत्वायोगाच्च। तस्मान्नैयायिकादिमतमनुपपन्नमिति भावः॥

नन्वन्तःकरणविशिष्टस्य प्रमातृत्वादिकमुक्तं तदयुक्तम्, आत्मनोऽसङ्गत्वेन निरवयवतया सावयवक्रियाश्रयान्तःकरणेन वैशिष्ट्यानुपपत्तेः। तथाहि न तावदात्मनोऽन्तःकरणेन संयोगः सम्भवति प्रागेव निरस्तत्वान्नापि तादात्म्यं तस्य भेदाभेदरूपत्वेन जडाजडयोरप्ययोगात्।

ध्यासस्येति । तत्रातस्मिंस्तद्बुद्धिर्ज्ञानाध्यासः । यथा शुक्तौ रजतबुद्धिर्यथा वात्मन्यनात्मबुद्धिः ॥ ३४ ॥

संस्कारजन्यत्वमध्यस्तत्वं भावनाख्यसंस्कारस्य स्मृतिजनकत्वेनार्थं प्रति तत्त्वे मानाभावात् प्रत्यभिज्ञायामतिव्याप्तेश्च। अत एव दोषसम्प्रयोगसंस्कारजन्यत्वं तदित्यपास्तम् । नापि भ्रमविषयत्वं तद्भ्रमस्यानिरूपणात् । तथाहि न तावत्संस्कारजन्यज्ञानत्वं भ्रमत्वं स्मृतावतिव्याप्तेः । नच तन्मात्रजन्यत्वं तदिति वाच्यम्, तद्भ्रमेऽतिव्याप्तेः । नापि व्यधिकरणप्रकारकज्ञानत्वं तद्घटेरूपमित्यादिप्रमायामतिव्याप्तेः । नाप्यसद्विषयज्ञानत्वं तदतीतादिज्ञानेऽतिव्याप्तिः । अतीतत्वं नाम वर्त्तमानध्वंसप्रतियोगित्वम् । अनागतत्वं नाम वर्त्तमानप्रागभावप्रतियोगित्वम् । तदुभयस्याप्यसद्रूपतया तज्ज्ञानेऽतिव्याप्तिर्वज्रलेपायिता । अत एव विशेष्यावृत्तिप्रकारकत्वं तद्भाववति तत्प्रकारकत्वं वा तदित्यपास्तं(१)। तस्मात्र भ्रमविषयत्वमध्यस्तत्वमित्याशङ्क्याह अध्यासोनामेति। न चार्थाध्यासेऽव्याप्तिरिति वाच्यम्। अवभास्यत इति कर्मव्युत्पत्त्या(२) तत्रापि तत् सम्भवात् । ततश्च स्वाधिकरणताऽयोग्याधिकरणेऽवभास्यमानत्वमर्थस्य तादृशाधिकरणेऽवभासत्वं ज्ञानस्येति ज्ञानार्थाध्यासयोर्लक्षणसमन्वय । अतो न लक्षणाव्याप्ति(३) पूर्वेति भाव । अध्यास विभजते स चेति। द्वैविध्यमेवाह ज्ञानेति । ज्ञानाध्यास प्रपञ्चयति तत्रेति ॥३४॥

---

(१) क स्तम् इति पाठः । (२) क व्युत्पत्त्या इति पाठः ।

(३) क इतिमर्थाप्तिरिति पाठाऽधिकः ।

प्रमाणजन्यज्ञानविषयः पूर्वदृष्टसजातीयोऽर्थाध्यासः ॥ ३५ ॥

अर्थाध्यासं लक्षयति प्रमाणेति । प्रमाणेन प्रत्यक्षाद्यन्यतमेनाजन्यं यज्ज्ञानं तस्य विषयः पूर्वदृष्टेन पूर्वानुभूतरजतेन सजातीयः रजतत्वेनैकजातीयः पूर्वदृष्टत्वानधिकरणत्वमित्येतत् । अयं निष्कर्षः प्रमाणाजन्यज्ञानविषयत्वे सति पूर्वदृष्टत्वानधिकरणत्वमर्थस्याध्यस्तत्वमिति पूर्वदलाभावेऽभिनवोत्पन्न-घटेऽतिव्याप्तिः । उत्तरदलाभावे स्मर्यमाणशिवविष्णुगङ्गादिषु अतिव्याप्तिरतोविशेषणद्वयम्[१]र्थस्य ।

नन्वत्र तत्त्वावेदकं प्रमाणं विवक्षितमुत व्यवहारिकं वा । आद्येऽपीदं लक्षणं प्रातीतिकव्यावहारिकयोरर्थाध्यासयोरसाधारणं साधारणं वा । नाद्यः प्रातीतिकलक्षणत्वे व्यावहारिकाध्यासेऽतिव्याप्तिः स्यात्, व्यावहारिकलक्षणत्वे इतरत्रातिव्याप्तिः स्यादुभयोः प्रमाणजन्यज्ञानविषयत्वात् । न द्वितीयः धर्माधर्मयोरव्याप्तिस्तयोस्तत्त्वावेदकश्रुतिजन्यज्ञानविषयत्वात् । नच तदिष्टं ब्रह्मव्यतिरिक्तसर्वस्याध्यस्तत्वेन तयोरपि लक्ष्यत्वात् । नापि तृतीयः उत्तरत्र विभागानुपपत्तेः ।

किञ्च प्रमाणाजन्यज्ञानं साक्षिचैतन्यं विवक्षितं किं वा वृत्तिज्ञानम्. नाद्यः जीवेऽव्याप्त्यापत्तेः । न द्वितीयः चैतन्येऽतिव्याप्तेः जडस्य वृत्त्यविषयतया सम्भवापत्तेः । तस्मादिदं लक्षणमनुपपन्नमिति, मैवम् । तत्त्वावेदकमेवात्र प्रमाणं विवक्षितम् । तच्च तत्त्वमस्यादिवाक्यं तदजन्यज्ञानं वृत्त्यभिव्यक्तचैतन्यं तद्विषयत्वं घटादौ

---

(१) अ, अर्थवदिति पाठः ।

प्रातिभासिकरजतादौ च वर्त्तत इति नाव्याप्तिः। न चासम्भवः व्यावहारिकप्रातिभासिकसाधारणलक्षणत्वात्। न चातिव्याप्तिः। नच धर्म्माधर्म्मयोस्तत्त्वावेदकश्रुतिजन्यज्ञानविषयतयाव्याप्तिरिति वाच्यम्, ऐकात्म्यबोधकतत्त्वमस्यादिवाक्यव्यतिरिक्तस्य पारमार्थिकतत्त्वावेदकत्वानुपपत्तेः। अतो धर्म्माधर्म्मयोर्नाव्याप्तिरिति लक्षणं सङ्गतमेवेति।

अन्ये तु प्रमाणाजन्यज्ञानविषयत्वे सति पूर्वदृष्टत्वानधिकरणत्वं प्रातीतिकाध्यासस्य लक्षणम्। अत्र प्रमाणमज्ञातार्थबोधकं विवक्षितम्। न चैवं सति घटादेरज्ञातत्वाभावात्तत्रातिव्याप्तिरिति वाच्यम्। प्रमाणाजन्यज्ञानविषयत्वमित्यनेनाज्ञातगोचरवृत्त्यनुपहितवृत्त्युपहितविशेषचैतन्यविषयत्वं विवक्षितं घटादेरतथात्वान्नातिव्याप्तिः। शुक्तिरजतादेस्तथात्वमस्त्येव। भ्रमकाले शुक्तित्वप्रकारकवृत्तेरभावात्। अज्ञातगोचरवृत्त्यनुपहितमिदमाकारवृत्त्युपहितयद्विशेषचैतन्यं तद्विषयत्वं शुक्तिरजतादौ वर्त्तते। न चाज्ञानान्तःकरणादीनां प्रातिभासिकत्वात्तत्राव्याप्तिरिति वाच्यम्। तेषां सर्वदा साक्षिणानुभूयमा[१]नत्वेनादृष्टपूर्वत्वान्नाव्याप्तिः। रुच पूर्वदृष्टत्वं नाम पूर्वकालीनदर्शनविषयत्वं पूर्वकालीनदर्शनं साक्षिचैतन्यं तद्विषयत्वानधिकरणत्वम् अज्ञानादिषु नास्तीत्यव्याप्तिरिति वाच्यम्। मास्तु तर्हि तेषां प्रातिभासिकत्वं संसारदशायामबाधितत्वेन व्यावहारिकत्वात्। एवञ्च स्वप्नाध्यासेऽपि योजनीयम्। यदा पूर्वदृष्टत्वं

(१) क. [illegible] पाठः।

सोऽपि द्विविधः प्रातीतिको व्यावहारिकश्चेति। तत्रा-
गन्तुकदोषजन्यः प्रातीतिकः। यथा शुक्तिरजतादिः।

नाम विषयसत्ताप्रयोजकदर्शनविषयत्वं विवक्षितम्, अस्मिन्पक्षे न शुक्त्याद्यातिरतिव्याप्तिर्वा। अयं निष्कर्षः, अज्ञातगोचरवृत्त्यनुपहितवृत्त्युपहितविशेषचैतन्यविषयत्वे सति विषयसत्ताप्रयोजकदर्शनविषयत्वं प्रातिभासिकलक्षणम्। तद्भिन्नत्वं व्यावहारिकाध्यासलक्षणमिति वदन्ति॥ २५॥

अर्थाध्यासं विभजते सोऽपीति। प्रातीतिकस्य लक्षणमाह तत्रेति। तत्रोदाहरणमाह यथेति। व्यावहारिकाध्यासं लक्षयति प्रातीतिकेति। प्रतीतिकाले भवः प्रातीतिकः। तदुदाहरति यथेति। ननु भवत्वेवमध्यस्तत्वं ततः किमित्यत आह तथाचेति। अपरेतु दोषसंप्रयोगसंस्कारजन्यत्वमध्यस्तत्वमिति वदन्ति। तेषामयमाशयः। इदं लक्षणं प्रातीतिक व्यावहारिकाध्यासमाधारणम्। न चाविद्याध्यासेऽव्याप्तिरिति वाच्यम्, तस्यालक्ष्यत्वात् कार्य्याध्यासस्यैवानर्थहेतुतया लिलक्षयिषितत्वेन तस्यैवेदं लक्षणम्। नच विशेषणवैयर्थ्यं लक्षणद्वयत्वेन विवक्षितत्वात्। तथाहि दोषजन्यत्वे सति संस्कारजन्यत्वम्, संप्रयोगजन्यत्वे सति संस्कारजन्यत्वञ्चेति। तत्र संस्कारजन्यत्वमध्यस्तत्वमित्युक्ते स्मृतावतिव्याप्तिस्तद्वारणाय दोषजन्येति। तावत्युक्ते दोषजन्यप्रमायामतिव्याप्तिः। त्रिविधो दोषः-प्रमातृदोषो, विषयदोषः, करणदोषश्चेति। रागादिराद्यः, सादृश्यादिर्द्वितीयः, काचादिस्तृतीयः, प्रत्यक्षे विषयस्य कारणत्वेन सादृश्यस्य प्रत्यक्षप्रमाया दोषजन्यतया तत्राति-

प्रातीतिकभिन्नो व्यावहारिकः। यथाकाशादिघटान्तं जगत्। तथाच प्रमातृत्वादिबन्धस्याध्यस्ततया मिथ्यात्वमुपपद्यते ॥ ३६ ॥

व्याप्तिः स्यादेव, तद्वारणाय संस्कारजन्येति। नच दोषत्वेन दोषजन्यत्वविवक्षायामुत्तरदलवैयर्थ्यमिति वाच्यम्, दोषत्वस्याननुगतत्वेन तदयोगात्। नच दोषसंस्कारयोर्ज्ञानजनकत्वेन कथमर्थस्य तज्जन्यत्वमिति वाच्यम्, अन्वयव्यतिरेकाभ्यां तयोरर्थं प्रत्यपि कारणत्वावधारणात्। नच तदन्वयव्यतिरेकयोर्ज्ञानविषयतयाऽन्यथासिद्धत्वेन ताभ्यां तयोरर्थं प्रति कथं कारणत्वावधारणमिति वाच्यम्, विनिगमनाविरहेणोभयत्र हेतुत्वे बाधकाभावात्। तस्माद्दोषजन्यत्वे सति संस्कारजन्यत्वमध्यस्तत्वमिति निरवद्यम्। तथा द्वितीयेऽपि स्मृतावतिव्याप्तिपरिहाराय सम्प्रयोगजन्यत्वे सतीति तावत्युक्ते प्रमायामतिव्याप्तिरत उत्तरदलम्। न चैवमपि प्रत्यभिज्ञायामतिव्याप्तिस्तत्रोक्तलक्षणसत्त्वादिति वाच्यम्, तद्भिन्नत्वे सतीति विशेषणात्। सम्प्रयोगशब्देनाधिष्ठानेन्द्रियसन्निकर्ष उच्यते। न चैवं सत्यन्तःकरणाध्यासेऽव्याप्तिस्तदाधिष्ठानेन्द्रियसन्निकर्षाभावादिति वाच्यम्, तत्राधिष्ठानसामान्यज्ञानस्यैव सन्निकर्षत्वेन विवक्षितत्वात्। अथ प्रत्यगात्मनोऽधिष्ठानस्य निःसामान्यविशेषतया कथं तत्सामान्यज्ञानं तत्पूर्वमिति वाच्यम्, वास्तवस्य तदभावेऽप्यावि(१)द्यकसामान्यविशेष-

---

(१) म, विद्यकेति पाठः।

एतदभिप्रायेणोक्तं भगवता भाष्यकारेण। "स्मृतिरूपः परत्र पूर्वदृष्टावभासः सजातीयावभास"इति अस्यार्थः स्मृतिरूपः संस्कारजन्यत्वेन स्मृतिसदृशः पूर्वदृष्टावभासः पूर्वदृष्टसजातीयावभास इति ज्ञानाध्यासपक्षे। अर्थाध्यासपक्षे तु प्रमाणाजन्य ज्ञानविषयः पूर्वदृष्टसजातीया(१)-भासित इति। एवं श्रुतार्थापत्तिर्निरूपिता। अभावप्रमा योग्यानुपलब्धिकरणिका यथा घटानुपलब्ध्या

भावस्य सुलभत्वात्। अथ वा सम्प्रयोगजन्यत्वे सति दोषजन्यत्वं लक्षणान्तरमस्तु। तस्मादिदमपि लक्षणं समञ्जसमिति ॥ २६ ॥

उक्ताभिप्राय भाष्यलक्षणे योजनीयमिति भाष्यकारं पूजयन् तल्लक्षणमुदाहरत्येतदिति। भाष्यलक्षणं व्याचष्टे अस्यार्थ इति। ज्ञानाध्यासपक्षे लक्षणं योजयति स्मृतीति। स्मृतेरूपमिवं रूपमस्येति स्मृतिसदृशोऽध्यासः। संस्कारजन्यत्वेन तयोः सादृश्यमित्याह संस्कारेति।

ननु पूर्वदृष्टरजतादेरन्यत्र विद्यमानत्वेन तत्सन्निकर्षाभावात् परत्रशुक्त्यादौ पूर्वदृष्टरजतावभासः कथं स्यादित्याशङ्क्य पूर्वदृष्टेत्यंश व्याचष्टे पूर्वेति। पूर्वदृष्टेन रजतादिना रजतत्वेन सजातीयस्य

---

(१) ग, जातीयावभास इति पाठ।

घटाभावप्रमा भूतले जायते। तत्रानुपलब्धिरेव करणं नेन्द्रियं, तस्याधिकरणग्रहणोपक्षीणत्वात् ॥ ३७ ॥

भ्रमकालोत्पन्नानिर्वचनीयरजतस्यावभास इत्यर्थः। अर्थापत्ते-लक्षणं योजयति अर्थेति। पूर्वेति। पूर्वदृष्टत्वानाधार इत्यर्थः। एवञ्चान्तःकरणस्याध्यस्ततया प्रमातृत्वादिबन्धस्य मिथ्यात्वमुपपद्यत इत्यतोनार्थापत्तेरन्यथोपपत्तिरित्यभिप्रेत्य श्रुतार्थापत्तिनिरूपण-मुपसंहरति एवमिति। क्रमप्राप्तामभावप्रमां निरूपयत्यभावेति। अनुपलब्धेरभावप्रमाकरणत्वमुदाहरणमुखेन विशदयति यथेति। उपलब्धेरभावोऽनुपलब्धिः तया भूतले घटो नास्तीति घटाभावप्रमा जायत इति योजना।

ननु तर्कसहकारिणानुपलब्धिसहकृतेन प्रत्यक्षेणाभावग्रहणसम्भवाद-नुपलब्धेः पृथक् प्रमाणत्वं किमर्थं कल्पनीयं? गौरवात्। नचेन्द्रिय-स्याधिकरणग्रहणोपक्षीणत्वेनाभावेन समं सन्निकर्षाभावाच्च तत् प्रमाकरणत्वानुपपत्तेरनुपलब्धेर्मानान्तरत्वमङ्गीकर्त्तव्यमिति वाच्यम्, इन्द्रियेणाभावग्रहणेऽधिकरणग्रहणस्यावान्तरव्यापारत्वोपपत्तेः संयो-गाद्यभावेऽपि विशेषण विशेष्यभावसन्निकर्षसम्भवेन यथोक्तप्रत्यक्षे-णाभावप्रमासम्भवात्। किमनुपलब्धेर्मानान्तरत्वकल्पनयेति नैयायि-कादीनामाशङ्कामपाकरोति तत्रेति। अभावप्रमा सप्तम्यर्थः। एवकारव्यवच्छेद्यमाह नेति। करणमित्यनुषज्यते। तथाच करणं नेन्द्रियमिति योजना। प्रतिज्ञातेऽर्थे हेतुमाह तस्येति ॥ ३७ ॥

अभावेन समं सन्निकर्षाभावाच्च । असाधारणं कारणं करणम् नियत पूर्ववृत्तिः कारणम् ॥ ३८ ॥

नन्वधिकरणज्ञानस्य व्यापारत्वाच्चेन्द्रियस्य तच्चोपक्षीणत्व-मित्याशङ्क्याह अभावेनेति । नचेन्द्रियाभावयोर्विशेषणविशेष्यभावः सन्निकर्ष इति वाच्यम्, सन्निकर्षो नाम सम्बन्धः । सच सम्बन्धिभ्यां भिन्न उभयाश्रितश्चैकश्चेति । विशेषणविशेष्यभावास्थातथात्वात् । तथाहि विशेषणस्य भावो विशेषणत्वं विशेष्यस्य भावो विशेष्यत्वं तथा च तदुभयविशेषणविशेष्यस्वरूपमेव नातिरिक्तं । द्वन्द्वान्ते श्रूयमाणोभावशब्दः प्रत्येकं विशेषणविशेष्याभ्यां सम्बन्धाद्विशेषणभावो विशेष्यभावश्चेति द्वैधा सम्पद्यते नैकः । अतः सम्बन्धलक्षणालक्षितत्वान्न विशेषणविशेष्यभावः सम्बन्धः । किञ्च व्यवहितभूतलस्याभावोऽपि गृह्येत । तत्राप्यभावस्य विशेषणत्वात् । नचेन्द्रियसम्बन्धविशेषणता-भावग्रहहेतुरिति वाच्यम्, परम्परया तस्यापि सत्त्वात् । नच साक्षात्सा हेतुरिति वाच्यम्, गौरवात् । किञ्चास्य(१) सन्निकर्षत्वकल्पने मानाभावात् अभावप्रमाया अन्यथाप्युपपत्तेः । नच समवायप्रत्यक्षे विशेषणतायाः क्लृप्तत्वेनात्रापि सा भविष्यतीति वाच्यम्, समवायस्य प्रागेव निरस्तत्वात् । किञ्च विशेषणतायाः सन्निकर्षत्वेनैव सर्वत्र घटादिप्रत्यक्षस्यापि सम्भवेन समवायादेः सन्निकर्षत्वं न सिध्येत् । न चेष्टापत्तिः अपसिद्धान्तात् । न चेन्द्रियेण भावपदार्थग्रहणे

---

(१) ग, किञ्च तस्येति पाठः ।

संयोगादिसन्निकर्षः अभावग्रहणे विशेषणतेति वाच्यम्, विनिगमकाभावात्। न चानुपलब्धेर्मानान्तरत्वकल्पनायां गौरवं तत्रैवेति वाच्यम्, वैपरीत्यात्। तथाहि इन्द्रियस्याभावप्रमायां कारणत्वं कल्पनीयम् पश्चात्तस्य करणत्वं(१) च कल्पनीयम्, असम्बन्धस्य तद्योगात्। विशेषणतायाः सन्निकर्षत्वं(२) च कल्पनीयमिति, तत्र पक्षे कल्पनात्रयम्, अस्मत्पक्षे त्वनुपलब्धेरभावप्रमाकारणत्वोभयवादिसिद्धतया तस्याः करणत्वं कल्प्यत इत्यतो लाघवम्। तथाचेन्द्रियं नाभावग्राहकं तदसन्निकृष्टत्वात्। यद्यदसन्निकृष्टं न तत्तद्ग्राहकं यथा गन्धासन्निकृष्टं चक्षुर्गन्धाग्राहकमिति। नचाप्रयोजकत्वं व्यवहितपदार्थस्यापि ग्राहकत्वापत्तेः। नच हेत्वसिद्धिः सन्निकर्षाभावस्योपपादितत्वात्। नच भावग्राहकत्वमुपाधिः घटादौ साध्याव्यापकत्वात्। पक्षे साधनव्यापकत्वाच्च। तस्मादिन्द्रियेणाभावग्रहासम्भवादभावप्रमाकरणत्वेनानुपलब्धेर्मानान्तरत्वमिति भाव। प्रमालक्षणमुक्त्वा तत्करणं प्रमाणमित्युक्तं पूर्वत्र। तत्र प्रमाभेदं निरूप्य किं तत्करणमिति जिज्ञासायां तल्लक्षयति असाधारणेति। अदृष्टादावतिव्याप्तिवारणायासाधारणेति विशेषणम्।

ननु करणस्य कारणविशेषत्वात् कारणसामान्यग्रहं विना तद्विशेषोदुर्ग्रह इत्याशङ्क्य तत्सामान्यं लक्षयति नियतेति। नियततत्सत्त्वं भावित्वं कार्योत्पत्तेः प्राक्कालाधिकरणत्वं पूर्ववर्त्तित्वं न तु

(१) ग, घ, पाठोऽधिकः।
(२) ग, चेऽधिकः।

तद्द्विविधम् । उपादानकारणं निमित्तकारणञ्चेति । कार्य्यान्वितं कारणमुपादानम्, यथा घटादेर्मृदादि ।

प्रागभावोपलक्षितसमयत्व प्रागभावस्यानङ्गीकारात् । इद कारण-सामान्यलक्षणम् । नच परिमाण्डल्यपरिमाणे गगनपरिमाणादौ चातिव्याप्तिस्तेषा कुत्राप्यहेतुत्वादिति वाच्यम् । प्रागेव परमाणुवादस्य निरस्तत्वेन पारिमाण्डल्यासिद्धेः । गगनादेः कार्य्यतया नि(१)रूप-तत्वेन तत्परिमाणस्यापि कारणत्वसम्भवात् । कालस्याविद्यासम्ब-न्धातिरिक्तत्वे मानाभावात् तत्परिमाणं नास्त्येव । अस्तु वाति-रिक्त' कालस्तथापि तस्येश्वरात्मकतया तद्विभुत्वे मानाभावात् । तेनैव सर्वव्यवहारोपपत्तेस्तत्परिमाणना(२)मस्यापि कारणत्वमस्त्येव । दिशोऽप्याकाशात्मतया न तत्परिमाणेऽतिव्याप्ति' । मनसोऽप्यणुत्वे विभुत्वे मानाभावात्, बाधकसद्भावात्, श्रुतिस्मृतिविरोधाच्च सुत्या तस्य कार्य्यत्वावगमेनान्त'करण परिमाणस्यापि कारणत्वमस्त्येवेति न कुत्राप्यतिव्याप्ति । विशेषलक्षण त्वनन्यथासिद्धनियतपूर्व्ववर्त्तित्व तच्चास्ति घटादिक प्रति मृदादेरनन्यथासिद्धत्व नाम अन्यान्वयव्यतिरेका-नुपजीव्यान्वयव्यतिरेकप्रतियोगित्व । अलमतिविस्तरेण ॥ ३८ ॥

कारणं विभजते तदिति । नच समवायिकारणासमवायि कारणनिमित्तकारणञ्चेति त्रैविध्ये वक्तव्ये कथ द्वैविध्योक्तिरिति

---

(१) ग, निरूपितत्वेनेति पाठ ।

(२) ग, परिमाणस्येति पाठ' ।

कार्य्यानुकूलव्यापारवन्निमित्तं यथा घटादेः कुलालादि। ब्रह्म तु मायोपहितं सत्प्रपञ्चस्योपाधिप्राधा-

---

वाच्यम्, एतादृशपरिभाषाया अप्रमाणिकत्वात्। समवायस्य पूर्वं निरस्तत्वेन समवायिकारणासिद्धा तत्प्रत्यासत्तिरूपासमवायिकारणस्य सुतरामसिद्धेः तस्य द्वैविध्योक्तिरूचितेति भावः। उपादानकारणं लक्षयति कार्य्येति। कार्य्यतादात्म्या(१)पन्ने कार्य्यान्वितमनन्यथासिद्ध-नियतपश्चाद्भाविकार्य्ये निमित्तकारणेऽतिव्याप्तिवारणायादिविशेषणरूपादावतिव्याप्तिवारणाय द्वितीय तत्रोदाहरणमाह यथेति। निमित्तकारणं लक्षयति कार्य्यानुकूलेति। नच जगदुपादाने ब्रह्मण्यतिव्याप्तिरिति वाच्यम्, तस्याभिन्ननिमित्तोपादानत्वस्य विवक्षितत्वेन लक्षितत्वात्। नचादृष्टादावव्याप्तिरिति वाच्यम्, तत्राप्युद्बोधस्य कार्य्यानुकूलव्यापारस्य सत्त्वात् न कोऽपि दोष इति भावः।

ननु ब्रह्मणश्चेतनया कार्य्यप्रपञ्चस्य जडतयेतरेतरविलक्षणत्वात्कथं ब्रह्मणोजगदुपादानत्वम्? नच श्रुत्यैव(२)समधिगम्यतया धर्म्माधर्म्मवद्ब्रह्मणो नातिशङ्कनीयत्वान्नोक्तदोष इति वाच्यम्, उपपत्तिविरोधे श्रुत्यर्थनिर्णयायोगात् अन्यथा मीमांसानारम्भप्रसङ्गात्। नच निमित्तमपि तत्सम्भवति असङ्गत्वादिश्रुतिविरोधप्रसङ्गात्। तथा-

---

(१) क, कार्य्यतादात्म्यापन्नमिति पाठः।

(२) श्रुत्यैकसमधिगम्यतया धर्म्मवदिति पाठः।

न्येनोपादानं स्वप्राधान्येन निमित्तं च भवति । "तदैक्षत बहुस्यां प्रजायेये"त्यादि श्रुतेः ॥ ३८ ॥

ननु जडस्य जडमेवोपादान वक्तव्य न ब्रह्म । नच श्रुतिविरोध स्मृतिन्यायविरोधे श्रुतेरर्थान्तरत्वोपपत्तेरिति वदन्त माध्व प्रत्याह ब्रह्मेति । चेतनात् पुरुषादचेतनस्य केशादेरचेतन गोमयादेश्चेतनस्य वृश्चिकादेरुत्पत्तेर्दृष्टत्वादित्युचणत्वहेतोरप्रयोजकत्वा "सोऽकामयते"त्यादिश्रुत्या ब्रह्मण उपादानत्वावगमेन श्रुतिविरोधे केवलोपपत्तेरप्रमाणतया मीमासारम्भोपपत्ते श्रुत्यनुकूलन्यायस्यैव प्रमाणत्वाद्ब्रह्मैव जगदुपादान न प्रधान, तस्याचेतनस्य स्वातन्त्र्येण प्रवृत्त्याद्यनुपपत्ते । चेतनाधिष्ठितस्य शकटादे प्रवृत्तेर्लोके दृष्टत्वात, दृष्टानुरोधेनादृष्टकल्पनाया न्याय्यत्वात्, मन्वादिस्मृतिसमूलतया तद्विरोधे निर्मूलकापिलादिस्मृतेरप्रमाणत्वाच, प्रधानादिकल्पनानुपपत्ते । न चैवमप्यसङ्गस्य ब्रह्मण कथ जगदुपादानत्वमिति वाच्यम्, अनिर्वचनीयमायोपहित ब्रह्मोपाधिप्राधान्येनोपादान ज्ञानशक्तिमदुपहित स्वरूपप्राधान्येन निमित्त चेत्यभ्युपगमादविरोध । तदिदमुक्तमुपाधिप्राधान्येनेति । आवरणादिशक्तिमन्मायोपाधिप्राधान्येनेत्यर्थ । स्वेति । ज्ञानशक्तिमन्मायोपहितप्राधान्येनेत्यर्थ । ब्रह्मणोऽभिन्ननिमित्तोपादानत्वे प्रमाणमाह तदिति । ऐचतेत्यनेन निमित्तत्वमवगम्यते बहुस्यामिति बहुभवनश्रवणेनोपादानत्वमन्यस्य तदनुपपत्ते प्रधानादेरीचणाद्यसम्भवेनाशब्दतयाऽप्रमाणिकत्वेन न जगत्कारणत्व'मीक्षतेर्नाशब्द'मिति न्यायाच्चेति भाव ॥ ३८ ॥

"प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधादि"ति सूत्राच्च। तच्चकारणं द्विविधम्, साधारणासाधारणभेदात्। कार्य्यमात्रोत्पादकं साधारणकारणं यथाऽदृष्टादि। कार्य्यविशेषोत्पादकमसाधारणकारणं यथा चाक्षुषादि। प्रमायां

ब्रह्मणोऽभिन्ननिमित्तोपादानत्वे व्याससूत्रं सम्वादयति प्रकृतिश्चेति। समन्वये चतुर्थपादे स्थितं "जन्माद्यस्य यत" इत्यस्मिन्नधिकरणे ब्रह्मणस्तटस्थलक्षणं जगत्कारणत्वं निर्णितं तत्किन्निमित्तत्वमात्रमुतोपादानत्वमपीति? "विश्वये स ईक्षां चक्रे" इत्यादिना ब्रह्मणः कर्त्तृत्वावगमात् लोके मृदादिभिन्नस्य कुलालादेर्घटादिकर्तृत्वदर्शनाच्च, ब्रह्म जगतो निमित्तमेव, अन्यदेवोपादानमिति प्राप्तेऽभिधीयते ब्रह्म जगतः प्रकृतिरुपादानं निमित्तं च भवति। कुतः? प्रतिज्ञादृष्टान्तानुपरोधात्। 'येनाश्रुतं श्रुत भवत्यमतं मतमविज्ञतं विज्ञात'मित्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञाय 'यथा-सोम्यैकेन मृत्पिण्डेने'त्यादि दृष्टान्तै ब्रह्मणो भिन्ननिमित्तोपादानत्वे अनयोरनुपरोधो भवति। अन्यथा तद्विरोधः स्यात् "तदैक्षत बहुस्यामि"त्यादि श्रुत्या तत्प्रतिपादनाच्च, आगमगम्येऽर्थे लौकिककुलालादिदृष्टान्तन्यायस्यानवताराच्च। तस्माद्ब्रह्मैव जगत प्रकृतिर्निमित्तञ्चेति। कारणरूप निर्णीतं कारणं प्रकारान्तरेण विभजते तच्चेति। कार्य्येति। कार्य्यतावच्छेदकावच्छिन्नकार्य्यानुत्पादकत्वे सति कार्य्यविशेषोत्पादकमसाधारणमित्यर्थः। अन्यत् कारणमत्र प्रत्ने क्रियायातमित्याशङ्क्याह तथापि चेति।

सा योग्यानुपलब्धिस्तयाभावो गृह्यते। नव्यर्थोल्लिखित-धीविषयोऽभावः ॥ ४१ ॥

योग्येऽधिकरणे[१]ऽनुपलब्धिः? नाद्यः,स्तम्भे पिशाचोन्योन्याभावस्या-नुपलब्धिगम्यत्वं न स्यात्प्रतियोगिनोऽयोग्यत्वात्। न द्वितीयः आत्मनि धर्माधर्माद्यभावस्यानुपलब्धिगम्यत्वप्रसङ्गात्। न चेष्टापत्तिः अतीन्द्रियाभावस्यानुमानगम्यत्वाभ्युपगमात्। तस्मात् योग्यताया निर्वक्तुमशक्यत्वेन योग्यानुपलब्ध्या तत्सहकृतप्रत्यक्षेण वाभावो गृह्यत इत्यसङ्गतमेव। कथं तर्ह्यभावग्रहः? न कथमपि केवलाधि-करणव्यतिरेकेणाभावस्याभावात्। तत्र प्रत्यक्षेणैवानुभूयते इति योग्यानुपलब्धिकरणिकाभावप्रमेत्युक्तमनुपपन्नमिति वदतं प्रभाकरं निराकर्त्तुं तर्कितप्रतियोगिसत्त्वप्रसञ्जितप्रतियोगिकत्वमनुपलम्भे-र्योग्यत्वमित्यभिप्रेत्य तन्निर्वचनस्यार्थं वदन् तयाभावो गृह्यत इत्याह यदित्यादिना। तथाच यदि स्तम्भे पिशाचत्वं स्यात्तर्हि स्तम्भत्व-दुपलभ्येतेति तर्कितेन प्रतियोगिरूपपिशाचत्वसत्त्वेन तदुपलम्भः प्रसञ्जनसम्भवात्। योग्यवृत्तिजातेर्योग्यत्वात्। अतो योग्या-नुपलब्ध्या स्तम्भे पिशाचान्योन्याभावस्य ग्रहणं सम्भवत्येव। आत्मनि धर्माधर्माद्यापादनेन तदुपलम्भे रापादयितुमशक्यत्वात्तत्र तदभावो नानुपलब्धिगम्यः किंत्वनुमानगम्यः। नच केवलाधिकरणव्यतिरेके-णाभाव एव नास्तीति वक्तुं शक्यम्, घटाद्यनुपलब्ध्या भूतले घटो

---

(१) ग, अधिकरणे प्रतियोग्यनुपलब्धिरिति पाठः।

सचात्यन्ताभाव एक एव भेदे प्रमाणाभावात्। तथाहि "सदेव सौम्येदमग्र आसीत्" "सत्त्वाचापर-

---

नास्तीत्याधाराधेयभावानुभवस्य सार्वजनीनत्वात् । न हि तदेव तस्याधिकरणं भवति । तस्मादधिकरणातिरिक्तोऽभावोऽस्त्येव । सच योग्यानुपलब्ध्या गृह्यते इति तत्करणिकाभाव प्रमेत्युक्तं सुसङ्गतमिति भावः ।

नन्वेवमपि ज्ञातानुपलब्ध्याभावो गृह्यते वाऽज्ञातानुपलब्ध्या वा? नाद्यः, अनवस्थाप्रसङ्गात् । न द्वितीयः सर्वदाऽभावग्रहणप्रसङ्गादतोऽनुपलब्धिकरणत्वमभावप्रमायाया न सङ्गतमिति चेन्न, ज्ञातानुपलब्धेरेवाभावप्रमाकरणत्वात् । नचानवस्था, उपलब्ध्यभावस्य प्रमात्वनिष्ठतया तज्ज्ञानस्य स्वप्रकाशसाक्षिरूपत्वेन तद्योगात्। तस्मादभावप्रमाया अनुपलब्धिरेव करणम् ।

ननु कोऽयमभावः? न तावद्द्रव्यादि षड्भान्योन्याभावः, स विशेषादेरनङ्गीकारात्। नापि भावभिन्नः स परस्पराश्रयप्रसङ्गात्। अतोऽभावस्यानिरूपणात् । अनुपलब्धेर्मानान्तरत्वमनुपपन्नमित्याशङ्क्याह नञर्थेति । नञो नञ्शब्दस्यार्थमुल्लिखति विषयीकरोति नञर्थोल्लिखिता, सा चासौ धीश्च नञर्थोल्लिखितधीस्तस्या विषयोऽभावो नास्तीति प्रत्ययवेद्योऽभावः ॥ ४१ ॥

ये तु घटादेरेकैकस्य *पदार्थस्य प्रागभावादिभेदेन* चतुर्विधाभावमाचक्षते तान्प्रत्याह स चेति। एक प्रतियोगिकोऽभावोऽत्यन्ताभाव एक एव । नहि सर्वेषां घटादीनामेक एवाभावोऽङ्गं

स्ये"ति श्रुति सूत्राभ्यां प्रागुत्पत्तेः कार्य्यस्य कारणात्मना सत्त्वप्रतिपादनेन प्रागभावस्य दुर्निरूपि[1]तत्वात्।

शक्यः, प्रतियोगिभेदेनाभावभेदस्य सर्वसम्मतत्वात्। तथा चैकस्य प्रतियोगिनः प्रागभावादिभेदेनाभावभेदोऽनुपपन्नः। तथाहि प्रतियोगिभेदेनाभावभेदो वाच्य, प्रतियोगिनोऽभावनिरूपकत्वेन तद्भेदमन्तरेणाभावभेदायोगात्।

ननु प्रतियोगिभेदाभावेऽपि प्रतियोगितावच्छेदकभेदेनाभावभेदोऽस्तु, प्रतियोगिवत्प्रतियोगितावच्छेदकस्यापि तन्निरूपकत्वात्। नच प्रतियोगितावच्छेदकस्यापि घटत्वस्यैकत्वात्कथं तद्भेदेनाभावभेद इति वाच्यम्? तस्य वस्तुत एकत्वेऽपि विशिष्टाविशिष्टरूपेण तद्भेदसम्भवात्। तथाहि भविष्यत्कालसम्बन्धिघटत्वं प्रागभावस्य प्रतियोगितावच्छेदकं भूतकालविशिष्टं घटत्वं ध्वंसस्य भूतभविष्यद्वर्त्तमानकालावच्छिन्न घटत्वमत्यन्ताभावस्य केवलघटत्वमन्योन्याभावस्येति प्रतियोगितावच्छेदकभेदेन प्रतियोग्यैक्येऽप्यभावभेदः सम्भवत्येवेति चेन्न। प्रतियोगितावच्छेदकभेदेनाभावभेदकल्पनायामानन्ताभाव कल्पनाप्रसङ्गात्। तथाहि यथा प्रतियोगिन एकत्वेऽपि भविष्यदादिकालभेदेन प्रागभावादिभेदः। एवं प्रमेयत्वद्रव्यत्वपृथिवीत्वादिप्रतियोगितावच्छेदकभेदेनापि घटाभावः भिद्येत। इह घटोनास्तीत्यनुभवत्पृथिवी घटोनास्ति द्रव्यं घटोनास्तीत्याद्यनुभवस्यापि सम्भवात्। न चैवमभ्युपगम्यते। तस्मात्प्रतियोगितावच्छेदकभेदेनाभावभेदो

(१) क, दुर्निरूपत्वादिति।

प्रागात्मज्ञानात्कार्य्यस्य निरन्वयनाशानङ्गीकारेण ध्वंसस्यापि दुर्निरू[1]पितत्वात् ॥ ४२ ॥

दुर्निरूप्य इति प्रतियोगिभेदेनैवाभावभेदो वाच्यः। ततश्च घटस्य प्रतियोगिन एकत्वात् तत्प्रतियोगिकाभावभेदोनास्त्येवेति। तदत्यन्ताभाव एक एवेति सिद्धम्।

ननु घटो भविष्यति घटोध्वस्तः घटोनास्ति घटो भूतलं नेति प्रतीतिवैलक्षण्येन घटाभावविषय-वैलक्षण्यस्यावश्यकत्वादतः प्रमाणबलेन प्रागभावादयोऽवश्यमभ्युपगन्तव्याः। प्रमाणसिद्धेऽर्थे युक्तीनामनवतारात्ता आभासी भवन्ति। अन्यथा कुत्रापि प्रमाणेन वस्तु निर्णयो न स्यात्। तदुक्तम्।

"स्वानुभूतावविश्वासे तर्कस्याप्यनवस्थितेः।
कथं वा तार्किकंमन्यस्तत्त्वनिश्चयमाप्नुयादि"ति ॥

तस्मात्प्रतियोग्यैक्येऽपि प्रमाणबलेन प्रागभावादिभेदसिद्धिरित्यत आह भेद इति। अभावभेद इत्यर्थः। नच भविष्यतीत्यादि प्रमाणस्योपन्यस्तत्वात्कथं तदभाव इति वाच्यम्? नहि घटो भविष्यतीत्यादिप्रतीत्याभावोऽनुभूयते, तया नञर्थानुल्लेखनात्। किं तर्हि घटस्य भविष्यत्कालसत्तासम्बन्धः। न चैवं पूर्वकाले तस्याभावः, असत्त्वप्रसङ्गात्। न चेष्टापत्तिः, असतः शशविषाणादेरुत्पत्तेरदर्शनेन तदुदयानुपपत्तेः। सतो वा अयं तद्धर्मापत्तिः

---

(१) ग, दुर्निरूप्यत्वात् इति पाठः।

कारकव्यापारवैयर्थ्यादिति चेन्न, कारणात्मना विद्यमानस्याभिव्यञ्जकत्वमात्रेण कारकव्यापारस्यार्थवत्त्वोपपत्तेः। एतेन प्रागसतः सता योगो वा आद्यक्षणसम्बन्धो वोत्पत्तिरिति प्रत्युक्तम् तद्व्यविष्यतीति प्रतीतेरन्यविषयत्वात्प्रागभावो दुर्निरूप[१]इत्यभ्युपगम्य[२] तदभ्युपगमे श्रुतिसूत्रविरोधमाह तथाहीति

इदं दृश्यमानं सर्वं कार्य्यजातमग्रे सृष्टेः पूर्वं सदेवासीदिति कारणात्मना सत्त्वमवधार्य्यते। कार्य्यस्य तथापरस्य कार्य्यस्य प्रागुत्पत्तेः कारणात्मना सत्त्वाद्वर्त्तमानकालेऽपि परमकारणादनन्यत्वं तद्व्यतिरेकेणाभाव इति सूत्रेण प्रतिपाद्यते। प्रागभावश्चेत् स्वीक्रियते तर्हि श्रुतिसूत्रविरोधः स्यात्। तस्मात्स दुर्निरूप[३] इत्यर्थः। एतेन सर्वं कार्य्यं स्वसमवायिकारणनिष्ठाभावप्रतियोगिकार्य्यत्वाद्व्यतिरेकेणाकाशवदिति प्रत्युक्तम्। श्रुति सूत्राभ्यां हेतोर्बाधितविषयत्वाद्सत्कार्य्यवादस्याप्रामाणिकत्वेनासदुत्पत्तेर्निराकृतत्वेन चानुमा[४]नानुपपत्तेश्च प्रागभावेन विनानुपपत्तेरभावाच्च न तत्सिद्धिरिति। अतएव ध्वंसोदुर्निरूप[५] इत्याह प्रागिति ब्रह्मसाक्षात्कारः। उत्पत्तेः पूर्वं सृष्टिप्रलयोर्वीजाङ्कुरवत्प्रवाहस्यानादित्वेन "सदेव सोम्येदमग्र आसीद्ब्रह्म वा इदमग्र आसीत् आत्मा वा इदमेक एवाग्र आसीत्"

---

(१) ब, दुर्निरूप्य इति पाठः।

(२) ब, अभ्युपेत्ये ति पाठः।

(३) ब, दुर्निरूप्य इति पाठः।

(४) ब, कृतत्वेनानुमानानुपपत्तेश्च तेन विनानुपपत्तेरभावाच्चेति पाठः।

(५) ब, दुर्निरूप्य इति पाठः।

अनादिनित्यत्रैकालिकात्यन्ताभावान्योन्याभावसत्त्वेऽद्वैतश्रुतिविरोधापत्तेः अतोऽत्यन्ताभाव एक एव ॥ ४३ ॥

"नासतो विद्यते भावः" इत्यादि श्रुति स्मृति वाक्यशतैः सृष्टेः पूर्वं प्रलीनस्य जगतः कारणात्मना सत्त्वप्रतिपादनेन कार्य्यस्य निरन्वयनाशाङ्गीकारे तद्विरोधप्रसङ्गात् ध्वंसो दुर्निरूपः[१]। नच घटोध्वस्त इति प्रतीतेः का गतिरिति वाच्यम्, तस्यास्तिरोभावमात्रविषयत्वोपपत्तेः श्रुत्यादिबाधेनानुमानादि प्रमाणान्तरानवताराच्च तत्रेतरस्य भ्रममूलत्वोपपत्तेश्चेति भावः ॥ ४१ ॥

ननु श्रुति स्मृतिविरोधेन युक्तिविरोधेन च प्रागभावध्वंसयोरनङ्गीकारेऽप्यत्यन्ताभावान्योन्याभावावश्यमभ्युपगन्तव्यौ । नच तत्र प्रमाणाभावः । भूतले घटोनास्ति वायौ रूपं नास्तीत्याद्यनुभवः । नाहमीश्वरः,त्वमहं न, भूतलं घटो न इत्याद्यनुभवश्च तत्र प्रमाणम् । उत्पत्तिविनाशकारणानिरूपणात्तावनादी नित्यौ च, अत एव त्रैकालिकौ । नचाद्वैतश्रुतिविरोधः तस्या भावाद्वैतपरत्वोपपत्तेः, अन्यथा प्रत्यक्षादिप्रमाणविरोधप्रसङ्गात् । तस्मादत्यन्ताभावान्योन्याभावावभ्युपगन्तव्यावित्याशङ्क्याह अनादीति । किं तौ पारमार्थिकौ उत मिथ्याभूतौ । नाद्य इत्याह अद्वैतेति । नच श्रुतेर्भावाद्वैतपरत्वमस्त्वि[२]ति वाच्यम्, मद्दोषे मानाभावात् । किञ्चाभावस्य

(१) दुर्निरूप इति पाठः ।
(२) अ, त्विति पाठः ।

प्रतियोगिनिरूपणाधीननिरूपणत्वेन तत्सत्ता समसत्ताकतया पारमर्थिकत्वं न सम्भवत्येव। नच प्रतियोगिनः सत्यत्वमस्ति। तस्य ब्रह्मज्ञानेन कल्पितत्वेन रज्जुसर्पवन्मिथ्यात्वस्योपपादितत्वात्। नच प्रतियोगिमिथ्यात्वे तत्सत्ताधीनसत्ताकस्य वास्तवत्वं सम्भवत्यतो द्वितीयः परिशिष्यते। अत एवाभावस्य त्रैकालिकत्वं प्रत्युक्तं कल्पितस्य ज्ञाननिवर्त्यत्वेन तदयोगात्। नच वाय्वादौ भूतभविष्यद्वर्त्तमानकालेषु रूपानुपलब्ध्या तदभावस्य त्रैकालिकत्वमिति वाच्यम्, तस्यापि कल्पितत्वेन ज्ञाननिवर्त्यत्वेन[१] तदनुपपत्तेः। यत्र तु 'अस्य सर्वमात्मैवाभूदिति' श्रुत्या मुक्तिकाले सर्वस्यात्ममात्रत्वप्रतिपादनाच्च। नच कालस्याविद्यासम्बन्धरूपत्वेन मुक्तौ सर्वव्यवहाराभावेन सोपाधिककालस्यापि मुक्तावभावेन व्यवहारकाले त्रैकालिकत्वं रूपाद्यभावस्य वाय्वादौ विवक्षितमिति वाच्यम्, इष्टापत्तेः। अन्योन्याभावस्तूभयथापि नास्त्येव। तथाहि। न तावद्वास्तवः स च सम्भवति उक्तन्यायेन वास्तवत्वासम्भवात्। नापि कल्पितोऽन्योन्याभावः सम्भवति प्रमाणप्रतियोगिनोरभावात्। तथाहि न तावदत्र प्रत्यक्षं प्रमाणमिन्द्रियाणां तदसन्निकृष्टत्वेन तैस्तद्ग्रहणायोगात्। नच विशेषणतैव सन्निकर्षोऽस्त्विति वाच्यम्, प्रागेव निरस्तत्वात् सम्बन्धान्तरानिरूपणाच्च। नाप्यनुमानं तत्र प्रमाणं साध्यस्याप्रसिद्धत्वेन तदयोगात्। भूतलं घटोनेत्यादि प्रतीतेर्वक्ष्यमाणविधयाऽन्यथाप्युपपत्तेः। अत एवोपमानादयोऽपि न तत्र प्रमाणम्, नापि प्रतियोगी तस्य निरूपयितुं शक्यते। तथाहि न

(१) ब, निवर्त्यत्वेनेति पाठः।

स च द्विविधः पारमार्थिको व्यवहारिकश्चेति। "नेह नानास्ति किञ्चने"त्यादि श्रुति प्रतिपादितः प्रपञ्चात्यन्ताभावः पारमार्थिकः स "चाधिष्ठानस्वरूपोऽधिष्ठा-

---

तावद्घटः प्रतियोगी तस्य तदविरोधित्वेन तदयोगात्। नापि तादात्म्यं तत्प्रतियोगी तस्य घटस्वरूपत्वे तद्भिन्नत्वे वा तदयोगात्। तथाहि नच तद्घटस्वरूपमेव उक्तदोषानपायात्। नापि घटस्वरूपातिरिक्तं तत् तर्हि तदन्योन्याभावस्य घटान्योन्याभावत्वायोगात्। नापि भिन्नत्वे सत्यभिन्नत्वं तत्, अन्योन्याश्रयापत्तेः। नाप्यभिन्नत्वमात्रं तत् तर्ह्यभेदात्यन्ताभावोभेद इत्यापतेत्। न स घटाभावः, न ह्यन्यप्रतियोगिकोन्याभावोभवति। तस्मात् प्रमाणप्रतियोग्यनिरूपणाद्वास्तवत्वावास्तवत्वाभ्यामन्योन्याभावस्य दुर्निरूप[१] इत्यभिप्रेत्य-परिशेषादत्यन्ताभाव एक एवेत्याह अत इति। यतः प्रागभावध्वंसाभावान्योन्याभावा दुर्निरूपा[२] अतः कारणादित्यर्थः॥ ४२॥

तं विभजते स चेति। आद्यं व्युत्पादयति नेति। इह प्रत्यगभिन्ने परमात्मनि नाना द्वैतजातं जीवेश्वरजगद्रूपं नास्ति, दृश्यत्वागस्य मायामयत्वेन मिथ्यारूपत्वादिति भावः। "ज्ञानानन्दादिगुणकं ब्रह्मे"ति परे मेनिरे तदपि नास्तीत्याह किञ्चनेति। गुणगुण्यादि-लक्षणं द्वैतमपि नास्तीत्यर्थः। आदिशब्देन "अथात आदेशोनेति नेति" "स एष नेत्यात्मा"ति श्रुतयो गृह्यन्ते।

---

(१) ग, दुर्निरूप्यत्वमिति पाठः।

(२) ग, दुर्निरूपा इति पाठ।

नातिरिक्त” इति केचित्। घटाद्यत्यन्ताभावो व्यावहारिकः। अयमेवाभेदप्रतियोगिकः। भूतलं घटोनेत्यादि-

ननु श्रुति प्रतिपादितप्रपञ्चात्यन्ताभावस्य कथं पारमार्थिकत्वम्, प्रतियोगिनः प्रपञ्चस्य कल्पितत्वेन प्रतियोगिसत्ताधीनसत्ताकस्य तदयोगात्? ब्रह्मव्यतिरिक्तस्य पारमार्थिकत्वेऽद्वैतश्रुत्या विरोधापत्तेश्चेत्यामङ्क्यारोपितात्यन्ताभावस्याधिष्ठानमात्रत्वेन पारमार्थिकत्वमुपपद्यत इत्याह स चेति। नचारोपितात्यन्ताभावस्याधिष्ठानमात्रत्वाभ्युपगमेऽनुपलब्धिप्रमाणाभ्युपगमविरोधः स्यादिति वाच्यम्। न हि वयं भूतले घटोनास्तीत्यनुभूयमानस्यात्यन्ताभावस्याधिष्ठानमात्रत्वमभ्युपगच्छामः। तस्य घटादिसमानसत्ताकस्य व्यावहारिकत्वेन भूतलादिवदधिष्ठानविलक्षणत्वात्। किन्तु “जगदधिष्ठाने ब्रह्मणि ने”त्यादि श्रुत्या प्रतिपादितप्रपञ्चात्यन्ताभावस्याधिष्ठानमात्रत्वं प्रतिपादयामः। नचैतावतानुपलब्धिप्रमाणाभ्युपगमविरोधोऽस्ति। तस्या भूतलादौ घटाद्यत्यन्ताभावग्राहकत्वेन प्रामाण्योपपत्तेर्न कोपि दोष इति भावः। मतान्तरमाह “अधिष्ठाने”ति निषेध श्रुत्या गम्यमानः प्रपञ्चात्यन्ताभावोऽधिष्ठानब्रह्मस्वरूपापेक्षयातिरिक्त एव। नचाद्वैतश्रुतिविरोधस्तस्या भावाद्वैतपरत्वादिति तात्पर्यम्। अत्रेदं चिन्त्यम्, श्रुतिसङ्कोचे मानाभावादधिष्ठानातिरिक्ताभावस्य प्रतियोगिसत्तासमसत्ताकतया प्रतियोगिनः कल्पितत्वेन तदधीनाभावस्यापि कल्पितत्वस्यैव वक्तव्यतया वास्तवत्वस्य दुर्निरूपत्वात्[1]

(१) ग, दुर्निरूप्यत्वात् इति पाठः।

प्रतीति विषयोभेद इत्युच्यते । घटोनास्तीत्यादिप्रतीतिविषयोऽत्यन्ताभाव इत्युच्यते वादिभिः । सर्वोऽप्यनित्य एव सर्वस्य ब्रह्मज्ञाननिवर्त्यत्वात् ॥ ४४ ॥

तस्माद्यत्किञ्चिदेतत् । द्वितीयं व्युत्पादयति घटेति । अयं व्यावहारिकात्यन्ताभावः पूर्वोक्तयोग्यानुपलब्ध्या गृह्यत इत्यनुपलब्धिर्मानान्तरमिति भावः ।

नन्वभावैक्याङ्गीकारे भूतले घटो नास्ति भूतलं घटो नेति प्रतीति वैलक्षण्यं कथं स्यात्, तयोः प्रमेयवैलक्षण्यस्यावश्यकत्वात्? अन्यथा विलक्षणप्रतीतेराक[1]स्मिकत्वापत्तेरित्यत आह अयमेवेति। अयमत्यन्ताभाव एव इत्यर्थः। वादिभिरिति नैयायिकादिभिरित्यर्थः । अतो न प्रतीतिवैलक्षण्यस्य आकस्मिकत्वा[2]पत्तिरिति भावः। भूतलादावनुभूयमानं घटात्यन्ताभावं नित्यं नैयायिकादयो वदन्ति । जीवेश्वरभेदस्य श्रुतितात्पर्यज्ञानशून्यास्तान्निराकरोति सर्वोऽपीति। जीवेश्वरादिभेदरूपो घटात्यन्ताभावश्च सर्वोऽपीत्यर्थः। अनित्यत्वं नाम ध्वंसप्रतियोगित्वं वा बाध्यत्वं वा । बाधः पूर्वमेव निरूपितः । तत्र युक्तिं वक्ति सर्वस्येति । ब्रह्मव्यतिरिक्तस्य भावाभावात्मकस्य प्रपञ्चस्याविद्याविलसितत्वेन वाक्योत्थ ब्रह्म[3]साक्षात्कारेण तन्निवृत्तावुपादाननाशे सत्युपादेयनाशस्यावश्यकत्वेन ज्ञाननिवर्त्यत्वमुपपद्यत इति भावः ॥ ४४ ॥

---

(१) ग, आकस्मिकता इति पाठः ।
(२) ग, आकस्मिकता इति पाठः ।
(३) ग, ब्रह्मैक्यसाक्षादिति पाठः ।

अन्ये तु लौकिकतन्त्रान्तरबुद्धिमनुसरन्तोऽभावभेदं स्वीचक्रुः। तथाहि, प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्चेति भेदाच्चतुर्विधोऽभावः। उत्पत्तेः प्राक्कारणे कार्य्याभावः प्रागभावः। यथामृदादौ घटाद्यभावः।

मतान्तरमाह अन्ये त्विति। तन्त्रान्तरं न्यायशास्त्रादि[1] प्रतिज्ञातार्थमुपपादयति तथाहीति। प्रागभावं व्युत्पादयति उत्पत्तेरिति। अनादिप्रतियोगिजनकः प्रागभाव इति निष्कर्षः। अथवा[2] विनाश्यभावोवास इति द्रष्टव्यम्। ध्वंसं व्युत्पादयति उत्पन्नेति जन्याभावो ध्वंस इत्यर्थः। अत्यन्ताभावं सूचयति प्रतीयोगीति। प्रतियोग्यसमानाधिकरणत्वं नाम प्रतियोग्यनधिकरणाधिकरणत्वं प्रतियोग्यधिकरणानधिकरणत्वं[3] वा प्रतियोग्यधिकरणभिन्नाधिकरणत्वं वा। न चैवं प्रागभावादावतिव्याप्तिरिति वाच्यम्, तृतीये तदभावात् तदेव विवक्षितमित्यर्थः। अन्योन्याभावं सूचयति प्रतियोगीति। प्रतियोगिसमानाधिकरणत्वं नाम तदधिकरणाधिकरणत्वम्। न चाकाशस्य विभुत्वेन निरधिकरणत्वात्तदन्योन्याभावस्य प्रतियोगिसमानाधिकरणत्वाभावादव्याप्तिरिति वाच्यम्। आकाशोत्पत्तेः प्राग् साधितत्वेन कार्य्यद्रव्यतयाकाशस्य सावयवत्वात्।

---

(१) ग, न्यायशास्त्रादिः प्रतिज्ञेति पाठः।
(२) ग, अथवाभावादिविनाश्येति पाठः।
(३) ग, क्वचिद् पुस्तके अनधिकरणत्वमिति पाठो दृश्यते।

उत्पन्नस्य कार्य्यस्य कारणेऽभावो ध्वंसाभावः। यथा-मुद्गरादि प्रहरणानन्तरं कपालादौ घटाद्यभावः। प्रतियोग्यसमानाधिकरणाभावोऽत्यन्ताभावः। यथा भूतलादौ घटाद्यभावः। प्रतियोगिसमानाधिकरणाभावोऽन्योन्याभावः। यथा भूतलादौ घटादिभेदः। सर्वेऽप्यभावा अनित्याश्च ॥ ४५ ॥

एवमभावप्रमानिरूपिता। एवं षड्विधप्रमया

घटादिवत्तदन्योन्याभावस्य प्रतियोगिसमानाधिकरणत्वसम्भवान्न तत्रा व्याप्तिः। आकाशावयवो मायैवेति न कोऽपि दोष इति भावः। सर्वेषामभावानां प्रतियोगिसमानसत्ताकत्वेन मायाकार्य्यत्वाद्ब्रह्मज्ञानबाध्यत्वेनानित्यत्वमेव। न तन्त्रान्तरवत् केषाञ्चिन्नित्यत्वं केषाञ्चिदनित्यत्वमित्याह सर्वे इति। नच ध्वंसस्यानित्यत्वे प्रतियोग्युन्मज्जनप्रसङ्ग इति वाच्यम्, प्रागभावध्वंसस्य घटस्यानित्यत्वस्य त्वयैवाभ्युपगतत्वादतो नोक्त दोष इति भावः ॥ ४५ ॥

अभावप्रमानिरूपणं निगमयति एवमिति। नन्वेवं प्रमानिरूपणमस्तु किं तत्र तेनेत्यत आह एवमिति। उक्तप्रकारेण षड्विधेति। प्रत्यक्षानुमित्युपमिति शाब्दार्थापत्त्यभावप्रमिति भेदात्। भिन्नयेत्यर्थः। आवरणेन सहितं सावरणं। आवरणं नामावरणशक्तिः। साच निरूपिता ततश्च षड्विधप्रमाभिः प्र
क्रमज्ञानं भवतीत्यर्थः।

सावरणमज्ञानं निवर्त्तते। तत्र परोक्षप्रमयाऽसत्त्वापादकमौढ्याज्ञाननिवृत्तिः। अपरोक्षप्रमयाऽसत्त्वाभानापादकाज्ञाननिवृत्तिः ॥ ४६ ॥

॥ इति द्वितीयः परिच्छेदः समाप्तः ॥

नन्वेवं सति परोक्षस्थले घटादेरपि प्रत्यक्षतापत्तिः। तदावरकाज्ञानस्य तद्गोचरप्रमया निवृत्तत्वात्। यदि न निवृत्तं तदावरकाज्ञानम्, तर्ह्यनुमित्यादिविषयत्वमनर्थकं स्यात्। न चानुमित्यादिविषयस्य परोक्षव्यवहारजनकत्वेनार्थवत्त्वमिति वाच्यम्, परोक्षव्यवहारस्याप्यावरकाज्ञाननिवृत्त्यभावेन तदयोगात्। अन्यथा प्रत्यक्षप्रमया निवृत्तेऽप्यज्ञाने विषयस्यापरोक्षाभासप्रसङ्गात्। तथा-ऽभ्युपगमे [illegible] तथैति। यद्विषयप्रमा-[illegible]। अज्ञानेन परोक्षे द्विविधो व्यवहारः सम्पद्यते [illegible] द्विविधो-[illegible] न भासते इति। [illegible]-दीनि। [illegible]ऽनुपपद्यते। [illegible]ऽनुपपद्यते। तत्र परोक्षप्रमया-

[illegible]

वरणशक्तियुक्तं मौढ्याज्ञानशब्दवाच्यं निवर्त्तते। अतएवानुमित्यादिप्रमोत्पत्त्यनन्तरं न कश्चिदपि विषयोनास्तीत्यनुभवति। किन्तु वह्न्यादिरस्तीत्येव प्रतिपद्यते। अन्यथा तत्र प्रवृत्त्यनुपपत्तेर्वह्न्याद्यर्थिनां अपरोक्षप्रमया तु द्विविधावरणशक्तिमदज्ञानं निवर्त्तते। अत एव घटः स्फुरति घटं पश्यामीत्याद्यनुभवः। तदिदमाह परोक्षेत्यादिना असत्त्वेति विषयस्यासत्त्वमापादयति असत्त्वव्यवहारं जनयतीत्यसत्त्वापादकं नास्तीति व्यवहारकारणं। तच्च तन्मौढ्याज्ञानञ्चेति। तयाऽसत्त्वावरणशक्तियुक्तमौढ्याज्ञाननिवृत्तिरित्यर्थः। मौढ्यं नाम विषयसत्ताव्यवहारशून्यत्वं। ततश्च षड्विधप्रमानिरूपणमर्थवदिति भावः।

ननु यथा प्रत्यक्षस्थले प्रत्यक्षप्रमानन्तरं घटः स्फुरतीत्यनुभवात् यथा घटादिस्फुरणं तथा परोक्षस्थलेऽप्यनुमित्यादिप्रमानन्तरं वह्न्यादिः स्फुरतीत्यनुभवात् वह्न्यादिस्फुरणमस्त्येव। तथा च कथं यथोक्तव्यवस्थासिद्धिरित्यत्रोच्यते। परोक्षस्थले वह्निसत्तामात्रस्फुरणम्, प्रत्यक्षस्थले तु रूपादिविशिष्टत्वेन तत् स्फुरणमिति व्यवस्थासम्भवति।

ननपरोक्षस्थले घटादीनां वृत्तिसम्बन्ध इव परोक्षस्थले वह्न्यादीनां वृत्तिसम्बन्धोऽस्ति न वा? नाद्यः, तत्र वह्नीन्द्रियसन्निकर्षाभावेनान्तःकरणस्य वहिर्निर्गमनाभावेन तदयोगात्। अन्यथा-प्रत्यक्षस्थलेऽप्यन्तःकरणस्य वहिर्निर्गमनं विना वृत्तिविषयसम्बन्धप्रसङ्गात्। न द्वितीयः, वह्न्यादिस्फुरणमेव न स्यात्। नच तत्र वृत्तिविषययोः संयोगसम्बन्धाभावेऽपि सम्बन्धान्तरेण तत् स्फुरणमस्त्विति वाच्यम्, सम्बन्धान्तरानिरूपणात्। तथाहि न तावद्वृत्तिविषययोः स्वरूपसम्बन्धेन तत् स्वरूपसम्बन्धस्याप्रामाणिकत्वात्।

किञ्च स्वरूपसम्बन्धाभ्युपगमे तेनैव सर्वत्र वा विशिष्टव्यवहारोपपत्तौ सम्बन्धान्तरं न सिध्येत्। किञ्च ज्ञानस्वरूपं वा विषयस्वरूपं वा उभयं वा सम्बन्धः। नाद्यः, घटज्ञानदशायां पटप्रतीत्यापत्तेः। न द्वितीयः, अन्धकारस्थघटस्यापि प्रतीत्यापत्तेः। न तृतीय, पूर्वोक्तदोषापरिहारात्, अनन्तस्वरूपाणां सम्बन्धकत्वकल्पने गौरवाच्च, नापि विषयविषयिभावः सम्बन्धः। तयोः संयोगसम्बन्धमन्तरेण तदयोगात् अन्यथा[१] अतिप्रसङ्गात्। तस्मात्कथं व्यवस्थोपपत्तिरिति? मैवं। परोक्षस्थले विषयेन्द्रियसन्निकर्षाभावेनान्तःकरणवहिर्निर्गमनाभावेन विषयाधिष्ठानचैतन्यस्य प्रमातृचैतन्येनैक्याभावेऽपि लिङ्गज्ञानेन वह्न्याद्याकारवृत्तौ सत्यां प्रमातृचैतन्यविषयचैतन्ययोर्वास्तवैक्यस्य विद्यमानत्वाद्वह्न्यादेर्भानमुपपद्यते। नचातिप्रसङ्ग इति वाच्यम्, तत्तदाकारवृत्तेस्तद्विषयभाने नियामकत्वात्। अत एव वह्न्यादेः परोक्षत्वेन भानमपरोक्षस्थलेत्विन्द्रियार्थसन्निकर्षे वहिर्निर्गतान्तःकरणवृत्त्या विषयस्य संयोगसम्भवात्, वृत्त्या सावरणाज्ञानस्य निवृत्तत्वाच्च। विषयप्रमाणप्रमातृसाक्षिचैतन्यानामेकोपाध्याक्रान्ततयैक्यसम्भवेन घटादिविषयस्य सुखादिवत्साक्षिण्यध्यस्ततयानावृतसंवित्तादात्म्याद् घटः स्फुरति घटं साक्षात्करोमीति ज्ञानविषयापरोक्षानुभवादपरोक्षतया विषयस्फुरणम्। परोक्षस्थले तु तद्वैपरीत्यात् तल्लिङ्गज्ञानेन तदाकारवृत्त्याऽसत्त्वापादकमौढ्याज्ञानस्य निवृत्तत्वाद्विषयप्रमाण-चैतन्ययोर्भेदाच्च। परोक्षतया वह्न्यादेःसत्तामात्रेण-

(१) अ, अन्यथा अतिप्रसङ्गात् इति पाठो न।

स्फुरणमिति व्यवस्था सम्भवत्येव। तस्मात् यद्विधया प्रमया सावरण-ज्ञाननिवृत्त्यातद्विषयभानं सम्भवति । "तत्त्वमस्या"दिवाक्यजन्या-परोक्षप्रमया ब्रह्मावरकमूलाज्ञाननिवृत्त्यातत्साक्षात्कारस्सम्भवत्येव । अतः प्रमानिरूपणमर्थवत्तस्माद्बोधेद्धार्द्वैतीवृत्तिर्द्धा बोधो वा प्रमेति प्रमानिरूपणं सिद्धम् ॥ ४ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्स्वयंप्रकाशानन्द-सरस्वतीपूज्यपादशिष्यभगवन्महादेवानन्दसरस्वतीविरचिते तत्त्वानु-सन्धानव्याख्यानेऽद्वैतचिन्ताकौस्तुभनाम्नि द्वितीयः परिच्छेदः ॥

अथ तृतीय परिच्छेदः।

श्रीगणपतये नमः।

प्रमाभिन्नं ज्ञानमप्रमा। सा च द्विविधा, स्मृतिरनुभूतिश्चेति। संस्कारमात्रजन्यं ज्ञानं स्मृतिः। सापि द्विवि-

---

ॐ नमः परमात्मने।

चराचराणामनिशं सुखाय यस्यावतारो भवतीति सन्तः।
वदन्ति योनिं जगतामनन्तं तं कृष्णमाद्यं शरणं प्रपद्ये ॥ १ ॥

वृत्तिर्द्विविधा प्रमाप्रमाभेदादित्यत्र प्रमा निरूपिता तत्राप्रतिबन्धायाः प्रमायाः अज्ञाननिवर्त्तकत्वेन प्रतिबन्ध तन्निवृत्त्युपायौ निरूपणीयौ तत्रासम्भावनादिः प्रतिबन्धः तदुक्तम् पराशरेण।

"भावना विपरीता या या च सम्भावना शुक।
कुरुते प्रतिबन्धं सा तत्त्वज्ञानस्य नापरमि"ति ॥

तन्निवृत्त्युपायः श्रवणादिः "श्रोतव्य"इत्यादि श्रुतेः। यद्यप्यस्य ज्ञानसाधनत्वमवगम्यते तथाप्यप्रमाणत्वेन साक्षात्तदनुपपत्त्या प्रतिबन्धादिनिवृत्तिद्वारा महावाक्यात्प्रमोत्पत्तावस्योपयोग इति ज्ञानसाधनत्वमुपपद्यते। ततश्च प्रतिबन्धस्यासम्भावनादेरप्रमायामन्तर्भावादवश्यमप्रमा निरूपणीयेत्यतः क्रमप्राप्तामप्रमां निरूपयति प्रमेति। प्रमात्वावच्छिन्नप्रमाभिन्नं ज्ञानमप्रमेति निष्कर्षः। तेन घटप्रमा-

धा, यथार्थाऽयथार्थभेदात्। यथार्थस्मृतिरपि द्विविधा अनात्मस्मृतिरात्मस्मृतिश्चेति ॥ १ ॥

भिन्नघटज्ञानेऽतिव्याप्तिर्निरस्ता प्रमात्वं नामानधिगतावाधितार्थविषयज्ञानत्वं घटोऽयं घटोऽयमिति धारावाहिकज्ञानस्थले विरोधिघटाकारवृत्त्युत्पत्तिपर्यन्तं यावद्घटस्फुरणं तावद् घटाकारवृत्तिरेकैवेति नाव्याप्तिः। नच सर्वं ज्ञानं धर्म्मिण्यभ्रान्तं प्रकारे तु विपर्यय इति न्यायेन भ्रमादेर्धर्म्यंशे प्रमारूपत्वेन प्रमाभिन्नत्वाभावादव्याप्तिरिति वाच्यम्, धर्म्यंशज्ञानस्यान्तःकरणवृत्तिरूपत्वेन भ्रमस्याविद्यावृत्तिरूपस्य तद्भिन्नत्वान्नाव्याप्तिरिति भावः। तां विभजते सा चेति। स्मृतेर्लक्षणमाह संस्कारेति। प्रत्यभिज्ञायामतिव्याप्तिवारणाय मात्रेत्युक्तं तस्याः संस्कारसहितेन्द्रियजन्यत्वेन तन्मात्रजन्यत्वाभावान्नातिव्याप्तिः। संस्कारध्वंसेऽतिव्याप्तिवारणाय ज्ञानमित्युक्तं संस्कारस्त्रिविधः वेगो-भावना स्थितिस्थापकश्चेति क्रियाजन्यः क्रियाहेतुर्वेगः। सत्त्व[1]स्यदिष्टनिष्ठोऽनुभवजन्यस्मृतिहेतुर्भावनासंस्कारः यचान्तःकरणनिष्ठोऽस्मन्मते। न्यायमतेत्वात्मनिष्ठः। अस्मदभिमताहंकारस्यैव नैयायिकादीनामात्मत्वात्। स्थितिस्थापकसंस्कारोधनुरादिनिष्ठः। यद्यपि वेगस्थितिस्थापकयोः क्रियाहेतुत्वमेव तथापि भावनासंस्कारस्य ज्ञानहेतुत्वात्तन्मात्रजन्यं ज्ञानं स्मृतिरितिलक्षणमुपपद्यते। स्मृतिं विभजते सापीति। यथोद्देशं यथार्थस्मृतिं विभागपूर्वकं निरूपयति यथार्थेति ॥ १ ॥

(१) ग, ङ, च दिष्ट, इति पा०।

तत्र व्यावहारिकप्रपञ्चो मिथ्यादृश्यत्वात् जडत्वात् परिच्छिन्नत्वात् शुक्तिरूप्यवदित्यनुमानसिद्धमिथ्यात्वानुसन्धानं यथार्थानात्मस्मरणम् ॥ २ ॥

यथार्थानात्मस्मृतिं निरूपयति तत्र व्यावहारिकेति। तयोर्मध्ये इत्यर्थः। पक्षस्य वा पक्षसमस्य वा दृष्टान्तत्वासम्भवेन तत्र व्याप्तिग्रहायोगात् पक्षं विशिनष्टि व्यावहारिकेति अज्ञातसत्त्वावत्त्वं व्यावहारिकत्वं शुक्तिरजतादेः प्रतीयमानसत्ताकत्वेन प्रातीतिकत्वात् दृष्टान्त उपपद्यते।

ननु वादिप्रतिवादिनोः सम्प्रतिपत्तिविषयो दृष्टान्तो वक्तव्यः प्रतिवादिभिः शुक्तिरजतस्यानङ्गीकारेण कथं स दृष्टान्त इति चेन्न। अन्यथा ख्यात्यादीनां पूर्वमेव निराकृतत्वेन शुक्तिरजतस्य साधितत्वात् दृष्टान्तोपपत्तेः ततश्च तत्र हेतुसाध्ययोर्दृश्यत्वमिथ्यात्वयोर्व्याप्तिग्रहसम्भवेन पक्षेऽपि दृश्यत्वहेतुना मिथ्यात्वं साधयितुं शक्यते व्यावहारिकेति पक्षो न विशिष्यते चेत्तदा शुक्तिरजतस्य प्रपञ्चान्तर्गतत्वेन पक्षकुक्षिनिक्षिप्तत्वादनुपसंहारिहेत्वाभासः स्यात् दृश्यत्वे हेतुः एतत् पक्षविशेषणमर्थवदिति भावः। एतस्मादनेनानुमानेन प्रपञ्चस्याकाशादेर्मिथ्यात्वसिद्धौ सत्यां तस्य सिद्धस्य मिथ्यात्वस्य पुनः पुनरनुसन्धानं यथार्थानात्मस्मरणम्। ननु मिथ्यात्वं प्रपञ्चनिष्ठं न वा। आद्ये मायामयप्रपञ्चनिष्ठस्य कथं याथार्थ्यं (१)याथार्थ्यस्य वस्तुधर्मत्वात्प्रपञ्चस्यावस्तुत्वाभ्युपगमादवस्तुधर्मस्य मिथ्यात्वस्यावस्तुत्वावश्यं भावेन

(१) क ख यथार्थ इति पा०।

तत्त्वमस्यादिवाक्यार्थानुसन्धानं यथार्थात्मस्मरणम्।

(१)याथार्थ्यानुपपत्तेः। द्वितीयेऽपि पक्षे साध्याभावेनानुमानस्य बाध एव स्यात्तस्मान्मिथ्यात्वानुसन्धानं यथार्थात्मस्मरणमित्यनुपपन्नमिति चेन्न दोषः। मिथ्यात्वं प्रपञ्चनिष्ठमेव। नचावस्तुधर्म्मस्यावस्तुत्वात्तदनुसन्धानस्य कथं (२)याथार्थ्यं ज्ञानगत(३)याथार्थ्यस्य विषयप्रयुक्तत्वादिति वाच्यम्, ज्ञानस्य याथार्थ्यं नाम मानान्तराबाध्यत्वं तदपि विषयकृतमेव स्वरूपेण ज्ञानस्य बाधाबाधयोरयोगाद्विषय बाधाबाधाभ्यां ज्ञानस्य बाध्यत्वव्यपदेशात्। एवञ्च प्रपञ्चस्य मिथ्यात्वं नामाधिष्ठानसत्तातिरिक्तसत्ताशून्यत्वमेव तस्य केनापि प्रमाणेन बाधाभावात् प्रत्युतादौ तां "वाचारम्भणं विकारो नामधेयमि"त्यादि श्रुतिविरोधेनाप्रामाण्योपपत्तेर्मिथ्यात्वस्य(४)बाधेन याथार्थ्यात्तदनुसन्धानस्यापि (५)याथार्थ्यं सत्त्वश्चेत्यनुमानसिद्धमिथ्यात्वानुसन्धानं यथार्थात्मस्मरणमिति सम्यगुपपन्नमिति भावः॥ २॥

यथार्थात्मस्मरणं दर्शयति तत्त्वमिति तत्त्वमस्यादिवाक्यार्थस्य पदस्वरूपस्य अद्धमं तदनुसन्धानं यथार्थात्मस्मरणमित्यर्थः। यथोदितं यथार्थस्मृतिं निरूप्य क्रमप्राप्तामयथार्थस्मृतिं विभज्य निरूपयति स्वप्नादीति। पूर्ववदिति। यथार्थस्मृतिवदयथार्थस्मृतिरात्मस्मृतिरिति द्विधेत्यर्थः। अयथार्थात्मस्मृतिं दर्शयति प्रपञ्चेति। तत्र

---

(१) क, ख, पुस्तकयोर्न दृश्यते। (२) क, ख, पुस्तकयोर्न दृश्यते।
(३) क, ख, पुस्तकयोर्न दृश्यते। (४) क, ख, [illegible] दृश्यते।
(५) क, ख, पुस्तकयोर्न दृश्यते।

अयथार्थस्मृतिरपि द्विधा, पूर्ववत् प्रपञ्चस्य सत्यत्वानु-

"घटः सन् पटः सन्निति प्रत्यक्षेण प्राणा वै सत्यमि" ति श्रुत्या प्रप-ञ्चस्य सत्यत्वावगमात्प्रमाणसिद्धस्य ब्रह्मवद्यथार्थत्वात्कथं तत्स्मरण-स्यायथार्थत्वमन्यथा ब्रह्मानुसन्धानस्याप्ययथार्थत्वापत्तेरित्याशङ्क्याह मिथ्येति। प्रपञ्चस्य "वाचारम्भणं विकारो नाम धेयं" "सोऽनृताभि-सन्धोऽनृतेनात्मानमन्तर्धाय भेद्य""तस्याज्ञानकृतो भवेदि"ति श्रुति-स्मृतिश्तैरारम्भणाधिकरणन्यायेन ब्रह्मभिन्नस्य मिथ्यात्वस्य निश्चि-तत्वाद् "घटः सन्नि"त्यादिप्रत्यक्षादेर्बाधेनाधिष्ठानसत्त्वविषयत्वो-पपत्तेः। नच "प्राणा वै सत्यमि"त्यादि श्रुत्येतरश्रुत्यादिबाधः किम-स्यादिति वाच्यम्, प्राणादीनामुत्पत्तिविनाशश्रवणेन कालत्रया-बाध्यत्वरूपसत्यत्वायोगात्, न्यायशून्यत्वाच्च, "प्राणा वै सत्यमि"त्यादि श्रुतेर्व्यावहारिकसत्यत्वविषयत्वोपपत्तेस्तयेतरश्रुतिबाधायोगात् प्रत्युत "वाचारम्भणा"दिश्रुतेर्न्यायमूलत्वेन तयैव प्राणसत्यत्वश्रुतेर्बाधः। तस्मा-त्प्रपञ्चस्य मिथ्यात्वात् सत्यत्वानुसन्धानमयथार्थानात्मस्मरणमिति युक्तमेवोक्तमिति भावः। द्वितीयं निरूपयति अहङ्कारेति। अहमिति कृतिः करणं यस्य सोऽहङ्कारः स आदिर्येषां तेऽहङ्कारा-द्यस्तेष्विति यावत्।

ननु सर्वेषां परीक्षकाणामहमनुभवविषयस्यैवात्मत्वेनाभिमतत्वा-त्कथं तस्यात्मानुसन्धानमयथार्थात्मस्मरणमिति चेत् शृणोतु भवान् देहाद्यज्ञानसाध्यनाः सर्वेऽहमनुभवविषयास्तत्र कोऽयमात्मा तव। न तावद्देह आत्मा उत्पत्तिविनाशवत्त्वाद्रूपादिमत्त्वाज्जडत्वाच्च घटवत्।

सन्धानमयथार्थानात्मस्मरणम् मिथ्यावस्तुत्वात्तस्याहङ्कारादिष्वात्मत्वानुसन्धानम् ॥ ३ ॥

नचाप्रयोजकत्वं कृतहानाकृताभ्यागमदोषप्रसङ्गात्। "तस्माद्वा एतस्मादन्नरसमयादन्योऽन्तरात्मा प्राणमय" इति श्रुतेश्च नापीन्द्रियाणामात्मत्वं करणत्वाद्वास्यादिवत् वनवदङ्गसमुदायत्वाच्च घटवद्भौतिकत्वाच्च। नचाप्रयोजकं करणस्य ज्ञातृत्वायोगात्। न हि वास्यादेः करणस्य ज्ञातृत्वं दृष्टं जानामीत्यात्मनो ज्ञातृत्वस्यानुभवसिद्धत्वात्। बहुसमुदायस्यात्मत्वे विरुद्धाभिप्रायतया सद्यः शरीरपातप्रसङ्गाच्च। नच 'वरगोष्ठी'न्यायेन बहूनामात्मत्वमविरुद्धमिति वाच्यम्। योऽहं पश्यामि सोऽहं स्पृशामीत्यभेदप्रत्यभिज्ञाविरोधप्रसङ्गाच्च। भौतिकस्यात्मत्वे पूर्वोक्तदोषानपायात्। अतो नेन्द्रियाणामात्मत्वं नापि प्राणः आत्मा वायुविकारत्वात् वाह्यवायुवत् "तस्माद्वा एतस्मात् प्राणमयादन्योऽन्तरात्मा मनोमय" इति श्रुतेश्च। नापि मन आत्मा करणत्वादिन्द्रियवत्। नच मनसः करणस्य निराकृतत्वात्तत्तस्यानात्मत्वं कथमिति वाच्यम्, मिश्रमतानुसारेण न्यायमतानुसारेण वा तदुपपत्तेः अस्मन्मते उत्पत्तिविनाशवत्त्वादिति हेतुर्द्रष्टव्यः। "तस्माद्वा एतस्मान्मनोमयादन्योऽन्तरात्मा विज्ञानमय" इति श्रुतेश्च नाप्यहङ्कार आत्मा दृश्यत्वात् घटवत्। नचाप्रयोजकत्वं विपक्षहेतूच्छित्तेरेव बाधकत्वात्। नचेष्टापत्तिः अन्यैस्तस्य दृश्यत्वानङ्गीकारात्। अस्मन्मते कार्य्यत्वेन तद्योगात्। एतेन बुद्धिचित्तयोरात्मत्वं प्रत्युक्तम्, "तस्माद्वा एतस्माद्विज्ञानमयादन्यो-

ऽन्तरात्मानन्दमय"इति श्रुतेश्च नाप्यानन्दमयशब्दवाच्यमज्ञानमात्मा-जड़त्वात् ज्ञाननिवर्चनत्वाच्च ।

"अत्रायं पुरुषः स्वयं ज्योतिर्भवति"

"अजो नित्यः शश्वतोऽयं पुराणः" ।

"आकाशवत्सर्वगतश्च नित्यः"

"क्षेत्रं क्षेत्री तथाकृत्स्नं प्रकाशयति भारत" ?

नित्यस्सर्वगतः स्थाणु"रित्यादि श्रुतिस्मृतिभिरात्मनश्चेतनत्व-नित्यत्वावगमात् तद्वैपरीत्यानुभवादज्ञानमनात्मैव एतेन शून्यमात्मेति प्रत्युक्तं तस्यापि साक्षिभास्यत्वात् कथं पुनर्देहादीनामहमनुभव-विषयत्वादनात्मत्वमित्युच्यते देहादीनां चिदात्मनश्चान्योन्याध्या-साद्देहादीनामहमनुभवविषयत्वं मृतदेहे तददर्शनात् । अन्यथान्य-त्रापि तत्प्रसङ्गात् । तस्मादहङ्कारादिष्वात्मत्वानुसन्धानमयथार्थात्म-स्मरणमिति निरवद्यम् । कस्तर्ह्यात्मेति चेदज्ञानतत्कार्याणि सर्वाणि यो निजसत्तया प्रत्यक्षतया भासयति ममाज्ञानं ममाहङ्कारो मम बुद्ध्यादिरिति स एवात्मा तस्य स्वप्रकाशचिद्रूपत्वात् स्मरणास्मरणे न सम्भवतः । न हि नित्यस्य स्वप्रकाशानुभवस्य स्वात्मनः स्मरणं वा विस्मरणं भवति तथाच श्रुतिः ।

"त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत् ।

तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदाशिवः ॥

साक्षी चेताः केवलो निर्गुणश्चे"त्याद्या देहाद्यशेषानात्मविलक्षणं स्वप्रकाशं चिद्रूपं साक्षिणं दर्शयन्ति उक्तञ्च ।

"अज्ञानं तत्कार्यं तदीयभेदानशेषतो निजसत्तयैव स्फुटं

आत्मनि कर्त्तृत्वानुसन्धानं वा अयथार्थात्मस्मरणं स्वप्नस्त्वनुभव एव न स्मृतिरिति वक्ष्यते। स्मृतिभिन्नं

च विस्मर्त्तुं मह्यो न शक्या सुप्तादिषु स्वप्रभयास्मि साचिदिति" "सचात्मा सङ्गः असङ्गोऽयं पुरुषः असङ्गो न हि सज्जत" इत्यादि-श्रुतेः अत एवाकर्त्ता सः तदुक्तम् भगवता।

"प्रकृत्यैव च कर्म्माणि क्रियमाणानि सर्वशः।
यः पश्यति तथात्मानमकर्त्तारं स पश्यती"ति॥
"अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः।
शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते"॥
यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते।
सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते॥
यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत"॥

इति च तस्मादात्मासङ्गश्चिद्रूपः स्वप्रकाशोऽकर्त्ता। कस्तर्हि कर्त्तेति चेदहङ्कार इति वदामः साभासान्तःकरणमहङ्कारः। कथन्तर्ह्यात्मनोऽहङ्करोमीति कर्त्तृत्वानुभवः अहङ्कारचिदात्मनोरितरेतराविवेकेनान्योन्याध्यासात्॥ २॥

तस्मादात्मनि कर्त्तृत्वाद्यनुसन्धानमयथार्थात्मस्मरणमित्याह आत्मनीति। नच "कर्त्ता शास्त्रार्थवत्त्वादि"ति सूत्रकारेणात्मन कर्त्तृत्वप्रतिपादनात् तस्मिन्कर्त्तृत्वानुसन्धानस्य कथमयाथार्थ्यमिति वाच्यम्, तत्र सोपाधिकात्मन एव कर्त्तृत्वप्रतिपादनात्। 'यथा च

ज्ञानमनुभूतिः। साच द्विविधा यथार्थाऽयथार्था चेति यथार्थानुभूतिः प्रमा ॥ ४ ॥

तच्चोभयथे'त्युत्तराधिकरणे तेनैव शुद्धस्यात्मन कर्त्तृत्वापवादा दन्यथानुज्ञापरिहारो देहसम्बन्धाज्ज्योतिरादिवदि त्युत्तर सूत्र-विरोधापत्ते । नचात्मन कर्त्तृत्व प्रतिपाद्य पुनस्तदपवादे सूत्र कारस्य किम्प्रयोजन "प्रक्षालनाद्धि पङ्कस्य दुरादस्पर्शन वर"मिति न्यायादिति वाच्यम्, आत्मन सोपाधिक कर्त्तृत्वमपि नास्तीति वदत साङ्ख्यस्य निराकरणार्थं तदात्मनोऽस्तीति प्रसाध्य तच्च कर्त्तृत्वमात्मन पारमार्थिकमिति वदतो नैयायिकादेर्निराकरणार्थ मुत्तर सूत्रे कर्त्तृत्वमपोद्यते । अन्यथा स्ववाक्यविरोध श्रुतिस्मृति विरोधश्च प्रसज्येत । तस्मादात्मन कर्त्तृत्वप्रतिपादन तदपवादश्चेति द्वयमर्थवदेव । तस्मादात्मनि कर्त्तृत्वाद्यनुसन्धानस्यायथार्थत्वमुपपन्न मेवेति भाव । ननु स्वप्नस्याप्ययथार्थस्मृतित्वात्कुतो न स्मृतेत इत्यत आह स्वप्नश्चेति । स्थ पश्यामीत्यनुभवादिति भाव । न स्मृतिरिति तयोर्भेदाभावादिति भाव । स्मृति निरूप्य क्रमप्राप्ता मनुभूति लक्षयति स्मृतीति । स्मृतित्वावच्छिन्न स्मृतिभिन्नज्ञानमनु-भूतिरनुभव इत्यर्थं । स्मृतावतिव्याप्तिवारणाय स्मृतिभिन्नमित्युक्तम् घटादावतिव्याप्तिवारणाय ज्ञानमिति । तां विभजते सा चेति । प्रथमां व्युत्पादयति यथार्थेति । यथार्था चासावनुभूतिश्चेति कर्म धारय । तस्या यथार्थ्यं नामाबाधितार्थविषयत्व तद्वति तत्प्रकारकत्व

सा निरूपिता। बाधितविषयानुभूतिरयथार्था। सापि द्विविधा, संशयोनिश्चयश्चेति। एकस्मिन् धर्म्मिणि भासमानविरुद्धनानाकोटिकज्ञानं संशयः। एकस्मिन्

वा। न च निर्विकल्पकज्ञानस्य निष्प्रकारत्वादव्याप्तिरिति वाच्यम्, शब्दनिष्प्रकारकस्य तस्याप्रमाणिकत्वेनानङ्गीकारात्।

नन्वभिनवोत्पन्न घटादावर्मविकल्पकस्य जन्यविशेषणज्ञानजन्यत्वस्य वक्तव्यत्वेन निर्विकल्पकत्वसिद्धिरिति चेन्न, विशेषणसन्निकर्षादेव तदुपपत्तेः। अन्यथातिप्रसङ्गाद्विशेषणज्ञानस्य विशिष्टज्ञानहेतुत्वे मानाभावाच्च। नच दण्डीतिज्ञाने विशेषणज्ञानस्य विशिष्टज्ञानत्वावच्छेदेनान्वयव्यतिरेकाभ्यां कारणत्वस्य क्लृप्ततयान्यत्रापि तदस्तिति वाच्यम्, दण्डीति ज्ञानस्य विशिष्टवैशिष्ट्यावगाहिज्ञानत्वेन नच विशेषणतावच्छेदकप्रकारकज्ञानस्यैव कारणतयाऽन्वयव्यतिरेकयोरन्यथाऽसिद्धत्वेन विशेषणज्ञानस्य तत्त्वे मानाभावात्। तस्माच्छाब्द-निष्प्रकारकज्ञानमप्रमाणिकमेवेति न क्वाप्यव्याप्तिः। नच शाब्द-निष्प्रकारकप्रमायामव्याप्तिरिति वाच्यम्, अस्य व्यावहारिकप्रमा-लक्षणत्वेन तस्यास्तन्निष्प्रकारकप्रमायात्वादतो यथार्थानुभूतिः प्रमेति निरवद्यम् ॥ ४ ॥

व्याख्यास्याने सर्वसाधारणं तर्हि सा प्रमा निरूपणीयेत्याकाङ्क्षायामाह सेति। द्वितीयपरिच्छेद इति शेषः। द्वितीयाया लक्षणमाह बाधितेति। विषयाभावप्रमायाधस्तद्विषयोबाधितः स विषयो यस्यास्तथा तथा प्रमायामतिव्याप्तिवारणायायथार्थविशेषणमयथार्थत्वं ता-

धर्म्मिणि स्वाकारविरुद्धधर्म्मद्वयवैशिष्ट्यावगाहिज्ञानाविरुद्धज्ञानं संशय इति केचित्। स च द्विविधः प्रमाणसंशयः प्रमेयसंशयश्चेति। तत्र प्रमाणगतासम्भावनाप्रमाणसंशयः। यथानाभ्यासदशायां समोत्पन्नं जलज्ञानं प्रमाणं नवेति संशयः। स च प्रमाणनिश्चयान् निवर्त्तते ॥ ५ ॥

वतिव्याप्तिवारणाय द्वितीयं तां विभजते सापीति। संशयं लक्षयति एकस्मिन्निति। एकैकस्मिन्धर्म्मिणीत्यर्थः। अन्यथैते आम्रा वा पनसा वेति समूहालम्बनसंशये व्याप्तिः स्यात् स्थाणुपुरुषाविति समूहालम्बनभ्रमेऽतिव्याप्तिवारणाय भासमानेत्युक्तं समूहालम्बनप्रमायामतिव्याप्तिवारणाय विरुद्धेत्युक्तम्। ननूक्तलक्षणसंशयस्य धर्म्यंशप्रमायामतिव्याप्तिरित्याशङ्क्य मतान्तरेण लक्षणमाहैकेति। एकैकस्मिन्विशेष्ये स्वस्य संशयत्वेनाभिमतस्य योऽयमाकारः स्थाणुत्वादिस्तद्विरुद्धोयोऽयमाकारः पुरुषत्वादिस्तदुभयवैशिष्ट्यावगाहि यज्ज्ञानं स्थाणुर्वा पुरुषो वेत्यादिविरुद्धं ज्ञानं संशय इत्यर्थः। अस्मिन् पक्षे एककोटिकज्ञानमपि कश्चित्संशयाभिमतं केचित् नृसिंहाश्रमश्रीचरणाः। संशयं विभजते स चेति। प्रमाणसंशयं व्युत्पादयेति तत्रेति। तयोर्मध्य इत्यर्थः। प्रमाणसंशयोद्विविधः प्रमाणसंशयः करणसंशयश्च तत्राद्यमाह यथेति। प्रमाणसंशयः कस्मान्निवर्त्तत इत्याशङ्क्याह स चेति। ननु प्रमाणस्य भावः प्रामाण्यं तदप

प्रामाण्यनिश्चयस्तु स्वत एव प्रामाण्यं नाम तद्वति

परमात्मत्वेव किं जातिरूपाधिर्वा नाद्य अव्याप्यवृत्तित्वात । न द्वितीयस्तस्यानिर्वचनादित्याशङ्क्य प्रामाण्यलक्षण वक्तु प्रामाण्य परतो गृह्यते इति नैयायिका स्वतो गृह्यत इति मीमांसका ॥ ५ ॥

तत्र परमत दूषयितु स्वमतमाह प्रामाण्येति । एवकारेण प्रामाण्यस्य परतोग्राह्यत्व प्रतिषिध्यते तल्लक्षणमाह प्रामाण्य नामेति । प्रामाण्यनिश्चयस्तु स्वत एवेत्युक्तम । तत्र प्रामाण्यस्वरूप निरूप्य स्वतस्त्व निर्वक्ति तस्येति । प्रामाण्यस्येत्यर्थ । स्वशब्देन प्रामाण्यमु च्यते तदाश्रयो ज्ञान तद्ग्राहिका यावती सामग्री तद्ग्राह्यत्व स्वतस्त्व-मित्यक्षरयोजना अत्र भट्टा एव योजयन्ति प्रथममय घट इति ज्ञान जायतेऽनन्तर मया घटोज्ञात इति घटस्य ज्ञातत्व प्रतिस-न्धीयते तया ज्ञाततया ज्ञानमनुमीयते । तथाहि घटोज्ञानविषय । ज्ञाततावत्त्वात् सुखादिवदित्यनेन प्रकारेण ज्ञातताऽलिङ्गकानुमित्या घटज्ञान तद्विष्ठ घटत्ववति घटत्वप्रकारक प्रामाण्य च गृह्यते । ततश्च स्वाश्रयस्य घटज्ञानस्य ग्राहिका यावती सामग्री ज्ञातताऽलिङ्ग-कानुमितिरूपा तद्ग्राह्यत्व प्रामाण्यस्य स्वतस्त्वमिति तच्चिन्त्यम्, ज्ञानविषयतातिरिक्तज्ञातताया प्रमाणाभावात । ज्ञातो घट इति प्रतीते र्ज्ञानविषयत्वेनाप्युपपत्ते । अन्यथा दृष्टो घटो ध्वस्तोघट इति प्रतीत्या दृष्टत्वादिकमपि सिध्येत । किञ्चातीतोघटोज्ञात इत्यनुसन्धानेन तत्रापि ज्ञातता सिध्येत् । न चेष्टापत्तिर्निराश्रय-

तत्प्रकारकत्वं तस्य स्वतस्त्वं-नाम यावत् स्वाश्रयग्राहक-

धर्म्मासम्भवात् । किञ्च(१) ज्ञाततायाः अपि ज्ञानविषयतया तदापि ज्ञातता स्यात् तथानवस्थाप्रसङ्गस्तस्माद् ज्ञाततायाः अप्रामाणिकत्वात्तल्लिङ्गकानुमित्याज्ञानं प्रामाण्यञ्च गृह्यत इत्यसङ्गतमेतदिति मन्यमानाः । प्रभाकरास्तु एवं वर्णयन्ति घटमहं जानामीत्येवं रूपं ज्ञानं घटं कर्म्म तया भासयति आत्मानमाश्रयत्वेन स्वं स्वप्रकाशत्वेन ततश्च स्वाश्रयज्ञानस्य ग्राहिका यावती सामग्री स्वप्रकाशज्ञानरूपा तया स्वनिष्ठप्रामाण्यं गृह्यत इति प्रामाण्यस्य स्वतस्त्वं तदपि न जन्यज्ञानस्य स्वप्रकाशत्वे मानाभावात् । अन्यज्ञानेनान्यग्रहणेऽतिप्रसङ्गात् तदिदमप्यसङ्गतमितिमन्यमाना मुरारिमिश्रा एवं योजयन्ति घटेन्द्रियसन्निकर्षानन्तरमयं घट इति ज्ञानं जायते पश्चाद् घटमहं जानामीत्यनुव्यवसायेन व्यवसायज्ञानं गृह्यते विषय विषयज्ञानं व्यवसायः । विषयिविषयज्ञानमनुव्यवसायः ततश्च स्वाश्रयस्य व्यवसायस्य व्यवसायस्य ग्राहिका यावती सामग्री अनुव्यवसायादिरूपा तया व्यवसायनिष्ठं प्रामाण्यं गृह्यते । तेन तस्य पूर्वमुपस्थितत्वादिदमेव प्रामाण्यतस्त्वमिति तत्तुच्छं अनुव्यवसायस्य प्रागेव निरस्तत्वात्तेन तद्ग्रहणायोगात् । स्वतः प्रामाण्यस्य निराकृतत्वेनात्ममनःसंयोगासम्भवस्योक्तत्वाच्च ज्ञानस्य मानसप्रत्यक्षत्वायोगात् । तस्मादिदमसङ्गतमित्यभिप्रेत्य स्वपक्षे स्वतस्त्वसाधनं योजयति

---

(१) क, ख, तस्मादिति पा० ।

ग्राह्यत्वम्, स्वाश्रयोवृत्तिज्ञानं तद्ग्राहकं साक्षिचैतन्यं तेन तन्निष्ठं प्रामाण्यं गृह्यत इति स्वतः प्रामाण्यम् ॥ ६ ॥

स्वाश्रयेति । ततश्च स्वाश्रयस्य ग्राहिका यावतीसामग्री साचीरूपा तद्ग्राह्यत्व प्रामाण्यस्य स्वतस्त्वमित्याह इति स्वत प्रामाण्यमिति ।

नन्वेव भवतामपि साचिणि किं प्रमाण न तावत्प्रत्यच रूपादिहीन[1]त्वेन चचुराद्यगोचरत्वात् मनसोऽनिन्द्रियत्वेनाप्रमाणत्वाच्च । नाप्यनुमान तद्व्याप्यलिङ्गाभावात् । नचाहङ्कारोऽनात्मा दृश्यत्वाद् घटवदित्यनुमानेन पचधर्मतावलात् साचिसिद्धिरिति वाच्यम् । पचतावच्छेदकानिर्वचनेनानुमानावतारात् । अतएवाहङ्कार' स्वव्यतिरिक्तद्रष्टृको दृश्यत्वात् समतवदिति परास्तम् । नाप्युपमान तस्य नियतविषयत्वाच्चाप्यागमस्तस्यार्थान्तरपरत्वात् नाप्यर्थापत्तिस्तेन विनतदनुपपत्तेरभावात् । नच सुखादिव्यवहार स्वगोचरज्ञान विनानुपपद्यमानस्तत्कल्पयति तच साचिचैतन्यमेवेत्यर्थापत्त्या तत्सिद्धिरिति वाच्यम् । सुखादिव्यवहारस्यात्मसमवेतसुखादिविषयज्ञानेनोपपन्नत्वेनार्थापत्तेरन्यथोपपत्ते । तस्मात् प्रमाणाभावस्य तवापि तुल्यत्वात् कथ प्रामाण्यस्य साचिग्राह्यत्व स्वतस्त्व वेत्यत' प्रामाण्यस्य परतस्त्वमभ्युपगन्तव्यम् । परतस्त्व नाम यावत् स्वाश्रयग्राहकातिरिक्तग्राह्यत्वम् । तथाहि प्रामाण्याश्रयव्यवसायज्ञानमनुव्यवसायेन

---

(१) म च, रहितत्वनति पा० ।

गृह्यते। प्रामाण्यन्त्वनुमानेन गृह्यते। तथाहि विवादगोचरापन्न व्यवसायज्ञान प्रमाण भवितुमर्हति समर्थप्रवृत्तिजनकत्वाद्व्यतिरेकेणाप्रमाणज्ञानवदिति। अथवा प्रथमानुव्यवसायेन व्यवसायो गृह्यते। द्वितीयानुव्यवसायेन तन्निष्ठ प्रामाण्यम। अन्यथा प्रथमोत्पन्न जलज्ञान प्रमाणमप्रमाण वेति संशयो नस्यादनभ्यासदशायाम्। तस्मात्परत एव प्रामाण्यग्रह इत्यचोच्यते "साक्षी चेता केवलो निर्गुणश्चेति" "वाच साक्षी मनस साक्षी" "एतद्यो वेत्ति त प्राहु क्षेत्रज्ञमिति तद्विद" "ज्योतिषामपि तज्ज्योतिस्तमस परमुच्यते" इत्यादि श्रुतिस्मृतिशतेभ्योऽज्ञानतत्कार्य्यावभासक साक्षीचिदात्मावश्यमभ्युपगन्तव्योऽन्यथोदाहृतश्रुतिस्मृतीनामप्रामाण्यप्रसङ्गात्। नच तासामर्थान्तरपरत्वमिति वाच्यम्, उपक्रमादिलिङ्गैस्तत्रैव तात्पर्य्यस्य निश्चितत्वेन तदयोगात्। तथानुमानादपि तत्सिद्धि। तथाहि अन्त करणतद्धर्मातिरिक्ताहमनुभवगोचरोऽहमनुभवे प्रकाशमानो वा स्वव्यतिरिक्तद्रष्टृक दृश्यत्वाद् घटवत्। नचाप्रयोजकत्व निरुपाधिकत्वमहत्वारभङ्गप्रसङ्गात्। एव सुखादिव्यवहारस्य स्वगोचरज्ञान विनानुपपत्त्यासाक्षिसिद्धि। नचात्मसमवेतसुखादिविषयज्ञानेन तद्व्यवहार इति वाच्यम्। जन्यज्ञानस्यात्मसमवेतत्वासिद्धे। अन्यथा "ह्रीर्धीर्भीरित्येतत्सर्वं मन एवे"ति श्रुतिविरोधप्रसङ्गात्। जीवात्मसमवेतस्य नित्यज्ञानस्य त्वयानङ्गीकाराच्च। किञ्चात्मन सयोगस्य सम्बन्धिनो निरवयवतयानिराकृतत्वेनात्मनि ज्ञानोत्पत्तेरसम्भवेन ज्ञानस्यात्मसमवेतत्वासिद्धेश्च। तस्मादनन्यथासिद्धश्रुतिस्मृत्यनुमानार्थापत्तिभ्यानुभवे साक्षी सिद्ध इति तेन प्रामाण्य गृह्यत

इति स्वतस्त्वं प्रामाण्यस्य सम्भवति। एतेन प्रामाण्यस्य परतोग्राह्यत्वं प्रत्युक्तम्। अनुव्यवसायस्य प्रागेव निरस्ततया तेन ज्ञानं गृह्यत इति दूरत एव द्वितीयानुव्यवसायेन प्रामाण्यग्रहो दूरतरः। किञ्च निश्चितप्रामाण्येनानुव्यवसायेन प्रामाण्यं गृह्यत आहोस्विद् निश्चितेन वा। नाद्योऽनवस्थापत्तेः। तथाहि अनुव्यवसायस्य स्वतः प्रामाण्यनिश्चयेऽपसिद्धान्तापत्तेः। अन्येन चेत्तस्यान्येन तस्याप्यन्येनेत्यनवस्थापत्तेः। नच विषयान्तरसञ्चारादनवस्थोपरम इति वाच्यम्। तर्ह्यनिश्चितप्रामाण्येनानुव्यवसायेन प्रामाण्यग्रह इत्यायातं तत्रश्चानुव्यवसायेनैव प्रमाणग्रहोऽस्तु। किं तेनापराद्धम्।

नन्वेवं ज्ञानग्राहकेणानुव्यवसायेनैव व्यवसायप्रामाण्यनिश्चये इदं ज्ञानं प्रमाणं न वेति संशयो न स्यादिति चेन्न। दोषवशेन तदुपपत्तेः। नच निश्चितेऽर्थे दोषवशेन कथं संशय इति वाच्यम्। दोष घटितसामग्र्यास्तादृशस्वभावत्वात्। अन्यथा प्राच्यां प्रतीचित्वभ्रमसंशयान्यतरानन्तरं सूर्य्योदयादिनेयं प्राचीति निश्चयानन्तरं पुनः संशयाद्यभावप्रसङ्गात्। नचेष्टापत्तिस्तयोरनुभवसिद्धत्वात्। तस्मादप्रामाण्यशङ्काशून्येनाद्येनैवानुव्यवसायेन प्रामाण्यनिश्चयः। अन्यथासर्वचानाश्वासप्रसङ्गात्। एतेन द्वितीयो विकल्पपरास्तः। अनिश्चितस्य तद्ग्राहकत्वायोगात् अप्रामाण्यशङ्काशून्यस्यैव ज्ञानस्य विषयनिश्चायकत्वाच्च। अतएवानुमानेन प्रामाण्यं गृह्यत इत्यपास्तमुक्तदोषसत्त्वात्। नन्वस्तु तर्ह्याद्येनैवानुव्यवसायेन प्रामाण्यग्रहः। न तदसम्भवस्योक्तत्वात्। तस्मात्साक्षिणैव वृत्तिज्ञाननिष्ठं प्रामाण्यं गृह्यते ॥ ६ ॥

अप्रामाण्यं [१]तु परतो गृह्यते। तच्च तद्भाववति तत्प्रकारकत्वं तदभाववत्त्वस्य। वृत्तिज्ञानानुपनीत-

---

नन्वेवं सत्यप्रामाण्यमपि स्वत एव गृह्यतामुक्तन्यायस्य तत्रापि तुल्यत्वादित्याशङ्क्याह अप्रामाण्यमिति। किं तदप्रामाण्यमित्यत आह तच्चेति। अस्ति च शुक्त्यादाविदं रजतमिति ज्ञाने रजताभाववति रजतप्रकारकत्वं वस्तुतो रजतस्य तत्राभावात्। नच भूतले घट इति प्रमायामतिव्याप्तिरिति वाच्यम्। भूतलघटयोरेकचैतन्याध्यस्तत्वेन तद्वति तत्प्रकारकतया तत्प्रमाया तदभावाच्छुक्तौ तु तत्समानसत्ताकतया रजतस्य तत्रासत्त्वेन प्रातीतिकरजतसत्त्वेऽपि नातिव्याप्तिर्नत्वसम्भव इत्यर्थः। वृत्तीति। नेदं रजतं किन्तु शुक्तिरिति बाधात्मकाधिष्ठानतत्त्वतत्साक्षात्कारवृत्त्या तदभाववत्त्वस्यानुपस्थितत्वेन तत्साक्षिणा ग्रहीतुं न शक्यते। अन्यथातिप्रसङ्गात्। तस्मादप्रामाण्यं परत एव गृह्यते ज्ञानग्राहिका[१]तिरिक्तसामग्र्येत्यर्थः। तथाहि ज्ञानान्तरं प्रवृत्तिर्द्विधा संवादिप्रवृत्तिर्विसंवादिप्रवृत्तिश्चेति आद्या फलपर्यन्ता। द्वितीया तच्छून्या तत्र विसंवादिप्रवृत्त्याऽप्रामाण्यं ज्ञानस्यानुमीयते। तथाहि विवादास्पदं शुक्तौ रजतज्ञानमप्रामाण्यं भवितुमर्हति विसंवादिप्रवृत्तिजनकत्वाद्व्यतिरेकेण प्रमावदिति ज्ञानग्राहि[१]कातिरिक्तेनानुमानेन ज्ञानस्याप्रामाण्यं निर्धा-

---

(१) (म) 'तु' पाठो न।

(१) म, ब पाठरूमि वा। (१) म, ब, पाठरूमि वा।

त्वेन साक्षिणा ग्रहीतुमशक्यतया परत एवाप्रामाण्यं गृह्यते ॥ ७ ॥

यते ज्ञानं तु साक्षिणा गृह्यतेऽप्रामाण्यं पुनरनुमानेन तस्मात्परत एवाप्रामाण्यं गृह्यत इति भावः। एवं प्रमा स्वत एवोत्पद्यते च स्वतस्त्वं नामोत्पत्तौ ज्ञानसामान्यसामग्रीमात्रप्रयोज्यत्वम्। नचाप्रमायामतिव्याप्तिस्तस्यास्तदतिरिक्तदोषजन्यत्वात्। नच प्रमायामपि दोषाभावजन्यतया परतस्त्वापत्तिरिति वाच्यम्। परमत गुणजन्यत्वस्यैवोत्पत्तौ परतस्त्वेन विवक्षितत्वात्। तस्यास्माभिरनङ्गीकारात्। प्रमामात्रेऽनुगतगुणस्यासम्भवेन तस्याप्रामाणिकतया च प्रमायास्तज्जन्यत्वानुपपत्तेः। किञ्च दोषाभावस्यापि न प्रमाहेतुत्वमभावमात्रस्य श्रुत्या कारणत्वप्रतिषेधात्। किन्तु दोषाभावस्य परमते दण्डत्वादिवदनुकूलमात्रत्वम्। अपि च दोषस्यान्वयव्यतिरेकाभ्यां प्रमोत्पत्तिप्रतिबन्धकत्वेन तदभावस्य कारणत्वं न सम्भवत्येव। प्रतिबन्धकाभावस्य कार्यानुत्पादकस्याग्रिमसमयसम्बन्धविघटकतयान्यथा सिद्धत्वात्। तस्मात्स्वत एव ज्ञानसामान्यसामग्रीमात्रात्प्रमोत्पद्यत इति सिद्धम्।

अप्रमा तु परत एवोत्पद्यते। ज्ञानसामान्यसामग्र्यतिरिक्तस्य दोषस्यान्वयव्यतिरेकाभ्यामप्रमां प्रति कारणत्वावधारणाच्च[1]। तस्मादुत्पत्तावपि परत एवाप्रामाण्यमिति सर्वमवदातम् ॥ ७ ॥

---

(१) ग, चेति पाठो न।

प्रामाण्यस्वतस्त्वपक्षे संशयो दोषवशादुपपद्यते। इत्ययं (१)प्रमाणसंशयो वेदान्ताद्वितीये ब्रह्मणि प्रमाणं न वेति संशयः। करणगता सम्भावना सा च श्रवणेन निवर्त्तते। तच्च निरूपितम्। तदपि श्रवणं शारीरक प्रथमाध्यायपठनेन निष्पद्यते। प्रमेयगतासम्भावना द्वि

ननु प्रामाण्यस्योत्पत्तौ ज्ञप्तौ च स्वतस्त्वाङ्गीकारेऽनभ्यासदशाया-मिदं जलज्ञानं प्रमाणमप्रमाणं वेति संशयः कथं स्यान्निश्चितेऽर्थे संशयायोगादत आह प्रामाण्येति। स्वत इति ज्ञानग्राहकग्राह्यत्वपरं इत्यर्थः। दोषेति। दोषघटितसामग्र्या बलवत्त्वात्प्रामाण्यसंशय उपपद्यते इत्यर्थः। एवमुत्पत्तौ ज्ञप्तौ च प्रामाण्यस्य स्वतस्त्वस्य निश्चितत्वात् प्रामाण्यनिश्चयेन संशयनिवृत्तिरुत्पद्यत इत्यभिप्रेत्योक्तं प्रामाण्यसंशयमुपसंहरति इतीति। इदानीं करणसंशयं निरूपयति वेदान्तेति। सा कस्मान्निवर्त्तते इत्यपेक्षायामाह सा चेति। तर्हि श्रवणं निरूप्यतामित्याकाङ्क्षायामाह तच्चेति। द्वितीयपरिच्छेदे तात्पर्य्यनिरूपणावसरे इति शेषः। तच्च श्रवणं कुतो निष्पद्यत इत्याशङ्क्याह शारीरक इति। प्रमाणगतासम्भावनां द्विप्रकारां निरूप्य प्रमेयगता संभावनां निरूपयितुं विभजते प्रमेयेति। केयमात्मगता सम्भावनेत्याकाङ्क्षायामाह प्राणेति। अथ

---

(१) (क) प्रम च इति पा।

विधा अनात्मगतात्मगता चेति । स्थाणुर्वा पुरुषोवेत्यनात्मसंशयः । आत्मसंशयोऽनेकविधः । तथाहि ब्रह्माद्वितीयं सद्वितीयं वा । अद्वितीयत्वेऽपि आनन्दगुणकं वानन्दस्वरूपं वा इत्यादि परमात्मगतसंशयः । आत्मा देहाद्यतिरिक्तो वा न वा देहाद्यतिरिक्तत्वेऽपि कर्त्ता वाऽकर्त्ता वा अकर्त्तृत्वेऽपि चिद्रूपोऽचिद्रूपो वा चिद्रूप-

---

साधारणदर्शनजो विशेषदर्शनेन निवर्त्तते इति द्रष्टव्यं विप्रतिपत्तिजन्यात्मसंशयोऽनेकप्रकार इत्याह आत्मेति । विरुद्धार्थप्रतिपादकानेकवचनं विप्रतिपत्तिः । सा भाष्यकारेण निरूपिता[१] । देहमात्र चैतन्यविशिष्टमात्मेति प्राकृता लोकायतिकाश्च प्रतिपन्नाः । इन्द्रियाण्यात्मेत्यपरे । मन आत्मेत्यन्ये । क्षणिकं विज्ञानमात्मेत्यपरे । शून्यमात्मेत्यपरे । देहेन्द्रियादिव्यतिरिक्तः संसारी कर्त्ता भोक्तेत्यन्ये । आत्मा तु केवल भोक्ता न तु कर्त्तेत्येके । [२]तदन्यः सर्वज्ञः सर्वशक्तिरीश्वर इति केचित् । आत्मा तु भोक्ता स इत्येके । एवं बहवो विप्रतिपन्ना इत्येवं विप्रतिपत्तिवशाज्जायमानमनेकप्रकारमात्मसंशयं दर्शयति तथाहीत्यादीति ।

"सलिल एको द्रष्टाऽद्वैत" इत्यादि श्रुत्याद्वैतात्मावगम्यते । स चोपाधिभेदाद्द्विविधः परमात्मा जीवात्मा चेति । तत्र मायोपाधिकः परमात्मा । स्थूलसूक्ष्मकारणशरीरोपाधिको जीवात्मा स

---

[१] ग, दर्शितेति पा ।　　[२] ग, तद्व्यतिरिक्त इति पा ।

त्वेऽपि आनन्दात्मको वा न वेत्यादि जीवगतः संशयः। जीवस्य सच्चिदानन्दरूपत्वेऽपि परमात्मना सहैक्यं सम्भवति न वा ॥ ८ ॥

ऐक्येऽपि तज्ज्ञानं मोक्षसाधनं न वा मोक्षसाधनत्वेऽपि तज्ज्ञानं कर्मसमुच्चितं मोक्षसाधनं वा केवलज्ञानं

एव कर्त्ता भोक्ता च उपाधिविवेकेन द्वयं किन्तु शुद्धोऽद्वैतो भवति। तदुक्तम्।

"जीवात्मा परमात्मा चेत्यात्मा द्विविध ईरितः।
चित्तादात्म्यात्त्रिभिर्देहै र्जीवः सन् भोक्तृतां व्रजेत् ॥
परमात्मा सच्चिदानन्दस्तादात्म्यं नामरूपयोः।
गत्वा भोग्यत्वमापन्नस्तद्विवेके तु नोभयम्" ॥

एवञ्च पूर्वोक्तः परमात्मा तत्पदार्थः। जीवस्त्वं पदार्थः। ततस्तत्पदार्थस्य परमात्मनः संशयमनेकप्रकारं दर्शयति ब्रह्मेति। आदिशब्देन ज्ञानगुणकं वा ज्ञानस्वरूपं वा सत्ताजातिमद्वा सत्तास्वरूपं वा सगुणं वा निर्गुणं वेत्यादिसंशया गृह्यन्ते त्वं पदार्थे संशयमनेकप्रकारं दर्शयत्यात्मेति। आदिशब्देनेन्द्रियादयो गृह्यन्ते। अपायादिशब्देन परिणामी वा कूटस्थो वा सत्ताजातिमान् वा सद्रूपो वेत्यादिसंशया गृह्यन्ते। एवं पदार्थसंशयं प्रदृश्य वाक्यार्थ संशयमाह जीवस्येति ॥ ८ ॥

इदानीं मोक्षसाधने संशयं दर्शयति ऐक्येऽपीति। ऐक्यगतेति।

वेत्यैक्यगतसंशयः। अयं सर्वोऽपि संशयो मननेन तर्कात्मकेन निवर्त्तते। तर्को नामानिष्टप्रसङ्गः। व्याप्यारोपेण व्यापकापादानमिति यावत्। व्याप्त्याश्रयो व्याप्यं व्याप्तिनिरूपकं व्यापकम्। तथाच यदि प्रपञ्चः सत्यस्स्यात्तर्हि अद्वितीयश्रुतिविरोधः स्यात्॥ ६॥

ऐक्यगतस्तज्ज्ञानगतः संशयः। अयं संशयः कस्मान्निवर्त्तेत इत्याह अयमिति। ननु कोऽयं तर्को येन सर्वोऽपि संशयो निवर्त्तते तत्राह तर्कोनामेति।

प्रसञ्जयतीति प्रसङ्गः अनिष्टप्रसञ्जक इत्यर्थः। तमेव विवृणोति व्याप्येति व्यापकेति व्यापकप्रसञ्जनमित्यर्थः। ननु किं तद्व्याप्यं किं तद्व्यापकमित्याकाङ्क्षायां तदुभयं व्युत्पादयति व्याप्तीति। व्याप्तिं निरूपयति ज्ञापयतीति व्याप्तिनिरूपकं व्याप्तिप्रतियोगीत्यर्थ.। व्याप्तिः पूर्वमेव निरूपिता इति भावः। एवं तर्कं निरूप्य बहूंस्तर्कांस्तत्तत्संशयनिवर्त्तकानुदाहरति तथाचेति। प्रपञ्चस्य सत्यत्वे जड़ाजड़योरैक्यायोगात्परमात्मनोऽद्वितीयत्वसाधकं तर्कमुदाहरति यदीति। नच भेदश्रुतिविरोधादद्वितीया श्रुतेरन्यपरतया न तद्विरोध इति वाच्यम्। फलवत्यज्ञाते़ऽर्थे श्रुतेस्तात्पर्यनियमाद्द्वैतस्याज्ञातत्वेन तज्ज्ञानान्निरतिशयपुरुषार्थसम्भवेन चाद्वैते श्रुतितात्पर्यस्य युक्तत्वाच्च तच्छ्रुतेरन्यपरत्वं भेदस्य मानान्तरसिद्धत्वेन तत्प्रतिपादकश्रुतेरनुवादकतयाऽप्रामाण्यप्रसङ्गात्। 'उदरमन्तरं कुरुतेऽथ

यदि परमात्मा जीवभिन्नः स्यात् तर्हि घटादिवदनात्मत्वेनानित्य एव स्यात् ॥ १० ॥

तस्य भयम्भवती'ति भेददर्शिनोऽनर्थश्रवणात्। 'अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मी'ति न स वेद यथा पशुरि'ति भेदस्य निन्दितत्वाच्च। श्रुतेस्तत्र तात्पर्यं न सम्भवत्येवातोऽद्वैतश्रुतेरतत्परत्वेन दुर्बलत्वाद्द्वैतश्रुतेस्तत्परत्वेन बलवत्त्वाद्बलवद्विरोधोऽनुपपन्न इति प्रपञ्चस्य सत्यतानुपपन्नम्। एवञ्च ब्रह्मणः पारमार्थिकत्वमद्वितीयत्वमनेन तर्केण सिद्ध्यतीति भावः ॥ ९ ॥

जीवपरमात्मैक्यसंशयनिवर्त्तकं तर्कमुदाहरति यदि परमात्मेति। नच परमात्मैव नास्ति यस्यानित्यत्वमापद्येतेति वाच्यम्। श्रुतिस्मृतीतिहासपुराणैस्तस्यावश्यमभ्युपेयत्वात्। नन्वाम्नायस्य क्रियार्थत्वादानर्थक्य"मतदर्थानामि"ति जैमिनिना सूत्रस्य वेदस्य विधिनिष्ठतया प्रामाण्यस्य प्रतिपादितत्वादीश्वरप्रतिपादकश्रुतिनां तद्बहिर्भूततया स्वार्थे प्रामाण्यायोगात् कथं तद्बलेनेतदभ्युपगमः। नचेश्वरप्रतिपादकश्रुतेरध्ययनविधिपरिगृहीतत्वेन कथमप्रामाण्यमिति वाच्यम्। कर्त्रादिभावकतया विध्यपेक्षितदेवतादिप्रकाशनपरत्वेन वा विधिपरत्वेन प्रामाण्योपपत्तेः। नच भिन्नप्रकरणनिष्ठानां कथं कर्मविधिपरत्वमिति वाच्यम्। तद्धुपासनाविधिपरत्वोपपत्तेः। नचोपासनाविधिशेषत्वेन परमात्मनः सिद्धत्वात्कथं तदभाव इति वाच्यम्। "असावादित्यो देवमधु"रित्यादिनादित्ये मधुत्वो-

पामनवज्जीवेऽविद्यमानमारोप्योपासनोपपत्तेः परमात्मप्रतिपादक श्रुतिनां तत्प्रतिपादने प्रवृत्तिनिवृत्त्योरसम्भवेन तत्र सङ्गतिग्रहायोगात्। परमात्मनः सिद्धवस्तुत्वेनापरिच्छिन्नतया हेयोपादेयशून्यतया च तत्प्रतिपादनफलाभावाच्च। तस्मादेवम्भावस्य विधिपरत्वेन प्रामाण्यमभ्युपगन्तव्यम्। तस्मात्कथं श्रुत्यादिभिः परमात्माभ्युपगमोऽतो निर्विषयोऽयं तर्क इति। अत्रोच्यते परमात्मावश्यमभ्युपगन्तव्यः। नच तत्र प्रमाणाभावः। श्रुतिस्मृतीतिहासपुराणानां सत्त्वात्। तथा हि

"स देव सौम्येदमग्र आसीत्" "एकमेवाद्वितीयम्" "सत्यं ज्ञानमनन्तम्ब्रह्म" "विज्ञानमानन्दम्ब्रह्म" "यः सर्वज्ञः स सर्वविद्यस्य ज्ञानमयं तपः" "एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्यामी" "यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरोऽयं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरोऽयमयत्येष त आत्मान्तर्याम्यमृतः" "ब्रह्म वा इदमग्र आसीत्" "आत्मा वा इदमेक एवाग्र आसीत्"

"यद्वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः।
तस्य प्रकृतिलीनस्य यः परः स महेश्वरः." ॥
नारायणः परम्ब्रह्म तत्त्वं नारायणः परम्।
नारायणः परं ज्योतिरात्मा नारायणः परम् ॥
ऋतं सत्यं परम्ब्रह्म पुरुषं कृष्णं पिङ्गलम्।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमः ॥
तमीश्वराणां परमं महेश्वरं
तं देवानां परमञ्च दैवतम्।

पतिं पतीनां प्रथमं पुरस्ता-
विदाम[1] देवं भुवनेश मीड्यम् ॥

"स एष इह प्रविष्ट आनखाग्रेभ्यः"। "स इवाश्वके"। "एतद्वै सत्यकामपरञ्चापरञ्च ब्रह्म हिरण्यगर्भं जनयामास। पूर्वं स नो बुद्धा शुभया संयुनक्तु। यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै तं ह देवात्मा बुद्धि प्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये"।

सर्वाणि रूपाणि विचिन्त्य धीरो
नामानि कृत्वाभिवदन् यदास्ते।
उपद्रष्टानुमन्ता च भर्त्ता भोक्ता महेश्वरः।
परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुषःपरः॥
समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्।
विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति॥
"उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।
ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति॥
आकाशमेकं हि यथा घटादिषु पृथक् पृथक्।
तथात्मैकोऽप्यनेकः स्यात् जलाधारेष्विवांशुमान्॥
ब्रह्मशर्वेन्द्रजामादिशुद्धिः परमा मता।
ममान्तरात्मा तव च ये चान्ये देहिसंज्ञकाः॥
सर्वेषां साक्षिभूतोऽसौ न ग्राह्यः केनचित् क्वचित्।
विश्वमूर्द्धा विश्वभुजो विश्वनासाक्षि नासिकः॥

(१) अ, विवामेति च।

एकश्चरति भूतेषु स्वैरचारी यथा सुखम् ।
यदक्षरं परंब्रह्म य ईश्वरः परः पुमान् ॥
गुणोर्मिसृष्टिस्थितिकालसंलयः
प्रधानबुद्ध्यादि जगत्प्रपञ्चसूः ।
स नोऽस्तु विष्णुर्मतिभूतिमुक्तिदः ॥
ब्रह्माक्षरमजं नित्यं यथासौ पुरुषोत्तमः ।
हिरण्यगर्भपुरुषप्रधानाव्यक्तरूपिणे ॥
ॐ नमो वासुदेवाय शुद्धज्ञानस्वभाविने ॥
यस्याज्ञया जगत्स्रष्टा विरिञ्चिः पालको हरिः ।
संहर्त्ता कालरुद्राख्यो नमस्तस्मै पिनाकिने ॥
अपुण्यपुण्योपरमेऽयं पुनर्भवनिर्भयाः ।
शान्ताः संन्यासिनो यान्ति तस्मै मोक्षात्मने नमः" ॥

इत्यादि श्रुतिस्मृतीतिहासपुराणवचनसहस्राणि नित्यशुद्धबुद्धमुक्तस्वभावं सर्वशक्तिमनन्तकल्याणगुणकपरमात्मानमुपक्रमोपसंहारादिलिङ्गनिश्चिततात्पर्य्याणि प्रतिपादयन्ति । न चैषामर्थान्तरता युक्ता श्रुतहान्यश्रुतकल्पनाप्रसङ्गात् । नचैषां कर्त्रादिस्तावकत्वं भिन्नप्रकरणस्थत्वात् । नचोपासनाविधिपरत्वं तदश्रवणात् । नचा"त्मा-वारे द्रष्टव्य" इत्यादिश्रवणात् ज्ञानविधिपरत्वं ज्ञानस्य प्रमाणवस्तुपरतन्त्रतया कर्त्तुमकर्त्तुमन्यथा कर्त्तुमशक्यत्वेन विधेयत्वायोगात् । नचैषां विधिपरत्वानङ्गीकारे प्रवृत्तिनिवृत्त्योरसम्भवेन सङ्गतिग्रहायोगादप्रमाण्याप्रामाण्यापत्तिरिति वाच्यम् । 'पुत्रस्ते जात' इति वाक्यश्रवणानन्तरं हर्षादिनानुमानेन पुत्रादिपदानां सङ्गतिग्रहदर्श-

नात्। तथाचापि तदुपपत्तेर्नामाप्रामाण्यापत्तिः। नच नद्यास्तीरे पञ्च फलानि सन्तीत्यादिवद्वेदान्तानां सिद्धार्थपरत्वेनाप्रामाण्यं तत्प्रतिपाद्यपरमात्मनोऽपरिच्छिन्नत्वेन हेयोपादेयत्वाभावेनानर्थक्यञ्चेति वाच्यम्। परमात्मनो मानान्तरायोग्यतयाऽज्ञातत्वेन तज्ज्ञानात् परमपुरुषार्थसम्भवेन च तत्प्रतिपादकवेदान्तानां प्रामाण्यप्रयोजनत्वोपपत्तेः। किञ्च

ज्ञानविधिपरत्वे वेदान्तानां विधेयज्ञानसाध्यस्य मोक्षस्य स्वर्गादेरिवानित्यत्वं प्रसज्येत अदृष्टजन्यभावकार्यस्यानित्यत्वनियमात्। नच तदिष्टं सर्वे मोक्षवादिनो मोक्षं नित्यमभ्युपगच्छन्ति। ततश्च सर्वतन्त्रविरोधः प्रसज्येत् "अनावृत्तिः शब्दादि"ति सूत्रविरोधश्च। तस्मादयुक्तमेतत्। अपि च मोक्षो नाम ब्रह्मभावो वाऽज्ञाननिवृत्तिर्वा सर्वथापि तस्य ज्ञानैकसाध्यत्वेन विधेयज्ञानजन्यापूर्वस्यानुपयोगान्निरर्थको ज्ञानविधिः। किञ्च

मोक्षस्योत्पाद्याद्यसम्भवेन ज्ञानैकव्यङ्ग्यतया ज्ञानविधिर्निरर्थकः। उत्पाद्याद्यन्यतमस्य विधिफलत्वात्। अभिव्यक्तिस्तु प्रमाणजन्येन केवलज्ञानेनापि सम्भवति। किञ्च ब्रह्मज्ञाने विधिराहोस्वित्तत्साधने श्रवणादौ वा। नाद्यो ब्रह्मणो विधेयज्ञानविषयतायोगात्। "अन्यदेव तद् विदितादथोऽविदितादधीत्या"दि श्रुत्या ब्रह्मणो विदिक्रिया कर्मत्वप्रतिषेधात्।

क्रियास्तु तर्हि सदेशासारविहितोपासमाकर्मत्वमिति चेदतिनिपुणमतिर्भवान् यतो ज्ञानाविषयस्योपासनाविषयत्वं ब्रवीति। किञ्च "यद्वा चानभ्युदितं येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धि नेदं

यद्यात्मानन्दो न स्यात्तर्हि कोऽपि न व्याप्रियेत'

यदिदमुपासते"त्यादि श्रुतिरुपासनाकर्मत्वमपि तस्य निषेधति । अविषयत्वे ब्रह्मणः शास्त्रयोनित्वादित्यधिकरणविरोध इति चेन्न । तन्निष्ठाज्ञाननिवर्त्तकत्वेन तद्विषयत्वोपचारादविरोधः । न द्वितीय दृष्टापत्तेः । वेदान्तानां ब्रह्मणि महातात्पर्य्येऽप्यवान्तरतात्पर्य्येण श्रवणादिविध्युपगमे बाधकाभावात् । तस्माद्वेदान्तानां विधिपरत्वासम्भवात्, सङ्गतिग्रहसम्भवाच्च । फलवदज्ञातार्थबोधकत्वेन प्रामाण्यसम्भवाच्च तन्मूलभूतस्मृत्यादीनामपि तुल्यन्यायत्वाच्छ्रुत्यादिभिः परमात्माङ्गीकार्य्य । किञ्च

जडस्य कर्म्मणः फलदातृत्वायोगात् परमात्मावश्यमभ्युपगन्तव्यः । तदेतत् सर्वमभिप्रेत्य भगवद्बादरायणेनोक्तम् "फलमत उपपत्ते"रिति तस्मात् स परमात्मा यदि जीवभिन्नः स्यात्तर्हि घटादिवदनात्मत्वेनानित्य एव स्यात् । नच तदिष्टं नित्यत्वप्रतिपादकश्रुतिस्मृतीतिहासपुराणविरोधप्रसङ्गात् । एतेन साङ्ख्यादयः परस्ता वेदितव्याः । अचेतनस्य प्रधानस्याप्रमाणिकत्वेन परमेश्वरस्यैव जगतोऽभिन्ननिमित्तोपादानत्वादत एव पतञ्जलिनैयायिकादयोऽपि निराकृताः । निरपेक्षेश्वरस्य निमित्तत्वे वैषम्यनैर्घृण्यप्रसङ्गात् श्रुत्यातदङ्गीकारे यथाश्रुति सोपाधिकसगुणेश्वरस्याभिन्ननिमित्तोपादानत्वं तस्यैव मायाविनिर्मुक्तस्य प्रत्यगभिन्नत्वमुक्तदोषपरिहाराय श्रुत्याद्यविरोधाय च सर्वैरवश्यमभ्युपगन्तव्यम् । तस्माद्यथोक्ततर्कस्य सविषयत्वात्ततो ब्रह्मात्मैक्यसंशयो निवर्त्तत इति भाव. ॥ १० ॥

इत्यादिव्याप्यारोपेण व्यापकप्रसञ्जनरूपा[1]स्तर्काः श्रुत्युक्ता द्रष्टव्याः। एतच्च मननं निरूपितमेतन्मननम् शारीरद्वितीयाध्यायपठनेन निष्पद्यते। संशयविरोधिज्ञानन्निश्चयः ॥ ११ ॥

इदानीं शोधितत्वंपदार्थस्य सुखात्मत्वसाधकं तर्कमुदाहरति यद्यात्मेति। आत्मा शोधितत्वंपदार्थः, आनन्द आनन्दस्वरूपः कोऽपि कश्चिदपि जनो न व्याप्रियेत न प्रवर्त्तेत स्वार्थमित्यर्थः। तथाच श्रुतिः "कोह्येवान्यात्कः प्राण्याद्यदेष आकाश आनन्दो न स्यादि"ति यद्यप्यत्राकाशशब्दः परमात्मपरः 'आकाशोऽर्थान्तरत्वादिव्यपदेशादि'ति न्यायेन रसं ह्येवायं लब्ध्वानन्दी भवतीति पूर्ववाक्ये रसशब्देनानन्दवाचिना परमात्मनो विवक्षितत्वादेष) ह्येवानन्दयतीत्युत्तरवाक्येऽपि एतच्छब्दार्थस्यान्येषामानन्दयितृत्वप्रतिपादनेन तस्यैव विवक्षितत्वाच्च। मध्येऽपि स एव विवक्षित इति तथापि शोधितयोस्तत्त्वंपदार्थयोर्नाममात्रभेदमन्तरेण स्वरूपभेदाभावात्। अत्रापि श्रुतिः प्रमाणं भवत्येव। नन्वेवं स्वसमवेतसुखार्थमपि प्रवृत्तिसम्भवात्। कथमनेन तर्केणात्मनः सुखात्मनः सुखात्मकत्वसिद्धिर्न सुखत्वेनैव सुखस्योद्देश्यत्वान्न स्वसमवेत-

---

[१] क, रूपास्तर्का इति पा ।

सुखत्वेन गौरवात्। न चैवं वैरिसुखोद्देशेनापि[१] प्रवृत्तिप्रसङ्ग इति वाच्यम्। तस्य प्रेमगोचरत्वाभावात्। स्वस्वरूपसुखस्य निरुपाधिकप्रेमगोचरत्वेन तदुद्देशेनैव निरुपाधिकप्रवृत्तेर्दर्शनात्। नच निरुपाधिकप्रेमगोचरत्वमपि सुखसमवायित्वेनात्मन इति वाच्यम्, तर्हि दुःखसमवायित्वेन निरुपाधिकद्वेषगोचरत्वमपि स्यात्। नच तत्कस्यचिदस्ति तस्मात्सर्वेषां स्वार्थे प्रवृत्तिदर्शनादात्मा सुखस्वरूप एवेति भावः। आदिशब्देन यदि परमात्मानन्दो न स्यात् तत्प्राप्तेर्[२]पुरुषार्थत्वं स्यात्। यदि परमात्मा चिद्रूपो न स्यात्। तर्हि घटादिवज्जड़त्वेन सूर्य्याद्यवभासकत्वं न संभवेत्। नचेष्टापत्तिः "तस्य भासा सर्वमिदं विभातिः तच्छुभ्रं ज्योतिषां ज्योतिः आधारमानन्दमखण्डबोधं विज्ञानमानन्दम्ब्रह्म" "ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यत" इत्यादि श्रुतिस्मृतिविरोधप्रसङ्गः। यदि परमात्मा सगुणस्स्यात्तर्हि निर्विशेषस्वरूपप्रतिपादकश्रुतिविरोधः स्यात्। यदि जीवश्चिद्रूपो न स्यात् तर्हि जड़त्वेन सावयवतया घटादिवदनात्मत्वेन जगदान्ध्यप्रसङ्गः। "योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः [३]स्वयं ज्योतिर्भवति" "क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ?" इत्यादिश्रुतिस्मृतिविरोधश्च प्रसज्येत यद्यात्मा कर्त्ता स्यात्तर्हि विकारितया[४] परिणामित्वेनानित्यस्स्यात्। यदि कर्म-

[१] ग, —सुखोद्देशो नापीति पाठः।
[२] ग, —र पुरुषार्थप्रसंग इति पाठ·
[३] ग, स्वयमिति पाठाधिक·।
[४] ग, परिणामित्वेनानित्यत्वं प्रसज्यत।

स च द्विविधः। यथार्थोऽयथार्थश्चेति। अविसंवादी यथार्थनिश्चयः। स चोक्त एव "विसंवाद्ययथार्थनिश्चयः"।

समुचितं ज्ञानं मोक्षसाधनं स्यात् तर्हि मोक्षस्यापि कर्मजतया स्वर्गस्येवानित्यत्वं प्रसज्येदेवमादि तर्का गृह्यन्ते। तर्हि तर्कात्मकं मननं निरूपणीयमित्याकाङ्क्षायामाह एतदिति। इदं मननं कुतो निष्पद्यतेऽत्राह एतन्मननमिति। क्रमप्राप्तस्य निश्चयस्य लक्षणमाह संशयेति॥ ११॥

तं विभजते स चेति। यथोद्देशं यथार्थं निरूपयति अविसंवादीति। फलपर्यवसायिज्ञानं यथार्थनिश्चयः निष्फलं ज्ञानं विसंवादि। अयथार्थं निश्चयं विभजते स चेति तर्क इति। उक्तो निरूपितः अतीतानन्तरग्रन्थ इति शेषः। विपर्ययलक्षणमाह विपर्यय इति। किमिदं ज्ञानस्य मिथ्यात्वं न तावद्बाध्यत्वं ज्ञानस्य स्वरूपेण तदयोगात्। नापि निर्विषयत्वनिर्विषयज्ञानाभावादित्याशङ्कायामाह अतस्मिंस्तदिति। तदभाववति तज्ज्ञानं मिथ्याज्ञानमित्यर्थः। ततो ज्ञानस्य बाधाभावेऽपि विषयबाधेन तत्सम्भवात्। बाध्यत्वं ज्ञानस्य मिथ्यात्वमित्यर्थः विपर्ययं विभजते स चेति निरुपाधिकं विभज्य यथोद्देशं व्युत्पादयति आद्येति शुक्ताविति। इदं रजतमिति भ्रमः। बाह्यो निरुपाधिकभ्रम इत्यर्थः। अहमित्याभ्यन्तरो निरुपाधिकभ्रम इत्यर्थः। सोपाधिकं भ्रमं विभज्य यथाक्रमं व्युत्पादयति सोपाधिकेति। लोहितेति। बाह्यः सोपाधिकभ्रम

सोपाधिको द्विविधः, बाह्य आभ्यन्तरश्चेति। लोहितः स्फटिक इत्यादिः बाह्यः। आकाशादिप्रपञ्च-भ्रमोऽपि बाह्यः सोपाधिकः; कर्माऽविद्याकार्यत्वात्, तत्त्वज्ञानिनो निवृत्तेऽप्यज्ञाने प्रारब्धक्षयपर्यन्तं प्रपञ्चो-

---

इत्यर्थः। **सोपाधिक इति**॥ सोपाधिकभ्रम इत्यर्थः। **ननु** आकाशादिप्रपञ्चभ्रमस्य कथं सोपाधिकभ्रमत्वम्? जपाकुसुमादि-वत् तदनुपलंभादित्याशङ्क्याह—**कर्मेति**॥ **ननु** अस्तु कर्माविद्या-कार्यम्, तथापि कथं सोपाधिकत्वम्? इत्याशङ्क्याह—**तत्त्व-ज्ञानिन इति**॥ ज्ञानेनावरणशक्तिमदज्ञाने निवृत्तेऽपि विक्षेप-शक्तिमदज्ञानेन प्रारब्धक्षयपर्यन्तमाकाशादिप्रपञ्चस्यानुभूयमान-त्वात्तद्भ्रमः सोपाधिक एव। न चोपाधेरनुपलंभः; कर्मसहित-विक्षेपशक्तिमदज्ञानस्यैवोपाधित्वादिति भावः॥ आभ्यन्तरसोपा-धिकभ्रमं दर्शयति—**कर्तृत्वादीति**॥ अहं कर्तेत्यात्मनि कर्तृ-त्वादिबुद्धिराभ्यन्तरः सोपाधिकः। तत्रान्तःकरण[1]मुपाधिः, तन्नि-ष्ठकर्तृत्वादिरात्मन्यविवेकेनारोप्यते, तस्यासङ्गत्वेन स्वतः कर्तृत्वा-योगात्, अतस्तस्य सोपाधिकत्वमिति भाव.॥

---

(१) अध्यासभाष्ये तु आत्मान्तःकरणयोः परस्परताद्रात्म्याध्यासपूर्वकं कर्तृत्वा-ध्यासस्य निरूपितमिति निरुपाधिकभ्रमत्वमेव स्वीकृतम्। यदि तु सोपाधिका-ध्यासे धर्मिताद्रात्म्याध्यासोऽपेक्षितमर्हं जपाकुसुमादात्म्याध्यासोऽपि तत्र वक्त्वे-तैनान्तव्य विचार।

पलब्धि[1] दर्शनात्। कर्तृत्वादिभ्रम आन्तरः। स्वप्नोऽप्याभ्यन्तरः सोपाधिकभ्रम एव, न तु स्मृतिः। तथाहि— जाग्रद्भोगप्रदकर्मोपरमे सति स्वप्नभोगप्रद-

---

नैयायिकास्तु—स्वप्नमयथार्थस्मरणं वदन्ति, तान्निराकर्तुं स्वप्नस्य सोपाधिकभ्रमान्तर्भावमाह—**स्वप्नोऽपीति ॥ सोपाधिकभ्रमः** अनुभव इत्यर्थः ॥ **ननु** स्वप्नस्य स्मृतिरूपत्वात् कथं भ्रमानुभवत्वम्? न च— तत्तोल्लेखाभावादिदं पश्यामीत्यनुभवाच्च तथात्वमिति—वाच्यम्, दोषवशेन तदितिस्थाने इदमित्युदयात् स्वप्नः स्मृतिरेव, निद्रादोषवशात् पश्यामीत्यपि भ्रम एव, अन्यथा रथतदुचितदेशादीनामभावाद्रथाद्युत्पादनसामग्र्यभावात्कथं तदुत्पत्तिस्तदनुभवो वा स्यात्? तस्मात् स्मृतिरेव[2] स्वप्न इत्याशङ्क्याह— **न स्मृतिरिति ॥** जाग्रत्कालीनरथतदुचितदेशतदुत्पादकसामग्र्यभावेऽपि जाग्रत्कालीनरथोत्पादकसामग्रीतो विल-

---

(१) ब्रह्मानन्दसरस्वत्यस्तु— अप्रामाण्यज्ञानानास्कन्दितपटुतरसंस्कारसहितदुष्यमाणादृष्टाभावादिसहिताधिष्ठानसाक्षात्कारस्यैवाज्ञाननिवर्तकत्वात् न प्रारब्धक्षयात् पूर्वमज्ञानं निवर्तते इत्याकाशादिभ्रमो निरुपाधिक एवेति मन्यन्ते। आकाशादिभ्रमस्याविद्यायाः दोषविधयैव हेतुत्वं न तु कुसुमस्येवोपाधिविधया। यस्य यद्रूपवत्त्व भ्रम तस्य पदार्थान्तरसन्निहितस्य पदार्थान्तरे तद्रूपभ्रमसमये उपाधित्वम्। यथा कुसुमाक्तवस्त्रादीनां लौहित्यवत्त्वादिधर्मवत्त्वेन स्फटिकादौ लौहित्यादिभ्रम प्रत्युपाधित्वम्। अविद्योपाधिकत्वं हि भ्रमसामान्यस्य सिध्यते इति तेन सोपाधिकत्वे निरुपाधिकभ्रमस्यैवासिद्धिप्रसङ्ग। एतेन— स्वप्नभ्रमसोपाधिकत्वपक्षोऽपि व्याख्यातः इति तदाशयः।

(२) मूलस्य रजतस्यायथार्थभ्रमोऽनुभवो भ्रम इति नैयायिका मन्यन्ते इति भावः।

कर्मोद्रेके सकलविषयेन्द्रियादिवसनावासितं निद्रादोषोपप्लुतमन्तःकरणं रथादिविषयाऽऽकारेण ग्राहकेन्द्रियाद्याकारेण रथादिविषयाकारवृत्त्याकारेण च परिण-

---

चणसामग्रीवशेन प्रातिभासिकर[1]जतोत्पत्त्यनुभवाविव स्वप्नकालीनरथोत्पत्त्यनुभवौ न विरुध्येते इत्युपपादयति—**तथाहीति** ॥ दारुतक्षादिः व्यावहारिकरथोत्पादकसामग्री, जाग्रदनुभवजनितवासनाविशिष्टमन्तःकरणं प्रातिभासिकरथगजाद्युत्पादकसामग्री तद्विलक्षणा च, ततो रथाद्युत्पत्तिस्तदनुभवश्च द्वय युक्तमेव, अतो स्वप्नो[2] न स्मृतिरिति भावः ॥ **ननु** जाग्रद्भोगप्रदकर्मणि सति कथं स्वप्नः स्यादित्याशङ्क्याह—**जाग्रदिति** ॥ तथापि भोगप्रदकर्मोपरमे सुषुप्तिरेव स्यात् न स्वप्न, इत्याशङ्क्याह—**स्वप्नेति** ॥ **ननु** स्वप्ने प्रमाणप्रमेयव्यवहारस्य जाग्रद्व्यवहारतुल्यत्वात्कथ रथादेः प्रातिभासिकत्वम् ? इत्याशङ्क्य जाग्रत्पदार्थस्य भौतिकत्वेन चिरस्थायित्वात् स्वप्नपदार्थस्य वासनाविशिष्टान्तःकरणपरिणामित्वेन वासनामयत्वादुभयोर्वैलक्षण्यमस्ती-

---

(१) यथापूर्वानुभवजन्यसस्कार' स्मृति प्रति कारणम् एव स्वप्नेऽपि पूर्वानुभवजन्यसस्कार' कारणम। नह्यननुभूतस्य स्वप्न। अनुभवस्तु इह जन्मनि जन्मान्तरे वेत्यन्यदेतत्। न सप्तमो रस शशशृङ्गादिक वा स्वप्ने कस्यापि भासते। अतएव स्मृतिरूप परत्र पूर्वदृष्टेति भाष्ये स्मृतिरूपपदम। वस्तुत रजताभासे स्मृतिरपि सर्वांश न स्मृतिरिति रूपपदप्रयोग इति भाव।

(२) अनुभूतसजातीयस्यैव स्वप्ने भान न तु तस्यैव। अत स्वप्नमान' विषयकसस्काराजन्यत्वात् न स्मृतित्वम। स्मृतिरूपत्व तु अध्यासधामान्यस्याविद्यमानविषयत्वेन इति भामत्यादौ व्यक्तम्।

मते। अन्तःकरणोपहितसाक्षी स्वयमन्यानवभास्य-स्तत्सर्वमवभासयति। अतः स्वप्ने साक्षिणः स्वप्रकाशत्वं सुविज्ञेयम्। जाग्रदवस्थायां सूर्यादितेजोभिः संकीर्ण-

---

त्वभिप्रेत्याह— **सकलेति** ॥ विषयाश्चेन्द्रियाणि च तेषां वासनाः ताभिर्वासितं वासनाश्रयमिति यावत् ॥ **ननु** भ्रमस्य दोषजन्यत्वात् प्रकृते तदभावात्कथं भ्रमः स्यात् स्वप्नः? इत्याशङ्क्याह— **निद्रेति** ॥ निद्रादोषसत्त्वाद्भ्रमः सम्भवतीत्यर्थः ॥ **ननु** अन्तःकरणं सर्वाकारेण परिणमते चेत् तदानीं ग्राह्यग्राहकव्यवहारः कथं स्यात्? तद्ग्राहकेन्द्रियाणामुपरतत्वादित्याशङ्क्याऽन्तःकरणस्यैव ग्राह्यग्राहकोभयाकारेण परिणतत्वात्तथा व्यवहार इत्याह- **रथादीति** ॥ **ननु** आलोकसहकृतचक्षुष[1] एव रूपग्राहकत्वात्तदानीं तदभावा-

---

(१) यथा काचादिदोषोपहित चक्षुरादि रजताद्याकारेण न परिणमते रजताकारेणाविद्यापरिणामितायां काचादिदोषस्य सहकारिकारणतामात्रमेव स्वप्नेऽपि अन्तःकरणनिष्ठनिद्रादोषस्य सहकारितयाऽविद्याया एव रजताद्याकारेण परिणामित्वं न त्वन्तःकरणस्य। न हि अविद्यातिरिक्तं मिथ्यावस्तुन उपादानं भवितुमर्हति। न हि वा स्वप्नदृष्टयोरिवान्तःकरणरथादीनां स्वरूपसाम्यमस्ति। यदि अविद्याया दुर्घटघटनापटीयस्त्वमन्तःकरणस्य कुत्रापि क्लृप्तम्। अन्यथाऽन्तःकरणेनैव सर्वेष्टनिर्वाहादविद्याया एवासत्त्वप्रसङ्गः। अतोऽन्तःकरणावच्छिन्नचैतन्याश्रितं निरवच्छिन्नचैतन्याश्रितं वाऽज्ञानं भ्रमविषयाकारेण परिणमते इत्यङ्गीकरणीयमिति सम्प्रदायः। एतेन— पुनश्च विपर्ययो द्विविधः—अन्तःकरणवृत्तिरूपोऽविद्यावृत्तिरूपश्च। स्वप्नादिरन्तःकरणवृत्तिरूप इति सम्प्रदायपक्षोऽपि—व्याख्यातः, सत्याविद्यकपदार्थाकारवृत्तिरन्तःकरणवृत्तिरिति युक्तमिति। सिद्धान्तलेशसंग्रहेऽपि 'भूताभासकार्यत्वं गुणाभासकार्यत्वं वा स्वाभासाभासमित्येव निरूपितम्। या सिद्धान्तलेशसंग्रहे स्वप्ने अन्तःकरणवृत्तिरङ्गीकृता सापि अधिष्ठानविषया सत्यार्थविषयेति रजतवृत्तिवैलक्षण्यं न भवति।

त्वात् साक्षिणः स्वप्रकाशत्वं दुर्विज्ञेयम्। स्वप्ने तु सूर्यादीनां जाग्रत्पदार्थानामुपरतत्वात्स्वयम्प्रकाशत्वं विवेक्तुं शक्यते ॥ १२ ॥

त्कथं रूपाद्यनुभवः? इत्याशङ्क्य सर्ववासनाश्रयान्तःकरणोपहित साक्षिबलेन रूपादिसर्वविषयानुव उपपद्यत इत्याह— **अन्तःकरणेति** ॥ **ननु** साक्षी साक्ष्यन्तरेण प्रथते चेत्तदाऽनवस्था स्यात्। न चेत् अज्ञायमानो जडः कथं विषयमवभासयेत्? इत्याशङ्क्याह— **स्वयमिति** ॥ स्वयम्प्रकाशमानत्वात्स्वयमन्यानवभास्यः सन् सर्वं स्वप्नपदार्थजातमवभासयतीत्यर्थः ॥ **ननु** जाग्रदवस्थायां साक्षिणः स्वयम्प्रकाशत्वस्याननुभूयमानत्वात्कथमन्यानवभास्यत्वम्? इत्याशङ्क्य जाग्रति सूर्यादितेजोभिः संकीर्णतयाऽविवेकिनां साक्षिणः स्वयम्प्रकाशत्वस्याननुभवेऽपि स्वप्ने सूर्यादिज्योतिषामुपरतत्वात्तस्य स्वप्रकाशत्व सुग्रहमित्याह— **अत एवेति** ॥ यतः स्वयमन्यानवभास्यः सन् तत्सर्वमवभासयत्यत एवेत्यर्थः ॥ सुज्ञेयत्वमेवोपपादयति— **जाग्रदिति** ॥ यद्यपि जाग्रदवस्थायामपि स्वप्रकाशसाक्षिबलेन सूर्यादिज्योतिषां भानम् "येन सूर्यस्तपति तेजसेद्धः" "तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाती"त्यादिश्रुतेः," स्वयमादित्यादिभिरनवभास्यः, "न तत्र सूर्यो भाति न चन्द्रतारकमि"त्यादिश्रुतेः, तथाप्यविवेकिनां साक्षिणः स्वप्रकाशत्वं दुर्विज्ञेयमेव; जडप्रकाशैः संकीर्णत्वात्, स्वप्ने तु तत्संकीर्णाभावात्सुज्ञेयमिति भावः ॥ स्वप्नपदार्थानामन्तःकरणपरिणामित्वेन

तथाच श्रुतिः "स यत्र प्रस्वपित्यस्य लोकस्य सर्वतो मात्रामुपादाय स्वयं विहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपित्यत्रायं पुरुषः स्वयं ज्योतिर्भवति

तत्साक्षिणः स्वप्रकाशत्वे श्रुतिमुदाहरति— **तथाचेति** ॥ [१]**सः** बुद्ध्युपाधिको जीवः। **यत्र** यस्यामवस्थायाम्। **लोकस्य** जाग्रत्पदार्थजातस्य। **मात्राम्** वासनाम्। **स्वयं विहत्य** स्थूलशरीराभिमानं मनुष्योऽहमित्याकारं त्यक्त्वा। **स्वयं निर्माय** वासनामयान् रथादिपदार्थान् सृष्ट्वा। **स्वेन भासा** स्वोपाधिभूतान्तःकरणविषयाकाररूपया वृत्त्या। **स्वेन ज्योतिषा** स्वप्रकाशचैतन्यज्योतिषा। **अत्र** स्वप्नावस्थायाम्। **स्वयं ज्योतिर्भवति** जडप्रकाशानामादित्यादीनामुपरतत्वादात्मा स्वप्रकाशचिद्रूपस्सन् विविक्ततयाऽवतिष्ठत इत्यर्थः॥ तत्र स्वप्नावस्थायां रथादयस्तदुचितदेशाश्च केऽपि न सन्तीत्यर्थः। **अथ** तदा। **रथादीन्** वासनामयान् तदुचितदेशांश्च। **सृजति** उत्पादयति निद्रादोषेण स्वात्मन्यारोपयतीत्यर्थः। आदिशब्देन— "स्वप्नेन शरीरमभिप्रहत्याचेतनः सुप्तः सुप्तानभिचाकशीति शुक्रमादाय पुनरेतिस्थानं हिरण्मयःपुरुष एकहंसः" इत्याद्याः श्रुतयो गृह्यन्ते। श्रुतिं व्याचष्टे— **स्वयं ज्योतिरिति** ॥ **ननु** किमिदं स्वप्रकाश-

(१) अहङ्कारोपहितचैतन्यं स्वप्नाध्यासस्योपादानमिति मताभिप्रायमिद मिदरवम् ।

न तत्र रथा न रथयोगा न पन्थानो भवन्ति अथ रथान् रथयोगान् पथः सृजते" इत्यादिः। स्वयं ज्योतिः स्वयं प्रकाशश्चैतन्याऽविषय इति यावत् ।

त्वम् ? न तावत् ज्ञानाविषयत्वम्; "तन्त्वौपनिषदं पुरुषं पृच्छामि" इत्यादिश्रुतिविरोधप्रसङ्गात्, नापि स्वसमानजातीयज्ञानाविषयत्वम्; अप्रसिद्धेरसंभवात्, नापि स्वविषयत्वम्; एकस्य कर्मकर्तृभावायोगात् । **एतेन**— अवेद्यत्वं स्वप्रकाशत्वमिति— **प्रत्युक्तम्** । **न च**— फलाव्याप्यत्वं तदिति— **वाच्यम्**; धर्माधर्मयोरतिव्याप्तेः, **नापि**— अपरोक्षव्यवहारयोग्यत्वं तदिति— **वाच्यम्**; आत्मनोऽसङ्गतया निर्धर्मकत्वेन योग्यतावच्छेदकापरिज्ञानाद्योग्यत्वस्यासंभवात्, तस्मात् स्वप्रकाशत्वं दुर्निरूपमिति, तत्राह— **चैतन्येति**(१) ॥ **ननु**— आत्मनः सर्वात्मनाऽविषयत्वे व्यवहारः कथं स्यात् ? व्यवहारस्य स्वसमानविषयव्यवहर्तव्यज्ञानसाध्यत्वादिति— **चेत्, न**; लाघवात् व्यवहर्तव्यज्ञानमेव व्यवहारकारणम् न तु स्वसमानविषयत्वेन; गौरवात् । ज्ञानस्य स्वस्मिन् स्वविषयभ्रमसंशयादिनिवर्तकत्वनियमादविषयत्वम्, अन्यथा जडत्वप्रसङ्गात् । **ननु**— एवं सति व्यवहर्तव्यज्ञानस्य चैतन्यस्य सदातनत्वेन सर्वदा घटादिव्यवहारप्रसङ्गः;

---

(१) तादात्म्येन चैतन्येऽनारोपितत्वमिति यावत् । तथाच चैतन्यानारोपितत्वात् अन्यथा शून्यवादप्रसङ्गात् तस्य स्वप्रकाशत्वमङ्गीकरणीयम् । अत च प्रतीयमानत्वस्यापि विशेषणत्वात् न घटाकाशादीनामप्रतीयमानां स्वप्रकाशत्वमिति बोध्यम् ।

स्वसमानविषयत्वस्य तत्राप्रयोजकत्वात्, नहि कस्यचित्सर्वदा घटादिव्यवहारो भवति, किञ्च वृत्तिनिर्गमनाभ्युपगमवैयर्थ्यप्रसङ्गः; घटादीन्द्रियसन्निकर्षे सति साक्षिचैतन्येनैव व्यवहारोपपत्तेः, तस्मात् स्वसमानविषयत्वमन्तरेण व्यवहर्तव्यज्ञानं व्यवहारकारणमित्यसङ्गतमिति— **चेत्, नैवम्;** व्यवहर्तव्यज्ञानत्वेन व्यवहारत्वेन सामान्यतः कार्यकारणभावः, घटादिव्यवहारे तु स्वसमानविषयत्वेन विशेषतोऽपि, "यत्सामान्ययोः कार्यकारणभावः बाधकं विना तद्विशेषयोरपि" इति न्यायात्, अन्यथा सर्वत्रातिप्रसङ्गात्। एवञ्च स्वप्रकाशचैतन्यं व्यवहर्तव्यज्ञानत्वेन स्वव्यवहारहेतुः, घटादिव्यवहारे तु स्वसमानविषयत्वेन तद्धेतुः। ततश्च न सर्वदा घटव्यवहारापत्तिः, नवा वृत्तिनिर्गमनवैयर्थ्यम्, इन्द्रियसंयोगस्य ज्ञानशब्दवाच्यत्वाभावेन तद्धेतुत्वायोगात्। तथाचात्मनः स्वप्रकाशत्वेन सामान्यसामग्रीतो व्यवहारः तद्वैपरीत्याद्घटादेस्सामान्यविशेषाभ्यामुपपद्यते। तस्माच्चैतन्याविषयत्वं स्वप्रकाशत्वमिति निरवद्यम्॥ नच श्रुतिविरोधः, तज्जन्यवृत्तिविषयत्वाभ्युपगमात्, अन्यथा तद्गताज्ञाननिवृत्तिर्न स्यात्। न च "यन्मनसा न मनुते" इति श्रुतिविरोधः, तस्याः फलव्याप्यत्वप्रतिषेधपरत्वात्। इन्द्रियजन्यवृत्त्यभिव्यक्तं चैतन्यं **फलम्**। न च तद्विषयत्वमात्मनः, स्वप्रकाशत्वात्। तदुक्तम्— "ब्रह्मण्यज्ञाननाशाय[१] वृत्तिव्याप्तिर-

[१] इदं तु विवरणमतेन, भामतीकल्पतरुसिद्धान्तेन तु वृत्तिविषयत्वमपि शुद्धचैतन्यस्य मान्यम्, तन्नौपनिषदं पुरुषं पृच्छामीत्यादिकं तूपहितचैतन्यविषयम्। तदुक्तं कल्पतरौ—शुद्धं ब्रह्मेति विषयीकुर्वाणा इति स्वोपहित हि विषया

पेक्ष्यते। फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितम्"॥ इति॥ अथवा—अवेद्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वं **स्वप्रकाशत्वम्,** फलाव्याप्यत्वमवेद्यत्वम्। **अपरोक्षव्यवहारः** प्रमाणजन्यवृत्तिः, तद्योग्यत्वं[१] आत्मचैतन्यस्वरूपमेव न तदतिरिक्तम्, येन योग्यतावच्छेदकज्ञानाभावात्तन्निरूपणाभावः प्रसज्येत। एवञ्च घटादौ धर्माधर्मयोश्चातिव्याप्तिवारणाय विशेषणद्वयम्। तस्मात् स्वप्रकाशत्वस्य निरूपितत्वादात्मा स्वयंज्योतिःस्वभावः॥ एवमात्मनः स्वप्रकाशत्वेऽर्थापत्तिरपि प्रमाणम्। **तथाहि**— अन्तःकरण तद्धर्मगोचरानुभवस्य भासकत्वं स्वप्रकाशत्वं विनाऽनुपपन्नं सत्तस्य स्वप्रकाशत्वं कल्पयति। न चाज्ञायमानस्य वाऽनुव्यवसायविषयस्य वा सन्दिह्यमानस्य वा ऽनुभवस्य विषयसत्तानिश्चायकत्वं संभवति। अज्ञायमानस्य विषयसत्तानिश्चायकत्वे निर्विकल्पत्वेन निर्विकल्पादपि विषयसिद्धिप्रसङ्गात्, अनुव्यवसायविषयस्य तथात्वेऽनवस्थापत्तेः, संशयेत्वर्थनिश्चायकत्वाभावस्य सर्वानुभवसिद्धत्वात्।

एवं स्वप्नोऽनुभवरूप एव न स्मृतिः; अन्यथा रथं पश्यामीत्यनुभवविरोधप्रसङ्गात्। स्वप्नपदार्थानामन्तः[1]करणमायाद्वारा शुद्धचैतन्याऽध्यस्तत्वेन इदानीं तत्साक्षात्काराऽभावेन बाधाऽभावेपि सोपाधिकतयोपाधिनिवृत्त्या तन्निवृत्तिरिति न जाग्रदवस्थायामनुवृत्तिः। कर्मनिद्रोपप्लुतमन्तःकरणमुपाधिः।

तस्मात् स्वप्रकाशत्वं विनाऽन्तःकरणतद्धर्मविषयानुभवस्य तदवभासकत्वानुपपत्त्या तदवश्यमभ्युपगन्तव्यम्। अन्यथा तस्य जडत्वेन जगदान्ध्यप्रसङ्गः। एवंच जन्यज्ञानस्य स्वप्रकाशत्वे प्रमाणाभावात् अनादिनित्यत्वमवश्यमभ्युपगन्तव्यम्। अन्तःकरणतद्धर्मयोरनुभवस्योत्पत्तिविनाशयोरनिरूपणात्। न च—दुःखज्ञानं नष्टं सुखज्ञानमुत्पन्नमित्यनुभवात्कथं तदनिरूपणम्? इति—**वाच्यम्;** साक्षिणोऽनादिनित्यत्वेन सुखदुःखयोरुत्पत्तिविनाशाभ्यां तदुपचारोपपत्तेः, अन्यथा "न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते" इत्यादिश्रुतिविरोधप्रसङ्गात्। तस्मादनाद्यनन्तासङ्गस्वप्रकाशचिद्रूप आत्मेति सिद्धम्॥

एवं प्रसङ्गादात्मनः स्वप्रकाशत्वमुक्त्वा प्रकृतमुपसंहरति—**एवमिति**॥ विपक्षे दण्डमाह—**अन्यथेति**॥ तस्मात् स्वप्नस्य स्मृतिरूपत्वमनुपपन्नमिति भावः। **ननु** एवं स्वप्नस्यानुभवत्वे

(१) अन्तःकरणपरिच्छिन्नतयाऽविद्यापरिच्छिन्नतया वा। शुद्धचैतन्येति च अवच्छिन्नचैतन्यस्याप्युपलक्षणम्। अत्र हि सिद्धान्तमतभेदे—अन्तःकरणोपहितचैतन्याध्यासो अनवच्छिन्नचैतन्याध्यासो वा स्वप्नानामिति पक्षद्वयम्।

केचित्तु स्वप्नाऽध्यासं निरुपाधिकं वदन्ति। तच्च विरोधिजाग्रत्प्रत्ययेन तन्निवृत्तिः।

स्वप्नाध्यस्तपदार्थानां रथादीनां तदधिष्ठानतत्त्वसाक्षात्काराभावेन बाधाभावात् निवर्तकान्तराभावाच्च जाग्रदवस्थायामनुवृत्तिः स्यात्, नचेष्टापत्तिः, अनुभवविरोधात्, तस्मात्तदनुभवत्वमनुपपन्नमित्याशङ्क्याह— **स्वप्नेति** ॥ द्विविधः कार्यनाशः— बाधो लयश्चेति। अधिष्ठानतत्त्वसाक्षात्कारेण बाधो भवति। अनुभूयमानस्याभावप्रमा **बाधः**। अथवा— अधिष्ठानतत्त्वसाक्षात्कारेण सोपादानाज्ञानेन सह कार्यस्य नाशो **बाधः**, उपादाने सत्यपि कार्यस्य तिरोभावो **लयः**। तथाच शुक्तितत्त्वसाक्षात्कारेण रजतबाधवदिदानीं स्वप्नपदार्थाधिष्ठानब्रह्मसाक्षात्काराभावेन स्वप्नपदार्थानां बाधाभावेऽप्युपाधिभूतजपाकुसुमादिनिवृत्त्या स्फटिके लौहित्यादिनिवृत्तिवत्स्वप्नपदार्थानामुपाधिनिवृत्त्या निवृत्तिसंभवाच्च जाग्रदवस्थायां स्वप्नपदार्थानुवृत्तिरिति भावः। कस्तत्रोपाधिः? इत्यत आह— **कर्मेति** ॥ जाग्रद्वासनावासितमित्यपि विशेषणीयम्; अन्यथा निर्वासनस्योपाधित्वायोगात्। उपाधिर्नाम स्वस्मिन्निव स्वसंसर्गिणि स्वधर्माधायकः। तथाच स्वप्नस्य सोपाधिकभ्रमत्वादनुभवत्वमुपपन्नमिति भावः ॥ मतान्तरमाह— **केचित्त्विति** ॥

ननु स्वप्नाध्यासस्य निरुपाधित्वे इदानीमधिष्ठानसाक्षात्काराभावेन स्वप्नपदार्थानां बाधाभावाज्जाग्रदवस्थायामनुवृत्तिः स्यात्,

पुनश्च विपर्ययः प्रकारान्तरेण द्विविधः । अन्तःकरण[1]वृत्तिरूपोऽविद्यावृत्तिरूपश्चेति । स्वप्नादिरन्तःकरण-

---

इत्याशङ्क्य रजतभ्रमानन्तरं शुक्तितत्त्वसाक्षात्कारेऽपि विरोधिदण्डादिज्ञानाद्यथा रजतभ्रमनिवृत्तिरुपादाने सत्यपि, तथाऽधिष्ठानसाक्षात्काराभावेऽपि विरोधिजाग्रत्प्रत्ययेन स्वप्नपदार्थनिवृत्तिरुपपद्यते, अतो न जाग्रदवस्थायामनुवृत्तिरित्याह— **तत्रेति** । न स्वप्नस्य विरुपाधिकत्वे । **न च**— उत्पन्नब्रह्मसाक्षात्काराणामज्ञानस्य निवृत्तत्वात्स्वप्नाध्यासो न स्यादिति— **वाच्यम्;** ज्ञानेनाज्ञाने निवृत्तेऽपि तत्कार्यनिवृत्ते[2]रभावात्, स्वप्नपदार्थानां साक्षादन्तःकरणोपा[3]दानत्वेन ज्ञानिनामपि स्वप्नाध्यासो भवत्येव। अन्यथा जाग्रदवस्थायामपि विषयाभावप्रसङ्गात् । तस्मात्स्वप्नोऽनुभव एवेति भावः ॥ प्रकारान्तरेण विपर्ययं विभजते— **पुनश्चेति** । अन्तःकरणवृत्तिरूपं विपर्ययं व्युत्पादयति— **स्वप्नेति** ॥ आदि-

---

(१) अत्र यद्वक्तव्यं तत् पूर्वमवोचाम् ।

(२) आवरणशक्तिमदज्ञानविनाशेऽपि विक्षेपशक्तिमदज्ञानानिवृत्त्या घटादिकार्यानुवृत्तिरिति केचित् । अन्ये तु शक्तिद्वयवतोऽप्यज्ञानस्य दग्धपटन्यायेन स्वरूपेण विनाशेऽपि संस्कारानुवृत्त्या घटादिकार्यानुवृत्तिरिति मन्यन्ते । अपरे तु [illegible] निवर्तकत्वाभावाज्ज्ञानस्यापि निवृत्तिरिति घटादिकार्याणामप्यनुवृत्तिरिति वदन्ति । सर्वथाप्युक्तशङ्कापरिहार उपपद्यत एव ।

(३) यद्यपि भ्रान्तिकाले रजतादीनामविद्योपादानकत्वमेव, न तु कामादीनामिवान्तःकरणोपादानकत्वम् । अन्यथा दैवादिव भ्रान्तिकालामपि व्यावहारिकत्वप्रसङ्ग[illegible] तथापि [illegible] उपादानत्वव्यवहारोऽन्तःकरणस्य उपपन्न इति मन्तव्यम् ।

वृत्तिरूपः। रजतादिभ्रमोऽविद्यावृत्तिरूपः। संशयस्तु-वि[1]द्यावृत्तिरेव। तत्रैवं सति निरुपाधिकविपर्ययो निदि[2]ध्यासनेन निवर्तते। सोपाधिकस्तूपाधिनि-

शब्देन मनोराज्यनष्टपुत्रसाक्षात्कारो गृह्यते। द्वितीयं व्युत्पादयति— **रजतादीति**॥ आदिशब्देन रज्जुसर्पादि गृह्यते। **न च**— रजतभ्रमस्येदमाकारवृत्त्युपहितसाक्षिरूपतया कथमविद्यावृत्तिरूपत्वम्? इति— **वाच्यम्**; साक्षिणोऽनादिनित्यतयोत्पत्तिविनाशशून्यत्वेनान्याकारवृत्तिनाशेनान्यसंस्कारोत्पत्तावतिप्रसक्त्या कालान्तरे प्रातिभासिकरजतस्मृतिहेतुसंस्कारार्थं तदाकाराविद्यावृत्तेरावश्यकत्वेनोक्तत्वादिति भावः॥ **ननु**— किं संशयोऽपि वृत्तिद्वयात्मकः? नेत्याह— **संशयस्त्विति**॥ **ननु**— विपर्ययनिवृत्तिः कस्मात् भवति? इत्यत आह— **तत्रेति**॥ एवमुक्तप्रकारेण द्विविधे विपर्यये निरूपिते सति तयोर्मध्ये निदिध्यासनस्य निरुपाधिकस्य निवृत्तिमाह— **निरुपाधिकेति**॥ सोपाधिकः कस्मान्निवर्तत इत्यत आह— **सोपाधिकस्त्विति**॥ निवर्तते इत्यनुषज्यते। वाक्यान्तरे श्रुतपदस्य वाक्या[3]न्तरे योजनमनु-

(१) भावाभावकोटिकसंशयस्यैकांशेऽन्तःकरणवृत्तिरूपत्वमपरांशेऽविद्यावृत्तिरूपत्वमिति द्वयत्वनिवृत्त्युपक्रमे ब्रह्मानन्दसरस्वत्यो निरूपयन्ति।

(२) अधिष्ठानसाक्षात्कारमात्रनिवर्त्यो विपर्ययः तथाधिष्ठानतत्त्वसाक्षात्कारप्रतिबन्धकविपरीतभावनामात्रस्य भ्रमहेतुदोषरूपस्य निदिध्यासनेन निवृत्तिर्न तु विपरीतविपर्ययस्येति तु सम्प्रदायः।

(३) वाक्यान्तरे सानन्वयिपदस्य वाक्यान्तरादपकृष्य सम्बन्धाय विवक्ष्यते इत्यादि पूर्वमीमांसायामनुषङ्गाधिकरणादौ स्पष्टम्।

पुनश्च विपर्ययः प्रकारान्तरेण द्विविधः । अन्तःकरण[1]वृत्तिरूपोऽविद्यावृत्तिरूपश्चेति । स्वप्नादिरन्तःकरण-

---

इत्याशङ्क्य रजतभ्रमानन्तरं शुक्तितत्त्वसाक्षात्कारेऽपि विरोधिदण्डादिज्ञानाद्यथा रजतभ्रमनिवृत्तिरुपादाने सत्यपि, तथाऽधिष्ठानसाक्षात्काराभावेऽपि विरोधिजाग्रत्प्रत्ययेन स्वप्नपदार्थनिवृत्तिरुपपद्यते, अतो न जाग्रदवस्थायामनुवृत्तिरित्याह—**तच्चेति** । न स्वप्नस्य विरुपाधिकत्वे । **न च**— उत्पन्नब्रह्मसाक्षात्काराणामज्ञानस्य निवृत्तत्वात्स्वप्नाध्यासो न स्यादिति— **वाच्यम्;** ज्ञानेनाज्ञाने निवृत्तेऽपि तत्कार्यनिवृत्ते[2]रभावात्, स्वप्नपदार्थानां साक्षादन्तःकरणोपा[3]दानत्वेन ज्ञानिनामपि स्वप्नाध्यासो भवत्येव । अन्यथा जाग्रदवस्थायामपि विषयाभावप्रसङ्गात् । तस्मात्स्वप्नोऽनुभव एवेति भावः ॥ प्रकारान्तरेण विपर्ययं विभजते— **पुनश्चेति** । अन्तःकरणवृत्तिरूपं विपर्ययं व्युत्पादयति— **स्वप्नेति** ॥ आदि-

---

(१) अत्र यद्वक्तव्यं तत् पूर्वमेवोक्तम् ।

(२) आवरणशक्तिमदज्ञानविनाशेऽपि विक्षेपशक्तिमदज्ञानानिवृत्त्या घटादिकार्यानुवृत्तिरिति केचित् । अन्ये तु शक्तिद्वयमप्यज्ञानस्य दग्धपटन्यायेन सूक्ष्मरूपेण विनाशेऽपि संस्कारानुवृत्त्या घटादिकार्यानुवृत्तिरिति मन्यन्ते । अपरे तु अप्रामाण्यज्ञानाद्यनास्कन्दितभुज्यमानादृष्टाभावविशिष्टज्ञानस्यैव निवर्तकत्वात् ज्ञानस्यापि निवृत्तिरिति घटादिकार्याणामप्यनुवृत्तिरिति वदन्ति । सर्वथाऽनुपपत्तिपरिहार उपपद्यते एव ।

(३) यद्यपि प्रातिभासिकानां रजतादीनां अविद्योपादानकत्वमेव, न तु कामादीनामधिष्ठानान्तःकरणोपादानकत्वम् । अन्यथा द्वैताद्वैत प्रातिभासिकानामपि व्यावहारिकत्वापत्तेः, तथापि अध्यारोपविषयत्वेनान्तःकरणस्य प्रातिभासिकविषयोपादानत्वेनाधिष्ठानत्वं रजतं प्रति शुक्तेरिवाधिष्ठानावच्छेदकत्वात् सोऽपि उपादानमध्यस्तारोपितकरणस्याप्युपपन्न इति सम्पदम् ।

ध्यासनैर्ब्रह्मज्ञानमिहैव भवति वा, अमुत्रापि वा। तदिहैवेति-प्राप्तम्; अस्मिन्नेव जन्मनि ब्रह्मापरोक्षज्ञानं मे भूयादिति श्रवणादीनामनुष्ठानात्? **ननु**—यज्ञादीनामपि ब्रह्मज्ञानसाधनत्वश्रवणेन तेषामामुष्मिकफलत्वात् कथं श्रवणादिनाऽस्मिन्नेव जन्मनि-ज्ञानं स्यात्? इति—**चेत्, न;** तेषां विविदि[१]षाहेतुत्वेन साक्षात् ज्ञानसाधनत्वाभावात्, श्रवणादीनां तु साक्षात् ज्ञानसाधनत्वेन तेषु सत्सु ब्रह्मज्ञानमिहैव भवत्येव; तस्य प्रमाणफलत्वात्। तस्माद्ब्रह्मज्ञानमैहिकमेवेति प्राप्ते— ब्रूमः, अप्रस्तुतप्रतिबन्धे ब्रह्मज्ञानमैहिकं भवति, प्रस्तुतप्रतिबन्धे त्वामुष्मिकमपि। तथाच श्रुतिः प्रतिबन्धयुक्तानामात्मनो दुर्ज्ञेयतां दर्शयति— "श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यं न विदुः" इति॥ स्मृतिरपि—"आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित्॥" इत्युक्तार्थं दर्शयति॥ **ननु**—जन्मान्तरकृतश्रवणादीनां ब्रह्मसाक्षात्कारहेतुत्वं कुतोऽवगम्यते? इति—**चेत्,** गर्भ एवैतच्छयानो वामदेव एवमुवाच" त्यादि श्रुत्या। तस्मात् श्रवणाद्यनुतिष्ठतः पुंसः प्रस्तुतप्रतिबन्धाभावे इहैव ब्रह्मापरोक्षज्ञान भवति तस्मिन् सत्यमुत्र जन्मान्तरेऽपि भवति॥ यत्कर्म फलोन्मुखं ब्रह्मसाक्षा-

(१) "न कर्मणा न प्रजया धनेन त्यागेनैकेऽमृतत्वमानशुरि"ति कर्मणो मोक्षेऽनुपयोगो वर्णितः, स चानुपयोगः मोक्ष प्रत्यकारणतया मोक्षनिमित्तत्त्वज्ञानाकारणतया च, न विविदिषाहेतुताऽभावेनापि। फलाधाधारणकारणत्व हि फलाव्यवहित तथाच पूर्वस्य तद्द्वारकस्य तत्साधनस्य च यथा सम्भाव्यते न तथाऽत्यन्तविप्रकृष्टस्य। "तमेत वेदानुवचनेन ब्राह्मणा विविदिषन्ती"ति श्रुतिरपि व्याख्याता। अपिच "धर्मजिज्ञासायाः प्रागप्यधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेरि"ति भाष्यभामत्यां द्रष्टव्यम्।

वृत्त्या। निदिध्यासनं निरूपितमेव। तदपि शारीरकतृतीयाऽध्यायपठनेन निष्पद्यते।

एवं च श्रवणमनननिदिध्यासनैरसंभावनाविपरीतभावनानिवृत्तावसत्यन्यस्मिन्प्रतिबन्धे तत्त्वमस्यादिवाक्यादहं ब्रह्मास्मीति अपरोक्षप्रमा जायते। तदुक्तम् "ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात्" इति।

पक्षः॥ तर्हि तन्निरूप्यतामित्याशङ्क्याह— निदिध्यासनमिति॥ शब्दप्रमाणनिरूपणावसरे तात्पर्यनिरूपणप्रसङ्गेनेति शेषः॥ तन्निदिध्यासनं कुतो निष्पद्यते? इत्याशङ्क्याह— तदपीति॥ ततः किम्? इत्यत आह— एवं चेति॥ श्रवणेन मानगताऽसंभावना निवर्तते, मननेन मेयगताऽसंभावना, निदिध्यासनेन विपरीतभावना। तदुक्तम्— "शृण्वन्नज्ञाततत्त्वार्थं जानन् कस्माच्छृणोम्यहम्। मन्वन्ना संशयापन्नः न मन्येऽहमसंशयः॥ विपर्यस्तो निदिध्यासेत् किं ध्यानमविपर्यये।" इति॥ ननु श्रवणमनननिदिध्यासनानि कुर्वतां केषांचित् कुतः साक्षात्कारो न जायते? इत्याशङ्क्याह— असत्यन्यस्मिन्निति॥ भूतभाविवर्तमानप्रतिबन्धः येषां यावत् वर्तते ज्ञानोत्पत्तौ, तावत्तेषां न ज्ञानोदयः, श्रवणादि कुर्वतामपि येषां स नास्ति तेषां विचारिततत्त्वमस्यादिवाक्याद्ब्रह्मसाक्षात्कारो भवत्येवेत्यर्थः॥ अस्मिन्नर्थे व्याससूत्रं संवादयति— तदुक्तमिति॥ तृतीये स्थितम्— ब्रह्मज्ञानमुद्दिश्यान्तरङ्गबहिरङ्गसाधनानि निरूपितानि। तत्र एते श्रवणमनननिदि-

ध्यामनेनैव ब्रह्मज्ञानमिहैव भवति वा, अमुत्रापि वा। तदिहैवेति-प्राप्तम्; अस्मिन्नेव जन्मनि ब्रह्मापरोक्षज्ञानं मे भूयादिति श्रवणादीनामनुष्ठानात्? **ननु**—यज्ञादीनामपि ब्रह्मज्ञानसाधनत्व-श्रवणेन तेषामामुष्मिकफलत्वात् कथं श्रवणादिनाऽस्मिन्नेव जन्मनि-ज्ञानं स्यात्? इति—**चेत्, न;** तेषां विविदि[1]षाहेतुत्वेन साक्षात् ज्ञानसाधनत्वाभावात्, श्रवणादीनां तु साक्षात् ज्ञानसाधन-त्वेन तेषु सत्सु ब्रह्मज्ञानमिहैव भवत्येव; तस्य प्रमाणफलत्वात्। तस्माद्ब्रह्मज्ञानमैहिकमेवेति प्राप्ते—ब्रूमः, असत्प्रतिबन्धे ब्रह्म-ज्ञानमैहिकं भवति, सत्प्रतिबन्धे त्वामुष्मिकमपि। तथाच श्रुतिः प्रतिबन्धयुक्तानामात्मनो दुर्ज्ञेयतां दर्शयति—"श्रवणायापि बहु-भिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यं न विदुः" इति॥ स्मृति-रपि—"आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित्॥" इत्युक्तार्थं दर्शयति॥ **ननु**—जन्मान्तरकृतश्रवणादीनां ब्रह्म-साक्षात्कारहेतुत्वं कुतोऽवगम्यते? इति—**चेत्,** गर्भ एवैतच्छयानो वामदेव एवमुवाचे" त्यादि श्रुत्या। तस्मात् श्रवणाद्यनुतिष्ठतः पुंसः असत्प्रतिबन्धाभावे इहैव ब्रह्मापरोक्षज्ञानं भवति तस्मिन् सत्यमुत्र जन्मान्तरेऽपि भवति॥ यत्कर्म फलोन्मुखं ब्रह्मसाक्षा-

(१) "न कर्मणा न प्रजया धनेन त्यागेनैकेऽमृतत्वमानशुरि"ति कर्मणो मोक्षे अनुपयोगो वर्णितः, स चानुपयोगः मोक्षं प्रत्यकारणतया मोक्षनिमित्ततत्त्वज्ञानाकारण-तया च, न विविदिषाहेतुताऽभावेनापि। फलासाधारणकारणत्वं हि फलाव्यवहित पूर्वस्य तत्त्वज्ञानस्य तत्साधनस्य च यथा सम्भाव्यते न तथाऽत्यन्तविप्रकृष्टस्य। तथाच "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ती' ति श्रुतिरपि व्याख्याता। अधिकं "धर्म-जिज्ञासायाः प्रागप्यधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेरि"ति भाष्यभामत्यां द्रष्टव्यम्।

वृत्त्या । निदिध्यासनं निरूपितमेव । तदपि शारीरकतृतीयाऽध्यायपठनेन निष्पद्यते ।

एवं च श्रवणमनननिदिध्यासनैरसंभावनाविपरीतभावनानिवृत्तावसत्यन्यस्मिन्प्रतिबन्धे तत्त्वमस्यादिवाक्यादहं ब्रह्मास्मीति अपरोक्षप्रमा जायते। तदुक्तम् "ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात्" इति ।

यत्र ॥ तर्हि तन्निरूप्यतामित्याशङ्क्याह— **निदिध्यासनमिति** ॥ शब्दप्रमाणनिरूपणावसरे तात्पर्यनिरूपणप्रसङ्गेनेति शेषः ॥ तन्निदिध्यासनं कुतो निष्पद्यते ? इत्याशङ्क्याह— **तदपीति** ॥ ततः किम् ? इत्यत आह— **एवं चेति** ॥ श्रवणेन मानगताऽसम्भावना निवर्तते, मननेन मेयगताऽसम्भावना, निदिध्यासनेन विपरीतभावना । **तदुक्तम्**— "शृण्वन्नप्यज्ञाततत्त्वार्थो जानन् कस्माच्छृणोम्यहम् । मत्वाऽपि संशयापन्नो मन्येऽहमसंशयम् ॥ विपर्यस्तो निदिध्यासेत् किं ध्यानमविपर्यये ।" इति ॥ **ननु** श्रवणमनननिदिध्यासनानि कुर्वतां केषांचित् कुतः साक्षात्कारो न जायते ? इत्याशङ्क्याह— **असत्यन्यस्मिन्निति** ॥ भूतभाविवर्तमानप्रतिबन्धः येषां यावत् वर्तते ज्ञानोत्पत्तौ, तावत्तेषां न ज्ञानोदयः, श्रवणादि कुर्वतामपि येषां स नास्ति तेषां विचारिततत्त्वमस्यादिवाक्याद्ब्रह्मसाक्षात्कारो भवत्येवेत्यर्थः ॥ उक्तार्थे व्याससूत्रं संवादयति— **तदुक्तमिति** ॥ तृतीये स्थितम्— ब्रह्मज्ञानमुद्दिश्यान्तरङ्गबहिरङ्गसाधनानि निरूपितानि । तत्र इते श्रवणमनननिदि-

ध्यानैर्ब्रह्मज्ञानमिहैव भवति वा, अमुत्रापि वा। तत्रेहैवेति-प्राप्तम्; अस्मिन्नेव जन्मनि ब्रह्मापरोक्षज्ञानं मे भूयादिति श्रवणादीनामनुष्ठानात्? **ननु**—यज्ञादीनामपि ब्रह्मज्ञानसाधनत्व-श्रवणेन तेषामामुष्मिकफलत्वात् कथं श्रवणादिनाऽस्मिन्नेव जन्मनि-ज्ञानं स्यात्? इति—**चेत्, न;** तेषां विविदिषा[1]हेतुत्वेन साक्षात् ज्ञानसाधनत्वाभावात्, श्रवणादीनां तु साक्षात् ज्ञानसाधन-त्वेन तेषु सत्सु ब्रह्मज्ञानमिहैव भवत्येव; तस्य प्रमाणफलत्वात्। तस्माद्ब्रह्मज्ञानमैहिकमेवेति प्राप्ते—ब्रूमः, अप्रस्तुतप्रतिबन्धे ब्रह्म-ज्ञानमैहिकं भवति, प्रस्तुतप्रतिबन्धे त्वामुष्मिकमपि। तथाच श्रुतिः प्रतिबन्धयुक्तानामात्मनो दुर्ज्ञेयतां दर्शयति—"श्रवणायापि बहु-भिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यं न विदुः" इति॥ स्मृति-रपि—"आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित्॥" इत्युक्तार्थं दर्शयति॥ **ननु**—जन्मान्तरकृतश्रवणादीनां ब्रह्म-साक्षात्कारहेतुत्वं कुतोऽवगम्यते? इति—**चेत्**, गर्भ एवैतच्छयानो वामदेव एवमुवाच" इत्यादि श्रुत्या। तस्मात् श्रवणाद्यनुतिष्ठतः पुंसः प्रस्तुतप्रतिबन्धाभावे इहैव ब्रह्मापरोक्षज्ञान भवति तस्मिन् सत्यमुत्र जन्मान्तरेऽपि भवति॥ यत्कर्म फलोन्मुखं ब्रह्मसाक्षा-

(१) "न कर्मणा न प्रजया धनेन त्यागेनैकेऽमृतत्वमानशुरि"ति कर्मणो मोक्षे ऽनुपयोगो वर्णित, स चानुपयोग मोक्ष प्रत्यकारणतया मोक्षनिमित्ततत्त्वज्ञानाकारण-तया च, न विविदिषाहेतुताऽभावेनापि। फलासाधारणकारणत्व हि फलाव्यवहित पूर्वस्य तद्द्वारकस्य तत्साधनस्य च यथा सम्भाव्यते न तथाऽत्यन्तविप्रकृष्टस्य। अतएव "तमेत वेदानुवचनेन ब्राह्मणा विविदिषन्ती"ति श्रुतिरपि व्याख्याता। अधिक "धर्म-जिज्ञासाया' प्रागप्यधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेरि"ति भाष्यभामत्यां द्रष्टव्यम्।

वृत्त्या । निदिध्यासनं निरूपितमेव । तदपि शारीरकतृतीयाऽध्यायपठनेन निष्पद्यते ।

एवं च श्रवणमनननिदिध्यासनैरसंभावनाविपरीतभावनानिवृत्तावसत्यन्यस्मिन्प्रतिबन्धे तत्त्वमस्यादिवाक्यादहं ब्रह्मास्मीति अपरोक्षप्रमा जायते । तदुक्तम् "ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात्" इति ।

पङ्गः॥ तर्हि तन्निरूप्यतामित्याशङ्क्याह— **निदिध्यासनमिति** ॥ शब्दप्रमाणनिरूपणावसरे तात्पर्यनिरूपणप्रसङ्गेनेति शेषः ॥ तन्निदिध्यासनं कुतो निष्पद्यते ? इत्याशङ्क्याह— **तदपीति** ॥ ततः किम् ? इत्यत आह— **एवं चेति** ॥ श्रवणेन मानगताऽसंभावना निवर्तते, मननेन मेयगताऽसंभावना, निदिध्यासनेन विपरीतभावना । **तदुक्तम्**— "शृण्वन्त्वज्ञाततत्त्वास्ते जानन् कस्माच्छृणोम्यहम् । मन्यन्तां संशयापन्नाः एनं मन्येऽहमसंशयः ॥ विपर्यस्तो निदिध्यासेत् किं ध्यानमविपर्यये ॥" इति ॥ **ननु** श्रवणमनननिदिध्यासनानि कुर्वतां केषां चित् कुतः साक्षात्कारो न जायते ? इत्याशङ्क्याह— **असत्यन्यस्मिन्निति** ॥ भूतभाविवर्तमानः प्रतिबन्धः येषां यावत् वर्तते ज्ञानोत्पत्तौ, तावत्तेषां न ज्ञानोदयः, श्रवणादि कुर्वतामपि येषां न सन्ति तेषां विचारिततत्त्वमस्यादिवाक्याद्ब्रह्मसाक्षात्कारो भवत्येवेत्यर्थः ॥ उक्तार्थे व्याससूत्रं संवादयति— **तदुक्तमिति** ॥ तृतीये स्थितम्— ब्रह्मज्ञानमुद्दिश्यान्तरङ्गबहिरङ्गसाधनानि निरूपितानि । तत्र इतः श्रवणमनननिदि-

ध्यायनैर्ब्रह्मज्ञानमिहैव भवति वा, अमुत्रापि वा। तत्रेहैवेति-प्राप्तम्; अस्मिन्नेव जन्मनि ब्रह्मापरोक्षज्ञानं मे भूयादिति श्रवणादीनामनुष्ठानात्? **ननु—**यज्ञादीनामपि ब्रह्मज्ञानसाधनत्व-श्रवणेन तेषामामुष्मिकफलत्वात् कथं श्रवणादिनाऽस्मिन्नेव जन्मनि-ज्ञानं स्यात्? इति—**चेत्, न;** तेषां विविदिषा[१]हेतुत्वेन साक्षात् ज्ञानसाधनत्वाभावात्, श्रवणादीनां तु साक्षात् ज्ञानसाधनत्वेन तेषु सत्सु ब्रह्मज्ञानमिहैव भवत्येव; तस्य प्रमाणफलत्वात्। तस्माद्ब्रह्मज्ञानमैहिकमेवेति प्राप्ते—ब्रूमः, अप्रस्तुतप्रतिबन्धे ब्रह्मज्ञानमैहिकं भवति, प्रस्तुतप्रतिबन्धे त्वामुष्मिकमपि। तथाच श्रुतिः प्रतिबन्धयुक्तानामात्मनो दुर्ज्ञेयतां दर्शयति—"श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यं न विद्युः" इति॥ स्मृतिरपि—"आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित्॥" इत्युक्तार्थं दर्शयति॥ **ननु—**जन्मान्तरकृतश्रवणादीनां ब्रह्मसाक्षात्कारहेतुत्वं कुतोऽवगम्यते? इति—**चेत्,** गर्भ एवैतच्छयानो वामदेव एवमुवाच" इत्यादि श्रुत्या। तस्मात् श्रवणाद्यनुतिष्ठतः पुंसः प्रस्तुतप्रतिबन्धाभावे इहैव ब्रह्मापरोक्षज्ञानं भवति तस्मिन् सत्यमुत्र जन्मान्तरेऽपि भवति॥ यत्कर्म फलोन्मुखं ब्रह्मसाक्षा-

(१) "न कर्मणा न प्रजया धनेन त्यागेनैकेऽमृतत्वमानशुरि"ति कर्मणो मोक्षेऽनुपयोगो वर्णित, स चानुपयोग. मोक्ष प्रत्यकारणतया मोक्षनिमित्तत्त्वज्ञानाकारणतया च, न विविदिषाहेतुताऽभावेनापि। फलासाधारणकारणत्व हि फलाव्यवहित पूर्वस्य सहकारकस्य तत्साधनस्य च यथा सभाव्यते न तथाऽत्यन्तविप्रकृष्टस्य। तथाच "तमेत वेदानुवचनेन ब्राह्मणा विविदिषन्ती"ति श्रुतिरपि व्याख्याता। अधिक "धर्मजिज्ञासायाः प्रागप्यधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेरि"ति भाष्यभामत्यां द्रष्टव्यम्।

प्रतिबन्धस्त्रिविधः। भूतभाविवर्तमानभेदात्। भूतप्रतिबन्धः पूर्वाऽनुभूतविषयस्याऽऽवेशेन पुनः पुनः स्मरणम्। तदुपाधिकब्रह्माऽनुसंधानेन तन्निवृत्तिः। यथा भिक्षोः पूर्वानुभूतमहिष्यादिस्मरणेन तत्त्वज्ञानानुत्पत्तौ गुरूपदिष्टतदुपाधिकब्रह्माऽनुसंधानेन तन्निवृत्तिरिति वदन्ति।

भाविप्रतिबन्धो द्विविधः। प्रारब्धशेषो ब्रह्मलोकेच्छा चेति।

तत्र प्रारब्ध[1]कर्म द्विविधम्। फलाऽभिसंधिकृतं

त्कारोत्पत्तिविरोधिवासनावा स एव प्रतिबन्धः. तदभावे ज्ञानमैहिकम्, अन्यथा वैपरीत्यमिति सिद्धम्॥

सूत्रोक्तप्रतिबन्धं विभजते—**प्रतिबन्ध इति**॥ तत्राद्यप्रतिबन्धं तन्निवृत्त्युपायं च सदृष्टान्तमाह— **भूतेति**॥ भाविप्रतिबन्धं विभजते— **भावीति**॥ **ननु** प्रारब्धस्य कर्मणो ज्ञानप्रतिबन्धकत्वे कस्यचिदपि ब्रह्मसाक्षात्कारो न स्यात्, तथाच "श्रोतव्य" इत्यादि विधेरप्रामाण्यापत्तिरित्याशङ्क्य तत्परिहाराय प्रारब्धं कर्म विभजते— **प्रारब्धमिति**॥ तत्राद्य फलभोगेनैव

---

(१) काम्यकर्माणि फलेच्छयाऽनुतिष्ठतां देवा अप्रमत्ता भवन्त वैषयिकपरिच्छिन्नं फलविषयादिकं पुरत उपस्थाप्य तेषां मदभिमुखीं प्रवृत्तिं च सम्पाद्य ज्ञानाय तेषां विघ्नं आचरन्ति। विना फलेच्छां कर्मानुतिष्ठतां तु ज्ञानं सम्पादयन्तीत्यस्यार्थे "आत्मप्राणो वै ब्राह्मण" इति श्रुतिव्याख्यानपूर्वकं "तस्य च भूत्या देवा न ईशते" इति वाक्यविवरणपूर्वकं बृहदारण्यकभाष्यवार्तिकादौ स्पष्टं निरूपितम्। तथाच द्विविधस्यापि प्रारब्धकर्मणस्तत्त्वविद उपभोग उपपन्न इति भावः।

केवलं चेति। तच फलाभिसन्धिकृतं फलं दत्त्वैव नश्यति। तस्मिन् सति ज्ञानं नोत्पद्यते; तस्य प्रबलत्वात्। तथाच श्रुतिः—"स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते यत् कर्म कुरुते तदभिसंपद्यते" इति। तादृशप्रारब्धशेषो भाविप्रतिबन्धः। केवलं प्रारब्धं तत्त्वज्ञानहेतुः पापनिवृत्तिद्वारा। तथाच श्रुतिस्मृती "धर्मेण पापमपनुदति" "ज्ञान-

---

चीयते इत्याह—**तच्चेति** ॥ तयोर्मध्ये इत्यर्थः ॥ स्वर्गो मे भूयादित्यादीच्छा फलाभिसन्धिरस्तु, ततः किम्? तत्राह—**तस्मिन्निति** ॥ फलाभिसन्धिकृते कर्मणि ॥ तत्र युक्तिमाह—**तस्येति** ॥ इच्छाघटितसामग्र्याः प्रबललेनेतरकार्योत्पत्तिप्रतिबन्धकलात्तस्य प्राबल्यमिति भावः ॥ फलाभिसन्धिकृतस्य प्राबल्ये प्रमाणमाह—**तथाचेति** ॥ **सः** पुरुषः **यथाकामः** यत्फलकामवान् यत्फलानुकूलसंकल्पः। **तत्क्रतुः**। संकल्पितं कर्म **तत्कर्म**। **तदभिसंपद्यते** कर्मानुरूपं फलं प्राप्नोतीत्यर्थः। फलितमाह—**तादृशेति** ॥ द्वितीयस्य फलाभिसन्धिरहितस्य प्रारब्धस्य कर्मणः पुण्यस्य मद्धाज्ञानोत्पत्त्यनुकूलतामाह—**केवलमिति** ॥ फलाभिसन्धिरहितमित्यर्थः। सुकृतप्रारब्धस्य फलाभिसन्धिरहितस्य पापनिवृत्तिद्वारा तत्त्वज्ञानानुकूलत्वे प्रमाणमाह—**तथाचेति** ॥ पापं प्रारब्धं फलाभिसन्धिकृतं केवलं चोभयमपि ज्ञानप्रतिबन्धकमेव प्रबलतरोत्तेजकेन तिरोभूय गच्छति। अन्यथा ज्ञानोत्पत्तिं प्रति-

मुत्पद्यते पुंसां क्षयात् पापस्य कर्मणः" इति। "कषाये कर्मभिः पक्के ततो ज्ञानं प्रवर्तते" इति च। एवञ्च भाविप्रतिबन्धस्य प्रारब्धशेषस्य भोगेनानिवृत्तौ सत्यपि श्रवणादौ न ज्ञानोदयः। यथाहुः "एकेन जन्मना क्षीणो भरतस्य त्रिजन्मभि" रिति।

[१]ब्रह्मलोकेच्छाया ब्रह्मसाक्षात्कारोत्पत्तिप्रतिबन्धकत्वं विद्यारण्यस्वामिनो वदन्ति स्म—

ब्रह्मलोकाऽभिवाञ्छायां सम्यक् सत्यां निरुध्य ताम्।
विचारयेद्यस्त्वात्मानं ननु साक्षात्करोत्ययम्॥ इति॥

बध्नातीति भावः। ननु भाविप्रतिबन्धस्य कियता कालेन क्षयो भवतीत्याशङ्क्य तत्र नियमो नास्तीत्यत्र संमतिमाह—यथाहुरिति॥ रामस्यैकेन जन्मना भाविप्रतिबन्धः क्षीणः, भरतस्य त्रिभिर्जन्मभिः क्षीणः, तथाच न कालनियम इति भावः॥ द्वितीयं भाविप्रतिबन्धं विद्यारण्यवचनेन स्पष्टयति—ब्रह्मलोकेति॥ अभि-

---

(१) ब्रह्मलोकान्तवैराग्यवतामेवात्मविज्ञानमपरोक्षं जायते। अन्यथा तु सगुणोपासनादावेवाधिकारात् सगुणोपासनाद्यधिकृता अपि तेऽपरोक्षज्ञानस्याजातौ यमात्मपरोक्षनिश्चयं प्राप्ता इन्द्रियनिग्रहादिसाधनसम्पन्ना स्वोपासनाविशेषेण ब्रह्मलोकं गत्वा तत्रैव ब्रह्मणा सह वेदान्तविचारादिना ब्रह्मज्ञानं प्राप्नुवन्तीत्येवो तदुत्तरं इति श्रवणादिमन्तरेण ब्रह्मलोकप्राप्ते कृपाप्यनुक्तत्वात् स्वर्गादिलोकेषु वैतृष्ण्यस्य ब्रह्मलोकेच्छायामभाव। विद्यारण्यवचनस्याप्ययमेवाशय। वेदान्तकल्पतरुपरिमलेऽधिकं स्पष्टम्। तथापि ब्रह्मलोकान्तवैराग्य इत्यामुत्रार्थफलभोगविरागपरेण विवक्षितम्। एव च सगुणोपासनादौ गुरूपदेशादिना श्रवणप्रवृत्तिरित्यादिकं निरूपितम्।

स पुनर्वेदान्तश्रवणादिमहिम्ना ब्रह्मलोकं गत्वा निर्गुणं ब्रह्म साक्षात्करोति। तथाच श्रुतिः "वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः, ते ब्रह्मलोके तु परान्तकाले परामृतात् परिमुच्यन्ति सर्वे" इति। स पुनस्तत्रैव मुच्यते।

वाञ्छायाम् इच्छाया। ता निरुध्येति योजना। **ननु—** कृतश्रवणादीना व्यर्थत्वात् स किमध पतति? नेत्याह—**स पुनरिति** ॥ तत्र प्रमाणमाह—**तथाचेति** ॥ "न हि कल्याणकृत् कश्चित् दुर्गति तात गच्छती"ति स्मृति चकारेण समुच्चिनोति। वेदान्तविज्ञानेन श्रवणजनितेन सुष्ठु निश्चितोऽर्थोऽद्वितीयब्रह्मस्वरूपो येषा ते तथोक्ता, **सन्यासयोगात्** श्रुतिस्मृतिविहित सर्वकर्मपरित्यागपूर्वकज्ञानाभ्यासयोगात्। **शुद्धसत्त्वाः** निर्मलान्तकरणा। **यतयः** सन्यासिनो ये। ते ब्रह्मलोके निर्गुण ब्रह्म साक्षात्कृत्य। **परस्य** हिरण्यगर्भस्य **अन्तकाले** अवसाने। **परामृतात्** उत्पन्नसाक्षात्कारात्। बन्धनात् **परिमुच्यन्ति** मुक्ता भवन्तीत्यर्थ। तथाच स्मृति—"ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे। परस्यान्ते कृतात्मान प्रविशन्ति पर पदम्"। [१]इति। तत्रैव विदेहकैवल्यमनुभवतीत्याह—**स पुनरिति** ॥ वर्तमानप्रति-

---

(१) यमीकृते मनस्यर्था सगुणब्रह्मशीलनात्। तदेवाविर्भवेत साक्षादपे तोपाधिकल्पनम्। इति कल्पतरुकृता सगुणोपासनमपि निर्गुणसाक्षात्कार साधनमिति भाव।

वर्तमानप्रतिबन्धं तन्निवृत्त्युपायं च विद्यारण्यस्वामिनो वर्णयांचक्रुः—

"प्रतिबन्धो वर्तमानो विषया-ऽऽसक्तिलक्षणः ।
प्रज्ञामान्द्यं कुतर्कश्च विपर्ययदुराग्रहः ॥
शमाद्यैः श्रवणाद्यैर्वा तत्र तत्रोचितैः क्षयम् ।
नीतेऽस्मिन्प्रतिबन्धे तु स्वस्य ब्रह्मत्वमश्नुते" ॥इति ॥

अस्य संमतिदर्शनेन व्युत्पादयति— **वर्तमानेति** ॥ **विषयेति** ॥ विषयेष्वासक्तिः राग इति यावत् । **प्रज्ञायाः** बुद्धेः **मान्द्यं** श्रुतार्थग्रहणधारणापटुत्वम् । कुत्सित तर्कः **कुतर्कः** श्रुतिविरोधितर्क इत्यर्थः । **विपर्यये** आत्मनः कर्तृत्वे **दुराग्रहः** आत्मा कर्तेत्यभिमानः ॥ एतेषां चतुर्णां वर्तमानप्रतिबन्धानां निवृत्त्युपायं तत्संमत्या दर्शयति— **शमाद्यैरिति** ॥ शमदमादिभिर्विषयासक्तिलक्षणस्य वर्तमानप्रतिबन्धस्य निवृत्तिः श्रवणेन प्रज्ञामान्द्यस्य मननेन कुतर्कस्य निदिध्यासनेन विपर्ययदुराग्रहस्य । शमाद्यैरित्यनेन दमादयो गृह्यन्ते । शमादीन्यनुपदमेव निरूपयिष्यति । श्रवणाद्यैरित्याद्यशब्देन मनननिदिध्यासने गृह्येते । श्रवणादीनि निरूपितानि । **तत्र तत्र** तस्मिन् तस्मिन् प्रतिबन्धे प्रथमस्य निवृत्तौ समाधिरुचितः कारणत्वेन, द्वितीयस्य निवृत्तौ श्रवणं तृतीयस्य मननं चतुर्थस्य निदिध्यासनम् । **क्षयं नीते** नाशं गते । यथोक्तसाधनचतुष्टयेन यथोक्तवर्तमानप्रतिबन्धचतुष्टये नष्टे सतीत्यर्थः । स्वस्य अन्तःकरणतद्वृत्तिसाक्षिणोऽसंगाद्वयस्य । **ब्रह्मत्वम्**

ततश्च श्रवणादिभिः सकलप्रतिबन्धनिवृत्त्या वाक्याद् ब्रह्मसाक्षात्कारोत्पत्तौ शमदमोपरतितितिक्षाश्रद्धासमाधानानि अन्तरङ्गसाधनानि।

अन्तरिन्द्रियनिग्रहः शमः। बाह्येन्द्रियनिग्रहो-दमः। उपरतिः संन्यासः। तितिक्षा द्वन्द्वसहिष्णुता। श्रद्धा गुरुवेदान्तविश्वासः। समाधानं श्रवणादिषु चित्तैकाग्र्यम्। "शान्तो दान्त उपरतस्तितिक्षुः समा-

---

अखण्डैकरसानन्दस्वरूपत्वम्। **अश्नुते** मुमुक्षुरनुभवतीत्यर्थः। श्रवणादिनाऽधिकारिणो ब्रह्मसाक्षात्कारोत्पत्तावन्तरङ्गसाधनानि दर्शयति— **श्रवणादिनेति** ॥ साधनानि व्युत्पादयति— **अन्तरिन्द्रियेति** ॥ **अन्तरिन्द्रियं** मनः। इद प्रस्थाना(१)न्तरीत्यैव्यम्, अन्यथा पूर्वोत्तरव्याघातापत्तेरिति भावः। पञ्च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणीति **बाह्येन्द्रियाणि** दश। शीतोष्णसुखदुःखमानापमाननिन्दास्तुत्यादीति **द्वंद्वानि**। श्रवणादीत्यादिशब्देन मनननिदिध्यासने गृह्येते। **चित्तस्य** अन्तःकरणस्यैकाग्र्यम्। ऐकाग्र्य नाम विजातीयप्रत्ययतिरस्कारेण लक्ष्यैकगोचरसजातीयप्रत्ययप्रवाह। तदुक्तम्— "शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रता परिणामः" इति ॥ शमादीनामन्तरङ्गसाधनत्वे प्रमाणमाह— **शान्त इति** ॥ **आत्मनि** अन्तःकरणे।

---

(१) वाचस्पतिमतरीत्यर्थं। तथाच मन इन्द्रियत्वनिराकरणस्य विवरणमतमुपरित्याद्व विरोध इति भाव।

हितो भूत्वा आत्मन्येवात्मानं पश्येदि"त्यादि। सूत्रकारोप्याह—"शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदङ्गतया तेषामवश्याऽनुष्ठेयत्वादि"ति।

यज्ञादयो बहिरङ्गसाधनानि; "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेने"त्यादिश्रुतेः।

तत्र संमतिमाह— **सूत्रकारोऽपीति** ॥ बहिरङ्गसाधनानि दर्शयति— **यज्ञादय इति** ॥ श्रवणादिना सकलप्रतिबन्धनिवृत्तौ वाक्याद्ब्रह्मसाक्षात्कारोत्पत्ताविति शेषः। यज्ञादीनां सत्त्वशुद्धिद्वारा विविदिषोत्पादनमुखेन ब्रह्मसाक्षात्कारोपयोगाद्बहिरङ्गसाधनत्वमित्यर्थः। तत्र प्रमाणमाह— **तमेतमिति** ॥ **वेदानुवचनम्**। ब्रह्मचर्याङ्गाध्ययनम्। बहिर्वेदिदानम् **दानम्**। हितमितमेध्याशनम् **तपः**। अत एवानाशकेने[१]ति विशेषणम्। **केचित्तु—** अनशनं वा कृच्छ्रानुष्ठानं वा तपः, "तप इति तपो नानशनात्परमि"ति श्रुतेरिति— **वदन्ति**। अस्मिन् पक्षे नाशकेनेति पदच्छेदः। **अयमर्थः— नाशकेन** भृगूदकगङ्गायमनामङ्गमादिषु बुद्धिपूर्वकतनुत्यागेन विविदिषोत्पत्तिद्वारा ब्रह्मसाक्षात्कारो भवति, श्रुतिस्मृतीतिहासपुराणेषूपलम्भात्॥ **अतएवोक्तं** कालि-

---

(१) तदुक्तं गीतायां—नात्यश्नतस्तु योगोऽस्ति न चातिस्वप्नशीलिनः। न च [illegible] शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषमिति च।

सर्वापेक्षा च यज्ञादिश्रुतेरश्ववदि”त्यप्युक्तम् ।

आहुः । यज्ञादीनां बहिरङ्गसाधनत्वे सूचममतिमथाह— **सर्वापेक्षा चेति** ॥ द्वतीये स्थितम्— ब्रह्मविद्यया मुक्तिफले जनयितव्ये कर्माणि नापेक्ष्यन्ते इत्युक्तम्—“अत एवाग्नीन्धनाद्यनपेक्षे”त्यत्र, इदानीं ब्रह्मविद्या स्वोत्पत्तौ कर्माण्यपेक्षते न वेति संशये नापेक्षते इति तावत्प्राप्तम्, प्रमाणप्रवृत्तौ सत्यां ज्ञानस्य स्वत एवोत्पत्तिसंभवेन कर्मणां तत्राप्रयोजकत्वात् । **किंच** स्वर्गोद्देशेन यजेतेति यागविधिवत् ब्रह्मज्ञानोद्देशेन कर्मविधानाभावात् न कर्मणां मोक्षहेतुत्वम् । **नच**—विविदिषन्तीति विविदिषावाक्ये तदुद्देशेन तद्विधानात्कर्मणां ज्ञानहेतुत्वमिति— **वाच्यम्;** तत्र विधिप्रत्ययाश्रवणेन वर्तमानापदेशितया तस्य स्तावकत्वात् । तस्मात् ब्रह्मविद्या स्वोत्पत्तौ कर्माणि नापेक्षते इति प्राप्ते— ब्रूमः, अस्ति कर्मापेक्षा ब्रह्मविद्यायाः स्वोत्पत्तौ । कस्मात् ? “तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेने”-त्यादिश्रुतेः । **नच—** वर्तमानापदेशितयाऽनुवादकत्वेनास्य स्तावकत्वमिति— **वाच्यम्;** विविदिषासंयोगस्यापूर्वत्वेन लेट्परिग्रहेण विधायकत्वोपपत्तेः । अन्यथा— “उपांशुयाजमन्तरा यजति” “पूषा प्रपिष्टभागः” इत्यादौ सर्वत्र विध्यभावप्रसङ्गः, “विधिर्वा [१]धारणवत्” इति सूत्रविरोधप्रसङ्गश्च स्यात् । तस्मात् यथाऽश्वः

---

(१) यथा उपरि हि देवेभ्यो धारयतीत्यादौ हि शब्दश्रवणेऽपि अपूर्वत्वा-द्विधिपक्षस्तद्दिति भाव ।

लाङ्गलाकर्षणेऽयोग्यतया न नियुज्यते, किन्तु योग्यत्वेन रथचर्यायां नियुज्यते तथा कर्माणि ब्रह्मविद्यया मोक्षफले जनयितव्ये नापेक्ष्यन्ते, तेषां तत्रायोग्यत्वात्, स्वोत्पत्तौ तु अपेक्ष्यन्ते, चित्तशुद्धिविविदिषोत्पत्तिद्वारा तद्योग्यत्वात्। तथाच स्मृतिः— "कषायपक्तिः कर्माणि ज्ञानं च परमा गतिः। कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते" इति॥ ज्ञानस्य प्रमाणफलत्वेऽपि पापिष्ठस्य श्रुतेऽपि वाक्ये ब्रह्मज्ञानानुदयेन कर्मणां पापनिवृत्तिद्वारा ब्रह्मसाक्षात्कारहेतुत्वं संभवत्येव। यदि कर्मणां तद्धेतुत्वमनुपपन्नमित्याग्रहः, तदापि शमदमाद्युपेतोऽधिकारी स्यात्। "शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्येत्" इति विधेः शमादिविधानात्। विहितानां तेषां ब्रह्मविद्याङ्गतयावश्यानुष्ठेयत्वात्। नच कर्मणां विद्योत्पत्तौ नात्यन्तापेक्षा; यज्ञादिश्रुतेः। **ननु**— एवमपि शमादीनामन्तरङ्गसाधनत्वं यज्ञादीनां बहिरङ्गसाधनत्वं कुतोऽवगम्यते? इति— चेत्, शृणु, इत्थम्, 'तस्मादेवंविच्छान्तो दान्तः' इति शमादीनां विद्यासंयोगावगमादन्तरङ्गसाधनत्वं विद्योत्पत्तौ, यज्ञादीनां "विविदिषन्ति यज्ञेन" इत्यादिना विविदिषासंयोगावगमात् बहिरङ्गसाधनत्वमिति विवेकः[१]। **नच**— एवमन्तरङ्ग बहिरङ्गसाधनविवेकेन किं प्रयोजनम्? इति— **वाच्यम्**; ज्ञानसाधन-

(१) अत एवाथातो ब्रह्मजिज्ञासेत्यत्र साधनचतुष्टयसम्पत्त्यानन्तर्यमेवाथशब्दार्थो न कर्मावबोधानन्तर्यमिति भाष्यकाराणां सिद्धान्तः। अन्यथा कर्मणामन्तरङ्गसाधनत्वे तदानन्तर्यमेवाथशब्दार्थः प्रसज्येत। इति।

तदेवं मननादिसंस्कृतचित्तदर्पणस्थद्दृक्ततविचारितमहावाक्योत्पन्नेनाऽहं ब्रह्मास्मीत्यप्रतिबद्धब्रह्मसाक्षात्कारेणाऽज्ञाने निवृत्ते संचितकर्मणां नष्टत्वादागामि-

---

श्रवणादिप्रवृत्तेस्तेन विनाऽसम्भवात्। न हि कश्चित् अन्तरङ्ग बहिरङ्गसाधनमज्ञात्वा सर्वकर्मसन्न्यासपूर्वकं श्रवणादौ प्रवर्तते। तस्मात् तद्विवेकोऽपि वैराग्यादिवच्छ्रवणादिप्रवृत्तौ कारणमेवेति सप्रयोजन एवेति॥

एवमन्तरङ्गबहिरङ्गसाधने निरूप्य सहकारिसम्पन्नमहावाक्यात् ब्रह्मसाक्षात्कारेणाज्ञाननिवृत्तौ मुमुक्षोः स्थितिमुपसंहरति—**तदेवमिति**॥ **तत्** यस्मात् कारणात् प्रतिबन्धनिवृत्त्युपायान्तरङ्गबहिरङ्गसाधनानि निरूपितानि तस्मात् कारणात्। **एवं** उक्तेन प्रकारेण। मननादीत्यादिशब्देन निदिध्यासनं गृह्यते। **ननु—** ज्ञानेनाज्ञाने निवृत्ते विषयानुभवोऽनुपपन्नः, मुमुक्षोर्देहाभिमानशून्यत्वात्, **न च—** प्रारब्धवशात्तदनुभव इति—**वाच्यम्;** क्लृप्तकारणाभावे तदयोगात्। देहाभिमाने सत्येव प्रमाणप्रमेयव्यवहारदर्शनात्तदभावे तददर्शनादन्वयव्यतिरेकाभ्यां देहाभिमानस्य विषयानुभवं प्रति कारणत्वस्य क्लृप्तत्वात् तदभावे ज्ञानिनां प्रारब्धवशात्कथं विषयानुभवः स्यात्? अतएवोक्तं भाष्यकृता— "तमेतमविद्याख्यमात्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः" इति॥ अन्यथा व्यवहारः, अध्यासपूर्वकः, व्यवहारत्वादित्यत्र हेतोः ज्ञानिनो

व्यवहारेऽनैकान्तिकत्वप्रसङ्गात् । **नच**— ज्ञानिनामपि बाधितानुवृत्त्या देहाभिमानसत्त्वान्नैकान्तिकत्वमिति— **वाच्यम्**; शुक्तिसाक्षात्कारेण तदज्ञाननिवृत्तौ रजतभ्रमनिवृत्तौ पुनस्तदनुवृत्तेरदृष्टत्वात् । अन्यथा तत्रापि प्रसङ्ग । **नच**— सोपाधिकस्थले शुद्धः स्फटिक इति साक्षात्कारे सत्यपि जपाकुसुमोपाधिसन्निधाने लोहितः स्फटिक इत्यनुभवस्य सर्वजनीनत्वात् तथात्रापि भविष्यतीति— **वाच्यम्**; तद्वदत्रोपाधेरनिरूपणात् । तस्मात् ज्ञानेनाज्ञाने निवृत्ते तत्कार्यनिवृत्त्या ज्ञानिनः प्रारब्धवशादिविषयानुभवोऽसङ्गत एवेति— **चेत्, उच्यते ?** ज्ञानिनो निवृत्ताज्ञानस्य प्रारब्धवशादिविषयानुभव उपपद्यते । **नच**— भ्रमकारणदेहाभिमानाभावे कथं स ? इति— **वाच्यम्**; बाधितानुवृत्त्या तस्य सत्त्वात् । **नच**— कारणीभूताज्ञानस्य निवृत्तत्वेन तत्कार्यस्य देहाभिमानस्य कथमनुवृत्तिः ? उपादाननाशे सत्युपादेयानुवृत्तेरदृष्टत्वादिति— **वाच्यम्**; उपादाननाशानन्तर क्षण उपादेयानुवृत्तेस्तार्किकैरभ्युपगतत्वेन तथाऽस्माक(१)मपि सम्भवात् । **नच**— तेषा-

(१) उपादाननाशात् विपरीतमत्र प्रमाणं इति हि वेदान्तिनां सिद्धान्तः । [illegible] प्रतीयते । [illegible] प्रतीयते" । इति [illegible] प्रतीयते । [illegible] मन्यते । [illegible] 'विपर्ययश्च [illegible] उपपद्यते [illegible] इति । [illegible] इति । [illegible]

मभ्युपगमस्याप्रामाणिकत्वात् सिद्धान्तेऽपि तथा प्रसङ्ग्येतेति—**वाच्यम्;** अस्माकं श्रुतिस्मृतियुक्त्यनुभवप्रमाणानां सत्त्वात्। **नच**—एवमपि यदुपादाननिवर्तकं तदुपादेयनिवर्तकं भवतीति ज्ञानस्याज्ञानतत्कार्यनिवर्तकत्वेन तस्मिन् सति देहाभिमाननिवृत्तेरावश्यकत्वेन कथं ततो विषयानुभव ? इति—**वाच्यम्;** तदपेक्षया प्रारब्धस्य बलवत्त्वात् **तथाहि**—ज्ञानमज्ञानतत्कार्यनिवर्तकम् तथापि प्रवृत्तफलत्वात् मुक्तेषुवत् प्रारब्धं तत्त्वज्ञानात् बलम्। **ननु**—अज्ञाननिवृत्तिरपि ज्ञानान्न स्यात्, प्रबलेन प्रारब्धेन तस्य प्रतिबन्धादिति—**चेत्, न;** ज्ञानस्याज्ञाननिवर्तकत्वांशे प्रारब्धस्याप्रतिबन्धकत्वात्तेन विनापि स्वफलभोगोपपत्तेः। पुरुषस्याज्ञानकार्याभावे फलभोगासम्भवात् ज्ञानस्याज्ञानकार्यनिवर्तकत्वांशं प्रारब्धं प्रतिबध्य पुरुषस्य फलं प्रयच्छतीत्यतो ज्ञानेनाज्ञाननिवृत्तावपि ज्ञानिनो बाधितानुवृत्त्या देहाभिमानसत्त्वेन प्रारब्धापादितविषयभोगो न विरुध्यते। तथाच पारमर्षं सूत्रम्—'भोगेन त्वितरे क्षपयित्वा तत सम्पद्यते" इति। तदभिप्रायज्ञो भगवान् वार्तिककारोऽप्याह स्म—"शास्त्रार्थस्य समाप्तत्वात् मुक्तिः स्यात्तावतामिते। रागादयः सन्तु कामं न तद्भावोऽपराध्यते" इति॥ सर्ववेदान्तरहस्यज्ञैर्विद्यारण्यैरप्युक्तम्—"अप्रवेश्य चिदात्मानं पृथक् पश्यन्नहंकृतिम्। इच्छंस्तु कोटिवस्तूनि न बाधो ग्रन्थिभेदतः॥ ग्रन्थिभेदेऽपि सम्भाव्या इच्छा प्रारब्धभोगतः। बुद्ध्वापि पापबाहुल्यादसमोऽपि यथा तव' इति॥ **ननु**—तैरेव रागादि प्रतिषिद्धं—'रागो लिङ्गमबोधस्य चित्तव्यायामभूमिषु। न चाधा-

त्माभिमानोऽपि विदुषोऽस्त्यासुरत्वतः॥ विदुषोऽप्यासुरत्वं चेन्निष्फलं ब्रह्मदर्शनम्। बुद्धतत्त्वो न विध्यर्हं इति चेत् वासनाबलात्॥ अबुद्ध इव संक्लिश्नन् विधिं ध्याने तदार्हति"॥ इत्याक्षेपपूर्वकं ज्ञानिनो ध्यानविधिमङ्गीकुर्वद्भिर्विद्यारण्यैरप्याभासरागोऽपि ज्ञानिनः प्रतिषिद्धः **इति, नैवम्;** आचार्यैरभ्यास[१]पूर्वकरागस्यैव प्रतिषेधात्। अन्यथा पूर्वोत्तरव्याघातः स्यात्। "सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते" इति स्मृतिविरोधश्च प्रसज्येत्। विद्यारण्यवचनमप्यदृढज्ञानविषयम्। दृढज्ञानिनो ध्यानविध्यसम्भवः; "तत्त्ववित्त्वविरोधिलाल्लौकिकं सम्यगाचरेत्"। इत्यादिनोक्तत्वात्। पुनश्चाग्रे ज्ञानिनो ध्यानविध्यसम्भवं वक्ष्यामः। ननु तर्हि ज्ञानिनो यथेष्टाचरणं किमभ्युपगम्यते? भ्रान्तोऽसि। न हि वयं ज्ञानिनो यथेष्टाचरणमभ्युपगच्छामः, किं तर्हि? प्रारब्धभोगानुकूलाभासरागद्वेषानुवृत्तिर्न तत्त्वज्ञानविरोधिनीति। अन्यथा तत्त्वज्ञानमेव न स्यात् कस्यापि। तदुक्तम्— "कादाचित्कं रागलेशं चिकित्सितुमशक्नुवन्। यो ब्रह्मनिष्ठां संद्वेष्टि कदा स्यात्तस्य निश्चयः" इति॥ **एतेन—** बाधितदेहाभिमानानुवृत्तौ ज्ञानिनोऽभ्युपगम्यमानायां बाधितरजतभ्रान्त्यनुवृत्तिरपि स्यादिति— **प्रत्युक्तम्;** शुक्तिज्ञानस्य भ्रमनिवर्तकत्वांशे प्रतिबन्धाभावात्॥

(१) भोगसामान्यस्येच्छाप्रयुक्तत्वात् प्रारब्धभोगाद्रिच्छा ज्ञानिनोऽपि यद्यपि स्यात् तथापि सा प्रारब्धा फलानीव भोगेनैव नश्यतीति न मया कर्मान्तरेषु फलेच्छापि जन्यते येन बन्ध स्यादिति प्रारब्धभोगानिच्छाप्रतिषेध एवाचार्याणामाशयः। न हि रागोऽभ्यासपूर्वकस्तदपूर्वकश्चेति द्विविध प्रसिद्ध। न हि विना देहाभिमान ज्ञानिनोऽपि रागानुवृत्तिरुपपद्यते इति परे मन्यन्ते॥

अथवा— मुमुक्षोस्तत्त्वज्ञानानन्तरमज्ञानलेशानुवृत्त्या प्रारब्धभोगोऽस्तु । **तदुक्तम्**— "द्वैतच्छायारक्षणायास्ति लेशो ह्यस्मिन्नर्थे स्वानुभूतिः प्रमाणम्" इति । **ननु**— ज्ञानेन निवृत्तस्याज्ञानस्य कोऽयं लेशो नाम ? न तावदवयवः, न निरवयवं न सावयवमज्ञानमित्यभ्युपगमात्, अवयविनि निवृत्ते सत्यवयवानिवृत्तेरयोगाच्च । नापि शक्तिरेव लेशः; ज्ञानेन शक्तिमतोऽज्ञानस्य नाशे निराश्रयशक्त्यवस्थानायोगात्, तस्मात् कथं लेशानुवृत्त्या भोगः इति, **उच्यते**— ज्ञानेनावरणशक्तिताद्रात्म्याध्यासो नश्यतः, अज्ञानं विक्षेपशक्तिमदनुवर्तते । अयमेव लेश इत्युच्यते । विक्षेपशक्तेर्ज्ञानाविरोधित्वात् तेन प्रारब्धभोगो ज्ञानिनो न विरुध्यते । **ननु**— एवं तर्हि तेनैव जन्मान्तरमपि ज्ञानिनः स्यात् इति— **चेत्, न**; निमित्ताभावात् । न ह्यज्ञानं स्वरूपेण जन्महेतुः, किं तर्हि ? धर्मा[१]धर्मौ, तावपि न प्रारब्धौ जन्मान्तरहेतू, किन्त्वनारब्धौ तत्स्थितिहेतुरावरणशक्तिमदज्ञानम्, तस्य ज्ञानेन निवृत्तौ संचितकर्मणामपि निवृत्तत्वादागामिकर्मास्पर्शात् भोगेन प्रारब्धस्य क्षयात् शरीरारम्भककारणाभावान्न ज्ञानिनो जन्मान्तरम् । विक्षेपशक्तिमदज्ञानं तु दग्धबीजवत्प्रारब्धभोगोपयोगिविषयोपदर्शनहेतुर्न जन्मान्तरहेतुः । तन्निवृत्तिस्तु प्रारब्धक्षयादेव न तत्र ज्ञानमपेक्षते । तदवस्थानप्रयोजकीभूतावरणशक्तिमदज्ञानस्य पूर्वमेव निवृत्तत्वात् । तस्मात् ज्ञानेनाज्ञाननिवृत्तावपि तल्लेशानुवृत्त्या ज्ञानिनः प्रारब्ध-

(१) "पुण्यो वै पुण्येन कर्मणा भवति पापः पापेन ।" इत्यादि श्रुतिः वेदान्तैकदेशिन एव वचनमात्रमिति दर्शयितुमिति पूर्वं चात्र प्रमाणम् ।

कर्मणामश्लेषात्प्रारब्धापादितविषयमनुभवन् मुमुक्षु-रखण्डैकरससच्चिदानन्दब्रह्मात्मनाऽवतिष्ठते । एतादृशं फलं चतुर्थाऽध्याय(१)पठनेन संभवतीति सांप्रदायिकानां रीतिः ।

भोगो न विरुध्यते । यद्वा— आवरणशक्ति तादात्म्ये केवलाज्ञानकृते, ते एव ज्ञानोत्पत्त्या नश्यतः, तयोर्निरुपाधिकभ्रमलात्, कर्मसहिताविद्याकृतो विक्षेपः, ततश्च विद्ययाऽविद्यानिवृत्तावपि प्रारब्धक्षयपर्यन्तं विक्षेपो न निवर्तते, तस्य सोपाधिकभ्रमलात्, कर्मसहितविक्षेपशक्तिमदज्ञानमुपाधिः, भोगेन प्रारब्धक्षये ज्ञानेन देहावस्थानप्रयोजकीभूतावरणशक्तिमदज्ञाननिवृत्तावारब्धकर्मनिवृत्तौ वर्तिनाशे दीपनाशवत् विक्षेपशक्तिमदज्ञानं स्वयमेव नश्यति, न तत्र योगं वा ज्ञानं वापेक्षते, प्रमाणाभावात् । यथाहुः— "अविद्यावृत्ति तादात्म्ये विद्ययैव विनश्यतः । विक्षेपस्य स्वरूपं तु प्रारब्धक्षयमीक्षते" इति । ततश्च ज्ञानिनो विषयानुभवस्य सोपाधिकतया साक्षात्काराविरोधित्वेन ज्ञानेनाज्ञाने निवृत्तेऽपि प्रारब्धापादितं विषयमनुभवन्मुमुक्षुर्ब्रह्मात्मनाऽवतिष्ठते इत्यविरोधः । तस्मात् तत्सर्वमविषमम् । इदं फलं कुतो भवतीत्यत आह— एतादृशमिति ॥

---

(१) प्रथमाध्यायेन वेदान्तश्रवणम् द्वितीयाध्यायेन मननं तृतीयाध्यायेन निदिध्यासनं चतुर्थाध्यायेन साक्षात्कारः इति चतुरध्यायी सामस्त्येन एतावता निरूपितम् । चतुर्भिरधिकारास्तु तदभिप्रायप्रतिपादक ब्रह्मविचारा न समन्वयादिविधिसूत्रैरिति सूत्रम्. चतुरध्याय्या अपि समन्वयमेवाभिप्रयन्ति, तदनुसारेणाह— यन्ते निमि ।

अन्ये तु गुरुमुखात्सम्पूर्णशास्त्रपठनं श्रवणं, तस्य पठितस्य युक्तिभिरनुसन्धानं मननम्, तस्यैव पुनः पुनरावृत्तिर्निदिध्यासनम्, अनन्तरं साक्षात्कार इत्याहुः।

वस्तुतस्तु शुद्धसत्त्वानां मुख्याऽधिकारिणां व्युत्पन्नानामव्युत्पन्नानां च श्लोकेन श्लोकार्द्धेन वा ब्रह्मसाक्षात्कारो भवत्येव; शब्दस्याऽचिन्त्यशक्तित्वात्। शास्त्रस्य

शारीरक इति शेषः। मतान्तरमाह— **अन्ये त्विति**। ननु शास्त्रानधिकारिणां मैत्रेयीप्रभृतीनां तदधिकारिणां जनकभरतप्रभृतीनां शास्त्रश्रवणादिकमन्तरेण सिद्धगीताश्रवणमात्रेण श्रुतिस्मृतीतिहासपुराणेषु तत्त्वज्ञानोत्पत्त्यवगमात् कथमयं नियमः सेत्स्यतीत्यपरितोषादाह— **वस्तु[1]तस्त्विति**॥ सगुणसाक्षात्कारपर्यन्तकृतोपासना **मुख्याधिकारिणः** जन्मान्तरश्रवणादिसामग्रीसंपन्नाः प्रतिबन्धक्षयान्मानुषं जन्म प्राप्ता वा **मुख्याधिकारिणः** विदितपदतदर्थसङ्गतिकाः **व्युत्पन्नाः**। तद्विपरीता **अव्युत्पन्नाः**॥ ननु भवतु व्युत्पन्नानामुक्तप्रकारेण साक्षात्कारः, अव्युत्पन्नानां सङ्गतिग्रहाभावात् कथं वाक्यात् ब्रह्मसाक्षात्कार इत्याशङ्क्याह— **शब्दस्येति**। यथा सुप्तप्रबुद्धस्येन्द्रियार्थसन्निकर्षानन्तरं चक्षुरादिना घटादिसाक्षात्कारो जायते, तथाऽतीतानेक-

---

(१) न च वामदेवादीनामिव [illegible]

शारीरकादेरमुख्याधिकारिविषयोपपत्तेः। तदुक्तं महाभारते—

" आत्मानं विन्दते यस्तु सर्वभूतगुहाश्रयम् ।

सुकृतपरिपाकवशेन भगवदनुगृहीतस्य नितान्तनिर्मलस्वान्तस्यैकश्लोकश्रवणेन श्लोकार्धश्रवणेन वाक्यमात्रश्रवणेन वा ब्रह्मसाक्षात्कारो भवत्येव । न ह्युन्मत्तानां विचित्रचित्ताना घटादिषु विपरीतव्यवहारो दृष्ट इति स्वस्थचित्तानामपि तादृशव्यवहारो भवतीति शक्य कल्पयितुम् । एव विषयाभिलाषिणां रजस्तमोवृत्त्युपहतचित्तानां पण्डिताना ब्रह्मसाक्षात्काराभावेऽपि कारुण्यामृतवारिराशिभक्तवत्सलश्रीकृष्णानुगृहीतस्य निरस्तसमस्तरजस्तमोवृत्तिस्वान्तस्य वाक्यमात्रश्रवणेन ज्ञानोत्पत्तौ बाधकाभावात् न कोऽपि दोष इति भाव.। ननु तर्हि शारीरकादिशास्त्रप्रणयन व्यर्थं स्यात्, तेन विनापि ब्रह्मसाक्षात्कारसम्भवादित्याशङ्क्याह— शास्त्रस्येति ॥ मुख्याधिकारिणा श्लोकेन श्लोकार्धेन वा ब्रह्मसाक्षात्कारो भवतीत्यत्र वचनमुदाहरति— तदुक्तमिति ॥ विन्दते साक्षात्करोति देहादिविलक्षणत्वेन । आत्मानम् स्वस्वरूपसच्चिदानन्दलक्षणमपरिच्छिन्नम्. "यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह । यच्च स्यात् सन्ततो भावस्तस्मादात्मेति चोच्यते" इति स्मरणादात्मा त्रिविधपरिच्छेदशून्यो भवति । पुन कथ भूतम् ? सर्वभूतगुहाश्रयम् सर्वेषां भूतानां ब्रह्मादिस्थावरान्तानां हृदि गुहायामन्तःकरणे शेते तत्साक्षितया तिष्ठतीति सर्वभूतगुहाशयम् सर्वभूत

श्लोकेन यदि वार्द्धेन क्षीणं तस्य प्रयोजनम् ॥"
इति ॥

साम्प्रदायिकैरप्युक्तम्। "वाक्यश्रवणमात्रेण पिशाचवद्वाप्नुया"दिति।

एतावानत्र विशेषः। अव्युत्पन्नानां परतन्त्रप्रज्ञत्वा-

बुद्धिमाद्यिणमित्यर्थः। तस्य ज्ञानिनो मानुषानन्दमारभ्य ब्रह्मानन्दान्तप्राप्तिरूपप्रयोजनं श्लोकेन श्लोकार्धेन वा। देहादिविलक्षणप्रत्यग्रूपाखण्डैकरमात्मलाभे **क्षीणं** अन्तर्भूतम्। "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ती" तिश्रुतेरित्यस्य श्लोकस्य तात्पर्यार्थः।

तत्र नैष्कर्म्यसिद्धिश्लोकार्धमुदाहरति— **साम्प्रदायिकैरपीति** ॥ "कृत्स्नानात्मनिवृत्तौ तु कश्चिदाप्नोति निर्वृतिम्। श्रुतिवाक्यस्मृतेश्चान्य. स्मार्यते च वचोऽपरः" इति पूर्वश्लोकः। अत्र चत्वारः श्रोतारः 1) विराट् 2) भृगुः (3) श्वेतकेतुः (4) पिशाचश्च। तत्र श्वेतकेतोरावृत्त्यपेक्षायामपि इतरेषां तदभावान्मुख्याधिकारिणां श्लोकेन वा तदर्धेन वा ब्रह्मसाक्षात्कारो भवत्येवेति न काऽप्यनुपपत्तिरिति भावः। **ननु—**मुख्याधिकारिणां व्युत्पन्नानामव्युत्पन्नानां चोक्तप्रकारेण ब्रह्मसाक्षात्कारे संपन्ने कर्तव्यशेषोऽस्ति न वेति विमर्शे निर्णयमाह— **एतावानिति** ॥ अत्र व्यवहारभूमौ अव्युत्पन्नानां ब्रह्मसाक्षात्कारानन्तरं ध्यानमिहाऽपेक्षितमिति मन्तव्यः। तत्र युक्तिं वक्ति— **परतन्त्रेति** ॥ परतन्त्रा—

दसम्भावनादिसम्भवाद् ध्याननिष्ठापेक्षिता। तदुक्तं भगवता—

"अन्ये त्वेवमजानन्तः श्रुत्वाऽन्येभ्य उपासते।
तेऽपि चाऽतितरन्त्येव मृत्युं श्रुतपरायणाः॥" इति।

विद्यारण्यैरप्युक्तम्—

"अत्यन्तबुद्धिमान्द्याद्वा सामग्र्या वाऽप्यसम्भवात्।
यो विचारं न लभते ब्रह्मोपासीत सोऽनिशम्॥"
इति।

"मरणे ब्रह्मलोके वा तत्त्वं ज्ञात्वा विमुच्यते" इति च। पतञ्जलिनाप्युक्तम्। "ततः प्रत्यक्त्वेनाधिगमोऽप्यन्तरायापगमश्चे"ति।

प्रमाणकुशलानां संशयादिग्रस्तानां पण्डितानामपि

समतोत्तरमाह— **मरण इति** ॥ उक्तार्थे योगसूत्र संवादयति— **पतञ्जलिनेति** ॥ **ततः** परमात्मध्यानात्। **प्रत्यक्त्वेनाधिगमः** प्रत्यगात्मसाक्षात्कारः। **अन्तरायापगमः** ज्ञानोत्पत्तौ सकलप्रतिबन्धनिवृत्तिश्च। भवतीति शेषः ॥ तदुक्तं बादरायणेन— "पराभिध्यानात्तिरोहितं ततो ह्यस्य बन्धविपर्ययौ" इति ॥ श्रुतिरपि— 'ज्ञात्वा देवं सर्वपाशापहानिः। क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः। तस्याभिध्यानात्तृतीयं देहभेदे विश्वैश्वर्यं केवल आप्तकामः" इति ॥ **ननु** अव्युत्पन्नानां प्रमाणकौशलाभावेन परतन्त्रप्रज्ञतया ब्रह्मसाक्षात्कारानन्तरं संभावितप्रतिबन्धवारणाय ध्याननिष्ठापेक्षायामपि प्रमाणकुशलानां पण्डितानां स्वतन्त्रप्रज्ञत्वेन ध्याननिष्ठा नापेक्षितेत्याशङ्क्य किं सर्वेषां सा नापेक्षिता, उत केषांचित्, **न द्वितीयः** इत्यापत्ते[1]रित्यभिप्रेत्य आह, नानाशास्त्रपरिशीलनेन जन्मान्तरीयदुरितवशेन च संशयविपर्यासग्रस्तानां पण्डितानामुत्पन्नस्यापि साक्षात्कारस्याप्रामाण्यशङ्काकलङ्कितत्वेना-

(१) स । इति पाठश्च [illegible] भवति तथापि [illegible] इति स [illegible] दर्शित ।

(1)ध्याननिष्ठाऽपेक्षिता। तदुक्तम्—"अपि संराधने प्रत्यक्षानुमानाभ्या"मिति।

ज्ञाननिवर्तनक्षमत्वाभावात्, "परीक्षया न गृह्णाति गृह्णाति चाविपर्ययात्। दृढपूर्वश्रुतत्वाच्च प्रमादाच्चापि लौकिकात्। चतुर्भिः कारणैस्तैर्याथातथ्यं न विन्दति" इति वार्तिकाचार्योक्तेश्च। केषाञ्चित् परमेश्वरानुगृहीतानामसम्भावनादिरहितानां पण्डितानां ब्रह्मापरोक्षज्ञानिनां ध्याननिष्ठापेक्षाभावेऽपि तद्विपरीतानां ध्याननिष्ठाऽपेक्षितैवेत्याह— **प्रमाणेति** ॥ तथा सगुणादिनिवृत्त्याऽप्रतिबद्धब्रह्मसाक्षात्कारेण परमपुरुषार्थो मोक्षस्तेषां भवतीति भावः ॥ तत्राचार्यसम्मतिमाह— **तदुक्तमिति** ॥ तृतीये स्थितम्— "प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः"। 'द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं च' इत्युपक्रम्याधिदैवमध्यात्मं च ब्रह्मणो मूर्तामूर्तलक्षणे द्वे रूपे मूर्तामूर्तरूपौ समष्टिव्यष्टिरूपौ महारजनाद्युपमलिङ्गगतं वासनारूपं चोपन्यस्याम्नायते—"अथात आदेशो नेति नेती"ति। अत्र यद्यपि निषेध्यं किञ्चिन्न प्रतीयते, तथाप्येव

---

(1) [illegible]

शब्दसमानार्थकेनेतिशब्देन सन्निहितवाचिना निषेध्य किंचित् समर्प्यते। तत्र संशयः— किमत्र रूपे परिशिनष्टि, ब्रह्म प्रतिषिध्यते, अहोस्वित् ब्रह्म परिशिनष्टि रूपे प्रतिषिध्येते इति। तत्र प्राप्तं तावत्— रूपे परिशिनष्टि ब्रह्म प्रतिषिध्यत इति। कुत इति चेत्, प्रत्यक्षादिसिद्धस्य रूपादेः प्रतिषेधायोगात्, "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" इति श्रुत्या ब्रह्मणो वाङ्मनसातीतत्वप्रतिपादनेन तस्यैव निषेधो युक्त इति प्राप्तेऽभिधीयते। न तावत् ब्रह्मप्रतिषेधः संभवति, रूपिणं विना रूपानवस्थानात्। किंच ब्रह्मव्यतिरिक्तस्य मूर्तामूर्तलक्षणस्य कार्यतयाऽनित्यत्वेन ब्रह्मप्रतिषेधे शून्यवादः प्रसज्येत। तर्हि किं प्रतिषिध्यत इति चेत्, **प्रकृतैतावत्त्वं हि प्रतिषेधति,** नेति नेतीति श्रुतिः पूर्ववाक्ये प्रकृतं ब्रह्मणो रूपत्वेनोपन्यस्तं मूर्तामूर्तलक्षणतद्गतसद्गतवासनारूपमेतावन्मात्रं प्रतिषेधति, "अथात आदेशो नेति नेती"ति, न रूपि ब्रह्म प्रतिषेधति, शून्यवादप्रसङ्गात् सर्वप्रतिषेधे। आदरार्थे नेति नेतीति वीप्सा। इदं कुतो ज्ञायत इति चेत् **ततः** प्रतिषेधानन्तरं **भूयो ब्रवीति** "न ह्येतस्मादिति नेत्यन्यत् परमस्तीति"। नेति। कोऽर्थः? नेत्येतस्मात् निषेधावधिभूतात् ब्रह्मणोऽन्यत् परं न अस्तीति योजना। यदा तु नेत्येतस्मादतिदेशादन्यत् परं अतिदेशान्तरं नास्तीति योजना क्रियते, तदा **ततो ब्रवीति च भूयः** इत्यस्यायमर्थः— **ततः** नेतिनेत्यादेशानन्तरं भूयः ब्रवीति श्रुतिः "अथ नाम धेयम् सत्यस्य सत्यमिति प्राणा वै सत्यम् तेषामेष सत्यमि"ति॥ यदुक्तम्— प्रमाणसिद्धस्य रूपस्य

प्रतिषेधायोगादिति, तदसत्; रूपस्याविद्याविलसितत्वेन तद्बोधकमानानामाभासत्वात्॥ यदुक्तम्— ब्रह्मणो वाङ्मनसातीतत्वप्रतिपादनेन प्रतिषेधो युक्त इति, तत्तुच्छम्; नहि ब्रह्मणो निरात्मतया वाङ्मनसातीतत्वं प्रतिपाद्यते, किं तर्हि? ब्रह्मणः सर्वेषां नः प्रत्यगात्मतया विषयित्वे न श्रुत्या तत्प्रतिपाद्यते॥ तस्मात् ब्रह्म परिशिष्टे रूपे प्रतिषेधति। तर्हि ब्रह्म सर्वैः कस्मात् न गृह्यते? इति चेत्, अव्यक्तत्वात्। तदपि कुतः? इति चेत्, "न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा"। "स एष नेति नेत्यात्माऽगृह्यो न हि गृह्यते"। "अस्थूलमनणु" "यत्तदद्रेश्यमग्राह्यम्।" "अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते" इत्यादिश्रुतिस्मृतिभिरिन्द्रियाद्यग्राह्यत्वप्रतिपादनात् ब्रह्मणो ऽव्यक्तत्वम्। तर्हि तद्ब्रह्म मुमुक्षवः कथं कदा साक्षात्कुर्वन्ति? इत्याकाङ्क्षायां तत्प्रकारं भगवान् सूत्रकारः उपदिशति— **अपीति॥ संराधने** ध्यानकाले एकाग्रचित्तेन प्रत्यगात्मतया ब्रह्म साक्षात्कुर्वन्ति, कस्मात्? **प्रत्यक्षानुमानाभ्यां** प्रत्यक्षं श्रुतिः, प्रामाण्ये निरपेक्षत्वात्। अनुमानं स्मृतिः, प्रामाण्यं प्रति सापेक्षत्वात्। श्रुतिस्तावत्— "ज्ञानप्रसादेन विशुद्धसत्त्वः ततस्तु तं पश्यते निष्कलं ध्यायमानः"। "कश्चिद्धीरः प्रत्यगात्मानमैक्षत् आवृत्तचक्षुरमृतत्वमिच्छन्" इत्याद्या। "यं विनिद्राः जितश्वासाः सन्तुष्टाः संयतेन्द्रियाः। ज्योतिः पश्यन्ति युञ्जानाः तस्मै योगात्मने नमः।" इत्याद्या स्मृतिः। तस्य ध्यानेन प्रतिपत्त्यनिष्टत्वं ब्रह्मसाक्षात्कारान्तरेषां भवतीव। अत्र— इदं ध्यानं सर्वसाधारण्येनोपदिश्यमानं

अन्यथाऽप्युक्तम्,—

"बहुव्याकुलचित्तानां विचारात् तत्त्वधीर्न चेत्।
योगो मुख्यस्ततस्तेषां धीदर्पस्तेन नश्यति॥" इति।
संशयादिरहितानां ध्याननिष्ठा चेत् स्याद् दृष्टं सुखम्।
तदुक्तं भगवता—
"अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।

— — — — — —

संशयादिग्रस्तपण्डितकर्तव्यत्वेन उपदिष्टमिति कथमुच्यते इति— वाच्यम्, "शास्त्रदृष्ट्या तूपदेशो वामदेववत्" इत्यत्र संशयादि-रहितानां पण्डितानां तत्त्वमस्यादिमहावाक्यार्थज्ञानमात्रेण परम पुरुषार्थप्रतिपादनेनास्य सूत्रस्य संशयादिग्रस्तपण्डितविषयत्वाव-गमात्, अन्यथा पूर्वोत्तरयोर्विरुद्धं वदन् सूत्रकार उन्मत्ततुल्यः स्यात्। तस्मादिदं सूत्रं संशयादिग्रस्तपण्डितविषयमेव न सर्व-साधारणमिति भावः॥

सम्मत्यन्तरमाह— **अन्यथेति**॥ **धीदर्पः** संशयादिः। ननु केचित् ज्ञानिनः संशयादिरहिताः पण्डिताः ध्यानं कुर्वन्तो दृश्यन्ते, तत् किमर्थं कुर्वन्ति? इत्याशङ्क्य दृष्टसुखार्थमित्याह— **संशयेति**। पण्डितानामित्यनुषङ्गः। **दृष्टमिति**। तदर्थं ध्यानं कुर्वन्ति इति भावः। तत्र भगवद्वचनमुदाहरति— **तदुक्तमिति**। न विद्यते ऽभिनिवेशो ऽन्यस्मिन् मायिके येषां तेऽनन्याः मां सर्वदा प्रत्यगात्मानं वासुदेवं "सोऽहं यत् तत् प्रवक्ष्यामि"

तेषां नित्याऽभियुक्तानां योगक्षेमं वहाम्यहम् ॥"
"मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम् ।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ॥"
इति ।

इत्युपक्रम्य "अनादिमत् परं ब्रह्म न सत् तत् नासदुच्यते" इत्या-
दिना प्रतिपाद्यमानम् । **चिन्तयन्तः** अन्वेषणं कुर्वन्तः । **ये जनाः**
साधनचतुष्टयसंपन्नाः । **पर्युपासते** विजातीयप्रत्ययानन्तरित-
तया ध्यानं कुर्वन्ति । अतएव **नित्याभियुक्तानां तेषां**
अहम् योगक्षेमं वहामि । अप्राप्तप्राप्तिर्योगः । प्राप्तस्य परि-
पालनं क्षेमः । **ननु**— अखण्डैकरसानन्दब्रह्मात्मनिष्ठानां लौकिका-
नन्दजातस्य तत्रैवान्तर्भावादप्राप्तांशस्यैवाभावात् ब्रह्मानन्दस्य
प्रत्यग्रूपतया नित्यप्राप्तत्वात् कथं भगवान् तेषां योगक्षेमं वहामीति
वदति ? इति— **चेत्, उच्यते :** यद्यपि तेषामप्राप्तांशस्याभावात्
ब्रह्मानन्दस्य नित्यप्राप्तत्वाच्च योगक्षेमौ न स्तः; तथापि अनात्म-
न्यात्मबुद्धिपरित्यागेन ब्रह्मानन्दात्मनाऽवस्थानं योग इत्युपचर्यते ।
प्रबलप्रारब्धभोगेनापि ब्रह्मनिष्ठातोऽप्रच्युतिः क्षेम इत्युपचर्यते ।
एतादृशयोगक्षेममेव वहामीति भगवानाह, त्यक्तसर्वैषणानामन्या-
दृशयोगक्षेमवहनायोगात् । अतः ध्याननिष्ठानां नियतादृष्टवशं
भवतीति भावः । भगवद्वचनान्तरमुदाहरति— **मच्चित्ता इति** ।
मयि सर्वदा प्रत्यगात्मत्वेनैकरसानन्दे निरस्तदुःखसुखस्वभावे

वासुदेवे **चित्तं** येषा ते तथोक्ता । एव मर्वच बोध्यम्। **ननु** एव ज्ञानिनां ध्यानविधि कुतो न स्यात्? "तमेव धीरो विज्ञाय प्रज्ञा कुर्वीत ब्राह्मण" इति श्रुते सत्त्वात, न च— साक्षात्कारेण परम पुरुषार्थलाभादुत्तर ध्यानविधिर्निष्फल इति— वाच्यम, इदानीम ब्रह्मसाक्षात्कारे सत्यपि यथा पूर्वसुखदु खादिममारोपलभान्न तावता पुरुषार्थसिद्धि किन्तु गुरूपमत्तिपूर्वक श्रवणादिना ब्रह्म निश्चित्य यावज्जीव ब्रह्मध्यानाभ्याम कर्तव्य एव, अन्यथा यथेष्टचेष्टा प्रमक्त्या मुमुक्षोर्नरकपात स्यात। **तथाहुः**— "नि सङ्गता मुक्ति पद यतीना सङ्गादशेषा प्रभवन्ति दोषा । आरूढयोगोऽपि निपात्यतेऽध सङ्गेन योगी किमुतान्पसिद्धि' । इति॥ अतो विषयासङ्गलक्षणयथेष्टचेष्टानिवृत्त्यर्थ ध्यानविधिरपेक्षित । तदप्युक्तम्— 'सग त्यजेत् मिथुनव्रतिना मुमुक्षु सर्वात्मना विसृजेत् बहिरिन्द्रियाणि। एकश्चरेत रहसि चित्रमनन्त ईशे युञ्जीत तद्व्रतिषु साधुषु चेत्प्रसग।' इति। न च— इद साधक-विषय न सिद्धविषयमिति— वाच्यम 'यस्मात् भिक्षु हिरण्य रसेन दृष्ट चेत् स ब्रह्महा भवेत' इत्यादिना सिद्धस्यापि विषयासक्त्या पातित्याभिधानात् 'तमेव धीरो विज्ञाये ति श्रुतिमूलत्वाच्च। अतएव वेदान्तशास्त्र ध्यानविधिपरमिति वदन्ति। अन्यथा प्रवृत्तिनिवृत्तिप्रयोजकत्वाभावेन परिनिष्पन्नवस्तुपरतया ऽनुवादकत्वेन शास्त्रस्याप्रामाण्यप्रसगात् । तस्मात् शास्त्रेण ज्ञानानन्तर ध्यानविधानात् सर्वै मुमुक्षुभि परिनिष्ठितैरपरिनिष्ठितै मध्यादिरहितै तद्भक्तैर्वा ब्रह्मज्ञानोत्तर यावज्जीव ब्रह्मध्यान

न तु ज्ञानिनो ध्यानविधिः; देहाऽभिमानशून्यतया कर्तृत्वाऽभावेन तस्य विधिकिङ्करत्वाऽयोगात्। तदु-

कर्तव्यमेवेत्याशङ्क्याह— **न तु ज्ञानिन इति ॥** देहाभिमानो[१] द्विविध — कर्मजो भ्रान्तिजश्चेति। कर्मक्षयात् आद्यो निवर्तते, द्वितीयस्याज्ञानमूलत्वेन ज्ञानेनाज्ञाने निवृत्ते तन्मूलभ्रान्तेरपि निवृत्त-त्वात् भ्रान्तिजाभिमानोऽपि निवर्तते। ततश्च ज्ञानिनो देहाभि-मानशून्यस्य कर्तृत्वादिनिवृत्तौ सर्वाधिकारनिवृत्तेः कुतो ध्यान-विधिः? तदुक्तम्—"व्याचक्षतां ते शास्त्राणि वेदानध्यापयन्तु वा। येऽत्राधिकारिणो मर्त्या नाधिकारोऽक्रियत्वतः। शृण्वन्त्वज्ञात-तत्त्वास्ते जानन् कस्मात् शृणोम्यहम्। मन्यन्तां संशयापन्ना न मन्येऽहमसंशयः। विपर्यस्तो निदिध्यासेत् किं ध्यानमविपर्यये॥" इति॥ न च— एवं शास्त्रस्याप्रामाण्यापत्तिः, ब्रह्मात्मभावस्य मानान्तरायोग्यत्वेन शास्त्रस्य विधिपरत्वानङ्गीकारे ततः प्रवृत्ति-निवृत्त्यभावेन शास्त्रत्व[२]मेव न स्यादिति— वाच्यम्, हित-

(१) देहाभिमानो नाम देहात्मताभिमानः स पुरुषस्य कर्माधिकारं प्रयोजयति, न तु घटादिपदार्थवत् देहसत्त्वज्ञानमात्रम्। तथाच ज्ञानिनं देहादिसत्त्वेऽपि देहात्मताभिमानाभावान्न कर्मस्वधिकारः। स चाध्यासपूर्वक एव न कर्मजः; कर्मणा देहाभिमानो देहाभिमानेन कर्मेत्यन्योन्याश्रयात्। तदुक्तं भाष्यकारैः— स्वकृतधर्माधर्मनिमित्तं सशरीरत्वमिति चेत् न; शरीरसम्बन्धस्यासिद्धत्वात् तद्धर्माधर्मयोरात्मकृतत्वासिद्धेः। शरीरसम्बन्धस्य धर्माधर्मयोस्तत्कृतत्वस्य चेतरेतराश्रयत्वप्रसङ्गादन्धपरम्परैषाऽनादित्वकल्पनेति। यच्च चैतत् भामत्यां जिज्ञासाधिकरणे।

(२) मानान्तरायोग्यधर्मबोधकवाक्यमिव वेदान्तवाक्यमपि विधेयोपासनादिपरमेव युक्तं न तु सिद्धब्रह्मस्वरूपप्रतिपादनपरमिति समन्वयाधिकरणपूर्वपक्षः।

ग्रामनाच्छास्त्रत्वोपपत्ते । न च— एवमप्यनुवादकत्वेनाप्रामाण्यमिति— वाच्यम्, ब्रह्मणो मानान्तरायोग्यत्वेन तदयोगात् । तस्मात् वेदान्तशास्त्र न ध्यानविधिपरम् । अत एव सूत्रकारभाष्यकाराभ्या समन्वयाध्याये चतुर्थाधिकरणे "तत्तु समन्वयादि"त्यत्र शास्त्रस्य विधिपरत्व पूर्वपक्षीकृत्य सिद्धान्ते वस्तुनिष्ठत्वेन वेदान्ताना प्रामाण्य समर्थितम । **ननु**— एव सति "तमेव धीरो विज्ञाय प्रज्ञा कुर्वीत ब्राह्मण" इति श्रुतेरप्रामाण्यप्रसग इति— **चेत्,** न, विज्ञायेत्यनेन श्रवणजन्यज्ञानस्यैव विवक्षितत्वेन तदुत्तर ब्रह्मसाक्षात्कारमुद्दिश्य ब्रह्मध्यानविधानोपपत्तेनाप्रामाण्य श्रुते । न च एवमपि साक्षात्कारानन्तर ध्यानविध्यनङ्गिकारे यथेष्टचेष्टा[१]प्रसग इति— वाच्यम्, 'देहाभिमानशून्यत्वेन तदयोगात, "निस्सगता मुक्तिपद," ' सग त्यजेत " इति वचनद्वयस्य साधकविषयत्वाच्च । यद्यपि "यस्माद्भिक्षुर्हिरण्य रसेन दृष्ट चेदित्या"दि वाक्य विद्वत्सन्यासप्रकरणे पठित सिद्धविषयमिवाभाति, तथापि सिद्धस्य देहाभिमानशून्यतया रागादिप्रसक्तेरभावेन साधकविषय कमेवेद वाक्य सिद्ध स्मोति ॥

(१ निषिद्धकर्माचरणमपि स्यात् विधिष्विव निषेधेष्वप्यधिकाराभावादिति भाव ।

२) देहाभिमानशून्यत्वं नाम देहाभिमानप्रयुक्तप्रवृत्त्यभाव इत्यर्थ । विधिषु याऽधिकारो न निषेधेष्वित्यादिना भामत्या निषेधेषु न ज्ञानिनोऽधिकार इति निरूपितम् । बृहदारण्यकोपनिषद्भाष्यवार्तिककारैस्तु— ज्ञानिनां निषिद्धेष्विष्टसाधनताज्ञानाभाव एव न प्रवृत्तिरिति निरूपयन्ति ।

क्तम्—"अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिव"-दिति। भाष्यकारैरप्युक्तम्—"अहं ब्रह्मास्मीत्ये-

---

तदेतत्सर्वमभिप्रेत्याह— **देहाभिमानेति॥** ज्ञानिनः अधिकरणं पूर्वमनुक्रान्तम्। यद्यात्मा ब्रह्म स्यात् तर्ह्यनुज्ञापरिहारौ निर्विषयौ स्याताम् इति चेन्न, **देहसंबन्धात्** देहाभिमानात् "गृहस्थः सदृशीं भार्यामुपेयात्," **इत्यनुज्ञा,** "गुर्वङ्गनां नोपेयात्" इति **परिहारः,** एतौ अनुज्ञापरीहारौ देहाभिमानात् आत्मनो ब्रह्मत्वाज्ञानदशायामुपपद्येते, ब्रह्मज्ञानदशायामात्मनस्तदभावादुभयमपि नास्त्येव। तत्र ज्योतिरादिवदिति दृष्टान्तः। यथाऽग्निः श्मशानसम्बन्धी परिह्रियतेऽन्यस्तूपादीयते, यथा वा पुरीष मनुष्यशरीरसम्बन्धि परित्यज्यते गवां शरीरसम्बन्ध्युपादीयते, तस्य पवित्रत्वात् तद्वत् देहाभिमानिनोऽनुज्ञापरीहारौ, अन्यस्य तु न किमपि कर्तव्यमस्ति। तदुक्तम्—"यस्त्वात्मरतिरेव स्यात् आत्मतृप्तश्च मानवः। आत्मन्येव च सन्तुष्टः तस्य कार्यं न विद्यते। नैव तस्य कृतेनार्थो, नाकृतेनेह कश्चन। न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः।" इति॥ पुराणेऽप्युक्तम्—"ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः। नैवास्ति किञ्चित् कर्तव्यमस्ति चेन्न स तत्त्ववित्।" इति। तथा देहाभिमानादनुज्ञापरीहारौ दर्शयत् सूत्र ध्यानविध्यभावे व्याससूत्र संवादयति— **तदुक्तमिति॥** सर्वकर्तव्यताभाव दर्शयतीत्यभिप्रायः। तत्र भाष्यसम्मतिमाह— **भाष्यकारैरिति॥**

तदवसाना एव सर्वे विधयः सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणीति देहेन्द्रियादिष्वहं ममाभिमानहीनस्य प्रमातृत्वाऽनुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्ति"रिति। तदुक्तं—

"गौणमिथ्यात्मनोऽसत्त्वे पुत्रदेहादिबाधनात्।
तत्सद्ब्रह्माऽहमस्मीति बोधे कार्यं कथं भवेत्॥"

इत्युक्तम्।

"सूत्रार्थो(१) वर्ण्यते यत्र वाक्यैः सूत्रानुकारिभिः। स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः" इति श्लोकोक्तलक्षणं भाष्यं कुर्वन्तीति भाष्यकारास्तैरित्येतत्। ब्रह्मविदां वचनमपि संवादयति-**गौणेति**॥ आत्मा त्रिविधः—गौणात्मा मिथ्यात्मा मुख्यात्मा चेति। पुत्रभार्यादयो **गौणात्मानः**। अन्नमयादयः पञ्चकोशाः **मिथ्यात्मानः**। तेषामधिष्ठानभूतो यश्चिदात्मा सच्चिदानन्दैकरसः स **मुख्यात्मा**। आत्मनोऽसत्त्व इत्यार्षत्वात् रेफलोपो न दोषाय। ततश्च गौणमिथ्यात्मनोरसत्त्वे मिथ्यात्वनिश्चये पुत्रदेहादीनामात्मत्वबाधनात् सर्वेषामधिष्ठानभूतसच्चिदानन्दैकरसब्रह्माहमस्मि इति बोधे जाते सति **कार्यं** कर्तव्यं **कथं भवेत्** न किमपि कर्तव्यं स्यादित्यर्थः। तथाच

---

(१) सूत्रकारवाक्यमिव भाष्यकारवाक्यमपि सम्यगादरणीयम्। न हि सूत्राननुगतार्थप्रतिपादकं वाक्यं भाष्यपदमर्हति। एतेन भाष्यलक्षणपद्योऽप्यत्र साम्प्रतं सूचितमिति।

ज्ञानिनो ध्यानाऽभावे व्यवहारप्राचुर्याद् दृष्टदुःख-

श्रुतिः— "स ब्राह्मणः केन स्यात् येन स्यात् तेनेदृश एव एष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्द्धते नो कनीयान्" इत्याद्या स्मृतिरपि— "एतद्बुद्धा बुद्धिमान् स्यात् कृतकृत्यश्च भारत। स बुद्धिमान् मनुष्येषु स युक्तः कृत्स्नकर्मकृत्" इत्याद्या ज्ञानिनः सर्वकर्तव्यताभावं कृतकृत्यताञ्च दर्शयतः। तस्मात् ज्ञानिनः कर्तव्यताभावात् ध्याननिष्ठा चेत् स्यात् तदा दृष्टसुखं भवति, अतो न तद्विधिगन्धोऽपीति भावः। **ननु** ज्ञानिनो ध्यानविध्यभावेन प्रारब्धवशेन बहिर्व्यवहारप्रसक्त्या असंभावनादिप्रसक्त्या मोक्षो न स्यादित्याशङ्क्याह— **ज्ञानिन इति॥ दृष्टेति॥** मात्रशब्देना-संभावनादि व्यावर्त्यते। नहि श्रवणमनननिदिध्यासनैर्निश्चित-तत्त्वस्य स्वतो निष्टत्तस्य करतलामलकवत् स्वस्वरूपमद्वयानन्द-मनुभवतः संशयादि संभवति। तदुक्तम्— "विद्याविशदमयष्टेण पिहितं प्रत्यक्षमुच्चैस्तरां उत्कृष्टोत्तमपूरुषं मुनिधिया मुञ्जादि-षिकामिव। कोशात् कारणकार्यरूपविकृतात् पश्यामि निःसंशयं नासीदस्ति भविष्यति क नु गतः संसारदुःखोदधिः।" इति॥ **ननु** मास्तु संशयादिः, अज्ञानमेव मोक्षप्रतिबन्धकं स्यात्, कथमन्यथा प्रारब्धभोगः? इत्याशङ्क्याह। **नेति॥** अपरोक्ष-ज्ञाने विरोधिनि सति ब्रह्माज्ञानायोगात् बाधितानुवृत्त्या द्वैतदर्शनमात्रेण प्रारब्धभोगोपपत्तेर्न मोक्षप्रतिबन्धः। तदुक्तं वार्तिककारैः— "तत्त्वमस्यादिवाक्योत्थसम्यग्धीजन्ममात्रतः। अविद्या

मात्रं न मोक्षप्रतिबन्धः। तदुक्तं—"तन्निष्ठस्य मोक्षो-

पदेशात्" ॥ ७ ॥

मत्र कार्येण नासीदस्ति भविष्यति।" इति ॥ सङ्क्षेपशारीर-
काचार्यैरप्युक्तम्— "पश्यामि चित्रमिव सर्वमिदं द्वितीयम्
तिष्ठामि निष्कलचिदेकवपुष्यनन्ते। आत्मानमद्वयमनन्तसुखै-
करूपं पश्यामि दग्धरशनामिव च प्रपञ्चम् ॥ अद्वैतमप्यनु-
भवामि करस्थबिल्वतुल्यं शरीरमहिनिर्ल्वयनीवदीक्षे। एवञ्च
जीवनमिव प्रतिभासनञ्च निःश्रेयसाधिगमनं मम सुप्रसिद्धम् ॥'
इति। तस्मात् ज्ञानेनाज्ञानतत्कार्यसंशयादीनां निवृत्तत्वात्
प्रारब्धाधीनव्यवहारे सत्यपि ज्ञानिनो मोक्ष उपपद्यत इति भावः।
तत्र सम्मतिमाह—**तदुक्तमिति** ॥ समन्वयलक्षणे स्थितम्—
'ईक्षतेर्नाशब्दम्— 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं"
इत्युपक्रम्य 'तदैक्षत बहु स्यां प्रजायेय" इत्यादिश्रुत्या जगत
कारणं किञ्चित् श्रूयते। तत्र संशयः— प्रधानादि जगत्कारणम्,
अहोस्वित् ब्रह्म वेति। तत्र ज्ञानक्रियाशक्तिमत्त्वात् परिणामित्वाच्च
त्रिगुणात्मकं प्रधानमेव जगत्कारणम्,[1] न ब्रह्म, तस्यापरिणामि-
त्वात् इति प्राप्ते— अभिधीयते न प्रधानं जगत्कारणं सच्छब्दवाच्यम्,
अशब्दम् यतः। कथमशब्दत्वमिति चेत् "तदैक्षत बहु स्यां

(१) अथायमनुमानप्रयोगः— प्रधानं न जगत्कारणं सदेवेति वाक्यघटकसच्छब्द-
प्रतिपाद्यत्वाभावात् इति एकः। अपरः प्रधानं न सच्छब्दवाच्यम् सच्छब्दस्य न
[illegible] । सच्छब्दो न प्रधानपरः ईक्षितिशब्दसमान[illegible]
दिति वा इति।

पदेशा"दिति। तस्मिन् ब्रह्मात्मनि निष्ठा अनन्यव्यापारतया परिसमाप्तिः पर्यवसानं यस्य स तथा तस्य, ज्ञानैकशरणस्येति यावत्।

प्रजायेय" इति कारणस्येक्षितृत्वश्रवणात् ईक्षितृत्वस्य चेतनधर्मत्वात् प्रधानस्याचेतनत्वेन तदयोगात्। **ननु** प्रधानस्यापि गौणमीक्षितृत्व भविष्यतीति—**चेत्,** न, "सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि" इति कारणे सत्यात्मशब्दप्रयोगादचेतने तदयोगात्। अचेतनेऽप्यात्मशब्दो गौणो भविष्यतीत्याशङ्क्य तदुत्तरत्वेनेदमाह— **तन्निष्ठेति ॥** सूत्र व्याचष्टे— **तस्मिन्निति ॥** अयमर्थः— यदि प्रधान जगत्कारण स्यात्, तर्हि "आचार्यवान् पुरुषो वेद तस्य तावदेव चिर यावन्न विमोक्ष्येऽथ सपत्स्ये" इति तन्निष्ठस्य मोक्षोपदेशो न स्यात्। न ह्यचेतनप्रधाननिष्ठस्य मोक्षोपदेशः सभवति, "तमेव विदित्वाऽतिमृत्युमेति नान्य पन्था विद्यतेऽयनाय" इति परमात्मविज्ञानदन्यस्य मोक्षसाधनत्वप्रतिषेधात्। किञ्च तत्त्वमसीति चेतनस्य श्वेतकेतोरचेतनतदात्म्यनिष्ठोपदेशायोगात् न तज्ज्ञानात् मोक्षः संभवति। तस्मात् न प्रधानं जत्कारणम्, किन्तु ब्रह्मैव। ततश्च तन्निष्ठस्य मोक्षोपदेशात् ब्रह्मज्ञानैकशरणस्य न मोक्षप्रतिबन्धः। "सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज। अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः।" इति भगवद्वचनाच्चेति भावः।

तथैव भगवानप्याह—

"य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह ।
सर्वथा वर्त्तमानोऽपि न स भूयोऽभिजायते ॥
यस्य नाऽहंकृतो भावो बुद्धिर्यस्य न लिप्यते ।
हत्वापि स इमान् लोकान् न हन्ति न
निबध्यते ॥" इति ।

शेषोऽपि—

"हयमेधशतसहस्राण्यथ कुरुते ब्रह्मघातलक्षाणि ।
परमार्थविन्न पुण्यैर्न च पापैः स्पृश्यते विमलः ॥"
इति ।

विद्यारण्यैरप्युक्तम्—

"पूर्णे बोधे तदन्यौ द्वौ प्रतिबद्धौ यदा तदा ।

तत्र भगवत्संमतिमाह— **तथैवेति** ॥ **पुरुषं** पूर्णं अपरिच्छिन्नानन्दस्वरूपमिति यावत् । **गुणैः** सत्त्वादिभिः सह प्रकृतिञ्च वेत्तीति संबन्धः । **सः** निवृत्ताविद्यो मुक्तीभूतः । **सर्वथा** सर्वप्रकारेण । **वर्तमानः** यथेष्टव्यवहारं कुर्वन्नपीत्यर्थः । उक्ताभिप्रायो भगवतैवोद्घाटित इति दर्शयितुमष्टादशाध्यायश्लोकमुदाहरति— **यस्येति** ॥ उक्तार्थे शेषवचनमुदाहरति— **शेषोऽपीति** ॥ **हय-मेधः** अश्वमेधः । **परमार्थवित्** अहंब्रह्मास्मीतिसाक्षात्कारवान् । उक्तवचनान्तरमुदाहरति— **विद्यारण्यैरिति** ॥ वैराग्योपरमा-

मोक्षो विनिश्चितः किं तु दृष्टं दुःखं न नश्यति ॥"
इति ।

वन्तौ द्वौ । "वैराग्यबोधोपरमाः सहायास्ते परस्परम् । प्रायेण सह वर्तन्ते वियुज्यन्ते क्वचित् क्वचित् ।" इति वैराग्यादीनां परस्परसहायत्वमुक्त्वा क्वचित् कस्यचित् वियोगमुक्त्वा कस्य पुनः त्रयाणां सहावस्थानं केन वा कस्यचित् वियोगो भवतीत्याकाङ्क्षायां— "त्रयोऽप्यत्यन्तपक्वाश्चेत् महतः तपसः फलम । दुरितेन क्वचित् किञ्चित् कदाचित् प्रतिबध्यते ॥" इति कस्यचिदुत्तमाधिकारिण पुरुषधौरेयस्य महता तपसा परमेश्वरानुग्रहेण च वैराग्यादीनां सहावस्थानमुक्त्वा मध्यमाधिकारिणः दुरितेन त्रयाणामन्यतमस्य प्रतिबन्धमुक्त्वा कस्मिन् पूर्णे किं फलं भवतीत्याकाङ्क्षाया— "वैराग्योपरमे पूर्णे बोधस्तु प्रतिबध्यते । यस्य तस्य न मोक्षोऽस्ति पुण्यलोकस्तपोबलात् ॥" इति वैराग्योपरमयोः पूर्णत्वे बोधस्य प्रतिबन्धफलमुक्त्वा तद्विपरीत इदमाह— **पूर्णे इति** ॥ तत्र त्रयाणां साधनस्वरूपं फलं च तत्रैव व्युत्पादितम्— "दोषदृष्टिर्जिहासा च पुनर्भोगे स्वदीनता । असाधारणहेत्वाद्या वैराग्यस्य त्रयो ह्यमी ॥ श्रवणादित्रयं तद्वत् तत्त्वमिथ्याविवेचनम् । पुनर्ग्रन्थेरनुदयो बोधस्यैते त्रयो मताः ॥ यमादिर्धीनिरोधश्च व्यवहारस्य संक्षय. । स्युर्हेत्वाद्याः उपरतेरित्यसङ्कर ईरितः ॥ ब्रह्मलोकतृणीकारो वैराग्यस्याव-धिर्मतः । सुप्तिवत् विस्मृति. सीमा भवेदुपरमस्य हि । देहात्मवत् परात्मत्वदार्ढ्ये बोधः समाप्यते ॥" इति ॥ ततश्च यस्य बोधः पूर्णः

बोधस्य पूर्णत्वावधिर्विष्णुपुराणे पराशरेण दर्शितः—

"अहं हरेः सर्वमिदं जनार्दनो
नान्यत्ततः कारणकार्यजातम् ।
ईदृङ्मनो यस्य न तस्य भूयो
भवोद्भवा द्वन्द्वगदा भवन्ति ॥" इति ।

वैराग्योपरमौ प्रारब्धकर्मणा प्रतिबद्धौ यदा तदा तस्य मोक्षः सिद्ध एव, "ब्रह्म वेद ब्रह्मैव भवति" "ब्रह्मविदाप्नोति परम्" इत्यादि श्रुतेः, किन्तु प्रारब्धकर्मवशेन व्यवहारप्राचुर्यात् दृष्टसुखं न लभते, तन्निवर्तकस्य योगस्य प्रतिबद्धत्वादिति भाव'। न च— प्रारब्धापेक्षया योगस्य प्रबलत्वात् कथं तस्य प्रतिबन्ध इति— वाच्यम्, अवश्यम्भाविप्रारब्धस्य योगापेक्षया प्रबलत्वात्। तदुक्तम्— "अवश्यम्भावि भावानां प्रतीकारो भवेद्यदि। तदा दुःखैर्न लिप्येरन् नलरामयुधिष्ठिराः॥" इति॥ **ननु** बोधे पूर्णे वैराग्यपरमयोः प्रतिबन्धेऽपि मोक्षो भवतीत्युक्तम्, तत्र बोधस्य पूर्णत्वं किंदृशमित्याकांक्षायां असम्भावनाविपरीतभावनाराहित्यं ब्रह्मसाक्षात्कारस्य पूर्णत्वमित्यभिप्रेत्य तत्र विष्णुपुराणवचनमुदाहरति— **बोधस्येति**॥ अज्ञानतत्कार्यं हरतीति **हरिः** भगवान् वासुदेवः परमात्मा। **ततो** हरेः कारणञ्च कार्यजातञ्च **कारणकार्यजातम् अन्यत्** किमपि नास्ति, कार्यकारणयोर्ब्रह्मणि कल्पितत्वेन तद्व्यतिरेकेणाभावादिति भावः। **द्वंद्वगदाः** शीतोष्णमानापमानादि द्वन्द्वव्याधयः। संशयविपर्याम-

ब्रह्मगीतायां ब्रह्माणं प्रति शिवेनापि—

(१)"अहं हि सर्वं न च किं चिदन्य—

न्निरूपणायामनिरूपणायाम् ।

इयं हि वेदस्य परा हि निष्ठा

ममाऽनुभूतिश्च न संशयश्च ॥" इति ।

उपदेशसहस्रिकायामपि—

"देहात्मज्ञानवद् ज्ञानं देहात्मज्ञानबाधकम् ।

आत्मन्येव भवेद्यस्य सोऽनिच्छन्नपि मुच्यते ॥"

इति ।

"अयमस्मीति पूरुषः" इत्यचाऽयमिति श्रुते-

शून्यतया गुरूपदिष्टमहावाक्यात् ब्रह्मसाक्षात्कारे सत्यज्ञानतत्कार्यं विनश्यति; "तरति शोकमात्मवित्" इति श्रुतेरिति भावः ॥ तत्र स्कन्दपुराणवचनमप्युदाहरति— **ब्रह्मेति** ॥ शिवेनापि बोधस्य पूर्णत्वावधिर्दर्शित इत्यनुषज्यते । तत्र आचार्यवचनमप्युदाहरति— **उपदेशेति** ॥

ग्रन्थान्तरसम्मतिमाह— **अयमित्यादिना** ॥ परमप्रकृतमुप-

---

(१) अत्र च सर्वं वाक्यं सावधारणमिति न्यायेन यथादिनैव ब्रह्मसाक्षात्कार मात्र एव ब्रह्मभावलक्षणैव मुक्तिर्भवत्येवेति सावधारणं विवक्षितमिति एतद्व्याख्य- भावकतया "तमेव विदित्वा" "ब्रह्मविद्ब्रह्मैव भवती"ति च श्रुत्युपन्यासमहिम्ना सूच्यते । तत्र त विदित्वैवेति योजनया ब्रह्मसाक्षात्कारेणैवेति ब्रह्मैव भवतीति विभागेन ब्रह्मभाव एव मुक्तिरिति च गम्यते ।

स्तात्पर्यप्रतिपादनव्याजेन विद्यारण्यैरपि दर्शितं तृप्तिदीपे—

"असन्दिग्धाऽविपर्यस्तबोधो देहात्मताक्षये।
तद्वदात्मनि निर्णेतुमयमित्युच्यते पुनः॥" इति।

सर्वथापि श्रवणादिनात्मब्रह्मसाक्षात्कारस्ततो ब्रह्मभावलक्षणा मुक्तिर्भवतीति सिद्धम्। "तमेव विदित्वाऽतिमृत्युमेति" "तरति शोकमात्मवित्" "ब्रह्मविद् ब्रह्मैव भवति" "एवमेवैष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरूपसंपद्य स्वेन रूपेणाऽभिनिष्पद्यते स उत्तमः पुरुषः"।

सङ्गरति—**सर्वथेति**॥ ततः किं? तत्राह—**तत इति**॥ तं परमात्मानम्। **विदित्वा** ब्रह्मास्मीति साक्षात्कृत्य। **मृत्युं** संसारकारणमज्ञानम्। **अत्येति** अतिक्रामति नाशयतीत्यर्थः। शोकमिति संसारकारणमज्ञानमुपलक्ष्यते। सम्यक् प्रसीदत्यस्मिन् जीव इति **संप्रसाद** इति सुषुप्तिवाचकेन संप्रसादशब्देन तदानीं जीवो लक्षणया प्रतिपाद्यते। **अस्माच्छरीरात्** स्थूलरूपात्। **समुत्थाय** विवेकेन तदभिमानं त्यक्त्वा। स्वेन **रूपेण** ब्रह्म अभिनिष्पद्यते। अयमर्थः—अहं ब्रह्मास्मीति स्वस्वरूपेण ब्रह्म साक्षात्कृत्य **परं ज्योतिः संपद्यते** परमात्मा भवतीति। यो ब्रह्मीभूतः **सः उत्तमः पुरुषः** उक्तः निरुक्तः तत्र अज्ञान

"आत्मानं चेद्विजानीयादयमस्मीति पूरुषः।
किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत्॥"
"यत्पूर्णानन्दैकबोधस्तद्ब्रह्माहमस्मीति कृतकृत्यो-
भवती"ति।
"एतद्बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारते"
त्यादिश्रुतिस्मृतिभ्यः॥ शेषोऽप्याह—

यस्मात्सावुत्तमः, अज्ञानतत्कार्य्यातीतः। **पुरुषः** पूर्णः। "नैतेन किञ्चनानावृतं नैतेन किञ्चनासंवृतमि"ति श्रुतेः। **अयं** नित्यापरोक्षस्वरूपः पुरुषः सर्वसाक्षी **अहमस्मीति। आत्मानं** प्रत्यगात्मानम् **जानीयात् चेत्** कश्चित् स किमिच्छन् कस्य कामाय शरीरमनुसञ्ज्वरेदिति सवन्धः। अत्र चेदिति ज्ञानाधिकारिणोऽत्यन्तदुर्लभत्वं सूचयति, "कश्चिद्धीरः प्रत्यगात्मानमैक्षत्" इति श्रुत्यन्तरात्,—"मनुष्याणां सहस्रेषु कश्चित् यतति सिद्धये। यततामपि सिद्धानां कश्चित् मां वेत्ति तत्त्वतः"। इति भगवद्वचनाच्च। कृतं कृत्यं येनासौ **कृतकृत्यः**। एतत् कृतकृत्यत्वं विद्यारण्यश्रीपादैः प्रपञ्चितम्—"ऐहिकामुष्मिकव्रातसिद्धौ मुक्तेश्च सिद्धये। बहु कृत्यं पुरास्याभूत् तत्सर्वमधुना कृतम्॥ तदेतत् कृतकृत्यत्वं प्रतियोगिपुरस्सरम्। अनुसंदधते चायमेवं तृप्यति नित्यशः॥ दुःखिनोऽज्ञाः संसरन्तु कामं पुत्राद्यपेक्षया। परमानन्दपूर्णोऽहं संसरामि किमिच्छया॥ अनुतिष्ठन्तु कर्म्माणि परलोकयियासवः। सर्वलोकात्मकः कस्मादनुतिष्ठामि किं कथम्॥

"वृक्षाग्राच्च्युतपादो यद्वदनिच्छन्नपि क्षितौ पतति।
तद्वद्गुणपुरुषज्ञोऽनिच्छन्नपि केवली भवति॥" इति।

॥ इति तत्त्वानुसन्धाने तृतीयः परिच्छेदः ॥

व्याचक्षतां ते शास्त्राणि वेदानध्यापयन्तु वा। येऽत्राधिकारिणो मर्त्याः नाऽधिकारोऽक्रियत्वतः। निद्राभिक्षे स्नानशौचे नेच्छामि न करोमि च। द्रष्टारश्च कल्पयन्तु किं मे स्यादन्यकल्पनात्॥ गुञ्जापुञ्जादि दह्येत नान्यारोपितवह्निना। नान्यारोपितसंसारधर्मानेवमहं भजे।" इत्यादि॥ **एतत्** ब्रह्मात्मतत्त्वम्। **बुध्वा** ब्रह्माप्नोति साक्षात्कृत्य। **बुद्धिमान्** कुशलः। तत्र शेषवचनमुदाहरति— **शेषोऽप्याह** ॥ तस्माद्विचारिततत्त्वमस्यादिवाक्यजन्यसाक्षात्कारेण नित्यनिरतिशयाखण्डैकरसानन्दब्रह्मभावलक्षणा मुक्तिर्भवतीति सिद्धम्॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य-श्रीमत्स्वयंप्रकाशानन्दसरस्वती-पूज्यपाद-शिष्यभगवन्महादेवसरस्वतीविरचिते तत्त्वानुसंधानव्याख्यानेऽद्वैतचिन्ताकौस्तुभे तृतीयः परिच्छेदः॥

अथ चतुर्थः परिच्छेदः ।

सा च मुक्तिर्द्विविधा, विदेहमुक्तिर्जीवन्मुक्तिश्चेति ।

यच्चिन्तयाऽऽप्ताः परमात्मभावमज्ञानतत्कार्यनिवर्तनेन ।
त्यक्तैषणाः संयमिनो महान्तस्तं कृष्णमाद्यं शरणं प्रपद्ये ॥१॥

ब्रह्मसाक्षात्काराद्विदेहमुक्तिरेकैव भवति, न जीवन्मुक्तिः; प्रमाणाभावात्। न च— "विमुक्तश्च विमुच्यते" "स जीवन्मुक्त उच्यते"। "स्थितप्रज्ञस्तदोच्यते" इत्यादि श्रुतिस्मृतिवचनानां सत्त्वात् कथं प्रमाणाभाव इति— वाच्यम्; तेषामन्यपर(१)त्वात्। किञ्च केयं जीवन्मुक्तिः अज्ञाननिवृत्तिर्वा, ब्रह्मभावो वा, आहोस्वित् जीवदवस्थायां कर्तृत्वादिबन्धनिवृत्तिर्वा। **नाद्यः;** विदेहमुक्तावतिव्याप्तेः। अतएव **न द्वितीयः।** **नापि तृतीयः;** जीवदवस्थायां भोगप्रदे प्रारब्धे कर्मणि सति कर्तृत्वादिबन्धनिवृत्तेरयोगात्। किञ्च कर्तृत्वादिबन्धः किं साक्षिणो निवार्यते, आहोस्विदहंकाराद्वा। **नाद्यः;** तत्त्वज्ञानेनैव वारितत्वात्। **न द्वितीयः;** भोगप्रदप्रारब्धकर्मणि सत्यहंकारगतस्य स्वाभाविकस्य कर्तृत्वादेः वारणायोगात्। न च— योगेन

(१) अस्मिन्मतेऽप्रमाणाज्ञानाभावविशिष्टपटुतमसंस्कारसहितप्रारब्धभोगस्या... अवस्थितपूर्वकालिकमात्रमेव मोक्षसाधनमिति विदेहमुक्तिरेकैव न जीवन्मुक्तिर्नाम काचिदस्ति। पूर्वतनमते तु सा समस्तीति विशेषः।

तदभिभव इति—वाच्यम् “योगात् प्रारब्धस्य बलवत्त्वात्[१]। किञ्च साधनाभावाच्च जीवन्मुक्तिर्न सिध्यति तत्त्वज्ञानस्य विदेहमुक्तिकारणत्वात्। न च—योगाभ्यास एव तत्साधनमिति—वाच्यम्; तस्य तत्त्वज्ञानसाधनत्वेनातत्साधनत्वात्। “ज्ञानामृतेन तृप्तस्य नित्यतृप्तस्य योगिनः। नैवास्ति किञ्चित् कर्तव्यमस्ति चेत् न स तत्त्ववित्॥” “तस्य कार्यं न विद्यते,” इति च साक्षात्कारोत्तर कर्तव्यप्रतिषेधाच्च”। किञ्च ज्ञानिनो देहाभिमानशून्यस्य कर्तृत्वाभावेन कर्तव्यप्रवृत्त्यसंभवेन तत्र अधिकारासंभवात् सा न सम्भवति। नहि निरधिकारजीवन्मुक्तिसाधनाभ्यासः संभवति। किञ्च प्रयोजनञ्च न पश्यामः तत्सिद्धे। न च—ज्ञानरक्षादिकमेव तत्प्रयोजनमिति—वाच्यम्, प्रमाणजन्यज्ञानस्याज्ञाननिवर्तनक्षमस्य बाधकासत्त्वे तद्रक्षाया दुर्निरूपत्वात्, तपसोऽन्यफलत्वात्, विसंवादाभावस्य समाध्यन्तर्भूततया ज्ञानसाधनत्वेन तत् फलत्वात् दुःखनाशसुखाविर्भावयोः ज्ञानफलत्वाच्च। तस्मात् प्रमाण-स्वरूप-लक्षण-साधनाधिकारि-प्रयोजनानां दुर्निरूपत्वात् जीवन्मुक्त्यभ्युपगमो निरर्थकः। तस्मात् तत्त्वज्ञानात् मुक्तिरेकरूपैवेति केचिदावदूका मन्यन्ते, तान्निराकर्तुकामो मुक्तिं विभजते—**सा चेति॥**

(१) यदा च प्रारब्धस्य प्राबल्यतया प्रवर्तनेऽपि चित्तविक्षेपादिना समाध्यर्थम् महाप्रयत्न निष्पादितम्। यत्तु योगस्य प्रारब्धापेक्षयापि प्राबल्यमुपन्यस्यते तन्न बोधक प्रमाण न वक्तव्यम्। यद्यपि समाधिदशायां जीवन्मुक्तस्य सदा प्रारब्धक्षयार्थं जीवन्मुक्त विद्यते इति तस्य प्रारब्धवशादिनिष्पन्नं न प्रतिबध्नाति।

द्वैविध्यमेवाह— विदेहेति ॥ अयं भाव — जीवन्मुक्ते स्वरूप-प्रमाण-साधन-फलान्यनुपदमेव निरूपयिष्यति। तत्तदाक्षेपाणां तत्तन्निरूपणावसरे समाधानं वक्ष्यामः। न चात्राधिकार्यसम्भव, उत्पन्नब्रह्मसाक्षात्कारस्य चित्तविश्रान्तिं कामयमानस्य विदत्संन्यासिन तत्राधिकारित्वात्(१)। न च— निवृत्ताविद्यस्य ब्रह्मसाक्षात्कारेणाभिमानशून्यतया कर्तृत्वाभावेन कथं तत्राधिकार इति— वाच्यम्, ज्ञानेनावरणशक्तिमदज्ञाननाशेऽपि प्रारब्धानुसारेण विक्षेपशक्तिमदज्ञानस्य लेशशब्दवाच्यस्य सर्वैरवस्थानाभ्युपगमेन बाधितानुवृत्त्या विदुषो देहाभिमानेन कर्तृत्व(२)सम्भवात्। न च— "तस्य कार्यं न विद्यते," "ज्ञानामृतेन तृप्तस्य" इत्यादिस्मृत्या विदुष कृतकृत्यस्य कर्तव्यप्रतिषेधात् न कर्तव्यशेषाभ्युपगम इति—

(१) स एव तत्राधिकारी यस्तत्फलकामः। तथाच जीवन्मुक्त्यधिकार्यपि स एव स्यात् यो जीवन्मुक्त्याशयः। न हि स्वर्गवान् पुरुषो यागेऽधिक्रियते। तथाचात्र विधविदत्संन्यासिनो जीवन्मुक्तत्वात् न जीवन्मुक्त्यधिकारी स किन्तु यो विदेह मुक्तिकाम साधनचतुष्टयसम्पन्नो वा स एवेति परं मन्यन्ते। निवृत्ताविद्यस्य विदुष जीवन्मुक्तिकर्तृत्वसमर्थनाद्युत्तरग्रन्थोऽपि परेषां मतेऽबाधित एव। जीवन्मुक्तस्या ज्ञानलेशात् प्रारब्धभोगसाधककर्तृत्वेऽपि, सिद्धजीवन्मुक्तिकर्तृत्वव्यपदेशोऽपि कौस्तुभगत चिन्त्यापपत्तिक एवेति।

(२) प्रारब्धकर्मानुसारेण तत्फलानुभवसाधककर्तृत्वस्येतरागकर्तृत्वाभावात् निवृत्ताविद्यस्योपासनादिकर्तव्यपदेशाभावात् निवृत्ताविद्योऽविश्रान्तचित्तः प्रसिद्ध एव। अत्र श्रापासनपदेन निदिध्यासनं विवक्षते यतः साक्षात्काराभ्यासो वा। आद्य निदिध्यासनस्य साक्षात्कारफलकत्वात् साक्षात्कारसम्पन्नस्यास्य निवृत्ताविद्यस्य चित्तविश्रान्त्यर्थं तेनैव चित्तवृत्तिनिरोधात्मना साक्षात्कृतब्रह्म निवृत्ताविद्यस्य पुनरुपासनानर्हत्वा च। द्वितीय साक्षात्काराभ्यासो नाम तद्भिन्नाधिकृत्तिनिरोध एव स च प्रारब्धतरविक्षेपासमुपस्थानमेव। न च निवृत्ताविद्यस्य बाधितप्रारब्ध सरविषयजातस्य च विदुष सम्भवति। तथाच साधनचतुष्टयसम्पन्न एव जीव न्मुक्त्यावधिकारीत्यपरे सन्तन्ते।

तत्र तत्त्वज्ञानिनो भोगेन प्रारब्धकर्मक्षये वर्तमानशरीरपातो विदेहमुक्तिः। तदुक्तं "भोगेन त्वितरे क्षपयित्वा ततः संपद्यते" इति।

वाच्यम्; अकृतोपास्तेर्विदुषोऽविश्रान्तचित्तस्य कर्तव्यशेषसत्त्वेन निरङ्कुशकृतकृत्यत्वलाभाभावात्। न च—अकृतोपास्तेः विश्रान्तचित्तस्य ज्ञानमेव नास्ति इति—वाच्यम्, "ज्ञानस्य प्रमाणवस्तुपरतन्त्रत्वेन सर्वसाधारणत्वात्, अन्यथा याज्ञवल्क्यकहोलादीनां तत्त्वज्ञानाभावप्रसङ्गात्। न चेष्टापत्तिः, तद्दृष्टान्तेनास्मदादेः कस्यापि ज्ञानसाधनश्रवणादौ प्रवृत्त्यभावप्रसङ्गात्, उदाहृतस्मृतेर्विश्रान्तचित्तज्ञानिविषयत्वात्। तस्मात् उत्पन्नब्रह्मसाक्षात्कारः चित्तविश्रान्तिं कामयमानो विद्वत्संन्यासी जीवन्मुक्तिसाधनाभ्यासेऽधिकारीति मुक्तिविभागो युक्त इति मतोऽप्ययमायुष्मतेति॥ प्रथमोद्दिष्टां विदेहमुक्तिं निरूपयति—**तत्रेति**॥ तयोर्मध्य इत्यर्थः। तत्र संमतिमाह—**तदुक्तमिति**॥ "तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये" इति वाक्यं विषयः। तत्र ज्ञानिनो वर्तमानदेहपाते वासनावशात् जन्मान्तरं भवति न वेति संशयः। तत्र तत्त्वज्ञानिनो ज्ञानेनाज्ञाने निवृत्तेऽपि यथा वासनावशात् प्रारब्धभोगः तथा भोगेन प्रारब्धक्षये वर्तमानदेहपाते वासनावशादपूर्वदेहान्तरप्राप्तिलक्षणं जन्म भवत्येवेति प्राप्ते—अभिधीयते—**भोगेन** सुखदुःखानुभवेन **इतरे** प्रारब्ध पुण्य[1]

---

(१) [illegible]

अन्ये तु भाविशरीराऽनारम्भो विदेहमुक्तिः ।

पापे । **क्षपयित्वा नाशयित्वा** । ब्रह्म **संपद्यते** अखण्डैकरसानन्दब्रह्मात्मनाऽवतिष्ठते, न देहान्तरप्राप्तिलक्षणं जन्म प्राप्नोति, कारणाभावात् ।

तथाहि ज्ञानेनाज्ञानसञ्चितकर्मणा नष्टत्वादागामिकर्मणाऽसंश्लेषात् भोगेन प्रारब्धकर्मणि प्रतिबन्धे नष्टे सवासनस्य विक्षेपशक्तिमदज्ञानस्यापि नष्टत्वात् ज्ञानी देहान्तरप्राप्तिलक्षणं जन्म न प्राप्नोति, किन्तु ब्रह्मैव सम्पद्यते । तथाच श्रुतिः— "तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये" इति । **ननु—** अनेकजन्मप्रदप्रारब्धकर्मणि सति प्रथमजन्मनि तत्त्वज्ञानोत्पत्तौ जन्मान्तरं भवति न वा । **आद्ये** ज्ञानस्य पाक्षिकत्वप्रसङ्ग, **द्वितीये** "नाभुक्तं क्षीयते कर्म" इति शास्त्रविरोधः प्रसज्येतेति— **चेत्,**

अत्र केचित्[1]— यथा "यावदधिकारमवस्थितिराधिकारिकाणामि"त्यत्र देवादीनां देहान्तरप्राप्तावपि तत्त्वज्ञानस्य न बाधोऽस्ति स्वाधिकारावसाने मोक्षश्च भवतीत्यभ्युपगतम्, तथाचापि प्रमाणबलात् तत्त्वज्ञानोत्पत्तावपि प्रथमजन्मनि प्रारब्धकर्मप्राबल्येन जन्मान्तरं भवति अज्ञानस्य बाधश्च भवति,

---

(१) इदं च जीवन्मुक्त्यभ्युपगमपक्षे । जीवन्मुक्तानां यद्यपि न कर्मोपासनादिकमपेक्षितम् । तथापि लोकसंग्रहार्थं तदपेक्षितम् । तदुक्तं— लोकसंग्रहमेवापि सम्पश्यन् कर्तुमर्हसी ति ।

सा च तत्त्वज्ञानोत्पत्तिसमकालैव। ज्ञानेनाऽज्ञाने निवृत्ते संचितकर्मणां नाशादागामिकर्मणामश्लेषा-

---

प्रारब्धस्य फलस्याज्ञानाविरुद्धत्वात्। अन्यथा अधिकारिपुरुषाणामपि तथात्वप्रसङ्गः। ततश्च ब्रह्मभावलक्षणो मोक्षोऽपि न विरुध्यते। अतोऽज्ञानस्य न पाक्षिकत्वम्, न वा "नाभुक्तं क्षीयते कर्मेति" शास्त्रविरोध इति— **वदन्ति** ॥

अपरे तु—"यस्तु विज्ञानवान् भवत्यमनस्कस्सदा शुचिः। स तु तत्पदमाप्नोति यस्माद्भूयो न जायते"॥ "य एवं वेत्ति पुरुषं प्रकृतिञ्च गुणैः सह। सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते" इत्यादिश्रुतिस्मृतिभ्यां तत्त्वज्ञानिनो जन्मप्रतिषेधात् तादृशप्रारब्धकर्मणि सति प्रथमजन्मनि श्रवणादौ सत्यपि ज्ञानं नोत्पद्यते, किन्तु चरमजन्मनि तत्त्वज्ञानमुत्पद्यते। तदुक्तम्— "यस्येदं जन्म पाश्चात्यं तस्मिन्नेव महामते। विशन्ति विद्या विमला मुक्ता वेणुमिवोत्तमम्।" इति। कालिदासेनाप्युक्तम्— "जन्तोरपश्चिमतनोः सति कर्मसाम्ये निःशेषपाशपटलच्छिदुरा निमेषात्। कल्याणि। देशिककटाक्षसमाश्रयेण कारुण्यतो भवति सा भववेददीक्षा॥" इति॥ सर्वथापि प्रारब्धक्षये ज्ञानी ब्रह्मतयाऽवतिष्ठत इति सिद्ध"मिति चतुर्थं निरूपितम्। [1]विदेहमुक्तौ पक्षान्तरमाह— **अन्येत्विति** ॥ भाविशरीरासारम्भलक्षणाया विदेहमुक्तेर्ज्ञानसमकालत्वं कथमित्या-

(१) अस्मिन्मते विदेहमुक्तिरेव न जीवन्मुक्तिरपि।

द्भोगेन प्रारब्धक्षयाच्छरीरान्तराऽऽरम्भकस्याऽसंभवात् भाविशरीराऽनारम्भस्य ज्ञानसमकालत्वं युज्यते ।

तदुक्तम्—

"तीर्थे श्वपचगृहे वा नष्टस्मृतिरपि परित्यजन् देहम् ।

ज्ञानसमकालमुक्तः कैवल्यं याति हतशोकः ॥" इति ।

एवं वर्णयांचक्रुः ।

श्रवणादिभिरुत्पन्नसाक्षात्कारस्य विद्वत्संन्यासिनः कर्तृत्वाद्यखिलबन्धप्रतिभासनिवृत्तिर्जीवन्मुक्तिः[1] ।

गद्याह— ज्ञानेनेति ॥ तत्र संमतिमाह— तदुक्तमिति ॥

क्रमप्राप्तां जीवन्मुक्तिं निरूपयति— श्रवणेति ॥

जीवदवस्थायामिति शेषः । अन्यथा विदेहमुक्तावतिव्याप्तिः स्यात् । यदुक्तम्— भोगप्रापकप्रारब्धकर्माणि जाग्रति सति

---

(१) प्रारब्धभोगेतरनिखिलबन्धनिवृत्तिरेव जीवन्मुक्तिः । यावज्जीवन प्रारब्धस्यापि निवृत्तिरिति न युक्तम्; "भोगेन त्वितरे क्षपयित्वे"ति सूत्रविरोधात् । चिकित्साशास्त्रं हि चाधिभौतिकदुःखनिवर्तनार्थम् । आधिभौतिकं च दुःखं यथा [illegible] द्विविधम् । तत्र पाञ्चभौतिकशरीरापरिरक्षणेन पूर्वतनप्रारब्धकर्मानुसारेण [illegible] । [illegible] चिकित्सा [illegible] कर्मविपाकनिमित्तस्य तु अनुभवेनैव नाशः । [illegible] विपाकपापविनाशक तु प्रारब्धकर्मप्राप्त [illegible] [illegible] चिकित्सा [illegible] । [illegible] प्रारब्धकर्मभोगम् अनुभूय [illegible] । [illegible] [illegible] ।

भोगप्रदप्रारब्धप्राबल्येपि योगाऽभ्यासेन तदभिभवात्, प्रारब्धाऽपेक्षया योगाऽभ्यासस्य प्रबलत्वात् । अन्यथा

कर्तृत्वादिप्रतिभासस्यावश्यकत्वात्तस्य साक्षिणः सकाशात् तत्त्वज्ञानेन निवारितत्वात् जलगतद्रववदन्तःकरणनिष्ठस्य वारयितुमशक्यत्वात् वारणे प्रारब्धभोगायोगात् कर्तृत्वादिप्रतिभासनिवृत्तिः जीवन्मुक्तिरित्यसंगतम्— इति, तत्राह— **भोगेति** ॥ *तत्त्वज्ञानापेक्षया यथा प्रारब्धं प्रबलं तथा प्रारब्धापेक्षया योगा*भ्यासस्य प्रबलत्वात् । तेन [१]प्रारब्धभोगानुकूलकर्तृत्वादिप्रतिभासस्यात्यन्तिकनिवृत्त्यभावे तदभिभवो भवत्येव, तथाच न तु दोष इति भाव । विपक्षे दण्डमाह— **अन्यथेति** ॥ न च— योगाभ्यासेन प्रारब्धप्रतिबन्धे "नाभुक्तं क्षीयते कर्म" इति शास्त्रविरोध इति— वाच्यम्, असति विरोधिनि तदुपपत्तेः । अन्यथा "जन्मान्तरकृतं पापं व्याधिरूपेण बाधते । तच्छान्तिरौषधैर्दानैर्जपहोमार्चनादिभिः" ॥ इति शास्त्रविरोधस्तत्रापि प्रारब्धकर्मण्यत्यन्तभक्तस्य प्रसज्येत तस्मात् प्रारब्धापेक्षया योगाभ्यासस्य प्रबलत्वात् तेन कर्तृत्वादिप्रतिबन्धप्रतिभासाभिभवरूपा जीवन्मुक्तिः सिध्यतीति न कोऽपि दोष इति भावः । प्रारब्धापेक्षया

(१) एतानि प्रायश्चित्तरूपाणि प्रारब्धप्राबल्यविषयदृष्टान्तकर्मानुष्ठेयानि । तत्प्रायश्चित्तनाशात्तु "नाभुक्तं क्षीयते कर्म" इत्यस्यैव बाधता । यथाच प्रारब्धवर्धनकर्मण्यपि पुरुषप्रयत्नस्य सार्थकत्वम् तथान्यत्र विज्ञेयम् । "विधिप्रतिषेधौ सार्थकत्वं स्मृतिः" इति भाष्यभावस्यापि न विरोधः वर्तते इति ।

पुरुषप्रयत्नवैयर्थ्येन चिकित्साशास्त्रमारभ्य मोक्षशास्त्रपर्यन्तस्याऽनारम्भप्रसङ्गात्। अतएव पुरुषप्रयत्नस्य साफल्यमाह वसिष्ठः—

"आ बाल्यादलमभ्यस्तैः शास्त्रसत्संगमादिभिः ।
गुणैः पुरुषयत्नेन सोऽर्थः सपाद्यते हितः ॥" इति ।

तत्र श्रुतिस्मृतीतिहासपुराणवचनानि प्रमाणानि ।

योगाभ्यासस्य प्रबलत्वे प्रमाणमाह— अत एवेति ॥ पुरुषप्रयत्नो द्विविध— अशास्त्रीय शास्त्रीयश्चेति । तत्र पुरुषोऽशास्त्रीयेण प्रयत्नेन नरक प्राप्नोति तस्य रागद्वेषपूर्वकत्वात् । द्वितीयेन बाल्यमारभ्य शास्त्रसत्सगादिभिरभ्यस्तैर्गुणै शान्त्यादिभिर्युक्तेन पुरुषप्रयत्नेन परमपुरुषार्थो हित सम्प्राप्यते । तथाचोक्तम्— 'उच्छास्त्र शास्त्रित चेति पौरुष द्विविध स्मृतम् । तत्रोच्छास्त्र मनर्थाय परमार्थाय शास्त्रितम् '। इति ॥ एव जीवन्मुक्तिस्वरूप निरूप्येदानीं तस्यां प्रमाणमाह '— तत्रेति ॥

जीवन्मुक्ति सप्रमाणयति । न च— श्रुत्यादीनां ब्रह्मण्येव तात्पर्यात् कथ तत्र प्रामाण्यमिति—वाच्यम्, ब्रह्मणि महातात्पर्येऽपि देवताधिकरणन्यायेन मानान्तराविरोध्यवान्तरतात्पर्य बाधकाभावात् । अन्यथा 'ब्रह्म वेद ब्रह्मैव भवति' 'श्रोतव्यो मन्तव्य' इत्यादीनामप्रामाण्य प्रसङ्गेन । तस्मात् यत्किञ्चिदेतत् ।

।

"विमुक्तश्च विमुच्यते" इति श्रुतिः ।
"यो जागर्ति सुषुप्तिस्थो यस्य जाग्रन्न विद्यते ।

कठवल्लीवाक्यमुदाहरति— **विमुक्तश्च विमुच्यते इति** ॥ यद्यपि ज्ञानात् पूर्वमपि रागादिभिर्मुक्तः, "शान्तो दान्त" इत्यादि श्रुत्या शमदमाद्युपेतस्य श्रवणाद्यधिकारावगमात्, तथापि ज्ञानात्पूर्वं रागद्वेषादिमुक्तिर्यत्नसाध्या, ज्ञानोत्तरन्तु योगाभ्यासेन वासनाक्षयमनोनाशयोर्दृढतर मप्यत्नेनाभासरूपस्य रागादेरप्यसंभवात् रागद्वेषादिमुक्तिः स्वतः सिद्धा भवतीत्यतो **विमुक्तः** विशेषेण मुक्तः आत्यन्तिकरागद्वेषादिनिवृत्तिमानित्यर्थः । एतादृशो जीवन्मुक्त उच्यते । भोगेन प्रारब्धे कर्मणि क्षीणे वर्तमानदेह पाते भाविबन्धात् विशेषेण मुच्यते । यद्यपि प्रलयकाले कश्चित्कालं भाविबन्धान्मुच्यते, तथापि नात्यन्तिकी तत्र मुक्तिरिति विशेषेण मुच्यत इत्युक्तम् । ज्ञानानन्तरभोगेन प्रारब्धकर्मक्षये वर्तमानदेहपाते पुनर्देहान्तरसंबन्धाभावात् । तस्मादियं श्रुतिः तत्त्वज्ञानोत्तर विदेहमुक्तिविलक्षणायां कर्तृत्वादिबन्धप्रतिभासनिवृत्तिरूपायां जीवन्मुक्तौ प्रमाणम् । तथा "तद्यथाऽहिनिर्ल्वयिनी वल्मीके मृता प्रत्यस्ता शयीत एवमेवेदं शरीरं शेते" "अथायमशरीरोऽमृतः" "प्राणो ब्रह्मैव तेज एवे"त्यादि श्रुतिस्तत्र प्रमाणत्वेनोदाहर्तव्या । तत्र वसिष्ठवचनमप्युदाहरति— **यो जागर्तीति** ॥ यः ब्रह्मविदिन्द्रियाणामुपरमाभावाज्जागर्ति जाग्रदवस्थामनुभवति । इन्द्रियैरर्थग्रहणाभावात्सुषुप्तिस्थः । अत-

यस्य निर्वासनो बोधः स जीवन्मुक्त उच्यते ॥" इति वासिष्ठे।

"प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान्।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥"

इति गीतायाम्।

एवेन्द्रियैरर्थोपलब्धिर्जागरितमित्युक्तलक्षणजाग्रद्यस्य न विद्यते, यस्य निर्वासनः शुभाशुभवासनारहितो बोधः स्वस्वरूपाखण्डैकरसानन्दानुभवः सः जीवन्मुक्त उच्यते इत्यर्थः।

भगवद्गीतासु द्वितीयाध्यायगतस्थितप्रज्ञलक्षणगतश्लोकमुदाहरति— प्रजहातीति॥ यदा यस्यामवस्थायां। मनोगतान् त्रिप्रकारकान् बाह्याभ्यान्तरवासनामात्ररूपान् कामान् प्रजहाति सर्वात्मना परित्यजति। आत्मनि प्रत्यग्भूताखण्डैकरसानन्दे। आत्मना योगाभ्यासपाटवेन वशीकृतमनसा वृत्तिरहितान्तःकरणेन स्वस्वरूपानन्दमनुभवन्। संतुष्टः तदा तस्यामवस्थायां स्थिता प्रतिष्ठिता प्रज्ञा यस्य स तथोक्तः।

प्रज्ञा द्विधा स्थिराऽस्थिरा चेति। जन्मान्तरीयपुण्यपुञ्जपरिपाकेनाकाशफलपातन्यायेन तत्त्वमस्यादिवाक्यश्रवणमात्रेण ब्रह्मात्मैक्यगोचरमहं ब्रह्मास्मीति ज्ञानमुत्पद्यते, तच्च गृहकृत्यादिव्यासङ्गेन पुनर्विस्मर्यते, सेयमस्थिरप्रज्ञा। यदा पुनर्योगाभ्यासेनात्यन्तं वशीकृतचित्तस्य जारानुरक्तायाः जारमिव बुद्धिस्तत्त्वमेव निरन्तरं धावति सेयं स्थिरप्रज्ञा। एतदभिप्रायेणोक्तं

"अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च।
निर्ममो निरहंकारः समदुःखसुखक्षमी ॥
संतुष्टः सततं योगी यतात्मा दृढनिश्चयः।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः॥"
इत्यत्र जीवन्मुक्तः भक्त उच्यते।

"प्रकाशञ्च प्रवृत्तिञ्च मोहमेव च पाण्डव" त्यारभ्य "गुणातीतः स उच्यते" इत्यन्तेन जीवन्मुक्तो दर्शितः।

वसिष्ठेन—'परव्यसनिनी नारी व्यग्रापि गृहकर्मणि। तदेवाऽऽस्वादयत्यन्तः परसङ्गरसायनम्। एवं तत्त्वे परे शुद्धे धीरो विश्रान्तिमागतः। तदेवास्वादयत्यन्तः बहिर्व्यवहरन्नपी'ति। अथ स्थिरप्रज्ञ एव जीवन्मुक्त इत्यर्थः। तत्र द्वादशाध्यायवचनमप्युदाहरति—**अद्वेष्टेति** ॥

ननु—अनेन वचनेन भगवद्भक्तः प्रतिपाद्यत इत्याशङ्क्याह। **अत्रेति**। **ननु**—एवं साधकोऽपि यथोक्तगुणविशिष्टः, "शान्तो दान्त" इत्यादि श्रुतेः, ततो जीवन्मुक्तस्य को विशेषः? इति, **उच्यते**—अस्त्येव विशेषस्तयोः, साधकस्य अद्वेष्टृत्वादयो गुणाः यत्नसाध्याः जीवन्मुक्तस्य स्वभावसिद्धा इति ततो विशेषः। तदुक्तम्—"उत्पन्नात्मैक्यबोधस्य ह्यद्वेष्टृत्वादयो गुणाः। अयत्नतो भवन्त्यस्य न तु साधनरूपिणः" इति ॥ तत्र चतुर्दशाध्यायगतगुणातीतलक्षणमप्युदाहरति— **प्रकाशञ्चेत्यादि** ॥ "प्रकाशञ्च प्रवृत्तिञ्च मोहमेव च पाण्डव। न द्वेष्टि संप्रवृत्तानि न निवृत्तानि

"निराशिषमनारम्भं निर्नमस्कारमस्तुतिम्।
अक्षीणं क्षीणकर्माणं तं देवा ब्राह्मणं विदुः॥"

इति महाभारते।

"यथा स्वप्नप्रपञ्चोऽयं मयि मायाविजृम्भितः।
एवं जाग्रत्प्रपञ्चोऽयं मयि मायाविजृम्भितः॥" इति।
"यो वेद वेदवेदान्तैः सोऽतिवर्णाश्रमी भवेत्॥"

इति पुराणे।

कांक्षति॥ उदासीनवदासीनो गुणैर्यो न विचाल्यते। गुणा वर्तन्त इत्येव योऽवतिष्ठति नेङ्गते॥ समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः। तुल्यप्रियाप्रियो धीरः तुल्यनिन्दात्मसंस्तुतिः॥ मानापमानयोस्तुल्य तुल्यो मित्रारिपक्षयोः॥ सर्वारम्भपरित्यागी गुणातीतः स उच्यते"। इति गुणात्ययसाधन भक्तियोगमप्याह— "मां च योऽव्यभिचारेण भक्तियोगेन सेवते। स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते"। इति। तत्र भारतवचनमप्युदाहरति— निराशिषमिति॥

तत्र स्कन्दपुराणवचनमप्युदाहरति— यथेति॥ मयि अन्तःकरणोपलक्षितप्रत्यगात्मनि। मायाविजृंभितः कल्पितः। मायात्वं नाम निरूपयितुमशक्यत्वे सति विस्पष्टं भासमानत्वम्। तदुक्तम्— "न निरूपयितुं शक्या विस्पष्टं भासते च या। सा मायेतीन्द्रजालादौ लोकाः सम्प्रतिपेदिरे"॥ इति। तस्माज्जीव-

सेयं जीवन्मुक्तिस्तत्त्वज्ञानवासनाक्षयमनोनाशाऽभ्यासात् सिध्यति ।

न्मुक्तौ श्रुतिस्मृतीतिहासपुराणानां प्रमाणानां सम्भावाज्जीवन्मुक्तिरवश्यं विदेहमुक्तिवदस्त्येव । तदुक्तम्— "जीवन्मुक्तिस्तावदस्ति प्रतीतेः द्वैतच्छायारक्षणायास्ति लेशः । अस्मिन्नर्थे स्वानुभूतिः प्रमाणमि"ति ॥ यदुक्तम्—साधनाऽनिरूपणाज्जीवन्मुक्तिरनुपपन्नेति, तत्राह— सेयमिति ॥ तत्त्वज्ञानस्य वासनाक्षयस्य मनोनाशस्य तत्त्वज्ञान-वासनाक्षय-मनोनाशाः तेषामभ्यासः यत्नतः पुनः पुनरावर्तनं तस्माज्जीवन्मुक्तिः यथोक्तस्वरूपा सिद्ध्यति ; तत्रापि तत्त्वज्ञानवासनाक्षयमनोनाशानां समकालाभ्यासोऽपेक्षितः। अन्वयव्यतिरेकाभ्यां तेषां परस्परहेतुत्वात्। तथाहि— दृश्यमानस्य सर्वस्य मिथ्यात्वेनाद्वितीयात्मनः पारमार्थिकत्वेनात्मैव सर्वं ततोऽन्यत्किमपि नास्तीति तत्त्वज्ञाने सम्पन्ने विषयाभावाद्रागद्वेषादिलक्षणा वासना क्षीयते, तत्त्वज्ञानाभावे विषयसत्यत्वानपायात् उत्तरोत्तरं रागद्वेषादिलक्षणा वासना प्रवर्द्धतीत्यतोऽन्वयव्यतिरेकाभ्यां वासनाक्षयं प्रति तत्त्वज्ञानं कारणम् । एवं वासनाक्षयोऽप्यन्वयव्यतिरेकाभ्यां तत्त्वज्ञानं प्रति कारणम् । तथाहि— विवेकदोषदर्शनप्रतिकूलवासनोत्पादनादिना रागद्वेषादिवासनायां क्षीणायां गुरुशास्त्राचार्यप्रसादेन निर्मले मनसि तत्त्वज्ञानमुदेति— इदं सर्वमात्मैव अतो नान्यत्किञ्चिदस्तीति । एवं वासनाक्षयाभावे मनसो रागादिकलुषितत्वेन शमदमादिसाधनसम्पत्तेरभावाच्छ्रवणाद्यसम्भवेन

विषयोन्मुखस्य तत्त्वज्ञानं नोत्पद्यत इत्यतोऽन्वयव्यतिरेकाभ्यां वासनाक्षयः तत्त्वज्ञानं प्रति कारणम्। एवं तत्त्वज्ञानवासनाक्षययोरन्योन्यकारणत्वम्। एवं तत्त्वज्ञानमनोनाशयोरन्योन्यकारणत्वमन्वयव्यतिरेकाभ्याम्। तथाहि– तत्त्वज्ञाने सति मिथ्यात्वनिश्चयेन प्रपञ्चस्य बाधितत्वेन मनस्तत्र न प्रवर्तते, सत्यत्वेन निश्चितस्यात्मनोऽविषयत्वेन तत्रापि मनो न प्रवर्तते, ततश्च निरिन्धनाग्निवत्क्षयमेवोपशाम्यति। तथाच श्रूयते– "यथा निरिन्धनो वह्निः स्वयोनावुपशाम्यति। तथा वृत्तिक्षयं चित्तं स्वयोनावुपशाम्यती" ति॥ एवं तत्त्वज्ञानाभावे प्रपञ्चसत्यत्वबुद्धेरनिवारणात् वृत्तिभिरुपचीयमानं चित्तं पीनं भवति। ततश्च कुतो मनोनाशः स्यादतोऽन्वयव्यतिरेकाभ्यां तत्त्वज्ञानं मनोनाशे कारणम्। एवं मनोनाशे सति निखिलद्वैतवृत्तीनामुपरमान्निरुपाधिकतया श्रुत्याचार्यप्रसादेन ब्रह्मसाक्षात्कारो भवति, तदभावेन भवतीति ताभ्यां मनोनाशोऽपि तत्त्वज्ञानकारणमित्येतयोरन्योन्यकारणत्वम्। एवं वासनाक्षयमनोनाशयोरप्यन्योन्यकारणत्वमन्वयव्यतिरेकाभ्याम्। तथाहि— वासनाक्षयाभावे रागद्वेषादिभिरुपचीयमानं चित्तं विषयोन्मुखं तदाकारेण परिणमते, ततो मनोनाशः कुतः स्यात्? क्षीणायां वासनायां बीजभावाद्वृत्तीनामनुदयान्मनो नश्यति। एवं मनोनाशे सति निखिलवृत्तीनामनुदयात्सर्वा वासनाः क्षीयन्ते, मनोनाशाभावे प्रारब्धकर्मबलेन विषयोपभोगे प्रवर्तमाने चित्ते सति हविषा कृष्णवर्त्मेव रागादिवासनोद्भवति। तथाच श्रुतिः— "न जातु कामः कामानामुपभोगेन शाम्यति। हविषा कृष्णवर्त्मेव

उत्पन्नस्य तत्त्वज्ञानस्याऽभ्यासो नाम पुनः पुनः केनाऽप्युपायेन तत्त्वाऽनुसंधानम् । तदुक्तम्—

भूय एवाभिवर्द्धते" ॥ इति ॥ तस्मादन्वयव्यतिरेकाभ्यां वासनाक्षयो मनोनाशे हेतुस्ताभ्यां मनोनाशोऽपि वासनाक्षयहेतुरित्यतोऽनयोरन्योन्यकारणत्वम् । तस्मात्तत्त्वज्ञानवासनाक्षयमनोनाशानां परस्परं कारणत्वात्समकालमभ्यासः कर्तव्यः ततो जीवन्मुक्तिः सिद्ध्यति ॥ तदुक्तम्— 'वासनाक्षयविज्ञानमनोनाशा महामते ॥ समकालं चिराभ्यस्ता भवन्ति फलदायिनः ' ॥ इति । **ननु** साधनचतुष्टयसम्पत्त्यनन्तरं तत्त्वज्ञानोद्देशेन विविदिषासंन्यासं कृत्वा श्रवणमनननिदिध्यासनानि कुर्वतस्तत्त्वज्ञानमुत्पद्यत इति वदन्ति, तत्त्वज्ञानानन्तरं जीवन्मुक्त्युद्देशेन विद्वत्संन्यासं कृत्वा तत्त्वज्ञानमनोनाशवासनाक्षयाभ्यासं कुर्वतो जीवन्मुक्तिः सिद्ध्यति इत्युच्यते, तत्र श्रवणाद्यनन्तरं प्रमाणजन्यज्ञानाभ्यासः कीदृशः ? तत्र न तावत् ज्ञानस्य कर्तव्यत्वं सम्भवति, तस्य प्रमाणफलत्वेन निष्पन्नत्वाद्वस्तुपरतन्त्रत्वेन कर्तुमकर्तुमन्यथा कर्तुमशक्यत्वाच्च । नापि तत्साधनश्रवणादिकर्तव्यत्वं युक्तम्, फलीभूतज्ञाने सति तदनुष्ठानवैयर्थ्यात् । तस्मादुत्पन्नज्ञानस्याभ्यासो दुर्निरूप इत्याशङ्क्याह— **उत्पन्नस्येति** ॥

केनेति ॥ श्रवणेन कथनेन वा पुस्तकावलोकनेन वा पाठनेन वा केनापि प्रकारेणेत्यर्थः । तत्र सम्मतिमाह— **तदुक्तमिति** ॥ तस्य तत्त्वस्य यथार्थस्य सम्यगालोकनस्य । **चिन्तनं** सम्यङ्मनन-

"तच्चिन्तनं तत्कथनमन्योन्यं तत्प्रबोधनम् ।

मन्धानमनुस्मरणमिति यावत । अथवा **तच्चिन्तनं** तत्त्वविचार तत्त्वं याथात्म्य ब्रह्मात्मैक्यमिति यावत् ॥ **तत्कथनं** तत्त्वकथन मन्यस्मै मुमुक्षवे यथोक्तसाधनसम्पन्नाय विनीताय प्रियाय भक्ताय विश्वासिने ॥ तथाच श्रुति — "तस्मै विद्वानुपसन्नाय प्राहेति सम्यक् प्रशान्तचित्ताय शमान्विताय' । "येनाचर पुरुष वेद सत्य प्रोवाच ता तत्त्वतो ब्रह्मविद्याम" । "तस्मै मृदितकषायाय तमस पार दर्शयति भगवान् सनत्कुमार " इत्याद्या ॥ स्मृतिरपि

"य इद परम गुह्य मद्भक्तेष्वभिधास्यति ।
भक्तिमपि परा कृत्वा मामेवैष्यत्यसशय ॥
न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तम ।
भविता न च मे तस्मादन्य प्रियतरो भुवी' ति ॥

यथोक्तलक्षणरहितायामुमुक्षवे तत्त्व न वक्तव्यम् । तथाच श्रुति —

"वेदान्ते परम गुह्य पुराकल्पप्रचोदितम् ।
नाप्रशान्ताय दातव्य नापुत्रायाशिष्याय वै पुनरि"ति ॥

स्मृतिरपि—

"इद ते नातपस्काय नाभक्ताय कदाचन ।
न चाशुश्रूषवे वाच्य न च मा योऽभ्यसूयति ॥
अशिष्यायाविरक्ताय यत्किञ्चिदुपदिश्यते ।
तत्प्रयात्यपवित्रत्व गोक्षीर श्वदृतौ यथा ॥
नापृष्ट कस्यचिद्ब्रूयात न चान्यायेन पृच्छत ।

एतदेव परं तत्त्वं ब्रह्माभ्यासं विदुर्बुधाः" ॥ इति ॥
यद्यपि तत्त्वज्ञानात् प्रागपि वासनाक्षयमनोनाशा-

जानन्नपि च मेधावी जडवल्लोकमाचरेत् ॥
धमार्थों यत्र न स्याता शुश्रुषा वापि तादृशी ।
तत्र विद्या न वक्तव्या शुभं बीजमिवोषरे ' ॥

इत्याद्या ॥ समाभ्यां मुमुक्षुभ्याम् **अन्योन्यं तत्प्रबोधनम्** । किं बहुना सर्वथा केनाप्युपायेन ब्रह्मैकव्यापारतयाऽवस्थानम् । **ब्रह्माभ्यासं विदुर्बुधाः** ब्रह्मात्मवादिन इत्यर्थः ॥ स्यादेतत्— प्राक्तत्त्वज्ञानात्साधकस्यापि वासनाक्षयमनोनाशाभ्यासोऽपेक्षित विषयासक्तचित्तस्य शमादिशून्यस्यानेकाग्रचित्तस्य तत्त्वज्ञानासम्भवात् । **ननु—** तत्त्वज्ञानस्य प्रमाण-वस्तु परतन्त्रतया सतोर्विषयप्रमाणयोस्तदुत्पत्तेरावश्यकत्वेन वासनाक्षय मनोनाशाभ्यां क्वोपयुज्यते ? इति **चेत्,** सत्यं ज्ञानं प्रमाणवस्तुपरतन्त्रम्, तथापि प्रमाणं न व्यासक्तस्य ज्ञानमुत्पादयितुं शक्नोति स्वविषये अनेकाग्रचित्तस्य व्यासङ्गादेर्ज्ञानोत्पत्तिप्रतिबन्धकत्वात् । अन्यथा सर्वथा ज्ञानोत्पत्तिः प्रसज्येत । न चेष्टापत्तिः शास्त्रारम्भवैयर्थ्यापत्तेः । ततश्च व्यासङ्गादिः ज्ञानोत्पत्तिप्रतिबन्धक एव । वासनाक्षय-मनोनाशाभावे तत्त्वज्ञानासम्भवात् साधकस्यापि ज्ञानार्थं सोऽपेक्षित एव ॥ तस्मात् तत्त्वज्ञानात् प्राक् सिद्धयोर्वासनाक्षय-मनोनाशयोः सतोस्तयोर्ज्ञानोत्तरमभ्यासो नापेक्षित एवेति कथं ततो जीवन्मुक्तिरित्याशङ्क्य परिहरति— **यद्यपीति ॥**

भ्यासो ऽपेक्षितस्तथापि विविदिषासंन्यासिन उपसर्जनभूतः सः, श्रवणाद्यभ्यास एव प्रधानः। विद्वत्संन्यासिनस्तु तत्त्वज्ञानाभ्यास उपसर्जनभूतो वासनाक्षयमनोनाशाऽभ्यासः प्रधान इत्यविरोधः।

एतदुक्तं भवति—"आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यः" इत्यादिश्रुत्या साधनचतुष्टयसम्पन्नस्य विविदिषासंन्यासिनस्तत्त्वज्ञानमुद्दिश्य श्रवणाभ्यासः प्रधानः श्रवणस्य प्रमाणविचारात्मकत्वेन मननस्य तदर्थविचारात्मकत्वेन निदिध्यासनस्यापि तथात्वेन ज्ञानं प्रत्यन्तरङ्गसाधनत्वान्मनोनाशवासनाक्षययोः प्रमाणसहकार्यन्तःकरणशोधकत्वेन श्रवणादिसहकारित्वात्तयोरभ्यासस्तस्योपसर्जनभूतः। ततश्च यथाकथञ्चिद्वासनाक्षयमनोनाशावभ्यासनिरवशेषं श्रवणाद्यनुतिष्ठतस्तत्त्वज्ञानमुत्पद्यते। उत्पन्नतत्त्वज्ञानस्य विद्वत्संन्यासिनस्तु "ग्रन्थमभ्यस्य मेधावी ज्ञानविज्ञानतत्परः। पलालमिव धान्यार्थी त्यजेद् ग्रन्थिमशेषतः" इत्युक्तप्रकारेण तत्त्वज्ञाने सम्पन्ने पूर्ववत् श्रवणाद्यभ्यासे प्रयोजनाभावात् प्रारब्धापादितविषयभोगकाले वासनाभिभवार्थं श्रवणाद्यभ्यासोऽपेक्षित इति उपसर्जनभूतः। पूर्ववासनाक्षयमनोनाशयोर्दृढतराभ्यासाभावे चित्तविश्रान्तेरभावात् तदर्थं ज्ञानोत्तरं नियमेन वासनाक्षयमनोनाशाभ्यासोऽवश्य कर्तव्य इति विद्वत्संन्यासिनस्तदभ्यासः प्रधानः। ततो जीवन्मुक्तिः सिद्ध्यतीति न कोऽपि दोषः। तत्फलमग्रे वक्ष्यति॥ नन्वेवमप्यधिकारिणः श्रवणादिना प्रतिबन्धापगमे तत्त्वमस्यादिवाक्यजन्यापरोक्षज्ञाने-

कृतोपास्तिकस्य मुख्याऽधिकारिणस्तदपेक्षाऽभावेपि अकृतोपास्तेरस्मदादेस्तदभावे चित्तविश्रान्त्यभावा-

नाज्ञानकृतावरणनिवृत्त्या परमपुरुषार्थलाभात् नातः परं किमप्यव शिष्यते कर्तव्यम्। नच— चित्तविश्रान्त्यर्थं वासनाक्षय मनोनाशा-भ्यासः कर्तव्यशेषो वर्तत इति— वाच्यम्, वाक्यजन्यापरोक्षज्ञानस्य नित्यनिरतिशयब्रह्मानन्दविषयतया तन्निमग्नमनसोऽन्यत्र प्रवृत्त्यसंभ वेन विश्रान्ते स्वभावसिद्धत्वात्। नहि सार्वभौमानन्दमनुभवन् राजा ग्रामाधिपतिसुखं तुच्छमपेक्षते। एवं मुमुक्षुरखण्डैकरस परमानन्दमनुभवन्नान्यत्तुच्छं सुखमपेक्षत इति ज्ञानिनः चित्त-विश्रान्तेः स्वतः सिद्धत्वान्न किञ्चित्कर्तव्यमवशिष्यते। तस्मात्तत्त्व-ज्ञानोत्तरं वासनाक्षयमनोनाशाभ्यासकर्तव्यमियमनं निरर्थकमित्या-शङ्क्याह— **कृतोपास्तिकस्येति।**

शास्त्राधिकारिणो द्विविधाः—मुख्या अमुख्याश्चेति। ये सगुण-साक्षात्कारपर्यन्तामुपास्तिं कृत्वा परमेश्वरप्रसादेन दोषदर्शना-द्वैराग्यादिसाधनसम्पन्ना ज्ञानोद्देशेन श्रवणादौ प्रवर्तन्ते तेषां सकृच्छ्रवणादिना जीवन्मुक्तिपर्यवसायि तत्त्वज्ञानमुदेति; प्रागेव योगाभ्यासेन चित्तैकाग्रतायाः सम्पन्नत्वात्। कृतोपासनानां तादृश-मुख्याधिकारिणां वासनाक्षयमनोनाशाभ्यासो नापेक्षितः। ये पुन-रिदानींतना अकृतोपास्तिकाः साधनसम्पन्ना जिज्ञासया श्रवणादौ प्रवर्तन्ते तेषामसुख्याधिकारिणामस्मदादीनां सम्यगनुष्ठितश्रवणा दिभिः तत्त्वसाक्षात्कार उत्पद्यत एव, उत्पन्नेऽपि तत्त्वसाक्षात्कारे वासनाक्षयमनोनाशयोः सम्यगनभ्यस्तत्वेन चित्तविश्रान्तेरभावात्

दुत्पन्नमपि तत्त्वज्ञानं विषयाऽबाधात्प्रमारूपमज्ञाननिवर्त्तकमप्यसंभावनादिसंभवान्न सुकरमिति वासनाक्षयमनोनाशाऽभ्यासोऽपेक्षितः ।

प्रमाणजन्यत्वादिविषयाबाधाभ्यां प्रमाणरूपोऽपि ब्रह्मसाक्षात्कारः कदाचिदसम्भावनादिप्रतिबन्धसम्भवेनाज्ञाननिवर्तनयोग्योऽपि प्रारब्धापादितभोगवासनया दोधूयमानत्वात् प्रवातस्थदीपवत् अज्ञाननिवर्तनक्षमो न स्यादतस्तेषाममुख्याधिकारिणां सम्भावितप्रतिबन्धनिवृत्त्यर्थं वासनाक्षयमनोनाशाभ्याम: कर्तव्योऽपेक्षितः । अत एवैतदभिप्रेत्य चतुर्थाध्याये— "आवृत्तिरसकृदुपदेशात्" । 'आप्रायणात्तत्रापि हि दृष्टमि"ति भगवान् सूत्रकारो ब्रवीति । तद्व्याकुर्वन् भगवान् भाष्यकारोऽप्यावृत्त्यधिकरणे— "यः पुनर्निपुणमतिर्यथोक्तलक्षणो मुख्याधिकारी सकृच्छ्रुत्वा प्रत्यक्षं ब्रह्मसाक्षात्करोति तं प्रत्यावृत्त्यानर्थक्यमिष्टमेव । यः पुनरमुख्याधिकारी यथोक्तलक्षणः तस्यैव प्रत्ययावृत्तिलक्षणो ध्यानयोगो नियम्यते— "श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इति । इममेवार्थं स्फुटीचकार । अतएव "आत्मेत्येवोपासीते"ति श्रुतिरप्येतदभिप्राया न विरुध्यते । अतएवैतदभिप्रायेण भाष्यकारस्तत्रापि नियमविधिमङ्गीचकार । अतएव विद्यारण्यैर्वार्तिकसारेऽयमर्थो दर्शितः । "बुद्धतत्त्वो न विद्यार्हे इति वेदामनावलात् । अबुद्ध इव संक्लिश्यन् विधिध्याने तदार्हती"ति ॥ तस्मान्मुख्याधिकारिणां वासनाक्षयमनोनाशाभ्यासाभावेऽप्यमुख्याधिकारिणां तत्त्वज्ञानानन्तरं चित्त-

वासनासामान्यलक्षणं तद्विभागं तत्प्रयोजनं लक्षणं च वसिष्ठ आह—

"दृढभावनया त्यक्तपूर्वाऽपरविचारणम् ।
यदादानं पदार्थस्य वासना सा प्रकीर्तिता ॥
वासना द्विविधा प्रोक्ता शुद्धा च मलिना तथा ।
मलिना जन्महेतुः स्याच्छुद्धा जन्मविनाशिनी ॥

विश्रान्त्यर्थं वासनाक्षयमनोनाशाभ्यासोऽपेक्षित । तदाह वसिष्ठ— तस्माद्राघव यत्नेन "पौरुषेण विवकि(क)ना(त) । भोगेच्छा दूरतस्त्यक्त्वा तत्त्वमेतत्समाश्रयेत । इति ॥ तस्मात्सर्वं समञ्जस । **ननु** केय वासना? यस्या क्षयाय प्रयत्येतेत्याशङ्क्य वसिष्ठेन सा दर्शितेत्याह— **वासनेति** ॥

समानस्य भाव **सामान्यं** साधारणलक्षणमित्यर्थ । तस्या वासनाया विभाग तासा विभक्ताना प्रत्येक लक्षणम । यया भावनया त्यक्त पूर्वापरविचारण यथा भवति तथा पदार्थस्य स्वाभिमतस्यादान ग्रहण भवति, अस्मद्व्यापा समीचीना अस्मद्देय समीचीन अस्मदर्थोऽस्त्वपुच इति वासना प्रोक्ता पण्डितैरित्यर्थ " मोक्षहेतु शुद्धा, बन्धहेतु मलिना, इममेवार्थं स्पष्टयति— **मलिनेत्यादिना** ॥ मलिना जन्महेतु स्यादित्युक्तमेवार्थं स्पष्टयति— **अज्ञानेति** ॥ ब्रह्मस्वरूपावरकेणाज्ञानेन सुष्ठु घनीभूत आकारो यस्य स तथोक्त स चासौ घनाहङ्कारश्चेति तथा तच्छालिनी तत्स्थितेति यावत् ॥ अहङ्कारस्य घनाकारो भ्रान्ति

जन्ममृत्युकरी प्रोक्ता मलिना वासना बुधैः ।
अज्ञानसुघनाकारघनाहङ्कारशालिनी ॥
पुनर्जन्माऽङ्कुरं त्यक्त्वा स्थिता सम्भृष्टबीजवत् ।
देहार्थं ध्रियते ज्ञातज्ञेया शुद्धेति चोच्यते" ॥ इति ।

तत्र ताश्च मलिनवासना जन्महेतवोऽनेकप्रकारा दर्शिता :—

परम्परा, सा चासुरसम्पत्प्रस्तावे भगवता दर्शिता— "इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम् । इदमस्तीदमपि मे भविष्यति पुनर्धनम् ॥ असौ मया हतः शत्रुः हनिष्ये चापरानपि । ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी ॥ आढ्योऽभिजनवानस्मि, कोऽन्योऽस्ति सदृशो मया । यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिता"। इति । शुद्धा जन्मविनाशिनीत्युक्तमर्थं स्पष्टयति— **पुनरिति** ॥ **जन्मांकुरं** जन्ममूलं **त्यक्त्वा** परित्यज्य विनाश्येति यावत् । **भर्जितबीजं** नष्टबीजं प्रारब्धभोगाश्रयदेहार्थं देहस्थित्यर्थं ज्ञातं ज्ञेयमखण्डैकरसानन्दात्मवस्तु यया तथोक्ता.या वासना ध्रियते सा शुद्धेति योजना ॥ पुनर्जन्मकरीति पदं व्याचष्टे— **तत्रेति** ॥ तयोर्मध्य इत्यर्थः ॥ **ननु** मलिनवासना कतिविधा उत्पाद्यतामित्याशङ्क्य मलिनवासना अनन्ता । सचेपतस्त्रिविधा व्युत्पादिता स्मृतावित्याह— **ताश्चेति** ॥ यथा सर्वे न निन्दन्ति यथा स्तुवन्ति तथाहमाचरिष्यामि इत्यभिनिवेशो लोकवासना सा यथाऽस्थितमशक्या जन्मकोटिशतैरत सा मलिनवासना । कथ

लोकवासना सम्पादयितुमशक्येति चेत्, यत एव लोके श्रूयते— "निरवधिगुणग्रामे रामे निरागसि वागसि स्फुरणमुदिताल्लोका लोका वदन्ति तदन्तिके। वरतनुरिति वालिद्रोहे मनागपमर्पण मपरिमितगुणे स्पष्टादुष्टे सुधा किमुदामत" इति। निर्दुष्टमपि परमात्मानं राममनन्तकल्याणगुणनिलयं प्रणतिमात्रेण सर्वपुरुषार्थदं श्रीरामं कचन पुरुषधौरेया स्तुवन्ति, केचन पुरुषा सदा निन्दन्ति किमु वक्तव्यमस्मदादिषु। तस्माल्लोकवासनाया सम्पादयितुमशक्यत्वात् स्वहितमेव कर्तव्यम् तदाह— 'विद्यते न खलु कश्चिदुपायः सर्वलोकपरितोषकरो यः। सर्वथा स्वहित माचरणीयं किं करिष्यति जनो बहुजल्पः। इति॥ तथा भर्तृहरिराप— निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्ति लक्ष्मी समाविशतु गच्छतु वा यथेष्टम्। अद्यैव वा मरणमस्तु युगान्तरे वा न्याय्यात् पथः प्रविचलन्ति पदं न धीराः॥ इति॥ तस्माल्लोकवासनाया सम्पादयितुमशक्यतया तत्राभिनिविष्टचित्तस्य ज्ञान प्रतिबन्धकतया मलिनत्वम्। एतदभिप्रेत्योक्तम्— 'न लोकचित्त ग्रहणे रतस्य न भोजनाच्छादनतत्परस्य। न शब्दशास्त्राभिरतस्य मोक्षो न वाऽतिरम्यावसथप्रियस्य इति॥ शास्त्रवासना त्रिविधा— पाठव्यसनमर्थव्यसनमनुष्ठानव्यसनञ्चेति। त्रयाणामपि दुःसम्पादत्वा न्मलिनत्वम्। तथाहि— पाठस्य दुःसम्पादत्वं तैत्तरीयश्रुतौ भारद्वाजोपाख्यानेनावगम्यते। "भारद्वाजो ह त्रिभिरायुर्भिर्ब्रह्मचर्य मुवास। तं ह जीर्णं स्थविरं शयानं इन्द्र उपव्रज्योवाच। भरद्वाज यत्ते चतुर्थमायुर्दद्यां किमेतेन कुर्या इति। ब्रह्मचर्यमेवैतेन

"लोकवासनया जन्तोर्देहवासनयाऽपि च।
शास्त्रवासनया ज्ञानं यथावन्नैव जायते"॥ इति।

चरेयमिति होवाच। तं ह त्रीन् गिरिरूपानविज्ञातानिव दर्शया-
ञ्चकार। तेषां हैकैकस्मान्मुष्टिमाददे। स होवाच भरद्वाजेत्या-
मन्त्र्य। वेदा वा एते। अनन्ता वै वेदाः। एतद्वा गतैः त्रिभि-
रायुर्भिरन्ववोचेथाः। अथ त इतरदनूक्तमेव। एहीमं विद्धी"ति॥
पञ्चसप्ततिवार्षिकं स्वाध्यायमधीयानं शयानं भरद्वाज दृष्ट्वा चतुर्थ-
मायुर्दास्यामीत्युक्तवान्। तच्छ्रुत्वा भरद्वाजोऽध्ययने मतिं चकार।
पश्चात्तद्दोषदर्शनेन ततो निवार्य तस्मै ब्रह्मविद्यामुपदिदेश"
इत्युपाख्यानश्रुतेरर्थः॥ अतएव— "अनन्तशास्त्रं बहु वेदितव्य-
मल्पश्च कालो बहवश्च विघ्नाः। यत्सारभूतं तदुपासितव्यं हंसो
यथा क्षीरमिवाम्बुमिश्रम्"॥ "अधीत्य चतुरो वेदान् धर्म-
शास्त्राण्यनेकशः। यस्तु ब्रह्म न जानाति दर्वी पाकरसं यथा॥
बहुशास्त्रकथाकन्थारोमन्थेन वृथैव किम्। अन्वेष्टव्यं प्रयत्नेन
तत्त्वज्ञैर्ज्योतिरान्तरम्"॥ इति॥ तस्मादर्थव्यसनमपि दुःसम्पाद्य-
मेव। अनुष्ठानव्यसनं विष्णुपुराणे निदाघस्योपलभ्यते— ऋतुना
पुनः पुनर्बोध्यमानोऽपि निदाघोऽनुष्ठानव्यसनेन तत्त्वं न बुबुधे।
तृतीये पर्यायेऽतिक्लेशेन सर्वपरित्यागेन तत्त्वं विज्ञातवान्। अतो-
ऽनुष्ठानव्यसनमपि तत्त्वज्ञानप्रतिबन्धकमेव। तस्मात्त्रिविधवासनाया
ज्ञानप्रतिबन्धकत्वान्मलिनत्वं। देहवासना द्विविधा— आत्मवासना
तत्सम्बन्धिवासना चेति। मनुष्योऽहमित्यात्मवासना। इतरा

"दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च।
अज्ञानं चाऽभिजातस्य पार्थ सम्पदमासुरीम्" ॥'
इति च।

योषित्पुत्रादिविषयाऽभिलाषाश्च मलिनवासना द्रष्टव्याः। विवेकदोषदर्शनसत्सङ्गसन्निधित्यागप्रतिकूलवासनोत्पादनेन उक्तानां मलिनवासनानामन्तःकरणगतानामनुत्पादो वासनाक्षयाऽभ्यासः। तथैव वसिष्ठादिभिर्दर्शितम्—

द्विविधा— शास्त्रीया लौकिकी चेति। प्रथमा द्विविधा— गुणदयापनयनप्रयुक्ता ध्यानप्रयुक्ता चेति॥ गङ्गास्नान-शालग्रामोदकाभिषेकादिनाऽऽद्या, शौचाचमनादिना द्वितीया। लौकिकी वासना द्विविधा— तैलपानमरीचभक्षणादिना प्रथमा, अभ्यङ्गस्नानादिना द्वितीया, ज्ञानप्रतिबन्धकत्वात् जन्महेतुत्वाच्च समस्तदेहवासनानां मलिनत्वमिति। अन्यदपि ज्ञानप्रतिबन्धकीभूतं मलिनवासनाजातं भगवता दर्शितम्— **दम्भेति**॥ स्वानुभवसिद्धं मलिनवासनाजातमन्यदप्यस्तीत्याह— **योषिदिति**।

उक्तानामनेकजातानां मलिनवासनानां कुतो निवृत्तिरित्याशङ्क्याह— **विवेकेति**॥ अत्र सम्मतिमाह— **तथैवेति**॥ इत्य-

"दृश्याऽसम्भवबोधेन रागद्वेषादितानवे ।
रतिर्घनोदिता या तु बोधाऽभ्यासं विदुः परम्" ॥
इति ।

"असङ्गव्यवहारित्वाद्भवभावनवर्जनात् ।
शरीरनाशदर्शित्वाद्वासना न प्रवर्त्तते" ॥ इति च ।
"नैष्कर्म्येण न तस्यार्थो न तस्याऽर्थोऽस्ति कर्मभिः ।
न समाधानजप्याभ्यां यस्य निर्वासनं मनः ॥
आत्माऽसङ्गस्ततोऽन्यत् स्यादिन्द्रजालमिदं जगत् ।
इत्यचञ्चलनिर्णीते कुतो मनसि वासना" ॥ इति ।

दृश्यमान सर्वमात्मव्यतिरिक्ततया वस्तुतो नास्तीति बोधो **दृश्यासम्भवबोधः**, तेन स्वात्मनि रागादिप्रतिबन्धासम्भवादात्मव्यतिरिक्तविषयस्य परमार्थतोऽभावाद्रागादीनां तनुत्वं सम्पद्यते । ततश्च **रागद्वेषादितानवे** स्वात्मानन्दानुभवे या रतिरुपैति रतेराभिमुख्येनात्मन्यन्तःकरणस्यात्मानन्दैकाकारतेति यावत् । **बोधाभ्यासं** **बुधाः** पण्डिताः ब्रह्मनिष्ठा इत्यर्थः । मलिनवासनाक्षयाभ्यास । वासनानामनन्तत्वात्प्रकारान्तरेण तन्निवृत्त्युपायप्रतिपादकं श्लोकं पठति— **असङ्गेति** ॥ असङ्गोऽहमिति व्यवहारोऽस्यास्तीत्यसङ्गव्यवहारी तस्य भावः तत्त्व तस्मादित्येतत् । व्यवहारो द्विविधः— अभिज्ञाव्यवहारो अभिलापनव्यवहारश्चेति । तत्रासङ्गोऽहमिति निरन्तरप्रत्ययावृत्तिं कुर्वतस्तदितरवासना न प्रवर्तते ; आत्मानु-

"दुःखं जन्म जरा दुःखं मृत्यु दुःखं पुनः पुनः।
संसारमण्डलं दुःखं पच्यन्ते यत्र जन्तवः" ॥

इति इतिहासे।

"निःसङ्गता मुक्तिपदं यतीनां

सन्धानवासनायाः प्रबलत्वात्। तदुक्तम्—"अत्र सर्वमनुस्मृत्य जात नैव तु पश्यति"। इति॥ वक्ष्यमाणप्रकारेण दोषदर्शनेन भवस्य संसारस्य भावनस्य स्मरणानुकूलसंस्कारात्मकवासनायाः **विवर्जना**त्परित्यागात्तिरोभावादित्यर्थः। ततो वासना न प्रवर्तते—इति। तदाहुः—"दुःखं सर्वमनुस्मृत्य कामभोगान्निवर्तते। तथाचोक्तम्—"मस्तकस्थायिनं मृत्युं यदि पश्येदयं जनः। आहारोऽपि न रोचेत किमुतान्या विभूतयः।" इति॥ श्रीमद्भागवते भगवताप्युक्तम्—"कोन्वर्थः सुखयत्येनं कामो वा मृत्युरन्तिके। आघातं नीयमानस्य वध्यस्येव न तुष्टिदः।" इति॥ अथवा शरीरनाशदर्शित्वाद्भवभावनवर्जनं ततोऽसङ्गव्यवहारित्वं ततो वासनानिवृत्तिरित्युत्तरोत्तरहेतुत्वं द्रष्टव्यम्। दोषप्रतिपादकं वचनं पठति—**दुःखमिति**॥ एवमात्मव्यतिरिक्तं सर्वं दुःखात्मकमनुसन्दधतः सर्वानात्मवासनानिवृत्तिर्भवतीति तात्पर्यम्। असत्सङ्गराहित्यस्य मोक्षसाधनत्वप्रतिपादकं श्लोकं पठति—**निःसंगतेति**॥

सङ्गराहित्यमित्यर्थः। **मुक्तिपदं** मोक्षमार्गः। तदुक्तं मनुना—"अध्यात्मरतिरासीनो निरपेक्षो निरामिषः। आत्मनैव सहायेन सुखार्थी विचरेदिह॥ कपालं वृक्षमूलानि कुचेलम-

सङ्गादशेषाः प्रभवन्ति दोषाः ।
आरूढयोगोऽपि निपात्यतेऽधः
सङ्गेन योगी किमुताऽल्पसिद्धिः" ॥

इति विष्णुपुराणे ।

तथा भागवतेऽपि—

"सङ्गं त्यजेत मिथुनव्रतीनां मुमुक्षुः
सर्वात्मना न विसृजेत् बहिरिन्द्रियाणाम् ।

सहायता । समता चैव सर्वस्मिन्नेतन्मुक्तस्य लक्षण"मिति ॥ अन्य-
त्रापि—"तस्माच्चरेत वै योगी सतां धर्ममदूषयन् । जनाः यथा-
ऽवमन्येरन् गच्छेयुर्नैव सङ्गतिमि"ति ॥ भारतेऽपि— अहेरिव गणा-
द्भीतः सम्मानान्नरकादिव । कुणपादिव च स्त्रीभ्यस्तं देवाः ब्राह्मणं
विदुः" ॥ इति ॥ सङ्गे सति किं न भवतीत्याह— **संगादिति ।**
दोषाः राग-द्वेष-मोहाः **मोहो** भ्रान्तिः ॥ किं कुर्वन्तीत्यत
आह— **आरूढेति** ॥ सङ्गोत्पन्नदोषैरारूढयोगो योग्यधः नरके
पात्यते किमु वक्तव्यमल्पसिद्धिरारुरुक्षुः पात्यत इत्यत्र । तस्मान्निः-
सङ्गत्वं मुमुक्षूणामावश्यकमिति भावः । इदानीं दम्पतिसङ्गत्याग-
प्रतिपादकं सौभरिवचनमुदाहरति— **संगमिति** ॥ मिथुनवृत्तीनां
दम्पतीनामेकादशेन्द्रियाणि बहिर्न विसृजेत् तद्विसर्जनेन नरके
पात्यते । प्राह मनुः— "अकुर्वन्विहितं कर्म निन्दितञ्च समाचरन् ।
प्रसज्जंश्चेन्द्रियार्थेषु नरः पतनमृच्छति" इति ॥ ततः सङ्ग परि-

एकश्चरेद्रहसि चित्तमनन्त ईशे
युञ्जीत तद्रतिषु साधुषु चेत्प्रसङ्गः" ॥ इति ।
"स्त्रीणां तत्सङ्गिनां सङ्गं त्यक्त्वा दूरत आत्मवान् ।
क्षेमे विविक्त आसीनश्चिन्तयेन्मामतन्द्रितः" ॥
इति च ।

त्यक्तेन्द्रियनिग्रहं कुर्वन् किं कुर्यादित्यत आह— **एक इति** ॥ एकाकिना स्थित्वा निरन्तरब्रह्मध्यानं कर्तव्यमित्यर्थः । **ननु—** मनः चञ्चलत्वात्परमात्मनि न तिष्ठति किं कर्तव्यमित्याशङ्क्याह— **तद्रतिष्विति** ॥ तस्मिन्परमात्मनि रतिः येषां ते तद्रतयः तेषु साधुषु सङ्गः कर्तव्य इति शेषः । कदापि लम्पटसङ्गो न कर्तव्य इत्याह— **स्त्रीणामिति** ॥

"कदापि युवतीं भिक्षुर्न स्पृशेद्दारवीमपि । स्पृशन्करीव बध्येत करिण्या अङ्गसङ्गतः" ॥ इति स्त्रीसङ्गस्य बन्धहेतुत्वप्रतिपादनेन तत्सङ्गिसङ्गस्यापि तथात्वेन च तदुभयं त्यक्त्वा मनोरमे एकान्तदेशे स्थित्वा सर्वेषामात्मानं वासुदेवं सर्वसाक्षिणमहं ब्रह्मास्मीति ध्यायेदित्यर्थः । तथाच स्मृतिः तत्फलबोधिनी— "अहमस्मि परं ब्रह्म वासुदेवाख्यमव्ययम् । इति यस्य स्थिरा बुद्धिः स मुक्तो नात्र संशयः" इति ॥ विष्णुपुराणेऽपि यमोऽपि भृत्यान् प्रत्याह— "सकलमिदमहं च वासुदेवः परमपुमान् परमेश्वरः स एकः । इति मतिरचला भवत्यनन्ते हृदयगते व्रज तान्विहाय दूरात्" ॥ इति ॥ तथाच दम्पतिलम्पटसङ्गत्यागपूर्वकं ब्रह्मानुसन्धानेन सर्व-

"महत्सेवां द्वारमाहुर्विमुक्ते-
स्तमोद्वारं योषितां सङ्गिसङ्गम् ।
महान्तस्ते समचित्ताः प्रशान्ता
विमन्यवः सुहृदः साधवो ये" ॥ इति च ।

तत्सङ्गे पातित्यमाह—

"योपिद्धिरण्याऽऽभरणाऽम्बरादि-
द्रव्येषु मायारचितेषु मूढः ।
प्रलोभितात्मा ह्युपभोगबुद्ध्या
पतङ्गवन्नश्यति नष्टदृष्टिः" ॥ इति ।

वासनानिवृत्तिः फलं भवति । सत्सङ्गस्य वासनाक्षयद्वारा मोक्ष साधनत्वप्रतिपादकं वचनमुदाहरति— महदिति ॥ द्वारं साधनं । स्त्रीसङ्गिसङ्गो न कर्तव्यः तस्य नरकसाधनत्वादित्याह— तमोद्वारमिति ॥ नरकप्राप्तिसाधनमित्यर्थः । ते के महान्त इत्याकाङ्क्षायामाह— महान्त इति ॥ समे ब्रह्मणि चित्तं येषां ते तथोक्ताः । "समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्" इति स्मृतेश्च । अथवा शत्रुमित्रयोः समं चित्तं येषां ते तथा । "सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु । साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ।" इति भगवद्वचनात् । अनुपकृतोपकारिणः सुहृदः शमदमसम्पन्नाः साधवः । तत्सङ्गे स्त्रीसङ्गिसङ्गे मूढोऽविवेकी । प्रलोभितः

प्रतिकूलवासना मैत्र्यादिवासनाः। ताश्च दर्शित "मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्याऽपुण्यविषयाणां भावनातश्चित्तप्रसादन"मिति।

अस्यार्थः— सुखिप्राणिष्वेते मदीया इति मैत्रीं, दुःखिप्राणिषु यथा मम दुःखं मा भूदेवमन्येषामपि दुःखं मा भूदिति करुणां पुण्यकारिषु पुरुषेषु मुदितां पापिषूपेक्षां भावयतो रागद्वेषाऽसूयामदमात्सर्यादिनिवृत्त्या चित्तप्रसादो भवतीति।

तथा दैवसम्पदभ्यासेनाऽऽसुरसम्पन्नश्यति। दैवी सम्पद्भगवता दर्शिता—"अभयं सत्त्वसंशुद्धि"रित्यारभ्य

उत्पादितलोभ आत्मा मनो यस्य स तथोक्तः। प्रतिकूलेति॥ मैत्र्यादिवासना व्युत्पादयितुं पतञ्जलिसूत्रमुदाहरति— ताश्चेति॥ सूत्रं व्याचष्टे— अस्यार्थ इति॥

रागेति॥ भावयतेति शेषः॥ प्रतिकूलवासनान्तराभ्यासेनापि मलिनवासना नश्यतीत्याह— तथेति॥ केयं दैवी सम्पदित्याकाङ्क्षायामाह— दैवीति॥ "अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः। दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्॥ अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्। दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम्। तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता। भवन्ति सम्पदं दैवीमभिजातस्य भारत।" इत्यनेन दैवसम्प-

"भवन्ति सम्पदं दैवीमभिजातस्य भारते"त्यन्तेन । "अमानित्व"मित्यादिनोक्ताऽमानित्वादिधर्माभ्यासेन तद्विपरीतमानादयो नश्यन्ति ॥

तथाच मैत्र्यादिवासनां सङ्कल्पपूर्वकमभ्यस्याऽनन्तरमजिह्मत्वादिधर्मानभ्यसेत् ।

दूर्गितेत्यर्थः । वासनानामनन्तत्वात्प्रकारान्तरेण प्रतिकूलवासनाभ्यासेन मलिनवासनानां निवृत्तिमाह— **अमानित्वेति** ॥ "अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम् । आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥ इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च । जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥ असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु । नित्यञ्च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥ मयि चानन्ययोगेन भक्तिरव्यभिचारिणी । विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥ अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् ।" इत्यनेनोक्तामानित्वादिज्ञानसाधनाभ्यासेन तद्विपरीतभ्रान्तिसाधनमानादयो नश्यन्तीत्यर्थः ॥ **ननु**— मलिनवासनानामनन्तत्वात् तासाममूर्तत्वेन समार्जनीसमूहीकृतधूलिराशिवत्पुञ्जीकर्तुमशक्यत्वात् कथं वासनाक्षयः स्यादित्याकाङ्क्षायामाह— **तथाचेति** ॥

प्रथमम्भ्येण सङ्कल्पपूर्वकमुपवासजागरणन्यायेन **मैत्र्यादिवासना** दैवीसम्पत् । अमानित्वादिधर्मेष्वभ्यस्यमानेषु सर्वा मलिनवासनाः क्षीयन्ते सूर्योदये तम इव । तेषु सम्यगर्जितेष्वजिह्मत्वादीन् धर्मान् वक्ष्यमाणानभ्यसेदित्यर्थः । के तेऽजिह्मत्वादय इत्याकाङ्क्षायां सम्प्रति-

अजिह्वत्वादयो दर्शिताः—

अजिह्वः षण्ढकः पङ्गुरन्धो बधिर एव च ।
मुग्धश्च मुच्यते भिक्षुः षड्भिरेतैर्न्न संशयः ॥ इति ।
इदमिष्टमिदं नेति योऽश्नन्नपि न सज्जते ।
हितं सत्यं मितं वक्ति तमजिह्वं प्रचक्षते ॥
अद्य जातां यथा नारीं तथा षोडशवार्षिकीम् ।
शतवर्षां च यो दृष्ट्वा निर्विकारः स षण्ढकः ॥
भिक्षार्थं गमनं यस्य विण्मूत्रकरणाय च ।
योजनान्न परं याति सर्वथा पङ्गुरेव सः ॥
तिष्ठतो व्रजतो वापि यस्य चक्षुर्न्न दूरगम् ।
चतुर्युगां भुवं मुक्त्वा परिव्राट् सोऽन्ध उच्यते ॥
हिताऽहितं मनोरामं वचः शोकाऽऽवहं च यत् ।
श्रुत्वाऽपि यो न शृणुते बधिरः स प्रकीर्त्तितः ॥
सांनिध्ये विषयाणां च समर्थोऽविकलेन्द्रियः ।
सुप्तवद्वर्त्तते नित्यं स भिक्षुर्मुग्ध उच्यते ॥ इति ।
तदनन्तरं चिन्मात्रवासनामभ्यसेत् ।
नामरूपात्मकस्य जगतश्चैतन्ये कल्पितत्वेन स्वतः-

पादिका सति पठति— अजिह्व इत्यादिना ॥ अजिह्व-
त्वादिधर्मेषु जितेषु किं कर्तव्यमित्याकाङ्क्षायामाह— तदनन्तर-
मिति ॥ केय चिन्मात्रवासनेत्याकाङ्क्षायामाह— नामरूपात्म-

सत्ताशून्यतया चैतन्यसत्तास्फुरणपूर्वकमेव स्फुरणं भवति। ते च नामरूपे मिथ्यात्वनिश्चयेनोपेक्ष्य चिन्मात्रोऽहमिति भावयेत् ।

सेयं चिन्मात्रवासना द्विप्रकारा, कर्तृकर्मकरणानुसन्धानपूर्विका केवला चेति। तत्र सर्वं जगच्चिन्मात्रमहं मनसा भावयामीति क्रियमाणा प्रथमा। सा संप्रज्ञातसमाधिकोटावन्तर्भवति। कर्तृकर्मकरणानुसन्धानरहिता चिन्मात्रोऽहमिति भवना केवला। सर्वस्य चिन्मात्रत्वं युक्त्या बलिं प्रत्युपादिष्टं—

कस्येति ॥ चिन्मात्रवासनां विभजते— सेयमिति ॥ प्रथमां चिन्मात्रवासनामभिनीय दर्शयति—सर्वमिति ॥ ननु प्रथमा-मायाः चिन्मात्रवासनायाः योगान्तर्भावः स्यादिति चेदिष्टापत्तिः ॥ प्रथमायाः चिन्मात्रवासनायाः कस्मिन्योगेऽन्तर्भाव इत्यत आह—मेति ॥ द्वितीयामभिनीय दर्शयति— कर्त्रिति ॥ ननु सर्वं चिन्मात्रं भावयामीति प्रथमा वासनोदाहृता, तत्र सर्वस्य चिन्मात्रत्वं कुतोऽवगन्तव्यमित्याशङ्क्य श्रुतिप्रमाणादवगन्तव्यमित्याह— सर्वस्येति ॥ "किमिन्द्रजालमिव चिन्मात्र सर्वं चिन्मयमेव तत् । कथं कोऽहं च चेत्रो लोका इति बराट मे ॥ इति पूर्वार्धं यथि सति सर्वस्य चिन्मात्रत्वं युक्त्योपपादितमिति बोध्यम् । द्वितीयायाः

चिदिहास्तीह चिन्मात्रं सर्वं चिन्मयमेव तत्।
चित्त्वं चिदहमेवेति लोकश्चिदिति संग्रहः ॥
द्वितीयाऽसंप्रज्ञातसमाधिकोटावन्तर्भवति ।
तस्यां चिन्मात्रवासनायां दृढाऽभ्यस्तायां पूर्वोक्ता-

कुचान्तर्भाव इत्याकांक्षायामाह— **द्वितीयेति** ॥ एवं चिन्मात्र-वासनायां जातायां किं भवतीत्याशङ्क्याह— **तस्यामिति** ॥

वासनात्रयसाधननिरूपणमुपसंहरति— **सोऽयमिति** ॥ ननु जीवन्मुक्तिसाधनत्वेन मनोनाशाभ्यासः प्रतिज्ञातः, स नोपपद्यते; मनसो नित्यत्वेन तन्नाशायोगात्, न च तत्र प्रमाणाभावः, धर्मि-ग्राहकमानेनैव तत्सिद्धेः। तथाहि सुखाद्युपलब्धयः करणसाध्याः जन्यसाक्षात्कारत्वात् रूपादिसाक्षात्कारवदिति सुखादिसाक्षात्कारं प्रति चक्षुरादीनां करणत्वबाधात् तत्करणत्वेन सिध्यत् मनो नित्य-मेव सिध्यति, तत्कारणानिरूपणात्। तथाहि आत्मनो विभुत्वेन निरवयवतया तदारम्भकत्वायोगः, अत एवाकाशादीनां तदा-रम्भकत्वमपास्तम्। न च—पृथिव्यादीनां तथात्वमस्तीति—वाच्यम्, निःस्पर्शद्रव्यत्वेन तत्कार्यत्वायोगात्, अन्यस्य कारणान्तरस्यानिरूप-णात्। नच— मायैव तत्कारणमस्त्विति—वाच्यम्; तस्या दुर्वचत्वात्, नच— "मायां तु प्रकृतिं विद्यान्मायिनन्तु महेश्वर"मित्यादि श्रुत्या तत्सिद्धिरिति— वाच्यम्; तस्यार्थान्तरपरत्वात्, अन्यथा तत्रापि सात्त्विकप्रमाणसिद्धतया मिथ्यात्वाभावप्रसङ्गात्। किञ्चैव-मनित्यत्वे मनसोऽनन्तप्रागभावध्वंसाः कल्प्याः, अनन्तमनांसि चैके-

कस्य कल्पनीयानि, ततश्च कल्पनागौरवम् । तस्माल्लाघवादेकैकस्यैकैकमेव नित्यं निरवयवं मनोऽभ्युपगन्तव्यम्; तस्य विभुत्वे आत्मसंयोगानङ्गीकारेणासमवायिकारणस्यात्ममनःसंयोगस्याभावेन ज्ञानाद्यनुत्पत्तिप्रसङ्गात् । तस्मादेव मनो नित्यं चेति तन्नाशासम्भवात् तन्नाशे जीवन्मुक्तिः सिद्ध्यतीत्यसङ्गतमिति— चेत्,

अत्र ब्रूमः— "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च"। "तन्मनो कुरुत" इत्यादिश्रुतिभ्यः परमात्मनः सकाशान्मनस उत्पत्त्यवगमेनानित्यमेव मनः, भावकार्यस्यानित्यत्वावश्यम्भावात् । न च— परमात्मनोऽद्वितीयत्वेन निरवयवतया कथं तदारम्भकत्वमिति— वाच्यम्, आरम्भवादानङ्गीकारेण तस्य तद्विवर्तत्वे बाधकाभावात् । नच— मायाया अप्रामाणिकत्वेनान्यस्योपाध्यन्तरस्यानिरूपणान्निरुपाधिकस्य परस्य कथं तद्विवर्ताधिष्ठानत्वमिति— वाच्यम्; मायायां प्रमाणस्योक्तत्वात् ।

नच— तस्याः प्रमाणसिद्धत्वे मिथ्यात्वाभावप्रसङ्ग इति— वाच्यम्, नहि प्रमाणैः तस्या वास्तवत्वं बोध्यते, "एकमेवाद्वितीयं" "नेह नानास्ति किञ्चन" इत्यादिश्रुतिविरोधप्रसङ्गात्, अपि त्वसत्त्वव्यावृत्तिमात्रं क्रियते । नचैतावता मिथ्यात्वाभावप्रसङ्गः; सदसद्विलक्षणत्वस्यैव मिथ्यात्वलक्षणत्वात् । ततश्च मायोपहितात्पराटाकाशाद्युत्पत्तौ महाभूतोपहिताद्ब्रह्मणोऽन्तःकरणोत्पत्तेः सम्भवात् मनसोऽनित्यत्वमेव । किञ्च नित्यत्वे मनसो "येनाश्रुतं श्रुतं भवतीत्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञा बाध्येत, अतोऽपि कार्यमनित्यं मनः । किञ्चेदं सुखाद्युपलब्धिकरणत्वेन मनः सिद्ध्यतु, तस्य नित्यत्वं कुतः

मलिनवासना सर्वा क्षीयते। अयं वासनाक्षयाऽभ्यासः। यत्तु सुवर्णादिवत् सावयवं कामादिवृत्तिरूपेण परिणाममानमन्तःकरणं मननात्मकत्वान्मनः, तच्च सत्त्वरज-

---

सिद्ध्येत्? अणुत्वात्, इति चेन्न, तत्र प्रमाणाभावात्। नच—उत्पत्तिकारणानिरूपणात्तथात्वमिति—वाच्यम्; तस्य श्रुत्यादिभिः प्रतिपादितत्वात्। नच—उत्पत्तिमत्त्वे मनस एकैकस्यानन्तप्रागभावध्वंसकल्पनागौरवमिति—वाच्यम, प्रमाणमूलत्वेन तस्यादोषत्वात्। अन्यथा नैयायिकादीनां कथं परमाणवो जगदुपादानत्वेन सिद्ध्येयुः।

अस्तु वा मनसोऽणुत्वम्, तथापि तस्य कथं नित्यत्वम्? परिच्छिन्नस्य घटादेः सावयवतयाऽनित्यत्वस्य लोके दृष्टत्वात्, दृष्टपूर्वकत्वाददृष्टकल्पनायाः। तस्मात्कार्यद्रव्यं सावयवं मध्यमपरिमाणमनित्यं मन इति सिद्धम्। अतो मनोनाशाज्जीवन्मुक्तिरुपपद्यते। नच—मनोनाशे विदेहमुक्तिरेव स्यात् प्रतिबन्धकाज्ञानतत्कार्ययोर्नष्टत्वात् इति—वाच्यम्, मनोनाशो द्विविधः—स्वरूपनाशः सरूपनाशश्चेति। आद्ये स्यादेव। द्वितीयेऽखिलवृत्तिनाशेऽपि स्वरूपेणान्तःकरणस्य सत्त्वेन भोगप्रापकप्रारब्धेन पुनरुत्थानसम्भवात् सरूपमनोनाशेन जीवन्मुक्तिरेव सिध्यति न विदेहमुक्तिः। नहि विदेहमुक्तस्योत्थानं सम्भवति; तद्बीजस्य नष्टत्वात् इत्यभिप्रेत्य जीवन्मुक्तिसाधनमनोनाशं निरूपयितुं तत्प्रतियोगि मनो निरूपयति—

यत्तु—सुवर्णादीति ॥ आदिशब्देन रजतादयो गृह्यन्ते। तस्यास्वरूपनाशं दर्शयितुं गुणात्मकत्वमाह—**तच्चेति** ॥ त्रिगुणात्मकत्वे हेतु

स्तमोगुणात्मकम्; तदाश्रयत्वेन सत्त्वरजस्तमोविकाराणां सुखदुःखमोहादीनामुपलम्भात्। रजस्तमोवृत्तिभिरुपचीयमानमन्तःकरणं पीनमात्मदर्शनाऽयोग्यं भवतीत्यतस्तत्सिद्ध्यर्थं वृत्तिनिरोधनेन सूक्ष्मताऽऽपादनं मनसो नाश इत्युच्यते।

तत्साधनानि दर्शितानि—

अध्यात्मविद्याऽधिगमः साधुसङ्गम एव च।

आह— तदिति ॥ सुखं सत्त्वविकारः दुःखं रजोविकारः मोहः तमोविकारः, एतेषां त्रयाणामन्तःकरणाश्रयत्वेनोपलम्भात् तत् सत्त्वाद्यात्मकमेवेत्यर्थः। ततः किम्? तत्राह— रज इति। पीनं स्थूलम्। नच— तावता कथमात्मदर्शनायोग्यत्वमस्येति— वाच्यम्, आत्मनोऽतिसूक्ष्मत्वेन स्थूलेन मनसा तद्दर्शनासम्भवात्। नहि स्थूलेन खनित्रेण सूक्ष्मपरस्यूतिः सम्भवत्यतः सूक्ष्मेण मनसा आत्मदर्शनं कर्तव्यम्। "दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः" इति श्रुतेः। तस्मादात्मदर्शनार्थं मनसः सूक्ष्मत्वमपेक्षितम्, स एव मनोनाश इत्याह— इत्युच्यत इति ॥ इति शब्दो हेत्वर्थः। यतः पीनं सत् आत्मदर्शनायोग्यम्, अतः कारणादित्यर्थः ॥ ननु वृत्तिनिरोधेन मनसः सूक्ष्मतापादनं मनोनाशश्चेत्तर्हि वृत्तिनिरोधः कस्माद्भवतीत्यत आह— तत्साधनानीति ॥

प्रतीचो ब्रह्मैकविद्याभिरध्यात्मविद्याधिगमः। नाम-रूपात्मकं दृश्यमानं सर्वं मिथ्यैव, अहमेव पूर्णः परमानन्दैकरसो

वासनासम्परित्यागः प्राणस्पन्दनिरोधनम् ।
एवास्तु(?) युक्तया पुष्टाः सन्ति चित्तजये किल ॥

मत्तोऽन्यत किमपि कारण काय वा नास्ति, अहमेव सर्वमित्य-ध्यात्मविद्याधिगमे दृश्यस्य मिथ्यात्वेन निश्चितत्वादविषयत्वादात्मन उभयत्राप्रवर्तमान चित्त निरिन्धनाग्निवदखिलवृत्तीनामनुदयात स्वयोनावुपशाम्यति। ततश्चाध्यात्मविद्याधिगमो मनोनाश प्रति मुख्यसाधनम्। बुद्धिमान्द्यादिना तत्राशक्तचित्त प्रत्युपायान्तर **साधुसङ्गमः**। साधवस्तु पुन स्मारयन्ति पुन पुनर्बोधयन्ति ततोऽध्यात्मविद्याप्राप्त्या मनोनाशो भवति। विद्यामदधनमदकुल मदाचारमदादिना पीड्यमान साधूननुवर्तितु नोत्सहते चेत्त प्रत्यु पायान्तर **वासनासंपरित्यागः**। विवेकेन वासनाना निवर्तनम्। तथाहि अहमत्र पण्डित, अन्य को वा कि जानाति? सर्वोऽप्य प्रयोजक, न मत्तोऽन्य पण्डितोऽस्तीति मनसोऽभिमानविशेषो **मदः**। अय विरोधिविवेकेन निवर्तनीय। दृप्तबालाकि शाकल्य प्रभृतीना पण्डिताभिमानिनामजातशत्रुयाज्ञवल्क्यप्रभृतिभि परि भवदर्शनात्, मनुष्यमारभ्य दक्षिणामूर्तिपर्यन्त तारतम्येन विद्यो-त्कर्षदर्शनाच्च। चन्द्रशिखामणे सर्वेषामादिगुरो महाशिवस्य दक्षि णामूर्तेरेव निरतिशयविद्योत्कर्ष इतरेषा सातिशय। तस्मान्माम-धिक कश्चित् पण्डित पराभविष्यतीति निरन्तर चिन्तयेत्ततो विद्यामदो निवर्तते। एव धनमदस्याप्यासुरसम्पद्रूपत्वेन पूर्वोक्तदैव-सम्पदभ्यासेन धनमद निवर्तयेत्। एव मघपतिना यावान् व्यवहार

प्राणनिरोधोपायो दर्शित :—
"प्राणायामदृढाऽभ्यासाद्युक्त्या च गुरुदत्तया।
आसनाऽशनयोगेन प्राणस्पन्दो निरुध्यते॥" इति।
प्राणायामप्रकारो दर्शित :—

"इडया पिब षोडशभिः पवनं
चतुरुत्तरषष्टिकमौदरिकम्।
त्यज पिङ्गलया शनकैः शनकै-
र्दशभिर्दशभिर्दशभिर्द्यधिकैः॥" इति।

इडया वामनासिकया पिब पूरय त्यज रेचय पिङ्गलया दक्षिणनासिकयेत्यर्थः।

प्राणायामस्य मनोनाशोपायत्वं श्रुतावप्युक्तम्—

क्रियते तावत्तोऽस्त्वपतिना कर्तुमशक्यत्वादिना तस्य पराभवमभ्य- याच। अहं को वा वराकः? भक्तोऽधिकाः कुबेरतुल्या बहवो वर्तन्त इत्येवं चिन्तयतो धनाभिमानो निवर्तते। एवमन्योऽपि वासनाप्रबन्धो विवेकेन तत्त्यागोऽभ्यस्येत्तं प्रत्यु- चारणीयः। पायान्तरं प्राणस्पन्दनिरोधनम्। प्राणस्पन्दनिरोधनं कस्मात् भवतीत्यत आह— प्राणेति॥ कथं प्राणायामाभ्यासः कर्तव्य इत्याकाङ्क्षायामाह— प्राणायामेति॥

कारिकां व्याचष्टे— इडयेति॥ प्राणायामेति॥ प्राण- निरोधादेरिति शेषः। योगी द्विविध.— देवधम्रादिप्रभवाशनो-

"प्राणान् प्रपीड्येह सुयुक्तचेष्टः
क्षीणे प्राणे नासिकयोच्छ्वसीत ।
दुष्टाश्वयुक्तमिव वाहमेनं
विद्वान्मनो धारयेताप्रमत्तः ॥" इति ।

आसनयोगं तत्साधनं तत्फलं च पतञ्जलिरसूचयत्—

"तत्र स्थिरसुखमासनं, प्रयत्नशैथिल्यानन्तसमापत्तिभ्याम्" । प्रयत्नशैथिल्यं लौकिकवैदिककर्मत्यागः । फणानां सहस्रेण धरणीं धृत्वा योऽनन्तो वर्तते स एवाऽहमस्मीत्यनुसंधानम् अनन्तसमापत्तिः । अनयाऽऽसनप्रतिबन्धकं दुरितं क्षीयते । "ततो द्वन्द्वानभिघातः" । आसनाऽभ्यासस्य फलं द्वन्द्वनिवृत्तिः ।

आसनयोगोऽपि दर्शितः—

"द्वौ भागौ पूरयेदन्नैर्जलेनैकं प्रपूरयेत् ।
मारुतस्य प्रचारार्थं चतुर्थमवशेषयेत् ॥" इति ।

एवं प्राणायामादिना प्राणस्पन्दे निरुद्धेऽखिलाश्चित्तवृत्तयो निरुध्यन्ते, प्राणस्पन्दाऽधीनत्वाच्चित्त-

---

आसनेति ॥ सूत्रं व्याचष्टे— प्रयत्नेति ॥ लौकिकवैदिककर्मसु वर्तमानस्यासनस्थैर्याभावात्तत्त्याग तत्साधनमित्यर्थः । अनन्तसमापत्तिमुपपादयति— फणानामिति ॥ अनन्तसमापत्तेः फलमाह— अनयेति ॥ फलसूत्रं व्याचष्टे— आसनेति ॥ आसनयोगमस्मृतिप्रदर्शनेन उपपादयति— आसनेति ॥ ननु प्राणायामादिना प्राणस्पन्दे निरुद्धे किं भवतीत्यत आह— एवमिति ॥ तत्रोपपत्तिमाह— प्राणेति ॥ यथा तत्स्थान पट तन्तुनिरोधे

वृत्त्युदयस्य। ततश्च स्वभावत आत्माऽनात्माकारमन्तःकरणमनात्माकारवृत्तिनिरोधादात्मैकाकारं भवति, यथाहुः—

"आत्माऽनात्माकारं स्वभावतोऽवस्थितं सदा चित्तम्।
आत्मैकाकारतया तिरोहिताऽनात्मदृष्टि विदधीत॥" इति।

अयमेव योगः। यथाहुः—"योगश्चित्तवृत्तिनिरोधः" इति।

निरुध्यते, यथा वा चित्ताधीनानि बाह्येन्द्रियाणि चित्तनिरोधे निरुध्यन्ते, एवं प्राणस्पन्दाधीना चित्तवृत्तयः तन्निरोधे निरुध्यन्त इत्यर्थः। ततः किमित्यत आह— **ततश्चेति**॥

अयमेव वृत्तिनिरोधो मनोनाश इत्युच्यते। तस्मिन्मनोनाशे सम्यक् सम्पन्ने आत्मैकाकारेण मनसाऽऽनन्दैकरसोऽपरिच्छिन्नः प्रत्यगात्माऽनुभूयते। "यदा यात्यमनीभावं तदा तत्परमं पदम्" इत्यादिश्रुतेरिति भावः। तत्र वृद्धसम्मतिमाह— **यथेति**॥ वृत्तिनिरोधो योगविद्भिर्योग इत्युच्यत इत्याह— **अयमिति**। तत्र योगशास्त्रसम्मतिमाह— **यथाहुरिति**॥ प्रमाणविपर्ययविकल्पनिद्रास्मृतीनां पञ्चानां निरोधो योगः। प्रत्यक्षानुमानागमाः प्रमाणानीति पातञ्जलाः। प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुपलब्धयः षड्विधानि प्रमाणानीति तु वयम्। प्रमाकरणं प्रमाणम्। प्रत्यक्षप्रमाकरणं प्रत्यक्षप्रमाणम्। अनुमितिप्रमाकरणमनुमानम्।

तत्साधनं चाहुः "अभ्यासवैराग्याभ्यां तन्निरोधः" इति।

भगवानपि तत्रैव—

"असंशयं महाबाहो मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते॥" इति।

वैराग्यं निरूपितम्।

निरोधो द्विविधः— संप्रज्ञातोऽसंप्रज्ञातश्चेति।

उपमितिप्रमाकरणमुपमानम्। शाब्दप्रमाकरणमागमः। उपपादकप्रमाकरणमर्थापत्तिः। ज्ञानकरणाजन्याभावानुभवासाधारणकारणमनुपलब्धिः॥ सामान्यविशेषलक्षणाभ्यां विस्तरेण प्रमा निरूपिता, करणञ्च निरूपितम्। विपर्ययो निरूपितः। विकल्पः संशयः, सोऽपि निरूपितः। तामसी वृत्तिर्निद्रा, कृति-प्रमत् ज्ञानं सोऽपि निरूपितः। अथवा निरूपिता। एतासां सर्ववृत्तीनां निरोधो योग इत्यर्थः। दैवासुरसंपत्तयः पूर्वमेव दैवासुरसंपत्तीनां निरोधो योग इत्यर्थः। निरूपिताः। ननु किं तन्निरोधसाधनमित्याकाङ्क्षायां सूत्रेण तदाह— तत्साधनं चेति॥

तत्र भगवद्गीतावचनमप्युदाहरति— भगवानपीति॥ किं तद्वैराग्यमित्याकाङ्क्षायामाह— वैराग्यमिति॥ तदभ्यासो निरूपणीय इत्यपेक्षायामादावस्य योग प्रत्यन्तरङ्गसाधनत्वाद्बहिरङ्गसाधनेन विना तदसिद्धेः सोपायं बहिरङ्गसाधनं निरूप्य तन्निरूपयितुं निरोधं विभजते— निरोध इति॥ वृत्तिनिरोध

कर्त्राद्यनुसंधानं विना चिन्मात्रलक्ष्यैकगोचरप्रत्ययप्रवाहः संप्रज्ञातसमाधिः। यथाहुः—

"विलाप्य विकृतिं कृत्स्नां संभवव्यत्ययक्रमात्।
परिशिष्टं तु चिन्मात्रं सदानन्दं विचिन्तयेत्॥
ब्रह्माऽऽकारमनोवृत्तिप्रवाहोऽहंकृतिं विना।
संप्रज्ञातसमाधिः स्याद् ध्यानाऽभ्यासप्रकर्षजः॥"

इति।

अस्य संप्रज्ञातसमाधेरङ्गिनो यमादीन्यष्टाङ्गानि।

इत्यर्थः। संप्रज्ञातस्य लक्षणमाह— **तत्रेति**॥ तयोर्मध्य इत्यर्थः। अङ्गसमाधिव्यावृत्त्यर्थं कर्त्राद्यनुसन्धानं विनेत्युक्तम्। आदिशब्देन कर्मकरणग्रहणम्। तत्र संमतिमाह— **यथाहुरिति**॥

"स्थूलसूक्ष्मक्रमात्सर्वं चिदात्मनि विलापयेदि"ति वार्तिकोक्तन्यायेन कृत्स्नं विकृतिमध्यस्तमज्ञानं तत्कार्यं स्थूलसूक्ष्मक्रमेण **चिदात्मनि विलाप्य** तद्व्यतिरेकेण नास्तीति निश्चित्येत्यर्थः। **संभवेति**। "विपर्ययेण तु क्रमोऽत उपपद्यते च"ति न्यायेनोत्पत्तिक्रमापेक्षया विपरीतक्रमादित्यर्थः। एवमुक्तप्रकारेणाज्ञानपर्यन्तं चिन्मात्रे विलाप्य परिशिष्टं चिन्मात्रं गुरूपदिष्टमहावाक्येन स्वात्मन्येव **चिन्तयेत्** ध्यायेत सच्चिदानन्दब्रह्मैवाहमस्मीति। संप्रज्ञातसमाधेरन्तरङ्गबहिरङ्गसाधनानि विभज्य दर्शयितुं तदङ्गानामियत्तामाह— **अस्येति**॥ बहिरङ्गसाधनान्युद्दिशति—

तत्र यमनियमाऽऽसनप्राणायामप्रत्याहारा बहिरङ्गानि ।

अहिंसा-सत्याऽस्तेय-ब्रह्मचर्याऽपरिग्रहा यमाः ।

अष्टाङ्गमैथुनवर्जनं ब्रह्मचर्यम् । यथाऽऽहुः—

"स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम् ।
संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च ॥
एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः ।
विपरीतं ब्रह्मचर्यमनुष्ठेयं मुमुक्षुभिः ॥
सत्सङ्ग-सन्निधित्याग-दोषदर्शनतो भवेत् ॥" इति ।

तत्र यमेति ॥ धारणादारा समञ्ज्ञातोपायत्वं बहिरङ्गत्वम् । यमादीनुपदिशति— अहिंसेत्यादिना ॥ मनसा वाचा कर्मणा प्राणिनामपीडनमहिंसा, यथार्थभाषणं सत्यम् । वञ्चनया परस्वापहरणं स्तेयम् ॥ न स्तेयोऽस्तेयः । ब्रह्मचर्यं निरूपयति— अष्टाङ्गेति ॥ किं तदष्टाङ्गमैथुनमित्याकाङ्क्षायां स्मृत्या तदाह— यथाहुरिति ॥ तदर्थेन क्रमाद्व्रतीत्याकाङ्क्षायामाह— विपरीतमिति ॥ अष्टाङ्गमैथुनं परित्यज्य तद्विपरीतमनुष्ठानं मुमुक्षुभिः संपादनीयमित्यर्थः । "यदिच्छन्तो ब्रह्मचर्यं चरन्ति सत्येन लभ्यः तपसा ह्येष आत्मा । सम्यक् ज्ञानेन ब्रह्मचर्येण नित्यमन्तः-शरीरे ज्योतिर्मयो हि शुभ्रो य पश्यन्ति यतयः क्षीणदोषाः" इत्यादि श्रुतेः । एवञ्च ब्रह्मचर्यसाधनमावश्यकं दर्शितम्—

अत एव स्त्रीणां सम्भाषणादिनिषेधोऽपि मुमुक्षू-
णाम्-

"न संभाषेत् स्त्रियं कांचित् पूर्वदृष्टां न च स्मरेत्।
कथां च वर्जयेत्तासां न पश्येल्लिखितामपि ॥"

इत्यादि स्मृतौ।

शौच-संतोष-तपः-स्वाध्यायेश्वरप्रणिधानानि नियमाः।

"का तव कान्ताऽधरगतचिन्ता
वातुल किं तव नास्ति नियन्ता ?।
त्रिजगति सज्जनसङ्गतिरेका
भवति भवोदधितरणे नौका" ॥ इति।

दोषदर्शनं महादेन दर्शितम्—

"मांसासृक्पूयविण्मूत्रस्नायुमज्जास्थिसङ्गते।
देहे यः प्रीतिमान् मूढो भविता नरकेऽपि सः" ॥ इति।

भगवतापि—

"स्वदेहाशुचिगन्धेन न विरज्येत यः पुमान्।
वैराग्यकारणं तस्य किमन्यदुपदिश्यते" ॥ इति।

एवं दोषमनुसन्धतः कथं तत्र प्रवृत्तिः स्यादतः सत्सङ्ग-
सन्निधिस्यागदोषदर्शनैर्दृढमयं रुन्ध्यादिति भावः। तदेव-
दृष्टान्तमाह— अत एवेति ॥

नियमानाह— शौचेत्यादिना ॥ मिताशनादि तपः।

आसनं निरूपितम्। तच्च पद्मस्वस्तिकादि अनेकप्रकारम्॥

रेचक-पूरक-कुम्भकाः प्राणायामाः।

इन्द्रियाणां विषयेभ्यो निवर्तनं प्रत्याहारः। एतेषु बहिरङ्गेषु जितेष्वन्तरङ्गेषु यत्नः कर्तव्यः।

धारणा-ध्यान-समाधयः संप्रज्ञातसमाधेरन्तरङ्गसाधनानि।

धारणा नाम मूलाधारमणिपूरकस्वाधिष्ठानाऽना-

प्रणवादिपवित्रमन्त्राणां जपः स्वाध्यायः। स्वेनानुष्ठितनित्यादिकर्मणः परमेश्वरे वासुदेवे परमगुरौ समर्पणमीश्वरप्रणिधानम्। रेचकेति॥ कुम्भको द्विविधः— आभ्यन्तरो बाह्यश्चेति। पूर्वोक्तप्रकारेण वायुमापूर्य हृदये वायुरोध आभ्यन्तरः। एवं यथाशक्ति वायुं विरिच्य शरीराद्बहिर्वायुरोध बाह्यकुम्भकः। एवमन्ये प्रकारा ग्रन्थान्तरोक्तास्तत्रैवानुसन्धेयाः।

एतेष्विति॥ अयं भावो योऽसमर्थोऽजितचित्तस्य, यस्य तु जन्मान्तरसुकृतपरिपाकवशेन शुद्धसत्त्वस्य प्रथममेव धारणाद्यन्तरङ्गसाधनानि तेन बहिरङ्गयमादिषु यत्नो न कर्तव्यः। कानि तान्यन्तरङ्गबहिरङ्गसाधनानीत्यत आह— धारणेति॥ केयं धारणेत्यत आह— धारणा नामेति॥

"मनः सङ्कल्पकं ध्यात्वा संक्षिप्यात्मनि बुद्धिमान्।
धारयित्वा तथात्मानं धारणा परिकीर्तिता॥

हृताऽऽज्ञाविशुद्धचक्रेशानामन्यतमे प्रत्यगात्मनि वा चित्तस्य स्थापनम्। तदेकस्मरणमिति यावत्।

ध्यानं नाम तत्र प्रत्ययैकतानता। लक्ष्यैकगोचरप्रत्ययप्रवाह इत्येतत्।

प्रत्ययप्रवाहो द्विविधः। विजातीयप्रत्ययान्तरितस्तदनन्तरितश्चेति। आद्यो ध्यानम्, द्वितीयः समाधिः।

सोऽपि द्विविधः। कर्त्राद्यनुसंधानपूर्वकस्तद्रहितश्चेति। आद्योऽङ्गसमाधिः। द्वितीयोऽङ्गी।

इति श्रुत्या प्रत्यगात्मनि मनसः संस्थापनं धारणा भवत्येवेत्याह— **प्रत्यगात्मनि वेति** ॥ किं तच्चित्तस्थापनमित्याकाङ्क्षायामाह— **तदिति** ॥ ध्यानं लक्षयति— **ध्यानं नामेति** ॥ **तत्र लक्ष्ये प्रत्ययानां** सजातीयवृत्तीनामे**कतानता** प्रवाहीकरणम्। इममेवार्थमाह— **लक्ष्येति** ॥ ध्यानसमाध्योर्भेदं वक्तुं प्रत्ययप्रवाहं विभजते— **स चेति** ॥ **अन्तरितो**ऽवच्छिन्नः, तद्विपरीतो**ऽनन्तरितः**। यदर्थो विभागस्तमाह— **आद्य इति** ॥ **ननु** सम्प्रज्ञातसमाधेरङ्गित्वात्कथमङ्गस्थापने तदुदाहरणम्? नचाङ्गसमाधिः ततो भिन्न इति वाच्यम्, अङ्गाङ्गिनोर्वैलक्षण्यादर्शनादित्याशङ्क्य तयोर्वैलक्षण्यं वक्तुं समाधिं विभजते— **सोऽपीति** ॥

विभागफलमाह— **आद्य इति** ॥ आद्यसमाधिं भगवत्पादा उदाजहार—

संप्रज्ञातसमाध्युदये लय-विक्षेप-कषाय-रसास्वादाश्चत्वारो विघ्नाः सन्ति । लयो निद्रा । पुनः पुनर्विषयाऽनुसंधानं विक्षेपः । चित्तस्य रागादिना स्तब्धीभावः कषायः । समाध्यारम्भसमये सविकल्पकानन्दाऽऽस्वादो रसास्वादः । यथाहुः—

"लये संबोधयेच्चित्तं विक्षिप्तं समयेत् पुनः ।
सकषायं विजानीयाद् शमप्राप्तं न चालयेत् ।
नाऽऽस्वादयेद्रसं तत्र निःसङ्गः प्रज्ञया भवेत् ॥"
इति ।

"दृशिस्वरूपं गगनोपमं परं
सकृद्विभातं त्वजमेकमक्षरम् ।
अलेपकं सर्वगतं यदद्वयं
तदेव चाहं सततं विमुक्त ओमि"ति ।

द्वितीयं वार्तिकाचार्य उदाजहार—

"ज्ञात्वा विवेकं चित्तं तत्साक्षिणि विलापयेत् ।
चिदात्मनि विलीनं चेत्तच्चित्तं न विचालयेत् ॥
पूर्णबोधात्मनाऽऽसीत पूर्णाचलसमुद्रवत् ।" इति ।

समाध्यभ्यासेन सम्भावितविघ्नान् परिहर्तुं तान् व्युत्पादयति— संप्रज्ञातेति ॥ के ते लयादय इत्याकाङ्क्षायां तानाह— लय इति ॥ तत्र गौडपादाचार्यकृतया तत्परिहारमाह—

अस्यार्थः—प्राणायामादिना लयाऽभिमुखं चित्त-मुत्थापयेत्। दोषदर्शनब्रह्माऽनुसंधानादिना विक्षिप्तं

यथाहुरिति ॥ सम्प्रति व्याचष्टे— अस्यार्थ इति ॥ आदि शब्देन निद्राशेषपरिहारस्वल्पभोजनादयो गृह्यन्ते। तदुक्तम्—"समाथ निद्रां सुजीर्णोऽल्पभोजी श्रमत्याज्याबाधे सुविविक्तप्रदेशे समहितनिष्टब्धः एष प्रयत्नोऽथवा प्राणनिरोधो निजाभ्यासमार्गा-दि"ति (?) ॥ दोषेति ॥ तथाचोक्तम्—

"दुःख सर्वमनुस्मृत्य कामभोगान्निवर्तते।
अज सर्वमनुस्मृत्य जात नैव तु पश्यती"ति ॥

आदिशब्देन सगुणध्यान—सत्सङ्गादयो गृह्यन्ते। तदुक्तम् भगवता—

"विषयान् ध्यायतश्चित्तं विषयेषु विषज्जते।
मामनुस्मरतश्चित्तं मय्येव प्रविलीयते ॥" इति।

वसिष्ठेनापि—

"सन्तः सदैव गन्तव्या यद्यप्युपदिशन्ति न।
या हि स्वैरकथास्तेषामुपदेशा भवन्ति ताः ॥" इति ॥

यथा भगवन्त प्रति मुचुकुन्देन—

"भवापवर्गो भ्रमतो यथा भवे-
ज्जनस्य तर्ह्यच्युत सत्समागमः।
सत्सङ्गमो यर्हि तदैव सद्गतौ
परावरेशे त्वयि जायते मतिः ॥" इति।

चित्तं समयेत् । ब्रह्मप्राप्तं चित्तं न चालयेत् । समाध्यारम्भसमये सविकल्पकाऽऽनन्दं नाऽऽस्वादयेत्, किंतूदासीनो ब्रह्मप्रज्ञया युक्तो भवेदिति ।

एवं निर्विघ्नेन संप्रज्ञातसमाध्यभ्यासेनाऽऽत्मप्रसादमात्रे मनसि ऋतम्भरा प्रज्ञोदेति ।

अतीताऽनागतविप्रकृष्टव्यवहितसूक्ष्मवस्तुविषयं योगिप्रत्यक्षम् ऋतम्भरा प्रज्ञा । तामपि निरुध्य समाधिमभ्यस्यतो गुणवैतृष्ण्यं परवैराग्यमुदेति । तत्तु निरूपितम् । ततोऽप्यभ्यासः कर्तव्यः ।

तथाऽऽचार्यैरपि—

"सङ्गः सत्सु विधीयतां भगवतो
भक्तिर्दृढा धीयताम् ॥" इति ।

सम्प्रज्ञातसमाधिरुदेति ॥
उक्तसाधनकलापैर्विघ्नेषु परिहृतेषु मनसि ऋत-
तेन संप्रज्ञातसमाध्यभ्यासेन प्रत्यगात्मन्येकाग्रतामापन्ने एवमिति ॥
म्भरा प्रज्ञोदेतीति योगशास्त्रप्रक्रियामनुसरन्नाह— ऋतम्भरप्रज्ञानिष्ठस्य
केयं ऋतम्भरा प्रज्ञेत्यत आह— अतीतेति ॥ संप्रज्ञातसमाधिमभ्यस्यत
निर्विकल्पकस्य समाधेरसम्भवात्तां निरुध्य भवतीत्याह— तामपीति ॥
आत्मसाक्षात्कारद्वारा परं वैराग्यं भवतीत्याह— तदिति ॥
तर्हि परं वैराग्यं निरूप्यतामित्याकाङ्क्षायामाह— ततोऽपीति ॥ पर-
ततः परं किं कर्तव्यमित्याकाङ्क्षायामाह—

उत्साहप्रयत्नोऽभ्यासः। यथाहुः—"तत्र स्थितौ यत्नोऽभ्यासः" इति। तस्यापि निरोधे सर्वधीनिरोधो

वैराग्यानन्तरमित्यर्थः। ततः परं कीदृशोऽभ्यासः कर्तव्य इत्याकाङ्क्षायामाह— **उत्साहेति** ॥ केनाप्युपायेन निखिलवृत्त्युपरोधरूपासम्प्रज्ञातसमाधौ निष्ठायामत्युत्साह एव प्रयत्नः, स एवाभ्यास इत्यर्थः। तत्र सम्मतिमाह— **यथाहुरिति** ॥

तत्र प्रशान्तवाहितायां स्थितौ ॥ **ननु—** तेनाभ्यासेन किं भवतीत्याकाङ्क्षाया तेन सर्ववृत्तिनिरोधे स्वस्यापि निरोधादसम्प्रज्ञातसमाधिर्भवतीत्याह— **तस्यापीति** ॥ **ननु—** उत्साहनिरोधेऽन्यसाधनमस्ति, न वा, **ऽनाद्यः;** अनवस्थाप्रसङ्गात्, **न द्वितीयः;** तन्निरोधायोगात्, न च— स्वयमेव स्वस्य निरोध इति— वाच्यम्, निरुद्धत्वात्, लोके तथाऽदर्शनाच्च। तस्मादिदमसङ्गतमिति— **चेन्न;** कतकरजोन्यायेन तस्य स्वपरनिवर्तकत्वात् स्यादिदं सङ्गतमिति भावः। **ननु** भवतु सर्वधीनिरोधः, प्रकृते किमायातमित्याशङ्क्य यः पूर्वमुपदिष्टः द्वितीयोऽसंप्रज्ञातः स एवायमित्याह— **अयमेवेति** ॥ सर्वधीनिरोध एवेत्यर्थः ॥ अत्र धीशब्देन प्रवृत्तिरित्युच्यते। तदुक्तम्—

"मनसो वृत्तिशून्यस्य ब्रह्माकारतया स्थितिः।
असम्प्रज्ञातनामाऽसौ समाधिरभिधीयते ॥
प्रशान्तवृत्तिकं चित्तं परमानन्ददीपकम्।
असम्प्रज्ञातनामाऽसौ समाधिर्योगिनां प्रियः॥" इत्यादि।

भवति । अयमेवाऽसंप्रज्ञातसमाधिः । न केवलं पर-
वैराग्यादेव समाधिलाभः, किन्त्वीश्वरप्रणिधानादपि ।
तथाचोक्तम्— "ईश्वरप्रणिधानाद्वा" "क्लेशकर्मविपा-
काऽऽशयैरपरामृष्टः पुरुषविशेष ईश्वरः" "तस्य वाचकः
प्रणवः" "तज्जपस्तदर्थभावन"मिति । एतदुक्तं भवति—
ईश्वरप्रणिधानाद्वा समाधिलाभः । क्लेशादिभिरसंबद्धः
सर्वज्ञः सर्वशक्तिरीश्वरः । ईश्वरस्याऽभिधायकः शब्दः

असंप्रज्ञातसमाधिं प्रति साधनान्तरमाह— **न केवलमिति** ॥
तत्र सम्मतिमाह— **तथाचेति** ॥ सूत्रतात्पर्यमाह— **एतदुक्त-
मिति** ॥

वेति विकल्पार्थे । उक्तक्रमाद्वा समाधिलाभः, ईश्वरप्रणि-
धानाद्वेति विकल्पार्थः । कोऽयमीश्वर इत्याकाङ्क्षायां क्लेशकर्मेत्यादि
सूत्रं प्रवृत्तम्, तदर्थमाह— **क्लेशेति** ॥ आदिशब्देन कर्मविपाका-
शया गृह्यन्ते । अस्यार्थः— अविद्यादयः पञ्च क्लेशाः, कर्म त्रिविध
शुक्लं कृष्णं मिश्रं चेति । पुण्यं **शुक्लं कृष्णं** पापमुभयं **मिश्रम्** ।
तदुक्तम्— "कर्माऽशुक्लाकृष्णं योगिनः त्रिविधमितरेषामि"ति ।
विपाकः कर्मफलम् । तदुक्तम्— "विपाको जात्यायुर्भोगाः"
इति ॥ **आशयस्तु** तज्जन्यवासना । ततश्च क्लेशकर्मविपाकाशयैः
सम्बद्धा जीवाः, तद्विपरीत ईश्वरः । पुरुषविशेष इति सूत्रां-
शस्यार्थमाह— **सर्वज्ञ इति** ॥ तस्येश्वरस्य प्रणिधानं कीदृशमित्या-

प्रणवः। प्रणवजपो माण्डूक्योपनिषत्पञ्चीकरणतद्वार्तिकोक्तप्रकारेण। प्रणवार्थानुसंधानं च ईश्वरप्रणिधानम्।

अथवा "तयोऽहं सोऽसौ योऽसौ सोऽह"मित्यत्र सशब्देन परमात्मोच्यते। अहंशब्देन प्रत्यगात्मोच्यते। अनयोः सामानाधिकरण्याद् ब्रह्मात्मैक्यमुच्यते। ततश्च सोऽहमित्यस्य परमात्माऽहमित्यर्थो यथा तथा प्रणवस्यापि। तथाहि—सोऽहमित्यत्र सकारहकार-

---

काङ्क्षायां तदुक्त "तस्य वाचकः प्रणव" इति सूत्रम्, तत् व्याकरोति–**ईश्वरस्येति**॥ तज्जपः तदर्थभावनमीश्वरप्रणिधानमिति सूत्रम्, तद्व्याख्यापयति– **प्रणवेति**॥ अनुसन्धानप्रकारः प्रथमपरिच्छेदे निरूपितः। प्रकारान्तरेण सदृष्टान्तं प्रणवार्थमाह– **अथवेति**॥ ननु दृष्टान्ते सोऽहमीश्वर इति पदयोः समानाधिकरण्येन तद्ब्रह्मात्मैक्यं प्रतिपाद्यतां•तत्कथं दार्ष्टान्तिक इत्याशङ्कयोपपादयति– **तथाहीति**॥ पृषोदरादि यथोपदिष्टमिति न्यायेन लोपः "एङः पदान्तादतीति" सन्धिः। तत्र मध्यतिमाह– **तदुक्तमिति**॥

अस्त्वेवं प्रणवशब्दनिष्पत्तिः, प्रकृते किमायातमित्यत आह– **ततश्चेति**॥ ततोऽपि किम्? तत्राह– **सर्वथापीति**॥ **परमेश्वरेति**। अनुग्रहोऽभिध्यातमनोगतेच्छा अस्याभिमत

योर्लोपे कृते परिशिष्टयोः 'ओ अम्' इत्यनयोः सन्धिं कृत्वोत्वा णे ओमिति शब्दो निष्पन्नः। तदुक्तम्—

"मकारं च हकारं च लोपयित्वा प्रयोजयेत्।
संधिं च पूर्वरूपोत्थं ततोऽसौ प्रणवो भवेत्॥". इति।

मस्त्विति। अथवा भूमिकाजयक्रमेण वासनाद्यभ्यासः कर्तव्यः।
तथाच श्रुतिः— "यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेत् ज्ञान आत्मनि।
ज्ञानमात्मनि महति नियच्छेच्छान्त आत्मनी"ति। अस्यार्थः—
लौकिकवैदिकाभिलपनव्यवहारहेतुभूता या वाक् तां मनसि
नियच्छेत्। ईकारः छान्दस। प्राज्ञः पण्डितो विवेकी वाग्व्यव-
हारं सर्वं समुत्सृज्य मनोमात्रेणावतिष्ठेत्। तथापि प्रणवजपो
न त्याज्यो यावत्समाध्युदयम्। तथाच स्मृतिः—
"मौनं योगासनं योग तितिक्षैकान्तशीलता।
निस्पृहत्वं समत्वं च सप्तैतान्येकदण्डिनाम्॥" इति।
योगः प्रणवजपस्तदर्थभावना, ततश्च गोमहिषादिवत्सम्यग्
निरोध प्रथमा भूमिः। तस्यां जितायां मनोनिरोधे द्वितीय-
भूमौ प्रयतेत। तत्सङ्कल्पात्मकमनो ज्ञानात्मनि नियच्छेत्।
ज्ञानात्मा विशेषाहङ्कारः अमुष्य पुत्रोऽहमित्यादिः. तन्मात्रेणाव-
तिष्ठेत्। सर्वसङ्कल्पविकल्पांस्त्यक्त्वा बालमूकादिवन्निर्मनस्कता
द्वितीया भूमिः॥ तस्यां जितायां विशेषाहङ्कारनिरोधे तृतीय-
भूमौ प्रयतेत। ब्राह्मणोऽहं मनुष्योऽहमिति ,विशेषाहङ्कारः, तं
महति नियच्छेत्। ब्राह्मणोऽहमित्याद्यभिमानं त्यक्त्वा सिता-

ततश्च ओमित्यस्य शब्दस्य परमात्माऽहमित्यर्थः। सर्वथापि प्रणवजपप्रणवार्थाऽनुसंधानरूपेण ईश्वरप्रणिधानेन परमेश्वराऽनुग्रहात् समाधिलाभो भवत्येव।

एवं समाध्यभ्यासेनाऽन्तःकरणस्याऽतिसूक्ष्मताऽऽपादनं मनोनाश इत्युच्यते।

अनेन सूक्ष्मेण मनसा त्वंपदलक्ष्ये साक्षात्कृते महावाक्येन स्वस्य ब्रह्मत्वसाक्षात्कारो भवति। न केवलं

मात्रावशेषो भवेत्। अहङ्कारसूक्ष्मावस्था **स्मिता**। इदमेव महत्तत्त्वम् सामान्याहङ्कार इति चोच्यते। अस्मिन्नुदासीनवद्विशेषाहङ्काराराहित्यं तृतीयभूमिः॥ तस्यां जितायामस्मितामात्रावशेषं महान्तमात्मानं शान्ते चिदेकरसात्मनि नियच्छेत्। **ननु**— महतोऽव्यक्ते निरोधः कुतो नोच्यते? इति— **चेन्न;** कार्यं कारणे निरुध्यमानं लीनमेव स्यात्, तथा च निद्रा स्यात्, न निरोधसमाधिः। अतो महान्तमात्मानं चिदात्मनि नियच्छेत्। चिदात्मनि सर्वात्मना चित्तं निरुद्धं चेदियमेवासम्प्रज्ञातसमाधिः चतुर्थभूमिः। एवं भूमिकात्रयेण समाध्यभ्यासः कर्तव्यः। ततः किमित्यत आह— **एवमिति**॥ उक्तप्रकाराणामन्यतमेन। **ननु** सूक्ष्मेण मनसा किं भवति? इत्याशङ्क्य तादृशमनसाऽन्तःकरणवृत्तिमात्रचिति त्वंपदलक्ष्ये प्रत्यगात्मनि साक्षात्कृतेऽनन्तरं तत्त्वमस्यादिवाक्येन स्वस्य ब्रह्मत्वसाक्षात्कारो भवतीत्याह— **अनेनेति**॥

ननु— "एतेन योगः प्रत्युक्तः" इति सूत्रकारैर्योगस्य दूषि-

समाधिनैव साक्षात्कारः, किं तु विवेकेनाऽपि भवति। अन्तःकरणतद्वृत्तीनामवभासको यश्चिदात्मा साक्षी तस्मिन् साक्षात्कृते वाक्याद् ब्रह्मसाक्षात्कारः संभवत्येव।

तत्त्वात्कथं साक्षात्कारसाधनत्वेन समाध्यभ्यासो नियम्यते? इति— **चेत्सत्यम्;** तत्र प्रधानकारणतावादनिराकरणताभिप्रायेण योग- शास्त्रं निराकृतं न तु चित्तनिरोधलक्षणयोगनिराकरणा- भिप्रायेण। अनिरुद्धचित्तस्य विषयप्रवणस्य ब्रह्मसाक्षात्कारा- सम्भवाच्च॥ किञ्च "समाध्यभावाच्च" "अपि संराधने प्रत्यक्षानु- मानाभ्यां" "निदिध्यासितव्यः" "विज्ञाय प्रज्ञां कुर्वीत" "ध्यानेनात्मनि पश्यति" "ध्यानयोगेन सपश्यन्नात्मन्यात्मान- मात्मने"त्यादि सूत्रश्रुतिस्मृतिशतैर्योगस्य साक्षात्कारसाधनत्वाव- गमात्समाध्यभ्यासोऽवश्यमपेक्षित एव महावाक्याद्ब्रह्मसाक्षात्का- रोत्पत्तौ॥ **नन्वेवं** जनकादीनां सिद्धगीताश्रवणमात्रेण ब्रह्म- साक्षात्कारो जात इति प्रतिपाद्यते वासिष्ठादौ समाध्यभावेऽपि, तत्कथं स्यादित्याशङ्क्य बहुव्याकुलचित्तानां तदपेक्षायामप्य- व्याकुलबुद्धीनां विवेकेन मनसा त्वंपदलक्ष्ये साक्षात्कृते महा- वाक्याद्ब्रह्मसाक्षात्कारो भवत्येव समाधिं विना॥ तदुक्तम्— "अव्याकुलधिया मोहमात्रेणाच्छादितात्मनाम्। सांख्यानां सा विचारोऽयं मुख्यो झटिति सिद्धिदः।" इति॥ समाधिविवेक- योरधिकारिभेदविषयतया सार्थकत्वेन तयोर्ब्रह्मसाक्षात्कारं प्रति विकल्पेन साधनत्वमित्यभिप्रेत्याह— **न केवलमिति॥** तत्र सम-

तदाह—

"द्वौ क्रमौ चित्तनाशस्य योगो ज्ञानं च राघव ।
योगो तद्वृत्तिनिरोधो ज्ञानं सम्यगवेक्षणम् ॥
असाध्यः कस्यचिद्योगः कस्यचिद् ज्ञाननिश्चयः ।
प्रकारौ द्वौ तदा देवो जगाद परमेश्वरः ॥" इति ।

ज्ञानं विवेकः ।

तृतीयाऽध्याये "इन्द्रियाणि पराण्याहु" रित्यारभ्य "कामरूपं दुरासद" मित्यन्तेन विवेकम्, षष्ठाऽध्याये योगं च "यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि

तिमाह— **तदाहेति** ॥ चित्तनाशस्य सूक्ष्मतापादनस्य **द्वौ क्रमावु**त्पादकौ कारणे । द्वैविध्यमेवाह— **योग इति** ॥ योगस्य लक्षणमाह— **योग इति** ॥ **तस्य** चित्तस्य वृत्तीनां निरोधः तद्वृत्तिनिरोधः । जडाजडौ विविच्य सम्यगसङ्कीर्णतयाऽवेक्षण दर्शनं विवेक इत्यर्थ. । अनयोर्विकल्पेन मनोनाशद्वारा साक्षात्कारहेतुत्वमित्याह— **असाध्य इति** ॥ सम्प्रति व्याचष्टे— **ज्ञानमिति** ॥ कोऽसौ देवः परमेश्वरः द्वौ प्रकारौ कुत्र जगादेत्याकाङ्क्षायां श्रीकृष्णो भगवान् गीतायां जगादेत्याह— **तृतीयेति** ॥

नन्वु योगाभ्याससाध्यमनोनाशस्य ब्रह्मसाक्षात्कारहेतुतया तेन ब्रह्मसाक्षात्कारे सति निखिलबन्धनिवृत्त्या पुनः सर्व-

गम्यते" इति वासुदेवः सर्वज्ञो भगवान् द्वौ प्रकारौ जगादेति श्लोकार्थः । तदेवं तत्त्वज्ञानवासनाक्षयमनोनाशाभ्यामाज्जीवन्मुक्तिः सिध्यतीति सिद्धम् ।

तस्या जीवन्मुक्तेः पञ्च प्रयोजनानि सन्ति । ज्ञानरक्षा, तपो विसंवादाऽभावो, दुःखनिवृत्तिः, सुखाऽऽविर्भावश्चेति ।

तत्रोत्पन्नब्रह्मसाक्षात्कारस्य पुनः पुनः संशयविपर्ययाऽनुत्पादो ज्ञानरक्षा ॥

तदनन्तरं तत्त्वज्ञानवासनाक्षय-
कर्तव्यताहान्या कृतकृत्यत्वात्तत
मनोनाशाभ्यासेनेत्याशङ्क्य यस्य योगाभ्यासपूर्वकं ब्रह्मसाक्षात्कारो
निर्वृत्तो वाक्येन तस्य तदनन्तरं तदपेक्षाभावेऽपि यस्य विवेकपूर्वकं
वाक्याद्ब्रह्मसाक्षात्कारो निर्वृत्तः तस्य तदनन्तरं प्रबलप्रारब्धभोगा
पादितकर्तृत्वभोक्तृत्वादिलक्षणबन्धप्रतिभासवारणस्य कर्तव्यशेषस्य
विद्यमानत्वेन तत्त्वज्ञानवासनाक्षयमनोनाशाभ्यासोऽपेक्षित इत्यभि
प्रायेणोपसंहरति— तदेवमिति ॥ यदुक्तं जीवन्मुक्तिसिद्धा प्रयो
जनाभावात्तदर्थं यत्नो नापेक्षितः इति, तत्राह— तस्या इति ॥
ज्ञानरक्षां निरूपयति— तत्रेति ॥ तेषु पञ्चसु मध्य इत्यर्थः ॥
'ननु प्रमाणोत्पन्नस्य ज्ञानस्य निश्चयत्वेन कथं तद्विषयसंशय-
विपर्यासप्रसक्तिः' ततश्च जीवन्मुक्त्यभ्यासेनाप्रसक्तयोस्तयोरनुत्पादः
कथं रक्षा स्यादिति' उच्यते; यद्यपि प्रमाणकुशलानां

तथाहि—

ज्ञानिनां शुक-राघव-निदाघादीनामिवाऽक्षतोपा-

मुख्याधिकारिणां संशयविपर्यासप्रसक्तिरेव नास्ति, तथाप्यन्येषां मा भवत्येव । किं तत्र निमित्तमिति चेत्, शृणु, अनन्तानि निमित्तानि सन्ति । तथाहि— साक्षात्कारानन्तरं यथापूर्वं मनुष्योऽहमित्यादिव्यवहारदर्शनात् रागद्वेषाद्युपलब्धेश्चोत्पन्नं ज्ञानमापातरूपमेवेति केनचिद्वावाटेनापादितस्य जीवन्मुक्त्यभ्यासाभावे संशयविपर्यासौ स्यातामिति केचित् । अन्येत्वाहुः ब्रह्मसाक्षात्कार एव न सम्भवति वाक्यात्परोक्षमेव ज्ञानं जायते, तथैवदर्शनात् । किञ्च यदीदानीं ब्रह्मसाक्षात्कारः स्यात्, तर्हि तेन सावरणाज्ञाननिवृत्त्या ईश्वरस्येव ज्ञानिनः सर्वज्ञत्वादिप्रसङ्गः, सनकादीनां शुकादीनां च तथा दर्शनात् ॥ न च— सर्वज्ञत्वादेस्तयोर्योगफलत्वात् ज्ञानफलत्वाभावान्नोक्तदोष इति— वाच्यम्, तर्हि योगादिहीनस्य ज्ञानं वा कथं स्यात्, प्रमाणवशात्स्यादिति चेत्, योगमन्तरेण प्रमाणस्यापि साक्षात्कारजनकत्वायोगात्, तस्मादुत्पन्नज्ञानमापातरूपमेवेति केनचित् यत् मूर्खेणापादितं प्रारब्धभोगवशेन विक्षिप्तचित्तस्य ज्ञानिनः संशयादि स्यादेवेति, तदभ्यासाभावे । एवमन्यानि संशयनिमित्तान्यूहेन द्रष्टव्यानि ॥ तस्माज्जीवन्मुक्त्यभ्यासेन परोक्षज्ञानिनोऽपि सम्भावितसंशयविपर्यासानुत्पादो ज्ञानरक्षेत्युच्यते । इममेवार्थं सदृष्टान्तमुपपादयति — **तथाहीति** ॥

स्तेषाम्ज्ञानिनोऽस्मदादेश्चित्तविश्रान्त्यभावात्पुनः कदाचित् संशयविपर्ययौ भवेताम्। अज्ञानवत् तावपि मोक्षप्रतिबन्धकौ। तदाह भगवान्—

ज्ञानिनामपरोक्षज्ञानिनाम्। शुकस्य प्रथमं स्वत एव विवेकेन ब्रह्मसाक्षात्कारो जातः, पश्चात्तद्विश्वासेन पृष्टः पिता व्यासः पुत्राय तदुपदिदेश, पुनश्च संदिहानं मत्वा जनकसमीपं गच्छेत्युवाच, स तं गतः तेनानुशिष्टः निर्विकल्पक समाधिं प्राप्य मुक्तिं गत इति वासिष्ठरामायणे कथा श्रूयते। निदाघोपाख्यान दर्शितम्। आदिशब्देन भगीरथादयो गृह्यन्ते॥ **ननु** भवेतां संशयविपर्यासौ, तावता को दोष इत्याशङ्क्याह— **अज्ञानवदिति**॥ तत्र भगवद्वचनमुदाहरति— **तदाहेति**॥ **ननु** जीवन्मुक्त्यभ्यासरहितस्य दृढापरोक्षज्ञानिनो मोक्षोऽस्ति न वा। आद्ये जीवन्मुक्त्यभ्यासवैयर्थ्यम्, द्वितीये तु शास्त्रविरोधः, **सत्यम्**; दृढज्ञानिनो मोक्षे सिद्धेऽपि दृष्टसुखार्थं जीवन्मुक्त्यभ्यासोपपत्तेः, जीवन्मुक्तानामपि भूमिकातारतम्येन दृष्टसुखतारतम्यमस्त्येव। तथाच श्रूयते— "आत्मक्रीड आत्मरतिः क्रियावानेव ब्रह्मविदां वरिष्ठ" इति॥ अस्यार्थः— आत्मनि **क्रीडा** रमणं अपरोक्षानुभवो यस्य स तथोक्तः। अयं ब्रह्मविदित्युच्यते। आत्मनि रतिः विजातीयानुभवतिरस्कारेण साक्षात्कारो यस्य स तथोक्तः आत्मानन्दोऽपरोक्षानुभविता। अयमेव ब्रह्मविदर इत्युच्यते। **क्रिया** ब्रह्मध्यानं तदस्यास्तीति क्रियावान् ब्रह्मात्मैक्यसमाधि-

"अज्ञश्चाऽश्रद्दधानश्च संशयात्मा विनश्यते"ति ।
ततश्च जीवन्मुक्त्यभ्यासेन संभवति संशयविपर्यय-
निवृत्तिर्ज्ञानरक्षा नाम प्रथमं प्रयोजनम् ।

मानिति यावत् । अथ ब्रह्मविद्वरीयानित्युच्यते ॥ अथ स्वतो नोत्तिष्ठति, यः स्वत' परतोऽपि नोत्तिष्ठति स ब्रह्मविदां वरिष्ठः ॥ एते चत्वार एव वसिष्ठेनोक्ताः । सप्तसु योगभूमिषु चतुर्थभूमि-मारभ्य प्रतिपादिताः सप्त भूमयो दर्शिताः । "ज्ञानभूमिः शुभेच्छा स्यात् प्रथमा समुदाहृता । विचारणा द्वितीया स्यात् तृतीया तनुमानसी ॥ सत्त्वापत्तिः चतुर्थी स्यात्ततोऽसंसक्तिनामका पदार्थभाविनी षष्ठी सप्तमी तुर्यगा स्मृते"ति ॥ भूमिकास्तिस्रः श्रवणमनननिदिध्यासनात्मिकाः । चतुर्थ्यां भूमौ साक्षात्कारोदयः । अत एव चतुर्थभूमिनिष्ठो ब्रह्मविदित्युच्यते । पञ्चम्यादिभूमि निष्ठानां विश्रान्तितारतम्येन दृष्टसुखतारतम्याद्वरवरीयोवरिष्ठा इत्युच्यन्ते ॥ एते त्रयोऽपि जीवन्मुक्ता एव "ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः । तेषामादित्यवत् ज्ञानं प्रकाशयति तत्परम् ॥" इत्यादि स्मृत्या ज्ञानेनाज्ञाननिवृत्तेः प्रतिपादनात् "ब्रह्म वेद ब्रह्मैव भवति" "ब्रह्मविदाप्नोति परमि"त्यादि श्रुत्या ब्रह्मज्ञानाद्ब्रह्मभावापत्तेः प्रतिपादनात् ब्रह्मविद्वरादीनां चतुर्णां मोक्ष' समान एव । दृष्टसुखं तारतम्येन भवति । तदुक्तम्— "तारतम्येन सर्वेषां चतुर्णां मुक्तमुत्तमम । तुल्या चतुर्णां मुक्तिः स्यात् दृष्टमोऽत्र विशिष्यते ।" इति ॥ ज्ञानरक्षानिरूपणमुप-

चित्तैकाग्र्यं तपः ।

"मनसश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तपः ।
स ज्यायान् सर्वधर्मेभ्यः स धर्मः पर उच्यते ॥"

इति स्मरणात् ।

ज्ञानिनो जीवन्मुक्तस्याखिलवृत्तीनामनुदयान्निरङ्कुशं चित्तैकाग्र्यं सम्पद्यते, तदेव तपः । तच्च लोक-

---

संहरति— ततश्चेति ॥ यतो जीवन्मुक्त्यभावमरक्षितस्य संशयादि प्रसक्त्या मोक्षप्रतिबन्धः स्यात्तस्मादित्यर्थः ॥ जीवन्मुक्तीति ॥ तत्त्वज्ञानाद्यभ्यासेनेत्यर्थः । द्वितीयं प्रयोजनं तपो निरूपयति— चित्तेति ॥ तत्र स्मृतिप्रमाणमाह— मनसश्चेति ॥

अग्निहोत्रादिसर्वधर्मेभ्यः स चित्तैकाग्र्यलक्षणो धर्मो ज्यायान् श्रेष्ठः परम उत्कृष्ट उच्यते ॥ योगविद्भिरित्यर्थः । तदाह— "तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽप्यधिको मतः । कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ।" इति ॥ भवत्वेव चित्तैकाग्र्यं तपः, प्रारब्धभोगेन विक्षिप्तचित्तस्य तु ज्ञानेन तत्कथं स्यादित्याशङ्क्याह— ज्ञानिन इति ॥ ज्ञानिनोऽपि यद्यपि प्रपञ्चमिथ्यात्वनिश्चयेन चिदात्मनः सत्यत्वावधारणात् चित्तैकाग्र्यमस्त्येव ; तथापि प्रारब्धभोगकाले आपाततो नामरूपादिप्रतिभाससम्भवेन न निरङ्कुशचित्तैकाग्र्यं तस्य, जीवन्मुक्तस्य तु योगाभ्यासेन मनसो नष्टत्वेन निखिलवृत्तीनामनुदयान्निरङ्कुशं चित्तैकाग्र्यं भवति । तदेव तप इत्यर्थः ॥ ननु जीवन्मुक्तानां तपः क्वोपयुज्यत इत्याश-

संग्रहाय भवति । तदुक्तं "लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसी"ति । संग्राह्यो लोकस्त्रिविधः । शिष्यो, भक्तस्तटस्थश्चेति । तत्र सन्मार्गवर्ती शिष्यो गुरूपदिष्टमार्गेण श्रवणादिना ब्रह्म साक्षात्कुर्वन्नुच्यते ; "आचार्यवान् पुरुषो वेद" "तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये" इति श्रुतेः ।

भक्तोऽपि ज्ञानिनः पूजाऽन्नपानादिनाऽभीष्टं प्राप्नोति

तथाच श्रुति :—

"यं यं लोकं मनसा संविभाति
विशुद्धसत्त्वः कामयते यांश्च कामान् ।
तं तं लोकं जयते तांश्च कामान्
तस्मादात्मज्ञं ह्यर्चयेद् भूतिकामः ॥" इति ।

स्मृतिरपि—

"यद्येको ब्रह्मविद् भुङ्क्ते जगत्तर्पयतेऽखिलम् ।
तस्माद् ब्रह्मविदे देयं यदस्ति वस्तु किंचन ॥"

इत्यादि ।

ह्याह— तद्येति ॥ तत्र भगवद्गीतासंमतिमाह— तदुक्तमिति । ब्रह्मवित्पूजादिनाऽभीष्टप्राप्तौ प्रमाणमाह— तथाचेति ॥ यादि-ग्रन्थेन— "यत्फलं लभते मर्त्यः कोटिब्राह्मणभोजनैः । तत्फल

तटस्थो द्विविधः। सन्मार्गवर्त्त्यसन्मार्गवर्ती चेति। तत्र सन्मार्गवर्ती मुक्तस्य सदाचारे प्रवृत्तिं दृष्ट्वा स्वयमपि तत्र प्रवर्तते। तदाह भगवान्—

"यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते॥" इति

असन्मार्गवर्ती तु जीवन्मुक्तस्य दृष्टिपातेन सर्वपापैः प्रमुच्यते।

तथाच स्मृतिः—

"यस्यानुभवपर्यन्ता बुद्धिस्तत्त्वे प्रवर्तते।
तद्दृष्टिगोचराः सर्वे मुच्यन्ते सर्वकिल्बिषैः॥" इति।

द्वेषिणस्तु ज्ञानिनो दुष्कृतं सम्भावितं गृह्णन्ति। तथाच श्रुतिः— "तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्या"मिति एवं जीवन्मुक्तस्य तपो लोकसंग्रहाय भवतीति तपो नाम द्वितीयं प्रयोजनम्।

जीवन्मुक्तस्य व्युत्थानदशायामसत्कृतनिन्दादिश्रव-

समवाप्नोति ज्ञानिनो यस्तु भोजयेत्॥ ज्ञानिभ्यो दीयते यत्र तत्कोटिगुणितं भवेत्।" इति गृह्यते। तत्त्वज्ञ नतो दृष्टिपातेनेतरेषां पापनिवृत्तौ प्रमाणमाह— **तथाचेति**॥ विसंवादाभाव तृतीयं प्रयोजनं निरूपयति— **जीवन्मुक्तस्येति**॥

णोऽपि पाखण्डकृतनिग्रहादिदर्शनादावपि चित्तवृत्त्यनुदयाद्विसंवादो न भवति। यथाऽऽहुः—

"ज्ञात्वा वयं तत्त्वनिष्ठां नन्दामोदामहे वयम्।
अनुशोचाम एवाऽन्यान्न भ्रान्तैर्विवदामहे॥" इतीति

विसंवादाऽभावो नाम तृतीयं प्रयोजनम्।

दुःखनिवृत्तिर्द्विविधा। ऐहिकदुःखनिवृत्तिरामुष्मिकदुःखनिवृत्तिश्चेति। तत्र ज्ञानेन भ्रान्तेर्निवृत्ततया योगाऽभ्यासेनाऽखिलवृत्तिनिरोधेन चित्तस्याऽऽत्मैकाकारतया ऐहिकसमस्तदुःखनिवृत्तिः प्रारब्धभोगे सत्यपि। तथाच श्रुतिः— "आत्मानं चेद्विजानीया" दित्यादिना ऐहिकदुःखनिवृत्तिं मुक्तस्य दर्शयति। ज्ञानेनाऽज्ञाननिवृत्त्या संचिताऽऽगामिकर्मणामश्लेषविनाशाभ्यामामुष्मिकदुःखानामपि निवृत्तिः। तथाच श्रुतिः—

दुःखनिवृत्तिरूपं चतुर्थं प्रयोजनं विभज्य निरूपयति—दुःखेति॥ यद्यपि ज्ञानिनोऽपि दुःखनिवृत्तिरस्ति, तथापि तस्य प्रारब्धभोगकाले बाधितानुवृत्त्या दुःखस्य सुखस्य चेत्याद्यनुभवसम्भवात् ज्ञानिनो दुःखनिवृत्तिः सुरक्षिता न भवति, जीवन्मुक्तस्य तु योगाभ्यासेनाखिलवृत्तीनां निरोधात्सा सुरक्षिता भवतीति• दुःखनिवृत्ति प्रयोजनं जीवन्मुक्तेर्भवत्येव॥ एतेन—प्रयोजनाभावात् जीवन्मुक्त्यभ्यासो निरर्थक इति— परास्तम्।

"एतं ह वाव न तपति किमहं साधु नाऽकरवं किमहं पापमकरवम्" इत्यादि, इति दुःखनिवृत्तिर्नाम चतुर्थं प्रयोजनम्।

मुक्तस्य ज्ञानयोगाभ्यामेऽज्ञानतत्कृताऽऽवरणविक्षेपनिवृत्त्या बाधकाऽभावात्परिपूर्णब्रह्मानन्दाऽनुभवसुखाऽविर्भावः। इममेवार्थं श्रुतिर्दर्शयति—

"समाधिनिर्धूतमलस्य चेतसो
निवेशितस्यात्मनि यत्सुखं भवेत्।
न शक्यते वर्णयितुं गिरा तदा
स्वयं तदन्तःकरणेन गृह्यते॥" इति॥ इति

सुखाविर्भावो नाम पंचमं प्रयोजनम्।

एवं स्वरूपप्रमाणसाधनफलनिरूपणैः द्विधा मुक्तिर्निरूपिता। तस्मात् ब्रह्मवित् जीवन्मुक्तो भोगेन

सुखाविर्भाव पञ्चम प्रयोजनं निरूपयति— **मुक्तस्येति**॥ जीवन्मुक्तस्येत्यर्थ। **ज्ञानं** ब्रह्मसाक्षात्कारः **योगो** निर्विकल्पकसमाधिपर्यन्तो ध्यानयोगः। नायमर्थोऽस्मदुत्प्रेक्षामात्रसिद्धः, किन्तु श्रुतिसिद्ध इत्याह— **इममिति**॥ इयता प्रबन्धेनोपपादितमर्थमुपसंहरति— **एवमिति**॥

प्रकरणप्रतिपाद्यमर्थं क्रोडीकृत्योपसंहारव्याजेन दर्शयति— **तस्मादिति**॥ ब्रह्मविदः प्रारब्धक्षये ब्रह्मानन्दात्मनाऽवस्थाने

प्रारब्धभोगे क्षीणे वर्तमानशरीरपातेऽखण्डैकरसब्रह्मानन्दात्मनाऽवतिष्ठते। "न तस्य प्राणा उत्क्रामन्ति अत्रैव समवनीयन्ते" "ब्रह्मैव सन् ब्रह्माप्येति" "ब्रह्म वेद ब्रह्मैव भवति" "विभेदजनके ज्ञाने नाशमात्य-

---

पुनरुत्थानाभावे च प्रमाणान्युपन्यस्यति— **न तस्येति** ॥ तस्य ज्ञानिनः प्राणा नोत्क्रामन्ति, यथाऽज्ञानिनः स्वकर्मफलोपभोगाय वर्तमानशरीरारम्भके प्रारब्धे क्षीणे प्राणा उत्क्रामन्ति परलोकजिगीषया, तथा भोगेन प्रारब्धस्य नष्टत्वात् ज्ञानेन सञ्चितकर्मणां नष्टत्वादागामिकर्मणामश्लेषात् ज्ञानोत्पत्तित एवाज्ञानस्य नष्टत्वात् जन्मबीजाभावात् प्राणा नोत्क्रामन्तीत्यर्थः। तर्हि कुत्र तिष्ठन्तीत्याशङ्क्याह— **अत्रेति** ॥ अत्र प्रत्यगात्मनि **प्राणाः समवनीयन्ते** लयं प्राप्नुवन्तीत्यर्थः। तथाच श्रुत्यन्तरम्— "एवमेवास्य परिद्रष्टुरिमाः षोडशकलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति" इति ॥ सूत्रकारोऽप्याह— "**तानि परे तथा ह्याह ही**"ति ॥ जीवदवस्थायामेव ब्रह्मसाक्षात्कारेणाज्ञाननिवृत्त्या ब्रह्मरूप एव सन् ब्रह्माप्येति प्रारब्धनिवृत्तौ ब्रह्मस्वरूपेणावतिष्ठत इत्यर्थः। तथाच श्रुत्यन्तरं "एवमेवैष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः" इति ॥ तथाच पारमर्षं सूत्रं— "संपद्याविर्भावः स्वेन शब्दादि"ति। तत्र विष्णुपुराणवचनमुदाहरति— **विभेदेति** ॥ विरुद्धो भेदो यस्मासौ विभेदः। अभेद इति

न्तिकं गते। आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति॥" "तद्भावभावमापन्नस्ततोऽसौ परमात्मना। भवत्यभेदो भेदश्च तस्याज्ञानकृतो भवेत्॥" इत्यादि श्रुतिस्मृतिशतेभ्यः। भगवान् सूत्रकारोऽप्याह—

यावत्। तथाच ज्ञानेनाभेदजनके ज्ञाने नष्टे सत्यात्मब्रह्मणोरसन्तं भेदं कः करिष्यतीति कश्चिन्मूर्खो योजयाञ्चकार, तदाकथं शेषापरिज्ञानदोषकृतमत एव तस्य मूर्खत्वमित्याह— तद्भावेति॥ ब्रह्मसाक्षात्कारवशात् ब्रह्मभावापत्तौ व्याससूत्रं संवादयति— भगवानिति॥ अस्मिन् ब्रह्मणि अस्य ब्रह्मविदः तद्योगं ब्रह्मभावापत्तिं शास्ति शास्त्रं "यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दतेऽथ सोऽभयं गतो भवती"त्यादि। अस्यार्थः— यदा यस्मिन् काले एष साधनचतुष्टयसम्पन्नोऽधिकारी श्रवणादिसाधनतत्परः अदृश्ये दृश्यविलक्षणे प्रत्यग्रूपे नित्यापरोक्षसाक्षिणि "यत्तदद्रेश्यमग्राह्यमस्थूलमनण्वह्रस्वमशब्दमस्पर्शमरूपमव्ययं" "स वा एष महानजरो आत्माऽजरोऽमरः" "सपर्यगाच्छुक्रमकायमव्रणं" "स एष नेति नेत्यात्मे"त्यादि श्रुत्यन्तरेभ्यः। नात्म्यमनात्म्यं तस्मिन् स्थूलशरीरविलक्षणे। "अशरीरं शरीरेष्वनवस्थेष्ववस्थितमि"ति श्रुत्यन्तरात्। न निरुक्तमनिरुक्तं तस्मिन्सूक्ष्मशरीरविलक्षणे। "इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिः बुद्धेरात्मा महान् परः। महतः परमव्यक्तमव्यक्तात्पुरुषः परः।" "प्राणा वै सत्य तेषामेष

प्रारब्धभोगे क्षीणे वर्तमानशरीरपातेऽखण्डैकरस-ब्रह्मानन्दात्मनाऽवतिष्ठते। "न तस्य प्राणा उत्क्रामन्ति अत्रैव समवनीयन्ते" "ब्रह्मैव सन् ब्रह्माप्येति" "ब्रह्म वेद ब्रह्मैव भवति" "विभेदजनके ज्ञाने नाशमात्य-

---

पुनरुत्थानाभावे च प्रमाणान्युपन्यस्यति— **न तस्येति** ॥ तस्य ज्ञानिनः प्राणा नोत्क्रामन्ति, यथाऽज्ञानिनः स्वकर्मफलोपभोगाय वर्तमानशरीरारम्भके प्रारब्धे क्षीणे प्राणा उत्क्रामन्ति परलोक जिगीषया, तथा भोगेन प्रारब्धस्य नष्टत्वात् ज्ञानेन सञ्चित-कर्मणां नष्टत्वादागामिकर्मणामश्लेषात् ज्ञानोत्पत्तित एवाज्ञानस्य नष्टत्वात् जन्मबीजाभावात् प्राणा नोत्क्रामन्तीत्यर्थः। तर्हि कुत्र तिष्ठन्तीत्याशङ्क्याह— **अत्रे**ति ॥ अत्र प्रत्यगात्मनि **प्राणाः समवनीयन्ते** लयं प्राप्नुवन्तीत्यर्थः। तथाच श्रुत्यन्त-रम्— "एवमेवास्य परिद्रष्टुरिमाः षोडशकलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति" इति ॥ सूत्रकारोऽप्याह— **"तानि परे तथा ह्याह**" इति ॥ जीवदवस्थायामेव ब्रह्मसाक्षात्कारेणा-ज्ञाननिवृत्त्या ब्रह्मरूप एव सन् ब्रह्मप्येति प्रारब्धनिवृत्तौ ब्रह्मस्वरूपे-णावतिष्ठत इत्यर्थः। तथाच श्रुत्यन्तरं "एवमेवैष संप्रसादोऽस्मा-च्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः" इति ॥ तथाच पारमर्षं सूत्रं— "सम्पद्या-विर्भावः स्वेन शब्दादि"ति। तत्र विष्णुपुराणवचनमुदाहरति— **विभेदेति** ॥ विरुद्धो भेदो यस्मासौ विभेदः। अभेद इति

श्रीमत्स्वयंप्रकाशाख्यगुरुणा करुणावशात् ॥
उपदिष्टं परात्मैक्यं तत्त्वमावेदितं मया ॥ १ ॥

ब्रह्मेशविष्ण्वादिसमस्तदेवाः
स्वस्वाधिकारेषु विभीतचित्ताः ॥
आज्ञावशाद्यस्य वसन्ति सर्वे
तं कृष्णमाद्यं शरणं प्रपद्ये ॥ २ ॥

मोचो भवति, सकामाना तु ब्रह्मलोक गतानामपि पुनरावृत्ति-
रस्त्येव, नेतरेषाम्— । "इम मानवमावर्तन्ते" इति श्रुतेरिति
सूचनतात्पर्यार्थ । इद सर्व परमरहस्य परमकृपालुना गुरुणाऽह-
मुपदिष्ट, तदेव मया प्रतिपादितमित्याह— **श्रीमदिति** ॥

तत्त्वं याथात्म्य परस्यात्मा च परमात्मानौ तयोरैक्यमथवा
परमात्मनो ब्रह्मण ऐक्य प्रतीच तच्च तत्त्व च परमात्मैक्यतत्त्व
उपदिष्ट च परमात्मैक्यतत्त्वञ्च इति तथा **आवेदितं** ज्ञापितम् ।
'सर्वधर्मान् परित्यज्य मामेक शरण व्रज । अह त्वा सर्वपापेभ्यो
मोचयिष्यामि मा शुच ॥" इति भगवद्वचनानुसारेण भगवन्त
श्रीकृष्ण शरण याति— **ब्रह्मेति** ॥ मायोपहितस्य परमात्मन
एवान्तर्यामिण कृष्णशब्दार्थत्वात् ब्रह्मादीनां तदाज्ञावशवर्तित्व-
मुपपद्यत इति भाव । तदुक्त भगवता— "अवजानन्ति मा
मूढा मानुषीं तनुमाश्रितम् । पर भावमजानन्तो मम भूत-
महेश्वरम् ॥" इति । "महात्मानस्तु मां पार्थ दैवीं प्रकृति

"अस्मिन्नस्य च तद्योगं शास्ती"ति । तस्मादहं ब्रह्मास्मीति तत्त्वमस्यादिवाक्यजन्यज्ञानात् ब्रह्मभावलक्षणो मोक्षो भवतीति सिद्धम् ; "न स पुनरावर्तते" "तद्बुद्धयस्तदात्मनस्तन्निष्ठाः तत्परायणाः । गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥" इत्यादि श्रुतिस्मृतिभ्यः ॥

सत्यमि"त्यादि श्रुत्यन्तरेभ्य' ॥ निलीयतेऽस्मिन् जगति निलयनं न निलयनमनिलयनं तस्मिन्नज्ञानविलक्षणे । "अक्षरात्परतः पर" इति श्रुत्यन्तरात् ॥ एष कार्यकारणविलक्षणे प्रत्यग्भूते सत्यज्ञानानन्दैकरसे ब्रह्मणि अखण्डैकरसब्रह्मात्मनाऽवतिष्ठत इति । परमप्रकृतमुपसंहरति— **तस्मादिति** ॥ तत्र श्रुतिस्मृती उदाहरति— **नेति** ॥ तथा व्यासोऽप्याह— "अनावृत्तिः शब्दादि"ति ॥ तस्मान्मुमुक्षूणामिहैवोत्पन्नसाक्षात्काराणां ब्रह्मलोकं गतानां निष्कामानामुपासकानां वा नाऽऽवृत्तिः, । **आवृत्तिः** शरीरान्तरस्वीकारः, न आवृत्तिरनावृत्तिः जन्ममरणनिवृत्तिर्मोक्ष इति यावत् । "यदा सर्वे प्रमुच्यन्ते कामा यस्य हृदि श्रिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते" । इति श्रुतेरस्मिन्मनुष्यशरीरे उत्पन्नब्रह्मसाक्षात्काराणामत्रैव मोक्षो भवति । "ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसञ्चरे । परस्यान्ते कृतात्मानः प्रविशन्ति॰पर पदम् ।" इत्यादिस्मृतेश्च ब्रह्मलोकगतानां निष्कामा उपासकानां तत्रैवोत्पन्नब्रह्मसाक्षात्काराणां ब्रह्मणा सह

यत्पादयुग्मकमलाश्रयणं विनाऽहम् ।
संसारसिन्धुपतितः सुखदुःखभाक् स्याम् ॥
यत्पादयुग्मकमलाश्रयणात्सुतीर्णः
तद्देशिकाङ्घ्रिकमलं प्रणतोऽस्मि नित्यम् ॥ ५ ॥
परमसुखपयोधौ मग्नचित्तो महेशम् ।
हरिविधिसुरमुख्यान् देशिकं देशिकानाम् ॥
जगदपि न विजाने पूर्णसत्यात्मसंवित् ।
सुखतनुरहमात्मा सर्वसंसारशून्यः ॥ ६ ॥

यत्पादेति ॥ गुरुचरणारविन्दध्यानलब्धब्रह्मानुभव प्रकटयति द्वाभ्या श्लोकाभ्याम्— परमेत्यादिना ॥ प्रपञ्चमिथ्यात्वनिश्चयेन ध्यानयोगेन परमानन्दाकारान्तःकरणसौक्ष्मात् साक्षात्कारेणाज्ञान तत्कार्ययोर्बाधितत्वात् ब्रह्माविष्णुमहेश्वरोपाधीना गुणिमायाबाधेन तदुपाधीना च बाधात् जगदपि किञ्चित न जानामीति ॥ तर्हि कथ तिष्ठति इत्याकाङ्क्षाया तदवस्थिति दर्शयति— पूर्णेति ॥ पूर्णः अपरिच्छिन्न ॥ सत्यात्मा कालत्रयाबाधित-स्वरूप । संवित चिद्रूप ॥ सुखतनुः सुखस्वरूप । सर्वसंसार-शून्य । ' असङ्गो ह्यय पुरुष ' इत्यादिश्रुत्या कर्तृत्वादिसर्वसंसार-वर्जित आत्माऽहमित्यनुभवामीत्यर्थ ॥ भिन्नतया स्वेष्टदेवतामपि

या भामती शर्वविरिञ्चिविष्णु-
देवादिभिर्नित्यमुपास्यमाना ॥
सदाऽक्षमालाविलसत्कराग्रां
वाग्वादिनीं तां प्रणमामि देवीम् ॥ ३ ॥
आकाशपुष्पमिव विश्वमहं निरीक्षे
मग्नोऽस्मि नित्यसुखबोधरसामृताब्धौ ॥
प्रत्यक्षमद्वयमनन्तसुखप्रबोधं
साक्षात्करोमि पदभावनया गुरूणाम् ॥ ४ ॥

माश्रिताः । भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ” । इति । श्रीकृष्णस्तु भगवान् स्वयमिति श्रीमद्भागवते । इदानीं स्वेष्टदेवतां वाग्वादिनीं नमस्करोति– **येति** ॥ **ननु–** “उदरमन्तरं कुरुतेऽथ तस्य भयं भवती”ति भेददर्शिनोऽनर्थश्रवणान्निर्गुणं ब्रह्मैवानुसन्धेयमित्याशङ्क्य गुरुप्रसादादहमेव निर्गुणं नित्यशुद्ध-बुद्धमुक्तस्वभावं ब्रह्म, न मत्तोऽन्यत् किञ्चिदस्ति दृश्यमान-नामरूपयोर्वन्ध्यापुत्रवदत्यन्ततुच्छत्वेन निश्चितत्वादित्यभिप्रेत्याह– **आकाशेति** ॥

श्रीगुरूणां पादारविन्दभावनया प्रत्यगात्मानमद्वितीयंसाक्षात्करोमि । “यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥” इति श्रुतेरिति भावः । इममेवार्थमन्वयव्यतिरेकाभ्यां स्फुटीकरोति–

वाणीति वेदवचनानि वदन्ति देवीम् ।
यामात्मयोनिरधिणा हृदये स्मरन्ति ॥
यच्चिन्तया सकलशास्त्रकृतो भवन्ति ।
तामानतोऽस्मि सततं प्रणतेष्टदात्रीम् ॥ ४ ॥
दुरन्तसंसारमहाम्बुराशेः समुद्धृतो येन कृपालुनाऽहम् ।
महत्तमं तं पुरुषोत्तम श्रीस्वप्रकाश गुरुमानतोऽस्मि ॥ ५ ॥
यन्नामरूपाणि निरस्य वेदो यद्बोधयेन्नित्यनिरस्तमोहम् ।
प्रसन्नरूप परिपूर्णरूपमहं तदेवास्मि विमुक्तमव्ययम् ॥ ६ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य-श्रीमत्स्वयं-प्रकाशानन्दसरस्वती पूज्यपादशिष्य-भगवन्महादेवा-नन्दसरस्वतीमुनिविरचिते तत्त्वानुसंधानव्याख्याने-ऽद्वैतचिन्ताकौस्तुभे चतुर्थः परिच्छेदः समाप्तः ॥

ओं तत्सत् । शुभमस्तु ॥

यदुकुलवररत्नं कृष्णमन्याँश्च देवान् ।
मनुजपतिमृगादीन् ब्राह्मणादींश्च जाने ॥
परमसुखसमुद्रे मज्जनात्तन्मयोऽहम् ॥
गलितनिखिलभेदः सत्यबोधैकरूपः ॥ ७ ॥

इति श्रीपरमहंस-परिव्राजकचार्य-श्रीमत्स्वयं प्रकाशानन्दसरस्वती-पूज्यपादशिष्य-भगवन्महादेवसरस्वतीमुनिविरचिते तत्त्वानुसन्धाने चतुर्थ परिच्छेदः । समाप्तश्चायं ग्रन्थः ।
ओं तत्सत् ॥ शुभं भवतु ॥

न पश्यामीत्याह— **यदुकुलेति** ॥ तत्र हेतुमाह— **परमसुखेति** ॥

उपासकानां कार्यार्थं तमसो विनिवर्तकम् ॥
श्रीकृष्णस्य गलेऽद्वैतचिन्ताकौस्तुभमर्पितम् ॥ १ ॥
अध्यारोपापवादोन्मृदितजडतनुर्दैतहेतुः परात्मा ।
आम्नायान्तैकगम्यः श्रुतिमतिमहितध्यानयोगेन बन्द्ये ॥
चीर्णे माचात्क्रतोऽसौ मुनिवरनिकरैः शुद्धमत्तैरुदारैः ॥
सुक्षैर्गम्यो मुकुन्दो यदुकुलतिलकः श्रेयसे भूयसेऽस्तु ॥ २ ॥
जिज्ञासितव्यो विमलान्तरङ्गैरानन्दविज्ञानमदेकरूपः ॥
वेदान्तवेद्यो यतिवर्यगम्यो गोपीजनेशः प्रदिशत्वभीष्टम् ॥ ३ ॥